श्री स्वामिनारायणो विजयतेतराम् ।

# श्रीमद् सत्सङ्गिजीवन शास्त्रम् ।

श्रीशतानन्दमुनि विरचितम्-गुर्जरानुवाद सहितम् ।

**શ્રી શતાનંદમુનિ વિરચિતમ્ ।**

# શ્રીમદ્ સત્સંગિજીવન શાસ્ત્રમ્

પ.પૂ. સનાતન ધ.ધુ. શ્રી લક્ષ્મીનારાયણ દેવ પીઠાધિપતિ આચાર્યશ્રી ૧૦૦૮ શ્રી અજેન્દ્રપ્રસાદજી શ્રી નરેન્દ્રપ્રસાદજી મહારાજશ્રી (વડતાલ)ની આજ્ઞાથી સાધુ આનન્દસ્વરૂપદાસ (વેદાન્તાચાર્ય) સંશોધિત

**चतुर्थ प्रकरणम् ।**

**ગુજરાતી અનુવાદ સહિત**

## ચતુર્થ-પ્રકરણ

सुव्रत उवाच -

स्वगृहे निवसन्तं तं निर्दम्भोऽभयनन्दनः ।
सिषेवे परया भक्त्या सकुटुम्बोऽन्वहं नृप! ॥१॥

### અધ્યાય : ૧

**પુરાણાદિ-શ્રવણના ઉત્સવમાં સામાન્ય પણે પુરાણાદિ શ્રવણની વિધિ કહેલી છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પોતાના પરિવાર સહિત અભયરાજાના પુત્ર ઉત્તમરાજા કપટે રહિત પોતાના ગૃહમાં નિવાસ કરતા શ્રીહરિની સર્વોત્તમ ભક્તિપૂર્વક દરરોજ સેવા કરતા હતા. (૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तत्प्रीतये स कृतवानन्नकूटमहोत्सवम् । प्रबोधन्युत्सवं चापि पूर्ववद्विस्मयावहम् ॥२॥ भक्तं सपरिवारं तं सुखयन्भगवानपि। भक्तान्देशान्तरेभ्यः स्वानाह्वाय्याचीकरच्च तौ ॥३॥ प्रबोधन्युत्सवेऽतीते स्वस्वदेशं गतेषु च । देशान्तरीयलोकेषु भगवान् लोकभावनः ॥४॥ वेदोक्तां स्थापयन्नेव मर्यादां स्वाश्रितेषु सः । पुराणश्रवणारम्भमचिकीर्षच्च सर्ववित् ॥५॥ उषस्युत्थाय षष्ठ्यां च प्रातःकृत्यं विधाय सः । आकारयत्पुराणज्ञं प्रयागजितमीश्वरः ॥६॥ स्वमन्दिरबहिर्वेद्यामासने स उपाविशत् । तत्र पौराणिकश्चान्ये पार्षदाद्या उपाययुः ॥७॥ यथोचितं सभायां ते निषेदुश्च व्यवस्थया । ततः स भगवानूचे मयराममद्विजं प्रति ॥८॥ श्रीनारायणमुनिरुवाच – **शृणु त्वं ब्राह्मणश्रेष्ठ ! ज्योतिःशास्त्रविशारद! । मासोऽयं मार्गशीर्षोऽस्ति मासानामुत्तमः किल ॥९॥ विभूतिर्वासुदेवस्य कथितोऽसौ महर्षिभिः । पुराणश्रवणं कर्तुमत्रेच्छास्ति मम द्विज! ॥१०॥ तदारम्भमुहूर्तं त्वं यथाशास्त्रं वदाधुना । निरन्तराया सिद्धिः स्याद्यत्रारम्भे कृते सति ॥११॥** पञ्चाङ्गपत्रं निष्कास्य स तदा स्थूलवेष्टनात् । दृष्ट्वा प्राह हरिं स्वामिन् ! मुहूर्तः श्वोऽस्ति तादृशः ॥१२॥ योगोऽस्ति मित्रसंज्ञो यद्धनिष्ठाबुधवारयोः । पुराणश्रवणारम्भस्तत्र कार्यस्त्वया प्रभो! ॥१३॥ इत्युक्ते तेन भगवान् प्राह पौराणिकं वचः । प्रारम्भः श्वोऽस्ति कर्तव्यः श्रीमद्भागवतस्य मे ॥१४॥ उषस्युत्थाय कर्तव्य दिनाद्यप्रहरावधि । त्वयाऽस्माभिश्च विप्रर्षे! नैत्यकं कर्म चान्वहम् ॥१५॥ ततः कथायाः प्रारम्भं कृत्वा मध्याह्न एव सा । समापनीया च ततः कार्यो माध्याह्निको विधिः ॥१६॥ पुनस्तृतीययामान्ते सायंसन्ध्यावधि द्विज! । प्रारभ्य च समाप्या सा भवतो रुचिरस्ति चेत् ॥१७॥ पौराणिक उवाच – **एवमेव करिष्यामि कृपानाथाहमन्वहम् । वाचयिष्ये यथाकालं कथामत्र दृढासनः ॥१८॥ विश्रान्तिर्या कृता मध्ये त्वया स्वामिंस्तया मम । जातं मनः प्रसन्नं वै**

---

ઉત્તમરાજા શ્રીહરિકૃષ્ણ ભગવાનની પ્રસન્નતા માટે આશ્ચર્યકારી અન્નકૂટનો મહોત્સવ અને પ્રબોધિનીનો ઉત્સવ પણ પૂર્વની માફક **સંવત્ ૧૮૭૯ના વર્ષ**માં પણ કરતા હતા. (૨) ભગવાન શ્રીહરિ પણ કુટુંબે સહિત પોતાના એકાંતિક સેવક ઉત્તમરાજાને સુખ આપતા સતા દેશાન્તરથી પોતાના ભક્તોને બોલાવડાવીને બન્ને ઉત્સવો ઉત્તમરાજા પાસે કરાવતા હતા. (૩) પ્રબોધિનીનો ઉત્સવ થયા પછી બીજા દેશોથી આવેલા ભક્તજનો પોતપોતાના દેશમાં ગયા ત્યારે પોતાનાં જનોનું પાલન કરનારા ભગવાન શ્રીહરિ વેદમર્યાદાને પોતાનાં આશ્રિતજનોમાં સ્થાપન કરવા માટે સ્વયં સર્વજ્ઞ હોવા છતાં પણ પુરાણ શ્રવણનો આરંભ કરાવતા હતા. (૪-૫)

શ્રીહરિએ સંવત્ ૧૮૭૯ના માગશર સુદી છઠ્ઠને દિવસે પ્રાતઃકાળમાં ઊઠીને પ્રાતઃસ્નાનાદિક કર્મ કરીને પુરાણના વક્તા પ્રયાગજીને પોતાના પાર્ષદ દ્વારા બોલાવ્યા. (૬) શ્રીહરિ પોતાના મંદિરની બહાર ઓટા ઉપર સિંહાસનમાં બેઠા. તે સ્થળમાં પુરાણિક પ્રયાગજી અને પાર્ષદો આવ્યા. (૭)

પુરાણી વગેરે પોતપોતાની મર્યાદાથી સભામાં યથાયોગ્ય બેઠા. પછી **ભગવાન શ્રીહરિએ મયારામ વિપ્રને કહ્યું:** (૮) હે બ્રાહ્મણશ્રેષ્ઠ ! હે જ્યોતિઃશાસ્ત્ર વિશારદ ! તમો સાંભળો. સર્વ માસોમાં શ્રેષ્ઠ આ માગશર માસ શ્રી વાસુદેવની વિભૂતિ કહેલો છે. આ માસમાં મારે પુરાણ શ્રવણ કરવાની ઈચ્છા છે. (૯-૧૦) માટે તમે હમણાં જ પુરાણશ્રવણના આરંભનું **મુહૂર્ત** કહો, જે મુહૂર્તમાં આરંભ કરવાથી નિર્વિઘ્નપણે કાર્યની સિદ્ધિ થાય. (૧૧) હે રાજન્ ! તે સમયે મયારામ વિપ્રે પોતાની પાઘડીમાંથી પંચાંગ કાઢી તેમાં જોઈને શ્રીહરિને કહ્યું : હે સ્વામિન્ ! તેવું મુહૂર્ત તો આવતી કાલે છે. (૧૨) હે પ્રભો ! જે મુહૂર્તમાં ધનિષ્ઠા અને બુધવારનો યોગ હોવાથી **મિત્ર** નામનો યોગ છે. તે મુહૂર્તમાં તમોએ પુરાણ શ્રવણનો પ્રારંભ કરવો. (૧૩) હે રાજન્ ! મયારામ બ્રાહ્મણે આ પ્રમાણે કહ્યું ત્યારે શ્રીહરિએ સભામાં પોતાની આગળ બેઠેલા પ્રયાગજી પુરાણીને વચન કહ્યું, હે પુરાણી ! આવતી કાલે મારે શ્રીમદ્ ભાગવતનો આરંભ કરવો છે. (૧૪) હે વિપ્રર્ષે ! તમો અને અમોએ પ્રાતઃકાળમાં ઊઠીને દિવસના પહેલા પહોરમાં સ્નાન સંધ્યાદિક નિત્યકર્મ દરરોજ કરવું. (૧૫) પછી કથાનો પ્રારંભ કરીને કથા બપોરે સમાપ્ત કરવી, પછી મધ્યાહ્નકાળની વિધિ કરવી. (૧૬) હે વિપ્ર, ફરીથી ત્રીજા પહોરના અંતમાં આરંભ કરી સાયંકાળ સુધી કથા વાંચવી, પછી સમાપ્ત કરવી, તમારે આમાં રૂચિ હોય તો કહો. (૧૭)

**પ્રયાગજી પુરાણી કહે છે** : હે કૃપાનાથ, હું દરરોજ તમારા કહ્યા પ્રમાણે કરીશ. સુસ્થિર આસનથી તમારી સમીપમાં સમય સમય પ્રમાણે કથા વાંચીશ. (૧૮) હે સ્વામિન્ ! તમોએ વચમાં જે વિશ્રાંતિ કરી તેથી મારું મન પ્રસન્ન થયું. અન્યથા-

देहक्लेशोऽन्यथा भवेत् ॥१९॥ आगम्यतां श्व इत्युक्त्वा ततस्तं भगवान्निजान् । भक्तान् पुराणश्रोतृंश्च जगादानन्दयन् वचः ॥२०॥ श्रीनारायणमुनिरुवाच-भक्ताः! शृणुत भद्रं वः सर्वेषां हितमुच्यते । पुराणश्रवणं कार्यं सर्वैरेव मदाश्रितैः ॥२१॥ चतुर्णामपि वर्णानां तथैवाश्रमिणामपि । अधिकारो भवत्येव पुराणश्रवणे सदा ॥२२॥ एष साधारणः पन्थाः साक्षात्सर्वार्थसिद्धिदः । महामुनिजनैः प्रोक्तो देवैरपि सुपूजितः ॥२३॥ स्वरूपबोधो न हरेः कथायाः श्रवणं विना । भवेन्नृणां विना तं च कथं स्यात्संसृतिक्षयः ॥२४॥ तस्माद्व्यासकृतानां हि पुराणानां निरन्तरम् । श्रवणं भारतस्यापि कार्यं रामायणस्य च ॥२५॥ अज्ञानतिभिरान्धानां दीपोऽयं ज्ञानसिद्धिदः । पुराणश्रवणं विष्णोरौषधं भवरोगिणाम् ॥२६॥ सर्वथैवात्मनः श्रेयो येऽभिवाञ्छन्ति देहिनः । ते शृण्वन्तु सदा भक्त्या कथां पौराणिकीं शुभाम् ॥२७॥ अशक्तो यः सदा श्रोतुं कथां भगवतः स तु । मुहूर्तं वापि शृणुयान्नियतात्मा दिनेदिने ॥२८॥ यस्तु प्रतिदिनं श्रोतुमशक्तः सोऽपि मानवः । पुण्यमासेषु शृणुयात्पुण्यासु च तिथिष्वपि ॥२९॥ मुहूर्तं वा तदर्धं वा क्षणं वा पावनीं कथाम्। ये शृण्वन्ति नरा भक्त्या न तेषामस्ति दुर्गतिः ॥३०॥

यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् । भक्त्या पुराणश्रवणात्तत्फलं विन्दते नरः ॥३१॥ कलौ युगे विशेषेण पुराणश्रवणादृते। नास्ति धर्मः परः पुंसां नास्ति मोक्षपथः परः ॥३२॥ कलौ हीनायुषो मर्त्या दुर्बलाः श्रमपीडिताः । दुर्मेधसो दुःखभाजो धर्माचारविवर्जिताः ॥३३॥ इति सञ्चिन्त्य कृपया भगवान्बादरायणः । हिताय तेषां विदधे पुराणाख्यं रसायनम् ॥३४॥

---

વિશ્રાંતિ ન કરી હોય તો શરીરને ક્લેશ થાય, જ. (એ વાત નિશ્ચિત છે) (૧૯) પછી ભગવાન શ્રીહરિએ પુરાણીને આવતી કાલે જ તમો આવો. આ પ્રમાણે કહીને પુરાણના શ્રોતા પોતાના ભક્તોને આનંદ આપતાં વચન કહ્યું : (૨૦)

**શ્રીહરિએ કહેલો પુરાણ શ્રવણનો મહિમા :- શ્રી નારાયણમુનિ કહે છે,** હે ભક્તો ! તમો મારું વચન સાંભળો. તમારું કલ્યાણ થાઓ. સર્વેનું હિતકારી વચન કહું છું. સર્વે મારા આશ્રિતોએ પુરાણનું શ્રવણ કરવું જ. (૨૧) બ્રાહ્મણાદિ ચાર વર્ણોને તેમજ બ્રહ્મચર્યાદિ ચાર આશ્રમીઓને પણ પુરાણ શ્રવણમાં સદા અધિકાર છે જ. (૨૨) આ પુરાણશ્રવણ સ્વરૂપ સર્વેને સામાન્ય માર્ગ મહામુનિજનોએ પ્રત્યક્ષ સમગ્ર પુરુષાર્થને આપનારો કહ્યો છે. દેવોએ પણ માન્ય કરેલો છે. (૨૩) કથાના શ્રવણ વિના મનુષ્યોને શ્રીહરિના સ્વરૂપનું માહાત્મ્યે સહિત યથાર્થ જ્ઞાન થાય નહિ.શ્રીહરિના સ્વરૂપના જ્ઞાન વિના જન્મમરણરૂપ સંસારનો નાશ થતો નથી. (૨૪) માટે વ્યાસે કરેલાં પુરાણો, શ્રીમદ્‌ભાગવતાદિ તથા મહાભારત, અને રામાયણનું પણ શ્રવણ નિરંતર કરવું. (૨૫) પુરાણ-શ્રવણ, અજ્ઞાનરૂપી અંધકાર યુક્ત જનોને શ્રીકૃષ્ણ પરમાત્માના સ્વરૂપના જ્ઞાનની સિદ્ધિ આપનારો દીપકરૂપ છે અને ભવરોગવાળાં જનોને પુરાણશ્રવણ ઔષધ છે. (૨૬)

જે શરીરધારીઓ સર્વ પ્રકારે આત્માનું શ્રેય ઈચ્છે છે, તે જનો શુભ પુરાણની કથા ભક્તિથી સદા સાંભળો. (૨૭) જે માણસ ભગવાનની કથા સદા સાંભળવામાં અશક્ત હોય તે માણસ તો એકાગ્ર મનથી દરોરોજ બે ઘડી કે ઘડી વાર પણ સાંભળે. (૨૮) જે માણસને દરરોજ ભગવાનની કથા સાંભળવાનો સમય ન મળતો હોય તેવા માણસે પણ પુણ્યવંતા શ્રાવણાદિ મહિનાઓમાં, એકાદશી જેવી તિથિઓમાં પણ ઘડી બે ઘડી શ્રવણ કરવું. (૨૯) જે માણસો બે ઘડી અથવા એક ઘડી અથવા ક્ષણ વાર પણ ભક્તિથી પવિત્ર ભગવાનની કથા સાંભળે છે, તે માણસોની દુર્ગતિ થતી નથી. (૩૦)

સર્વ યજ્ઞોમાં અને સર્વ દાનોમાં જે ફળ કહેલું છે, તે ફળને મનુષ્ય ભક્તિથી કરેલા પુરાણ-શ્રવણથી પામે છે. (૩૧) આ મહાઘોર કળિયુગમાં વિશેષપણે પુરાણ શ્રવણ વિના પુરુષોને સર્વોત્તમ ધર્મ નથી. બીજો કોઈ મોક્ષમાર્ગ નથી. (૩૨) કલિયુગમાં મનુષ્યો અલ્પાયુષ, શક્તિ રહિત, નાના પ્રકારના પરિશ્રમથી પીડાવાળા, કુબુદ્ધિવાળા, અધ્યાત્માદિ ત્રિવિધ દુઃખ ભજનારા પોતાના વર્ણાશ્રમને યોગ્ય સદાચારથી રહિત આચરણવાળા હોય છે. (૩૩) આ પ્રકારનો વિચાર કરીને ભગવાન કૃષ્ણ દ્વૈપાયને કલિયુગના મનુષ્યોના હિત માટે પુરાણસંજ્ઞાવાળું રસાયણરૂપી ઔષધ કર્યું. (૩૪) મહાપ્રયત્નથી અમૃતપાન કરતાં એક જ અમર થાય. પુરાણરૂપી અમૃતનું પાન કરનાર તો કુળને પણ જરા અવસ્થાએ રહિત-અમર કરે. (૩૫) માણસ પુરાણના શ્રવણ વિના પશુ સમાન માનેલો છે માટે પોતાના હિતને ઈચ્છતા પુરુષોએ પુરાણનું શ્રવણ વિધિપૂર્વક

पिबन्नेवामृतं यन्नादेकः स्यादजरामरः । पुराणामृतपः कुर्यात्कुलमप्यजरामरम् ॥३५॥ विना पुराणश्रवणं नरः पशुसमो मतः। तस्मादवश्यं तत्कार्यं विधिना स्वहितार्थिभिः ॥३६॥ सुव्रत उवाच – इत्युक्तवन्तं तं नत्वा हरिमुत्तमभूपतिः । पप्रच्छ प्राञ्जलिर्भक्त्या पुराणश्रवणोत्सुकः ॥३७॥ राजोवाच – पुराणश्रवणस्येश! श्रोतुमिच्छाम्यहं विधिम् । कस्मिन्काले च तत्कार्यं देशे कीदृग्विधे तथा ॥३८॥ वक्ता पुराणस्य विभो ! कीदृशः परिकीर्तितः । श्रोतारः कीदृशाश्च स्युः किं देयं तैः समापने ॥३९॥ एतन्मे ब्रूहि भगवन्निति पृष्टो नृपेण सः । सर्वेषां शृण्वतामूचे तच्छुश्रूषां विदन् विभुः ॥४०॥ श्रीनारायणमुनिरुवाच– सर्वपापविनिर्मुक्तिकरणे यस्य मानसम् । भवेत्तेनादरान्नित्यं पुराणं श्रव्यमुत्तमम् ॥४१॥ आनुकूल्यं न चेन्नित्यं तदावश्यं पुमान्नृप! । पुराणश्रवणं कुर्याच्चातुर्मास्ये च पर्वसु ॥४२॥ विधानं तस्य यद्राजन्यथोक्तफलदायकम्। तत्स्कान्दादिपुराणोक्तं कथयामि समासतः ॥४३॥ कृताह्निकः समाहूय वक्तारं शास्त्रकोविदम् । सम्भाव्यासनदानेन नमस्कुर्यात्तमादरात् ॥४४॥ उच्चासने पुस्तकं च संस्थाप्यैव ततोऽवरे । व्यासासनेऽतिमृदुले वक्तारमुपवेशयेत् ॥४५॥ सम्पूज्य पुस्तकं त्वादौ ततो वक्तारमर्चयेत् । चन्दनेनाक्षतैः पौष्पैर्हाराद्यैर्धूपदीपकैः ॥४६॥ नैवेद्यफलताम्बूलदक्षिणाभिश्च भक्तितः । सम्पूज्यारार्त्रिकं कृत्वा नमस्कुर्वीत सादरम् ॥४७॥ नमस्ते भगवन्व्यास ! वेदशास्त्रार्थकोविद ! । ब्रह्मविष्णुमहेशानां मूर्ते ! सत्यवतीसुत!॥४८॥ मन्त्रेणानेन वक्तारं नमस्कृत्य ततो नृप! । श्रोतॄन्विप्रान्सतश्चार्चेन्मुख्यः श्रोता यथोचितम् ॥४९॥ आसनादवरे वक्तुरुपविश्यासने ततः । पुराणं शृणुयुः सर्वे नत्वा तं स्वस्थमानसाः ॥५०॥ उपवेश्यं ब्राह्मणानां पृष्ठतस्तत्र बाहुजैः । तेषां च पृष्ठतो वैश्यैस्तेषां शूद्रैश्च संसदि ॥५१॥ ये च सङ्करजातीयाः शूद्राणां

---

અવશ્ય કરવું. (૩૬)

**સુવ્રતમુનિ કહે છે,** હે રાજન્ ! આ પ્રમાણે કહેતા શ્રીહરિને નમસ્કાર કરી પુરાણ શ્રવણમાં ઉત્સાહવાળા ઉત્તમરાજાએ બન્ને હાથ જોડીને આદરપૂર્વક પૂછ્યું : (૩૭) હે ઈશ ! હું પુરાણશ્રવણનો વિધિ સાંભળવા માટે ઇચ્છું છું. તે પુરાણશ્રવણ કયા સમયમાં કરવું તથા કયા દેશમાં કરવું ? (૩૮) હે વિભો ! હે હરે ! પુરાણનો વક્તા કેવો કહેલો છે. પુરાણના શ્રોતાઓ કેવા હોય અને પુરાણના શ્રોતાઓએ પુરાણની સમાપ્તિમાં પુરાણ વાંચનારને શું આપવું ? (૩૯) હે ભગવન્ ! આ મારા પ્રશ્નનો ઉત્તર મને કહો. હે રાજન્ ! આવી રીતે ઉત્તમ ભૂપતિએ પુછાયેલા સમર્થ શ્રીહરિએ ઉત્તમરાજાને પુરાણ સાંભળવા ઇચ્છતા જાણીને સભામાં બેઠેલાં જનોને સાંભળતા ઉત્તમરાજાને કહ્યું. (૪૦)

**સ્કન્દાદિ પુરાણોમાં કહેલો શ્રવણ વિધિ :- શ્રીનારાયણમુનિ કહે છે,** હે ઉત્તમ ! જેનું મન સર્વે પાપોના વિનાશ કરવામાં ઉત્સુક હોય, તે માણસે હંમેશા આદરથી પુરાણ સાંભળવું. (૪૧) હે રાજન્ ! જો પ્રતિદિન પુરાણ સાંભળવાની અનુકૂળતા ન હોય, તો પુરુષે ચાતુર્માસમાં અને બારસ-અમાવાસ્યાદિ પર્વોમાં પુરાણશ્રવણ અવશ્ય કરવું. (૪૨) હે રાજન્ ! યથાર્થ કહેલા ફળને આપનારું પુરાણશ્રવણનું જે વિધાન છે તે સંક્ષેપથી કહું છું. (૪૩) જેણે નિત્યવિધિ કરી છે એવો શ્રોતા સકલ શાસ્ત્રને જાણનાર પુરાણ વાંચનારને બોલાવીને આસન આપીને સન્માનપૂર્વક વક્તાને નમસ્કાર કરે. (૪૪) અતિ ઊંચી પીઠ ઉપર પુસ્તકની સંસ્થાપના કરી પુસ્તકના આસનથી નીચે અત્યંત કોમળ વ્યાસાસનમાં પુરાણ વાંચનારને બેસાડે. (૪૫) પ્રથમ પુસ્તકને ઉપચારોથી પૂજીને પછી વક્તાને પૂજે. ચંદન, અક્ષત, પુષ્પહારો-તોરા- બાજુબંધાદિક તથા ધૂપ-દીપથી અને નૈવેદ્ય-ફળ-તાંબૂળ-દક્ષિણા વગેરેથી ભક્તિ પૂર્વક પૂજન કરી આરતી કરીને આદરપૂર્વક જેમ હોય તેમ મંત્રપૂર્વક વક્તાને પ્રણામ કરે. (૪૬-૪૭) **(મંત્ર કહે છે :)** હે ભગવન્ ! હે વ્યાસ ! હે વેદશાસ્ત્રના અર્થમાં પ્રવીણ ! હે બ્રહ્મા વિષ્ણુ મહેશોની મૂર્તિ ! હે સત્યવતી પુત્ર ! તમોને નમસ્કાર છે. (૪૮) હે નૃપ ! આ મંત્રથી વક્તાને નમસ્કાર કરી મુખ્ય શ્રોતા, શ્રોતા બ્રાહ્મણો અને સાધુઓને યથાયોગ્ય પૂજે. (૪૯) પછી વક્તાના આસનથી નીચે આસને બેસીને સર્વે શ્રોતાઓ એકાગ્ર ચિત્તવાળા, વક્તાને નમસ્કાર કરી પુરાણ સાંભળે. (૫૦) કથાશ્રવણની સભામાં બ્રાહ્મણોની પછવાડે ક્ષત્રિયો બેસે અને ક્ષત્રિયોની પાછળ વૈશ્યો બેસે અને તેમની પાછળ શૂદ્રો બેસે અને શૂદ્રોની પાછળ સંકરજાતીયજનો બેસે, આ પ્રકારે મર્યાદાથી બેસીને ભગવાનની કથા સાંભળવી. (૫૧-૫૨) જે બ્રાહ્મણો જ્ઞાનવૃદ્ધ તપોવૃદ્ધ અને બ્રહ્મનિષ્ઠ હોય, તે જ્ઞાનવૃદ્ધાદિ શ્રોતાજનોને સર્વેની આગળ બેસાડવા. (૫૩) હે મહીપતે ! સ્ત્રીઓએ પણ તે સભામાં પુરુષોથી ચાર હાથ દૂર, શ્રીહરિની કથા સાંભળવા મર્યાદાથી બેસવું. (૫૪) પત્ર = શાક વગેરેનાં પાન, પુષ્પ = મોગરા વગેરેનાં પુષ્પ, ફળ

पृष्ठतस्तु तैः । मर्यादयैवोपविश्य श्रोतव्या भगवत्कथाः ॥५२॥ ज्ञानवृद्धास्तपोवृद्धा ब्रह्मनिष्ठाश्च ये द्विजाः । उपवेश्याः श्रोतृभिस्ते सर्वेषामग्रतो नरैः ॥५३॥ धनुर्मानान्तरे पुम्भ्यः स्त्रीभिश्चापि महीपते! । मर्यादयैवोपवेश्यं तत्र श्रोतुं हरेः कथाः ॥५४॥ पत्रं पुष्पं फलं वापि रौप्यकं ताम्रढब्बुकम् । निवेद्य वा धान्यमुष्टिं वक्त्रे तु शृणुयात्कथाम् ॥५५॥ बालो युवाऽथवा वृद्धो दरिद्रो दुर्बलोऽपि वा । पुराणज्ञः सदा वन्द्यः पूज्यश्च सुकृतार्थिभिः ॥५६॥ न प्राकृतमतिः कार्या पुराणज्ञे कदाचन । यस्य वक्त्रोद्गता वाणी कामधेनुः शरीरिणाम् ॥५७॥ गुरवः सन्ति लोकस्य जन्मतो गुणतश्च ये । तेषामपि च सर्वेषां पुराणज्ञः परो गुरुः ॥५८॥ भवकोटिसहस्रेषु भूत्वा भूत्वावसीदते । यो ददाति हरेर्ज्ञानं कोऽन्यस्तस्मात्परो गुरुः ॥५९॥ पुराणज्ञः शुचिः शान्तो दान्तो विजितमत्सरः । साधुः कारूण्यवान्वाग्मी जात्या विप्रः कथां वदेत् ॥६०॥ द्विजातिरन्यो यः प्राप्तो दीक्षां भागवतीं स तु । अष्टाङ्गब्रह्मचर्याढ्यो निर्लोभश्चेद्वदेत्कथाम् ॥६१॥ व्यासासनं समारूढो यदा पौराणिको भवेत्। आसमाप्तेस्तदा कञ्चिन्नमस्कुर्यान्न भूपते !॥६२॥ एकान्तिका हरेर्भक्ता हरिर्वा मानुषाकृतिः । तत्रागच्छेद्यदि तदा नमस्कुर्वीत तांश्च तम् ॥६३॥ ये धूर्ता ये च दुर्वृत्ता ये चान्यविजिगीषवः । तेषां कुटिलवृत्तीनामग्रे नैव वदेत्कथाम् ॥६४॥ न दुर्जनसमाकीर्णे न शूद्रश्वापदाकुले । देशे न द्यूतसदने वदेत्पुण्यकथां सुधीः ॥६५॥ सद्ग्रामे सद्भिराकीर्णे सुक्षेत्रे देवतालये । नदीतटे शुचौ गेहे कथा वाच्याऽशनालये ॥६६॥ श्रद्धाभक्तिसमायुक्ता नान्यकार्येषु लालसाः । वाग्यताः शुचयोऽव्यग्राः श्रोतारः पुण्यभागिनः ॥६७॥ पुराणं ये त्वसम्पूज्य गन्धाद्यैर्नमनेन वा । शृण्वन्ति च कथां भक्त्या दरिद्राः स्युर्नरास्तु ते ॥६८॥ कथायां कीर्त्यमानायां ये गच्छन्त्यन्यतो नराः । भोगकाले प्रणश्यन्ति तेषां दाराश्च सम्पदः ॥६९॥

= સોપારી વગેરે, રૂપાનાણું અથવા તાંબાની મુદ્રા અથવા મૂઠી કોઈ અન્ન વક્તાને નિવેદન કરી કથા સાંભળે. (૫૫) પુરાણનો વક્તા સોળ વર્ષથી નાની ઉંમરનો બાળક હોય અથવા યુવાન હોય કે વૃધ્ધ હોય અથવા દરિદ્ર હોય કે દુર્બળ હોય તોપણ પુણ્યને ઈચ્છનાર શ્રોતા જનોએ સદા નમસ્કાર કરવા યોગ્ય અને પૂજવા યોગ્ય છે. (૫૬) પુરાણને જાણનારામાં ક્યારેય સાધારણ મનુષ્યબુદ્ધિ ન કરવી. કારણ કે પુરાણને જાણનારાના મુખથી નીકળેલી વાણી કથાના શ્રોતાજનોને કામધેનુ સમાન છે. (૫૭) જે જાતિમાત્રથી જ અને ગુણથી લોકના ગુરુઓ છે તે સર્વેની મધ્યે પણ પુરાણને જાણનારો સર્વ શ્રેષ્ઠ ગુરુ છે. (૫૮) જે પુરાણ જાણનારો ચોરાશી લાખ યોનિઓમાં ઉત્પન્ન થઈ દુઃખ પામનાર પુરુષને પરમાત્માનું જ્ઞાન આપે છે. માટે પુરાણજ્ઞથી બીજો સર્વ શ્રેષ્ઠ ગુરુ કોણ હોય ? અર્થાત્ કોઈ ના થાય. (૫૯) પવિત્ર, શાન્ત, જિતેન્દ્રિય, દાન્ત, મત્સરે રહિત, સાધુ, કરુણાવાળો, સારી રીતે પુરાણ વાંચવામાં પ્રવીણ-જાતિથી બ્રાહ્મણ, પુરાણજ્ઞ કથા વાંચે. (૬૦) અથવા ધર્મવંશી ગુરુ થકી જે ભાગવતી દીક્ષા પામેલો બીજો દ્વિજાતિ-ક્ષત્રિય અથવા વૈશ્ય અષ્ટાંગ બ્રહ્મચર્ય વ્રતમાં રહેનાર (ત્યાગી-સાધુ વગેરે), દ્રવ્યાદિના લોભ-રહિત જો હોય તો કથા કહે. પૂર્વે કહેલા શુદ્ધિ વગેરે ગુણો પણ જાણવા. (૬૧) હે ભૂપતે ! પુરાણજ્ઞ જ્યારે વ્યાસાસન પર બેઠા હોય ત્યારે કથાની સમાપ્તિ સુધી કોઈ પણ માણસને નમસ્કાર કરે નહીં. (૬૨) જ્યારે કથાની સભામાં શ્રીહરિના એકાંતિક ભક્તો આવે અથવા મનુષ્યાકૃતિ સ્વયં પરમેશ્વર આવે ત્યારે શ્રીહરિના એકાંતિક ભક્તોને અને શ્રીહરિને પુરાણી પ્રણામ કરે. એમ ના કરે તો રોમહર્ષણને બળભદ્રના આગમનની માફક અનર્થાપત્તિ આવે. (૬૩) જે પુરુષો ધૂર્ત, દુરાચારી, બીજાને જીતવાની ઈચ્છાવાળા, કુટિલ વૃત્તિવાળા હોય તેમની આગળ કથા કહેવી નહીં. (૬૪) બુદ્ધિમાન પુરાણી અતિદુષ્ટ જનથી યુક્ત સ્થાનમાં અતિ પવિત્ર ભગવાનની કથા કહે નહીં. (૬૫) સદાચારી જનોથી યુક્ત ગામમાં, પુણ્ય ક્ષેત્રમાં, દેવાલયમાં, ગંગા આદિક નદીના તટમાં, શુદ્ધ ગૃહમાં, ભોજનશાળામાં કથા વાંચવી. (૬૬) કથા શ્રવણમાં આદરવાળા અને ભક્તિથી યુક્ત, અન્ય કાર્યમાં લાલસાવાળા ન હોય; તેમજ નિયમમાં વાણીવાળા, બાહ્ય અને આભ્યન્તર શુદ્ધિવાળા, સ્થિર ચિત્તવાળા શ્રોતાઓ પુણ્યભાગી થાય છે. (૬૭) જે મનુષ્યો ચન્દન-પુષ્પાદિ ઉપહારો તથા નમસ્કારથી પુરાણનું ભક્તિપૂર્વક પૂજન કર્યા વગર કથા સાંભળે છે તે મનુષ્યો દરિદ્ર થાય છે. (૬૮) જે મનુષ્યો કથા વંચાતી હોય ત્યારે બીજે જાય છે તે મનુષ્યોને સ્ત્રીઓ અને સંપત્તિઓ તેના ઉપભોગ સમયે નાશ પામે છે. (૬૯) માથે બાંધીને શ્રોતાઓએ કથા સાંભળવી નહીં. તેમજ સોપારી, પાન, બીડી વગેરેનું ભક્ષણ કરવું નહીં, તમાકુ વગેરેનું સેવન કરવું નહીં, ભાંગ-મફર-માજમ, ગાંજો વગેરે કેફી વસ્તુઓનું સેવન કરવું નહીં. (૭૦) શ્રોતાઓએ ઊંચા આસન પર બેસવું નહીં. વક્તાના સમાન આસન ઉપર બેસવું નહીં. પગ ઉપર પગ ચઢાવીને પ્રૌઢપાદથી (જંઘા ઉપર

सोष्णीषैर्न कथा श्रव्या पूगताम्बूलभक्षणम् । श्रोतृभिर्नैव कर्तव्यं न तमालादिसेवनम् ।।७०।। तुङ्गासने नोपवेश्यं न च वक्तृसमासने । प्रौढपादैर्नोपवेश्यं नैव वीरासने च ।।७१।। वस्त्रवेष्टितपादैश्च नोपवेश्यं तथा क्वचित् । न शयानैः कथा श्रव्या दैहिकापदमन्तरा ।।७२।। स्त्रीणां मुखानि पश्यन्तो ये शृण्वन्ति कथां हरेः । कामिनस्ते तु पुरुषा भवन्ति ग्रामशूकराः ।।७३।। कथायां वर्तमानायामन्या वाचो वदन्ति ये । ते गर्दभाः प्रजायन्ते तथा वाददुराग्रहाः ।।७४।। कथायां श्रूयमाणायां विघ्नं कुर्वन्ति ये शठाः । पिशाचत्वं प्रपद्यन्ते ते नूनं नृपसत्तम! ।।७५।। ये निन्दन्ति पुराणज्ञान्कथां वा पापनाशिनीम् । ते तु जन्मशतं मर्त्याः शुनकाः सम्भवन्ति हि ।।७६।। तस्मात्सविनयं राजन्सादरं च हरेः कथा । श्रोतव्या नियमेनैव यथा वक्तुः सुखं तथा ।।७७।। तैलेन गात्रं सम्मर्द्य स्नापनीयः पुराणवित् । अन्नैः सुमृष्टैः सरसैर्भोजनीयस्तथान्वहम् ।।७८।। देयं तस्मै च पूर्वाह्णे प्रत्यहं स्वरशुद्धये । सशर्करं तु गोक्षीरं गालितं क्वथितं तथा ।।७९।। खण्डपर्वस्कन्धपूर्तौ व्रताहेषु च पर्वसु । विशिष्टपूजा कर्तव्या देया शक्त्या च दक्षिणा ।।८०।। समाप्तौ तु पुराणस्य कर्तव्यं पूजनं महत् । यथाशक्त्यखिलैर्देया श्रोतृभिर्हेमदक्षिणा ।।८१।। रौप्यं वा ताम्रमुद्रां वा वस्त्रं वान्नं च वाहनम् । काष्ठं दरिद्रोऽपि मृदं तस्मै दद्यात्स्वशक्तितः ।।८२।। आरोप्य वाहनं रम्यं वस्त्रालङ्कारपूजितम् । गीतवाद्यैर्नयेयुस्तं श्रोतारस्तद्गृहं ततः ।।८३।। इति सामान्यतः प्रोक्तः सर्वेषामेव भूपते! । पुराणोपपुराणानां श्रवणस्य विधिर्मया ।।८४।। विधिनानेन शृणुयुर्ये पुराणानि भूपते! । सम्पूर्णं स्यात्फलं तेषां पुराणोक्तं न संशयः ।।८५।। आदौ विधिमिमं श्रुत्वा पुराणश्रवणं ततः । कर्तव्यं विधिनानेन ततः सिद्ध्यति वाञ्छितम् ।।८६।। श्रीमद्भागवतं नाम पुराणं यन्महन्नृप! । अस्ति तस्य तु सर्वेभ्यो विशेषोऽप्यस्ति कश्चन ।।८७।। विधिना

---

અથવા જાનુ ઉપર અથવા સાથળ ઉપર બીજો પગ મૂકીને) અથવા વીરાસનથી (સાથળ ઉપર પગ મૂકીને) બેસવું નહીં. (૭૧) શ્રોતાઓએ વસ્ત્રથી ઢીંચણ બાંધીને ક્યારેય પણ બેસવું નહીં. પોતાના દેહના દુઃખ વિના સૂતાં સૂતાં કથા સાંભળવી નહીં. (૭૨) જે પુરુષો સ્ત્રીઓનાં મુખો જોતા સતા શ્રીહરિની કથા સાંભળે છે તે કામી પુરુષો ગામનાં ભુંડ થાય છે. (૭૩) જે પુરુષો કથા વંચાતી હોય ત્યારે બીજી વાણી બોલે છે તે પુરુષો ગધેડાઓ થાય છે તથા જે વાણીથી દુરાગ્રહ કરનારા હોયછે તે પણ ગધેડાઓ જ થાય છે. (૭૪) હે નૃપોત્તમ ! શઠો એવા જે પુરુષો કથા સાંભળવામાં વિઘ્ન કરે છે તે પુરુષો પિશાચપણાને પામે છે જ. (૭૫) જે પુરુષો પુરાણીની નિંદા કરે છે અથવા પાપ નાશ કરનારી કથાને નિંદે છે તે મનુષ્યો તો સો જન્મ સુધી શ્વાનની યોનિને પામે છે, જ. (૭૬) હે રાજન્! માટે વિનય સહિત જેમ હોય તેમ આદર સહિત જેમ વક્તા પુરાણીને સુખ થાય તે પ્રમાણે નિયમપૂર્વકજ કથા સાંભળવી. (૭૭) પુરાણવિત્‌ને શરીર પર તેલ ચોળીને સ્નાન કરાવવું તેમ જ શુદ્ધ સારા રસોવાળાં સ્વાદિષ્ટ અન્નોથી દરરોજ ભોજન કરાવવું. (૭૮) દરરોજ પ્રાતઃકાળમાં સ્વરની શુદ્ધિ માટે સાકરે સહિત ગાળેલું તથા ઊનું કરેલું ગાયનું દૂધ પુરાણ વાંચનારને આપવું. (૭૯) ખંડ-પર્વ-સ્કન્ધ અથવા અધ્યાયની સમાપ્તિને દિવસે અને એકાદશી આદિ વ્રતના દિવસોમાં અને અમાવાસ્યાદિ પર્વના દિવસોમાં પુરાણ સહિત પુરાણીની વિશેષ પૂજા કરવી અને શક્તિને અનુસરીને દક્ષિણા આપવી. (૮૦) પુરાણની સમાપ્તિમાં તો મહાપૂજા કરવી. સમગ્ર શ્રોતાઓએ શક્તિ પ્રમાણે સુવર્ણની દક્ષિણા આપવી. (૮૧) રૂપ્ય મુદ્રા અથવા તામ્ર મુદ્રા અથવા ઉત્તમ વસ્ત્ર, અન્ન અથવા વાહન પોતાની શક્તિ પ્રમાણે પુરાણીને આપે. દરિદ્ર હોય તે પણ કાષ્ટ, મૃત્તિકા વગેરે ઉપયોગની વસ્તુ આપે. (૮૨) પછી શ્રોતાઓએ વસ્ત્ર- અલંકારોથી પૂજાયેલા પુરાણીને રમણીય શિબિકા આદિ વાહનમાં બેસાડીને ગીત-વાજિંત્રોએ સહિત પુરાણીના ભવનમાં પહોંચાડવા. (૮૩) હે ભૂપતે ! આ પ્રમાણે સર્વે પુરાણો અને ઉપપુરાણોના શ્રવણનો વિધિ મેં સામાન્યપણે કહ્યો. (૮૪) હે રાજન્ ! જે મનુષ્યો આ કહેલા વિધિથી પુરાણો સાંભળે તે જનોને પુરાણોમાં કહેલું સંપૂર્ણ ફળ થાય છે એમાં સંશય નથી. (૮૫) પ્રથમ આ વિધિ સાંભળીને પછી પુરાણ શ્રવણ કરવું. આ પ્રમાણે પુરાણના શ્રવણથી ઇચ્છિત ફળની પ્રાપ્તિ થાય છે. (૮૬) હે રાજન્ ! શ્રીમદ્ ભાગવત નામનું મહાપુરાણ છે તે તો સર્વ પુરાણોથી કંઈક વિશેષ છે. (૮૭) તે શ્રીમદ્ભાગવતપુરાણનું શ્રવણ અને એકસો આઠ પારાયણાદિ સ્વરૂપ પુરશ્ચરણ અથવા દાન આ લોકમાં જે જનો શક્તિથી કરે છે તે જનોને અક્ષય પુણ્ય થાય છે. (૮૮)

હે રાજન્ ! આ પ્રકારે શ્રી હરિકૃષ્ણ ભગવાનનું વચન સાંભળીને નિર્મળ બુદ્ધિવાળા ઉત્તમ નૃપતિ, શ્રીહરિને નમસ્કાર



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**श्रवणं तस्य पुरश्चर्यां च शक्तितः । दानं वा येऽत्र कुर्वन्ति तेषां सुकृतमक्षयम् ॥८८॥**
सुव्रत उवाच – **आश्रुत्य नारायणवाचमित्थं विशुद्धबुद्धिः स पुनर्नरेशः । जिज्ञासितं स्वस्य हरिं तमीशं पप्रच्छ नत्वा विनयेन राजन्! ॥८९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे सामान्यतः सकलपुराणोपपुराण-श्रवणविधिनिरूपणनामा प्रथमोऽध्यायः ॥१॥

राजोवाच – **श्रीमद्भागवतस्यापि श्रवणस्य विधिं प्रभो! । पुरश्चर्याप्रकारं च विधिं दानस्य मे वद ॥१॥ त्वमेवैतद्यथावद्वै वेत्सि सर्वमशेषतः । अतः शुश्रूषवे मह्यं वक्तुमर्हसि तत्त्वतः ॥२॥** सुव्रत उवाच – **इति भूपतिना पृष्टः स पुराणमुनिस्तदा । श्रीमद्भागवतस्योचे श्रवणादिविधिं च तम् ॥३॥** श्रीनारायणमुनिरुवाच-**शृणु राजन्प्रवक्ष्यामि श्रीमद्भागवतस्य ते । श्रवणादिविधिं सम्यक् स्ववाञ्छितफलप्रदम् ॥४॥ पुराणानि द्विधा सन्ति लघूनि च महान्ति च । लघून्युपपुराणानि पुराणानि महान्ति च ॥५॥ महापुराणान्यकरोत्स्वयं व्यासो दशाष्ट च । अन्ये तूपपुराणानि चक्रुस्तावन्ति चर्षयः ॥६॥ ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा । मार्कण्डेयं नारदीयमाग्नेयं च भविष्यकम् ॥७॥ लैङ्गं च ब्रह्मवैवर्तं वाराहं स्कान्दवामने । कौर्मं मात्स्यं गारुडं च ब्रह्माण्डं चाथ भूपते! ॥८॥ महापुराणसंज्ञानि प्रोक्तान्यष्टादशेति हि । नामान्युपपुराणानां कथयाम्यथ तेऽनघ! ॥९॥ सानत्कुमारं नान्दं च नारसिंहं च कापिलम् । दौर्वाससं नारदीयं शैवधर्मं च मानवम् ॥१०॥ ब्रह्माण्डाख्यं चौशनसं वारुणं कालिकाह्वयम् । वासिष्ठलिङ्गं वासिष्ठं तथा माहेश्वराभिधम् ॥११॥ पाराशरं साम्बसौरे इत्यष्टादश भूपते! । मारीचभार्गवादीनि सन्त्यन्यान्यपि कानिचित् ॥१२॥ इतिहास इति प्रोक्तं यन्महाभारतं तु तत् ।**

કરી પોતે જાણવા ઈચ્છેલું ફરીથી વિનયપૂર્વક શ્રીહરિને પૂછતા હતા. (૮૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે પુરાણશ્રવણોત્સવે સામાન્યતઃ સકલપુરાણોપપુરાણ શ્રવણવિધિ નિરૂપણનામા પ્રથમોઽધ્યાયઃ (૧)*

## અધ્યાય : ૨

**બ્રાહ્મ-પાદ્‌માદિક પુરાણોનાં નામ કહેવાપૂર્વક વિસ્તારથી હેતુપૂર્વક શ્રીમદ્ ભાગવતની ઉત્પત્તિ કહી છે.**

**ઉત્તમ નૃપતિ બોલ્યા,** હે પ્રભો ! શ્રીમદ્ ભાગવતના શ્રવણનો વિધિ-પુરશ્ચરણનો પ્રકાર અને દાનનો વિધિ મને કહો. (૧) આ મેં પૂછેલું સર્વ તમો યથાર્થ સમગ્ર જાણો છો. માટે આ સાંભળવા ઈચ્છતા મને યથાર્થ કહેવા યોગ્ય છો. (૨) હે રાજન્ ! આ પ્રકારે ઉત્તમ રાજાએ પુરાણમુનિ શ્રીહરિને પૂછ્યું ત્યારે શ્રીમદ્ ભાગવતનો શ્રવણાદિ વિધિ ઉત્તમ રાજાને કહ્યો. (૩)

**બે પ્રકારના પુરાણો :- શ્રીનારાયણમુનિ કહે છે :** હે રાજન્ ! શ્રીમદ્ ભાગવતનો પોતાને ઈચ્છિત ફળ આપનારો શ્રવણાદિ વિધિ તમને સારી રીતે કહું છું તે તમો સાંભળો. (૪) પુરાણો લઘુ અને મોટાં આ બે પ્રકારનાં છે. તેમાં ઉપપુરાણો છે તે લઘુપુરાણો, અને મોટાં પુરાણોને મહાપુરાણો કહે છે. (૫) સ્વયં વ્યાસે અઢાર મહાપુરાણો કર્યાં, બીજા ઋષિઓએ તેટલી-અઢાર સંખ્યાવાળાં ઉપપુરાણો કર્યાં. (૬) પ્રથમ **મહાપુરાણો**નાં નામો બ્રહ્મપુરાણ, પદ્‌મપુરાણ, વિષ્ણુપુરાણ, શિવપુરાણ, શ્રીમદ્ ભાગવત, માર્કંડેયપુરાણ, નારદીયપુરાણ, અગ્નિપુરાણ, ભવિષ્યોત્તરપુરાણ, લિંગપુરાણ, બ્રહ્મવૈવર્તપુરાણ, વારાહપુરાણ, સ્કન્દપુરાણ, વામનપુરાણ, કૂર્મ પુરાણ, મત્સ્ય પુરાણ, ગરુડપુરાણ, બ્રહ્માંડપુરાણ આ અઢાર પુરાણોની મહાપુરાણ સંજ્ઞા છે. હે અનઘ ! **ઉપપુરાણો**નાં નામો તમોને કહું છું - સાનત્કુમાર, નાન્દીપુરાણ, નારસિંહપુરાણ, કાપિલપુરાણ, દૌર્વાસસપુરાણ, નારદીયપુરાણ, શૈવધર્મપુરાણ, માનવપુરાણ, બ્રહ્માંડપુરાણ, ઔશનસપુરાણ, વારુણપુરાણ, કાલિકપુરાણ, વાસિષ્ઠપુરાણ, વસિષ્ઠલિંગપુરાણ, માહેશ્વરપુરાણ, પારાશરપુરાણ, સામ્બપુરાણ, સૌરપુરાણ આ પ્રમાણે અઢાર ઉપપુરાણો છે. હે રાજન્ ! મારીચપુરાણ, ભાર્ગવ પુરાણ વગેરે જેમને છે એવાં બીજાં પણ કેટલાંક ઉપપુરાણો છે. (૭-૧૨) જે મહાભારત છે, તે તો ઈતિહાસ છે એમ કહ્યું છે. રામાયણને તો કાવ્ય છે એમ મુનિશ્રેષ્ઠોએ કહેલું છે. (૧૩) વેદસહિત મહા પુરાણો વગેરેમાં ભાગવત નામનું મહાપુરાણ દહીંથી માખણ જેમ તેમ સાર રૂપ છે અથવા મણિઓમાં ચિન્તામણિ જેમ તેમ સાર છે. સંસારરૂપ મહારોગને નાશ કરવામાં રસાયનરૂપ કહેલું છે. (૧૪)

ચંદ્રભાગાદિ સર્વે ભારતદેશની નદીઓમાં ગંગા જેમ શ્રેષ્ઠ છે, દેવોમાં અચ્યુત જેમ શ્રેષ્ઠ છે, એકાંતિક ભક્તોમાં શંકર



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

रामायणं तु काव्याख्यं कथितं मुनिसत्तमैः ॥१३॥ एतेषां च सवेदानां सारो भागवताभिधम् । महापुराणं कथितं भवरोगरसायनम् ॥१४॥ नदीनां तु यथा गङ्गा देवानामच्युतो यथा । वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥१५॥ सर्ववेदपुराणेभ्यः श्रेष्ठत्वेऽस्य तु कारणम् । कथयामि च ते राजन्रुचिस्तत्रास्ति ते यतः ॥१६॥ यदाऽसृजज्जगदिदं ब्रह्मा लोकपितामहः । तदानीं श्रेयसे नृणां वेदं प्रावर्तयत्स तु ॥१७॥ एक एव पुरा वेदः कृतादावभवद्युगे । अधीयते स्म सार्थं तं समग्रमपि सद्धियः ॥१८॥ द्वापरान्ते त्वल्पधियो बभूवुः कालवेगतः । तं नाध्येतुं नराः शेकुर्बोद्धुमर्थं च तस्य ते ॥१९॥ नारायणावतारोऽभूत्तदा द्वैपायनो मुनिः। वेदार्थबोधनेनैव श्रेयसेऽयतताऽऽत्मनाम् ॥२०॥ वेदमेकं चतुर्धैव व्यभजत्स महामुनिः । चक्रे बोद्धुं तदर्थं च पुराणैः सह भारतम् ॥२१॥ चतुर्णामपि वर्णानामाश्रमाणां च सर्वशः । धर्मार्थकाममोक्षांश्च तत्र सोऽवर्णयत्स्फुटम् ॥२२॥ आत्यन्तिकश्रेयसे च धर्मानेकान्तिनामपि । क्वचित्क्वचित्प्रसङ्गेन वर्णयामास तत्र सः ॥२३॥ ऋग्वेदाचार्यमकरोत्ततः पैलमृषिं मुनिः । यजुर्वेदस्य चाचार्यं स वैशंपायनं मुनिम् ॥२४॥ सामवेदस्य चाचार्यं चकार स तु जैमिनिम् । अथर्ववेदाचार्यं च सुमन्तुमकरोदृषिम् ॥२५॥ इतिहासपुराणानामाचार्यं रोमहर्षणम्। स बादरायणश्चक्रे हितायैव नृणामृषिः ॥२६॥ सरस्वतीनदीतीरे शम्याप्रासाभिधाश्रमे। इत्थं कृत्वापि स मुनिर्नैवातुष्यन्निजान्तरे ॥२७॥ तस्यासन्तोषहेतुं ते ब्रवीमि नृपते ! शृणु । निःश्रेयसाय लोकानां तस्य जन्मास्ति भूतले ॥२८॥ तस्य हेतुस्तु सद्धर्मो ज्ञानं वैराग्यमेव च । माहात्म्यज्ञानयुग्भक्तिर्भूम्नश्चेति चतुष्टयम् ॥२९॥ स तु तेनाल्पको ह्येव वर्णितोऽप्यतिविस्तृतैः । मिश्रत्वाद्धर्मकामार्थैर्बोद्धुं शक्यो न तत्त्वतः ॥३०॥ स्वर्गादिफलदेष्वेव ततः कर्मसु मानवाः । सक्ता

જેમ શ્રેષ્ઠ છે, બ્રાહ્માદિ ગ્રંથોમાં આ **શ્રીમદ્ ભાગવત પુરાણ તેવી રીતે શ્રેષ્ઠ છે.** (૧૫) હે રાજન્ ! સર્વ વેદપુરાણોથી આ શ્રીમદ્ ભાગવતનું શ્રેષ્ઠપણાનું કારણ તમોને કહું છું. જેથી શ્રીમદ્ ભાગવતમાં તમારી રુચિ છે. (૧૬) લોકના પિતામહ બ્રહ્માએ જ્યારે આ જગત સર્જ્યું, તે સમયે બ્રહ્મા મનુષ્યોના સમગ્ર પુરુષાર્થની સિદ્ધિ માટે વેદને પ્રવર્તાવતા હતા. (૧૭) પૂર્વે સત્યુગાદિમાં વેદ એક જ હતો. કુશાગ્ર બુદ્ધિવાળા પુરુષો સમગ્ર વેદને અર્થજ્ઞાન સહિત ભણતા હતા. (૧૮) દ્વાપર યુગના અંતમાં કાલવેગથી અલ્પબુદ્ધિવાળા પુરુષો થયા. તે મનુષ્યો વેદને ભણવા માટે અને વેદનો અર્થ જાણવા શક્તિમાન થયા નહીં. (૧૯) તે સમયે નારાયણના **અવતાર વ્યાસ મુનિ થયા.** આ મુનિ વેદાર્થના જ્ઞાનથી જીવોના કલ્યાણ માટે પ્રયત્ન કરતા હતા. (૨૦) મહામુનિ દ્વૈપાયને એક વેદને ઋગાદિ ચાર પ્રકારે વિભાગ કર્યો. વેદાર્થ જાણવા માટે બ્રાહ્માદિ સત્તર મહાપુરાણોએ સહિત મહાભારત સંજ્ઞાવાળો ઈતિહાસ કર્યો. (૨૧) બ્રાહ્મણાદિ ચાર વર્ણો અને બ્રહ્મચારી વગેરે ચાર આશ્રમોના ધર્મ, અર્થ, કામ અને મોક્ષોને વ્યાસે પુરાણાદિમાં જેમ હોય તેમ વર્ણન કર્યા. (૨૨) વ્યાસે પુરાણો અને ભારતમાં આત્યંતિક કલ્યાણ માટે એકાંતિકના ધર્મોને પણ પ્રસંગથી કોઈ કોઈ સ્થાને વર્ણન કર્યા. (૨૩) પછી વ્યાસમુનિએ પૈલ ઋષિને ઋગ્વેદના આચાર્ય કર્યા. વૈશંપાયન મુનિને યજુર્વેદના આચાર્ય કર્યા, જૈમિનિ મુનિને સામવેદના આચાર્ય કર્યા અને સુમંતુ ઋષિને અથર્વ વેદના આચાર્ય કર્યા. (૨૪-૨૫) બાદરાયણ મહામુનિ, તે વ્યાસજીએ મનુષ્યોના હિતને માટે જ રોમહર્ષણ મુનિને ઈતિહાસ પુરાણોના આચાર્ય કર્યા. (૨૬) સરસ્વતી નદીના તીરે **શમ્યાપ્રાસ** નામના આશ્રમમાં રહીને, આ પ્રમાણે કરીને પણ વ્યાસમુનિ પોતાના મનમાં સંતોષ પામ્યા નહીં. (૨૭) હે રાજન્ ! **વ્યાસના અસંતોષનું કારણ** તમોને કહું છું. તે સાંભળો. પૃથ્વીમાં વ્યાસનો જન્મ જનોના કલ્યાણ માટે છે. (૨૮) લોકના કલ્યાણનું કારણ તો સદ્ધર્મ-જ્ઞાન-વૈરાગ્ય અને શ્રી વાસુદેવની માહાત્મ્ય જ્ઞાને સહિત ભક્તિ આ ચાર જ છે. (૨૯) વ્યાસે આત્યંતિક કલ્યાણનું કારણ વર્ણન કર્યું તો પણ અલ્પ, શાકાદિમાં મીઠાની માફક અલ્પ માત્ર જ વર્ણન કરેલું છે. તે પણ અત્યન્ત વિસ્તારથી ધર્મ-અર્થ અને કામોથી મિશ્રિત હોવાથી યથાર્થપણે જાણવા માટે શક્ય નથી. (૩૦) માટે ધર્મ-અર્થ અને કામના સ્થાપક ઘણાં વાક્યોથી મનુષ્યો સ્વર્ગાદિ ફલ આપનારા કર્મોમાં ભગવાનની ભક્તિથી રહિત કેવલ યજ્ઞાદિ ક્રિયાઓમાં આસક્ત થયા. (૩૧) તે સમયે વ્યાસમુનિની જનકલ્યાણ માટે જે પુરાણાદિની કૃતિ તેનાથી જનકલ્યાણ રૂપ ફળની ઉત્પત્તિ થઈ નહિ, માટે નહિ રચેલા સમાન જ થયું. (૩૨) તે સમયે અન્તર્યામીપણે પ્રત્યક્ષ સર્વાવતારધારી પુરુષોત્તમ શ્રીકૃષ્ણે વ્યાસના મનમાં અકૃતાર્થતાની પ્રેરણા કરી. તેથી મહાસંતાપ થયો. (૩૩) તે સંતાપરૂપી શોકથી વ્યાસનું જ્ઞાન સંકુચિત થયું. માટે વ્યાસ

आसन्बहुविधैर्वाक्यैस्तत्प्रतिपादकैः ॥३१॥ तदा तु तस्य श्रेयोर्था पुराणादिकृतिर्मुनेः । आसीदेवाकृतप्राया तत्फलानुदयात्किल ॥३२॥ तदान्तर्यामिणा साक्षाद्वासुदेवेन तद्धृदि । अपूर्णकामता प्रैरि तया तापो महानभूत् ॥३३॥ तदुत्थया शुचा तस्य ज्ञानं सङ्कुचितं ह्यभूत् । अतः शान्तिं स न प्रापद्ग्रन्थं कर्तुं न चाशकत् ॥३४॥ ततो दयालुर्भगवान्नारायण ऋषीश्वरः । नारदं प्रैषयत्तस्मै निपुणं परबोधने ॥३५॥ विचारेणापि तापस्य हेतोरनुपलम्भनात् । शोचन्तं तमुपेयाय नारदः सर्वदुःखहा ॥३६॥ व्यासेन पूजयित्वाऽथ स्वासन्तोषस्य कारणम् । सम्पृष्टः स मुनिः प्रोचे सर्वज्ञो भगवत्प्रियः ॥३७॥ नारद उवाच – यदर्थमवतारस्ते सम्यक् तन्न त्वया कृतम् । अपूर्णकामता तस्माद्धृदये तव वर्तते ॥३८॥ आत्यन्तिकश्रेयसे त्वं जनानां रचयानघ! । त्वत्कृतग्रन्थसर्वस्वं पुराणं केवलं रसम् ॥३९॥ यशः श्रीवासुदेवस्य तद्भक्तानां च तत्त्वतः । तत्र वर्णयतः शान्तिर्भविष्यति तवान्तरे ॥४०॥ श्रीमद्भागवतं नाम पुराणं रचयाधुना । तेन निःश्रेयसं नृणां त्वत्सन्तोषश्च सेत्स्यति ॥४१॥ आज्ञा नारायणस्येत्थं भवतीत्युपदिश्य तम् । जगाम नारदः सोऽथ तद्व्यधित्सत्समाधिना ॥४२॥ वेदान्स्मृतीश्चेतिहासान्पुराणानि च सर्वशः । सूत्राणि काव्यान्यामथ्य बुद्ध्या तत्सारमाददे ॥४३॥ स्वानुभूतिसहायेन तेन भागवताभिधम् । स चकार महायोगी पुराणं मुक्तवाञ्छितम् ॥४४॥ क्षीराब्धावोषधीः सर्वा मथित्वा मन्दराद्रिणा ।

---

શાંતિ પામ્યા નહિ અને બીજો કોઈ ગ્રન્થ કરવા શક્તિમાન થયા નહિ. (૩૪) પછી દયાળુ ઋષિઓના સ્વામી ભગવાન **બદરીપતિ નારાયણે** બીજાને બોધ આપવામાં નિપુણ નારદને વ્યાસને બોધ આપવા માટે મોકલ્યા. (૩૫) વિચારથી પણ તાપનું કારણ નહિ મળવાથી શોક કરતા વ્યાસને સકલ પીડાનિવર્તક નારદ મળ્યા. (૩૬) વ્યાસે પૂજાના ઉપચારોથી પૂજીને પછી પોતાના અપૂર્ણકામપણાનું કારણ પૂછ્યું. ત્યારે સર્વજ્ઞ - ભગવાનને પ્રિય નારદજીએ વ્યાસને કહ્યું. (૩૭) હે વ્યાસમુને, ! તમારો જેને માટે પ્રાદુર્ભાવ છે, મનુષ્યોને વેદના અર્થના જ્ઞાનથી આત્યન્તિક મોક્ષની પ્રાપ્તિ થાય; તે પ્રયોજન તમોએ સારી રીતે કર્યું નથી. માટે તમારા હૃદયમાં પૂર્ણકામપણું પ્રવર્તતું નથી. (૩૮) હે નિષ્પાપ, તમો જનોના આત્યન્તિક કલ્યાણ માટે તમોએ કરેલા સમગ્ર ગ્રન્થ માત્રના સારરૂપ કેવળ રસરૂપ પુરાણને રચો. (૩૯) તે પુરાણમાં શ્રીવાસુદેવનો યશ અને તેના ભક્તોનો યશ યથાર્થપણે વર્ણન કરતાં તમારા અન્તઃકરણમાં શાંતિ થશે. (૪૦) હાલમાં જ શ્રીમદ્ ભાગવત પુરાણને રચો. તેનાથી મનુષ્યોનું આત્યંતિક કલ્યાણ અને તમોને સંતોષની સિદ્ધિ થશે. (૪૧) આ પ્રમાણે નારાયણ શ્રીબદરીપતિની આજ્ઞા છે. હે રાજન્ ! આવી રીતે વ્યાસને ઉપદેશ આપીને નારદ ગયા. પછી વ્યાસે શ્રીમદ્ ભાગવત પુરાણને સમાધિથી કરવા માટે ઈચ્છા કરી. (૪૨)

વ્યાસજી ઋગાદિ ચાર વેદો, મનુ, યાજ્ઞવલ્કય આદિ ઋષિઓએ રચેલાં ધર્મશાસ્ત્રો, ભારતાદિ ઈતિહાસો, સમગ્ર બ્રાહ્માદિ પુરાણો, શારીરક સૂત્રો, ઋષિ પ્રણીત રામાયણાદિ કાવ્યોને મંથન કરી પોતાની બુદ્ધિથી વેદાદિના સારરૂપ અર્થને ગ્રહણ કરતા હતા. (૪૩) મહાયોગી વ્યાસે પોતાના અનુભવની સહાયતાવાળા વેદાદિના સારે સહિત મુક્તોએ ઈચ્છેલું શ્રીમદ્ ભાગવત નામનું પુરાણ કર્યું. (૪૪) જેમ વિષ્ણુભગવાને સર્વ ઔષધિઓને ક્ષીરસમુદ્રમાં મન્દ્રાચળ મંથન કરી સુધાને સમ્પાદન કર્યું, તે પ્રકારે વ્યાસજીએ **શ્રીમદ્ ભાગવત પુરાણ** સમ્પાદન કર્યું. (૪૫)

હે રાજન્ ! વાસુદેવ શ્રીકૃષ્ણ પૃથ્વીમાંથી અન્તર્ધાન થયા ત્યારે લોકોમાં પોતાના વંશે સહિત નિરાધાર **ધર્મના પણ આશ્રયભૂત** આ પુરાણ જ હતું. (૪૬)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણ શ્રવણોત્સવે સહેતુક ભાગવતોત્પત્તિ નિરૂપણનામા દ્વિતીયોઽધ્યાયઃ (૨)*

## અધ્યાય : 3

**વિશેષપણે સર્વ શાસ્ત્રના રહસ્યની ઉક્તિપૂર્વક સ્પષ્ટ વિસ્તારપૂર્વક શ્રીમદ્ ભાગવતનું માહાત્મ્ય કહેલું છે.**

**શ્રી નારાયણ મુનિ બોલ્યા,** હે રાજન્ ! સર્વ શાસ્ત્રોના સારભૂત શ્રીમદ્ ભાગવત નામના પુરાણમાં સાંખ્યશાસ્ત્રમાં

**यथोदपादयद्विष्णुः पीयूषं स तथैव तत् ॥४५॥ अन्तर्हिते भूमिप ! वासुदेवे भुवस्तलादाश्रय एतदासीत् । सहान्वयस्यापि निराश्रयस्य धर्मस्य लोकेषु पुराणमेव ॥४६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे सहेतुकभागवतोत्पत्तिनिरूपणनामा द्वितीयोऽध्यायः ॥२॥

श्रीनारायणमुनिरुवाच - **सारेऽस्मिन्सर्वशास्त्राणां श्रीमद्भागवताभिधे । साङ्ख्यसूत्रोदितो ह्यर्थो योगसूत्रोदितस्तथा ॥१॥ ब्रह्मसूत्रोदितश्चार्थो वेदान्तार्थश्च भूपते! । विस्तराद्वर्णितोऽस्त्येव भगवद्भक्तिवृद्धये ॥२॥ श्रीकृष्णो हि चतुर्व्यूहो वासुदेवादिसंज्ञकः । वर्णितः पञ्चरात्रेण पुरुषाद्यवतारधृत् ॥३॥ तस्य स्वरूपविज्ञानं तस्मिन्भक्तिश्च नैष्ठिकी । नैष्कर्म्यं कर्म तत्प्रीत्यै वैराग्यमितरत्र च ॥४॥ तथा तस्यावताराणां जन्मकर्माणि यान्यपि । तेषां दिव्यतया ज्ञानं तद्भक्तेष्वेव सौहृदम् ॥५॥ तथात्मरूपविज्ञानं सम्यङ्नृणां भवेदिति । एतान्येवात्र विस्तार्य बहुधाऽवर्णयन्मुनिः ॥६॥ एतं गुह्यतमं त्वर्थं श्रीमद्भागवतस्थितम् । न हि सर्वे विजानन्ति जानन्ति विरला बुधाः ॥७॥ श्रोतारो वापि वक्तारो ये स्वधर्मेषु संस्थिताः । पञ्चस्वपि विरक्ता ये विषयेष्वात्मवेदिनः ॥८॥ नराकृतिं वासुदेवमनन्तैश्वर्यमण्डितम् । ज्ञात्वैव तत्र भक्तिं ये नैष्ठिकीं कुर्वते नराः ॥९॥ सौहार्दं सात्त्वतेष्वेव निर्दम्भं ये च कुर्वते । त एवैतद्रहस्यं हि जानन्ति नृप ! नेतरे ॥१०॥ एतैस्तु लक्षणैर्युक्ता अदक्षा अपि लौकिके । अनधीतानेकशास्त्रा अप्येतच्छ्रवणाद्विदुः ॥११॥ एतल्लक्षणहीना येऽधीतशास्त्रचया अपि ।**

કહેલો અર્થ તથા યોગસૂત્રોમાં કહેલો અર્થ તથા બ્રહ્મસૂત્રમાં કહેલો અર્થ અને વેદાન્તનો અર્થ ભગવાનની ભક્તિની વૃદ્ધિ માટે વિસ્તારથી વર્ણન કરેલો છે. (૧-૨) વાસુદેવાદિ ચતુર્વ્યૂહરૂપ પુરુષાદિ અવતાર ધારણ કરનાર શ્રીકૃષ્ણ પંચરાત્રથી વર્ણન કરેલા છે. (આથી ચતુર્વ્યૂહ- વર્ણનરૂપ પંચરાત્રના અર્થનો આ ભાગવતમાં વિસ્તાર છે એમ જાણવું) (૩)

શ્રીકૃષ્ણ ભગવાનના સ્વરૂપનું વિજ્ઞાન અને શ્રીકૃષ્ણ ભગવાનમાં નૈષ્ઠિકી (દ્રઢ) ભક્તિ, શ્રીકૃષ્ણની પ્રસન્નતા માટે નિષ્કામ કર્મ અને ભગવાન વિના બીજા પદાર્થોમાં વૈરાગ્ય તથા શ્રીકૃષ્ણના અવતારો વરાહાદિનાં જન્મકર્મોનું દિવ્યપણે જ્ઞાન અને ભગવાનના ભક્તોમાં જ સુહ્રદપણું તથા આત્માના સ્વરૂપનું વિજ્ઞાન તેમ જ ભગવત્સ્વરૂપનું વિજ્ઞાન મનુષ્યોને સારી રીતે થાય તેને માટે આ સાંખ્ય સૂત્રોના અર્થો વગેરે અને ભગવત્ સ્વરૂપના વિજ્ઞાનાદિનું ઘણા પ્રકારે વિસ્તારીને જ શ્રીમદ્ ભાગવતમાં વ્યાસે વર્ણન કર્યું છે. (૪-૫-૬)

શ્રીમદ્ ભાગવતમાં રહેલો આ સાંખ્ય સૂત્રાદિ સ્વરૂપ અતિ ગુપ્ત અર્થ તો સર્વે વક્તાઓ તથા સર્વે શ્રોતાઓ જાણતા નથી, કોઈ વિરલા વિદ્વાનો જ જાણે છે. (૭) અથવા પોતાના ધર્મમાં રહેલા, શબ્દાદિ માયિક પંચ તન્માત્રાઓમાં વૈરાગ્ય પામેલા, આત્મનિષ્ઠાવાળા, (૮) જે પુરુષો (શ્રોતા અને વક્તાઓ) મનુષ્યાકાર શ્રીકૃષ્ણભગવાનને અનંત ઐશ્વર્યથી અલંકૃત જાણીને શ્રીકૃષ્ણમાં જ નૈષ્ઠિકી ભક્તિ કરે છે. હે નૃપ ! જે શ્રોતા અને વક્તા પુરુષો શ્રીકૃષ્ણના એકાંતિક ભક્તોમાં જ કપટે રહિત મિત્રપણું કરે છે, તે જ પૂર્વોક્ત શ્રીમદ્ ભાગવતમાં **ગુપ્ત અભિપ્રાય**ને જાણે છે. બીજા જાણતા નથી. (૯-૧૦) ધર્મનિષ્ઠાદિ લક્ષણોથી યુક્ત પુરૂષો લોકવ્યવહારમાં નિપુણ ન હોય અને અનેક શાસ્ત્રો ભણેલા ના હોય, તો પણ આ ભાગવતમાં રહસ્ય શ્રવણ માત્રથી જ જાણે છે. (૧૧)

ધર્માદિ લક્ષણોથી રહિત હોય તે પુરૂષો શાસ્ત્રોના સમુદાયોને ભણેલા હોય, લૌકિક સમગ્ર વ્યવહારોમાં નિપુણ હોય, જનોના ગુરુપણાને પામેલા હોય, અને જીવનપર્યન્ત દરરોજ શ્રીમદ્ ભાગવતનું અધ્યયન કરતા હોય અથવા સાંભળતા હોય તોપણ તે પુરુષો રહસ્યને જાણતા નથી અને શ્રીકૃષ્ણમાં એકાન્તિકી ભક્તિને પામતા નથી. (૧૨-૧૩) જે પુરુષો આ રહસ્યને સત્પુરુષોના મુખથી જાણીને અથવા સાંભળીને શ્રીમદ્ ભાગવતમાં રહેલા **રહસ્ય** પ્રમાણે વર્તતા નથી તે પુરુષો પણ અજ્ઞાનીના સમાન જ છે. માટે આ ભાગવતનું ભક્તિપૂર્વક શ્રવણ-પઠનથી સેવન કરવું. (૧૪) આવા મહિમા યુક્ત આ પુરાણના જ્ઞાનથી (મહિમા જાણીને) અથવા અજ્ઞાનથી શ્રવણ અથવા પઠન પણ પૃથ્વીમાં જે મનુષ્યો કરે તે પુરુષો તત્કાલ જ પાપથી મુક્ત થાય. તે પુરુષો, જ્યારે (જો) ફરીથી પાપ ના કરે તો સંસારના બંધનથી મુક્ત થાય. (૧૫-૧૬) લાંબા કાળથી થયેલા માટે જ વૃદ્ધ, પ્રાયશ્ચિત્તરૂપ વૈદ્યોએ ત્યાગ કરેલા, બ્રહ્મહત્યાદિ મહાપાપરૂપ મહારોગનું પથ્યરૂપ આ શ્રીમદ્ ભાગવત જ અમૃતરૂપ ઔષધ છે. (૧૭)

વ્યાસજીએ સર્વોત્તમ સર્વના સારરૂપ આ પુરાણ કરીને મનુષ્યોના કલ્યાણ માટે પોતાના પુત્ર શુકદેવને ભણાવ્યું.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

निपुणा व्यवहारेषु कुर्वन्तो गुरुतामपि ॥१२॥ यावज्जीवमधीयानाः शृण्वन्तो वै तदन्वहम् । रहस्यं नैव जानन्ति लभन्ते प्रेम न प्रभौ ॥१३॥ ज्ञात्वा वै तत्सतां वक्त्रान्न वर्तन्ते तथा च ये । तेऽप्यज्ञतुल्या विज्ञेया भक्त्या सेव्यमिदं ततः ॥१४॥ पुराणस्येदृशस्यास्य ज्ञानादज्ञानतोऽपि वा । श्रवणं पठनं वापि ये कुर्युर्मानवा भुवि ॥१५॥ सद्यस्ते पापनिर्मुक्ता भवेयुर्यदि ते पुनः । न कुर्युः पातकं तर्हि मुक्ताः स्युर्भवबन्धनात् ॥१६॥ चिरन्तनाया वृद्धाया महापापमहारुजः । त्यक्ताया निष्कृतैर्वैद्यैरिदमेवामृतं हितम् ॥१७॥ रहस्यमेतत्परमं कृत्वा व्यासो निजात्मजम् । पुराणं श्रेयसे नृणां शुकं स त्वध्यजीगपत् ॥१८॥ दयालुः स शुकः प्राह गङ्गातीरे परीक्षितम् । प्रायोपविष्टं नृपतिं महर्षिगणसंसदि ॥१९॥ ततः प्रवृत्तिरभवद्भूतलेऽस्य नराधिप! । श्रीमद्भागवतस्येति श्रेष्ठमेतत्प्रकीर्तितम् ॥२०॥ आकृष्णनिर्गमात्त्रिंशद्वर्षावधि गते कलौ । नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ॥२१॥ सप्तभिर्दिवसैः सर्वं सार्थं चाचकथत्स तत् । प्रौष्ठपद्यां पौर्णमास्यां पुराणं तत्समापयत् ॥२२॥ वेदादीनां साररूपा यतो भागवती कथा । अत्युत्तमा ततो भाति सेवनीयैव सर्वथा ॥२३॥ यथा दुग्धे स्थितं सर्पिर्नास्वादायोपकल्पते । पृथग्भूतं तु तद्दिव्यं देवानां रसवर्धनम् ॥२४॥ इक्षूणामादिमध्यान्तं शर्करा व्याप्य तिष्ठति। पृथग्भूतैव सा मिष्टा तथा भागवती कथा ॥२५॥ कालव्यालमुखग्रासत्रासनिर्नाशहेतवे । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥२६॥ एतस्मादपरं किञ्चिन्मनःशुद्ध्यै न विद्यते । जन्मान्तरीयपुण्यौघैः शुश्रूषा तस्य सम्भवेत् ॥२७॥

---

(૧૮) દયાળુ શુકે ગંગા કિનારે મહર્ષિગણની સભામાં અનશન વ્રત લઈને બેઠેલા પરીક્ષિત રાજાને આ પુરાણની કથા સંભળાવી. (૧૯) હે રાજન્ ! ત્યાર પછી શ્રીમદ્‌ભાગવતની પૃથ્વીમાં **પ્રવૃત્તિ** થઈ આ પ્રમાણે મહિમા હોવાથી આ શ્રીમદ્‌ભાગવત શ્રેષ્ઠ કહેલું છે. (૨૦)

શ્રીકૃષ્ણના અન્તર્ધાન થયા પછી ત્રીસ વર્ષ કળીયુગનાં ગયાં ત્યારે ભાદરવા માસમાં નવમી તિથિથી આરંભીને શુકે પરીક્ષિતની આગળ કથા વાંચવાનો આરંભ કર્યો. (૨૧) શુકદેવે સાત દિવસોએ અર્થ સહિત સર્વ ભાગવત પુરાણ સંપૂર્ણ કહ્યું. પૂર્વાભાદ્રપદા નક્ષત્ર યુક્ત પૂર્ણિમાને દિવસે સમાપ્ત કર્યું. (૨૨) જે માટે ભાગવતની કથા વેદાદિના સારરૂપ છે તેથી જ તે અત્યુત્તમ, સર્વ પ્રકારે સેવન કરવા યોગ્ય જ ભાસે છે. (૨૩) જેમ દૂધમાં રહેલું ઘી દૂધથી જુદું પ્રાપ્ત થાય ત્યારે તો કર્પૂરની માફક રમણીય યજ્ઞભાગને જમનારા દેવોને પણ સ્વાદની વૃદ્ધિ કરનારું થાય છે. મનુષ્યોને થાય તેમાં કહેવું જ શું ? (૨૪) અથવા શેરડીના સાંઠામાં આદિ-મધ્ય અને અન્તમાં સાકર વ્યાપીને રહે છે તે સાકર શેરડીથી જુદી પ્રાપ્ત થયેલી સતી જ ઉત્તમ મિષ્ટપણાને પામે છે, તેવી રીતે ભાગવતની કથા **વેદાદિના સાર રૂપ** છે. (૨૫) કાળરૂપી મહાસર્પના મુખગ્રાસથી ગળેલા જનોના ત્રાસના અતિશય વિનાશ માટે કલિયુગમાં શ્રીમદ્ ભાગવતશાસ્ત્ર શુકમુનિએ કહેલું છે. (૨૬) આ શ્રીમદ્ ભાગવત શાસ્ત્રથી બીજું કોઈ પણ શાસ્ત્ર મનની શુદ્ધિ માટે નથી જ, શ્રીમદ્ ભાગવતનું શ્રવણ કરવાની ઈચ્છા જન્માન્તરના પુણ્ય સમૂહોથી ઉત્પન્ન થાય. (૨૭)

**અમૃતના બદલામાં કથામૃતની માંગણી :-** બ્રહ્મર્ષિ, દેવર્ષિ, રાજર્ષિની સભામાં પરીક્ષિત રાજાનો મોક્ષ કરવા માટે તેને કથા કહેવા માટે શુકદેવ સારી રીતે બેઠા ત્યારે અમૃતનો કળશ લઈને જ દેવો ત્યાં પરીક્ષિત સમીપે થયેલી સભામાં આવ્યા. (૨૮) પોતાના કાર્યમાં કુશળ સર્વે દેવો શુકદેવને અતિ આદરપૂર્વક પ્રણામ કરી કહેવા લાગ્યા. હે મુને! તમો આ અમૃતને ગ્રહણ કરીને શ્રીમદ્ ભાગવતની કથા રૂપી અમૃત અમોને આપો. (૨૯) આ પ્રકારે વિનિમય થયે સતે સુધા (અમૃત) પરીક્ષિત રાજા પાન કરે, અને અમો સર્વે કથાઅમૃતનું પાન કરીશું. (૩૦)

**દેવતાઓને પણ દુર્લભ કથામૃત :- શ્રીહરિ કહે છે,** હે રાજન્ ! ત્યારે તેમણે કહ્યા પછી, લોકમાં શ્રીમદ્ ભાગવતની કથા ક્યાં ? અને સુધા ક્યાં ? એ બેનું સમાનપણું નથી કારણ કે કાચ ક્યાં ? અને ચિન્તામણિ ક્યાં ? આ પ્રકારે વિચારીને બ્રહ્મજ્ઞાન આપનાર શુકદેવ, દેવતાઓનાં મુખ જોઈને હસ્યા. (૩૧) દેવોને તો વિષયાસક્ત ચિત્ત હોવાથી ભાગવતામૃતને યોગ્ય નહીં જાણીને કથા અમૃત, તે દેવોને શુકે આપ્યું નહીં. આ પ્રકારે ભાગવતની કથા દેવોને પણ દુર્લભ છે. (૩૨)

પછી પરીક્ષિત રાજાનો શ્રીમદ્ ભાગવતના **અમૃતપાન**થી આત્યન્તિક મોક્ષ જોઈને સ્વયં દેવોની સાથે આવેલા બ્રહ્માએ

परीक्षिते कथां वक्तुं सभायां संस्थिते शुके । सुधाकुम्भं गृहीत्वैव देवास्तत्र समाययुः ॥२८॥ शुकं नत्वावदन्सर्वे स्वकार्यकुशलाः सुराः । कथासुधां प्रयच्छ त्वं गृहीत्वैव सुधामिमाम् ॥२९॥ एवं विनिमये जाते सुधा राजा प्रपीयताम् । प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥३०॥ क्व कथा क्व सुधा लोके क्व काचः क्व महामणिः । ब्रह्मरातो विचार्येत्थं ततो देवान् जहास सः ॥३१॥ अयोग्यांस्तांस्तु विज्ञाय न ददौ स कथामृतम् । एवं भागवती वार्ता देवानामपि दुर्लभा ॥३२॥ राज्ञो मोक्षं ततो वीक्ष्य स्वयं ब्रह्मापि विस्मितः । सत्यलोके तुलां बध्वा शास्त्रजातमतोलयत् ॥३३॥ लघून्यन्यानि जातानि गुरु त्वेकमिदं महत् । तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥३४॥ मेनिरे ते हरे रूपं शास्त्रं भागवतं ततः । पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ॥३५॥ एतं वृत्तान्तमाश्रुत्य सर्वे त्रैलोक्यवासिनः । श्रेयस्कामास्तदेवैकमाद्रियन्त न चापरम् ॥३६॥ निवृत्तिमार्गस्याचार्याः कपिलः सनकादयः । इदमेवान्द्रियन्ते स्म पुराणं परया मुदा ॥३७॥ प्रवृत्तिमार्गस्याचार्या मरीचिप्रमुखास्तथा । इदमेवादरान्नित्यं जगृहुः शुभकर्मसु ॥३८॥ श्वेतद्वीपे निरन्ना ये मुक्ताश्च बदरीवने । ऋषयस्तेऽप्येतदेव प्राधान्येन सिषेविरे ॥३९॥ श्रुतिस्मृतिपुराणानि निराधाराणि तर्हि तु । ब्रह्माणमेत्य शरणं प्रोचुः शोककृशानि च ॥४०॥ देवदेव! जगद्धातस्त्वमस्माकमधीश्वरः । भवसीति परं कष्टमस्माकं श्रोतुमर्हसि ॥४१॥ श्रीमद्भागवतस्यैव गुरुत्वात्सर्वशास्त्रतः । जाता प्रवृत्तिस्त्रैलोक्ये सर्वत्र शुभकर्मसु ॥४२॥ अस्मांस्तु कोऽपि दृष्ट्यापि न पश्यत्यादरात्प्रभो! । अतो नामापि नो लोके न स्थातेत्येव भाति नः ॥४३॥ जीविताशां विहायैव ततस्त्वां शरणं गतान् ।

પણ વિસ્મય પામીને સત્યલોકમાં ત્રાજવાં બાંધીને સમગ્ર શાસ્ત્રસમૂહને તોળ્યા. (૩૩) બીજાં બધાં શાસ્ત્રો લઘુ (હલકાં) થયાં અને આ શ્રીમદ્ ભાગવત એક જ ગુરુ (ઘણાભારવાળું) થયું તે સમયે બ્રહ્મલોકના નિવાસી સર્વે ઋષિગણો અતિશય આશ્ચર્ય પામ્યા. (૩૪) પછી ઋષિગણો ભાગવતશાસ્ત્રને શ્રીકૃષ્ણનું સ્વરૂપ માનવા લાગ્યા. અધ્યયન અને ભક્તિપૂર્વક શ્રવણથી તત્કાલ જ વૈકુંઠલોકની પ્રાપ્તિરૂપ ફળ આપનાર માનતા હતા. (૩૫) સત્યલોકમાં બ્રહ્માએ સર્વે શાસ્ત્રોની તુલના કરી તેમાં શ્રીમદ્ ભાગવત **ગુરુ** થયું, અને બીજાં બધાં **લઘુ** (નાના અર્થાત્ હળવાં) થયાં. આ વાર્તા સાંભળીને પોતાના મોક્ષની ઈચ્છાવાળા સર્વે ત્રિલોકીમાં રહેનારા, એક શ્રીમદ્ ભાગવતનો જ આદર કરતા હતાં. બીજાનો આદર કરતા નહોતા. (૩૬) નિવૃત્તિમાર્ગના આચાર્યો, કપિલ અને સનકાદિ-પરમ આનંદથી આ પુરાણનો જ આદર કરતા હતા. (૩૭) તે પ્રકારે પ્રવૃત્તિ માર્ગના આચાર્યો મરીચિ વગેરે મુનિઓ શુભ કર્મમાં શ્રીમદ્ ભાગવતને જ આદરપૂર્વક નિત્ય ગ્રહણ કરતા હતા. (૩૮) શ્વેતદ્વીપમાં જે નિરન્ન મુક્તો અને બદરિકાશ્રમમાં જે ઋષિઓ હતા તે પણ શ્રીમદ્ ભાગવતનું જ મુખ્યપણે પઠણ-શ્રવણાદિથી સેવન કરતા હતા. (૩૯) તે સમયે તો શ્રુતિ-સ્મૃતિ-પુરાણો આધાર વિનાનાં થયાં અને શોકથી ક્ષીણ શરીરવાળાં થઈને બ્રહ્માને શરણે આવીને બોલવા લાગ્યા : (૪૦) હે દેવદેવ ! હે જગત્ધાતા ! તમો અમારા અધીશ્વર છો, માટે અમારું પરમ દુઃખ સાંભળવા યોગ્ય છો. (૪૧) સર્વ શાસ્ત્રથી શ્રીમદ્ ભાગવતનું જ મહાનપણું હોવાથી ત્રિલોકીમાં સર્વ શુભ કાર્યોમાં તેની પ્રવૃત્તિ થઈ. (૪૨) હે પ્રભો ! અમોને તો કોઈ પણ દૃષ્ટિથી પણ આદરપૂર્વક જોતું નથી. માટે લોકમાં અમારાં નામો પણ રહેશે નહીં. આ પ્રમાણે અમારા મનમાં ભાસે છે. (૪૩) હે બ્રહ્માજી ! માટે જીવવાની આશાનો ત્યાગ કરીને જ તમારાં શરણે આવેલા અમોને રક્ષણ કરવા યોગ્ય છો. કારણકે તમો લોકોનું પાલન કરનારા છો. (૪૪)

હે રાજન્ ! પછી શાસ્ત્રોને આશ્વાસન આપીને બ્રહ્મા શ્રીમદ્ ભાગવત પ્રત્યે બોલ્યા, હે અનઘ ! તમોએ પોતાની જ્ઞાતિઓનું ઉલ્લંઘન કરવું નહીં. (૪૫) હે તાત ! તમોએ પોતાનાં આ પુરાણોનો ત્યાગ કરીને એકાકી ક્યારેય જવું નહિ. આ પ્રમાણે મારું વાક્ય તમો પાલન કરવા માટે યોગ્ય છો. (૪૬) તે સમયે ભાગવતે તે બ્રહ્માને પ્રણામ કરીને કહ્યું, હે બ્રહ્મન્ ! આજથી આરંભીને પુરાણોના મંડળમાં નિવાસ કરીશ. (૪૭) હે બ્રહ્મન્ ! સર્વશ્રેષ્ઠપણું મને સ્વભાવથી જ પ્રિય નથી. આ પ્રમાણે તમો જાણો. પરંતુ સર્વ શાસ્ત્રોથી અધિકપણું તમોએ તોલવાથી કરેલું છે, અને વ્યાસજીએ 'મને અપૂર્ણ કામપણાથી થયેલો **સંતાપ** શ્રીમદ્ ભાગવતથી **શાન્ત** થયો; બીજાં શાસ્ત્રોથી થયો નહિ.' એમ સર્વ ઠેકાણે કહેવાથી અધિકપણું કરેલું છે. (૪૮)

હે વિભો ! હાલમાં જેમ તમારી આજ્ઞા છે તે પ્રમાણે કરીશ. હે રાજન્ ! આ પ્રમાણે શ્રીમદ્ ભાગવતનું વચન સાંભળીને બ્રહ્મા પ્રસન્ન થયા. (૪૯) બ્રહ્માએ શ્રીમદ્ ભાગવત પુરાણને પુરાણોના અનુક્રમથી શ્રવણ, દાન, અર્ચન વગેરે જેમાં છે એવા પુરશ્ચરણઆદિમાં પુરાણોની મધ્યે **પાંચમી સંખ્યામાં જ** સ્થાપના કરી. (૫૦) તે દિવસથી આરંભીને સર્વ શ્રુતિ,સ્મૃતિ, પુરાણો શ્રીમદ્ ભાગવતને આશરીને પોષણ પામ્યા અને અર્થજ્ઞાનમાં સદા અનુસર્યાં. (માટે જ શ્રીમદ્ ભાગવતના સમગ્ર અર્થ જાણવાની ઈચ્છાવાળાએ વેદ-ઈતિહાસ-પુરાણો જોવાં.) (૫૧) આવા પ્રતાપવાળા શ્રીમદ્ ભાગવતના આશ્રય માત્રથી પાંચમી સંખ્યા સમગ્ર ભૂતલમાં પ્રસિદ્ધ થઈ. શતાદિ સંખ્યાથી પણ શ્રેષ્ઠ થઈ. લોકવાણી પણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पातुमर्हसि नो धातर्यतस्त्वं लोकभावनः ॥४४॥ तान्याश्वास्य ततो ब्रह्मा श्रीमद्भागवतं प्रति। उवाचेमा ज्ञातयः स्वा नातिक्रम्यास्त्वयानघ! ॥४५॥ त्वयैवैकाकिना तात! विहायैतान्निजान्क्वचित् । न गम्यमिति मद्वाक्यं त्वं पालयितुमर्हसि ॥४६॥ तदा भागवतं प्राह तं प्रणम्य पितामहम् । अद्यप्रभृति वत्स्यामि पुराणानां हि मण्डले ॥४७॥ आधिक्यं न स्वतोऽभीष्टं ममास्तीत्यवगच्छ भोः । किन्तु त्वया तोलनेन व्यासेन च कृतं हि तत् ॥४८॥

साम्प्रतं च यथाऽऽज्ञा ते करिष्यामि तथा विभो! । इति तस्य वचः श्रुत्वा प्रसन्नोऽभवदात्मभूः ॥४९॥ पुराणानां तु सङ्ख्यायां पञ्चम्यामेव तद्विधिः । पुराणं स्थापयामास श्रुतिदानार्चनादिषु ॥५०॥ श्रुतिस्मृतिपुराणानि तदेवालम्ब्य तद्दिनात् । सर्वाणि पोषणं प्रापुः सर्वदा च तदन्वयुः ॥५१॥ श्रीमद्भागवतस्यास्य संश्रयाद्भूतलेऽखिले । विख्याता पञ्चमी सङ्ख्या शतादिभ्योऽप्यभूद्वरा ॥५२॥ तदिदं श्रीभागवतं पुराणं ब्रह्मसम्मितम् । सेव्यते पुरुषैर्धन्यैर्भूतलेऽत्र नराधिप! ॥५३॥ धन्या भागवती वार्ता प्रेतपीडाविनाशिनी । सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः ॥५४॥ रुदन्ति सर्वपापानि सप्ताहश्रवणक्षणे । अस्माकं प्रलयं सद्यः कथेयं हा!! करिष्यति ॥५५॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकायसम्भवम् । श्रवणं प्रदहेत्पापं पावकः समिधो यथा ॥५६॥ अस्मिन्वै भारते वर्षे सूरिभिर्देवसंसदि । अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम् ॥५७॥ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा । अध्रुवेण शरीरेण शुकशास्त्रकथां विना ॥५८॥ अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम् । चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ॥५९॥ जराशोकविपाकार्तं रोगाणां मन्दिरं परम् ।

સંભળાય છે કે, **'જ્યાં પંચ ત્યાં પરમેશ્વર'** વગેરે. (૫૨) હે રાજન્ ! શ્રીકૃષ્ણ પરબ્રહ્મ સંશયે રહિત સ્વરૂપ-સ્વભાવ-ગુણ-વિભૂતિ-ઐશ્વર્ય વગેરેથી પ્રતિપાદન જેણે કર્યા છે તેવું આ શ્રીમદ્ ભાગવત પુરાણ આ લોકમાં ધન્ય પુરુષોએ સેવા કરાય છે. (૫૩) પ્રેતની પીડા નાશ કરનારી શ્રીમદ્ ભાગવતની કથા ધન્ય છે તથા શ્રીકૃષ્ણના લોકને આપનારા સાત દિવસનું પારાયણ પણ ધન્ય છે. (૫૪)

સાત દિવસોથી શ્રીમદ્ ભાગવત કથા-શ્રવણના અવસરમાં સર્વ પાપો, આ કથા અમારો તત્કાલ પ્રલય કરશે. અરે ! અમારો મોટો ખેદ છે. એમ કહીને અતિશય રુદન કરવા લાગે છે. (૫૫) શ્રીમદ્ ભાગવતનું શ્રવણ અગ્નિ કાષ્ઠોને જ જેમ તેમ જાણીને કરેલાં અથવા અજ્ઞાનથી કરેલાં, નાનાં અથવા મોટાં શરીર-વાણી અને મનથી થયેલાં પાપોને બાળે છે. (૫૬) આ ભરતખંડમાં શ્રીમદ્ ભાગવતની કથા નહિ સાંભળનાર જનોનો જે **જન્મ** તે દેવસભામાં નારદાદિ મુનિઓએ **નિષ્ફળ** કહેલો છે. (૫૭) શુકદેવજીએ કહેલા શ્રીમદ્ ભાગવતની કથા વિના સુપુષ્ટ કરેલા માટે જ બલવાન, ક્ષણવિનાશી, અજ્ઞાનથી પાલન કરેલા શરીરથી શું? કોઈ પણ અર્થ નથી. (૫૮) અસ્થિના થાંભલાવાળું, સ્નાયુઓના બંધવાળું, માંસ અને લોહીથી લેપાયેલું, ઉપર ચામડીથી બાંધેલું, દુર્ગન્ધ યુક્ત, મૂત્ર અને વિષ્ઠાના પાત્ર રૂપ, જરા - શોક અને નિરંતર પરિણામોથી સદા પીડાયુક્ત, રોગોનું પરમ મંદિર; અન્નજળાદિથી નિરંતર પૂરવા છતાં પણ નહિ પુરાતું, કૃતઘ્ન, કફ-વાત-પિત્તાદિના દોષવાળું, ક્ષણવિનાશી, કૃમિ-વિષ્ટા અને ભસ્મની જ અન્તે સંજ્ઞાવાળું- આ પ્રકારે શરીર, શાસ્ત્રથી અને અનુભવથી નિરૂપણ કરેલું છે. આવા શરીરથી જે પુરુષ પોતાનું આત્યન્તિક મોક્ષરૂપી કાર્ય સિદ્ધ કરે તે પુરુષ મહા બુદ્ધિશાળી **પંડિત** છે. (૫૯-૬૦-૬૧) જે અન્ન પ્રાતઃકાળમાં રાંધેલું; સાયંકાળે ભોજનને યોગ્ય રહેતું નથી, તે અન્નના રસથી પોષણ પામેલા શરીરમાં નિત્યપણું ક્યાંથી હોય ? અર્થાત્ ન જ હોય. (૬૨) કથાશ્રવણ નહિ કરનારા પુરુષો જળમાં પરપોટાની માફક, પક્ષીઓમાં મચ્છરોની માફક મરણને માટે જ ઉત્પન્ન થાય છે. (૬૩)

શ્રીમદ્ ભાગવતપુરાણ નિર્દોષ છે કારણ કે વૈષ્ણવોને પ્રિય જે ભાગવતમાં પરમહંસોએ પ્રાપ્ય, અદ્વિતીય, માયાના ગુણરૂપ મેલોથી રહિત ક્ષર અને અક્ષરથી પણ પર, શ્રીકૃષ્ણ પરમાત્માનું સ્વરૂપ વ્યાસે ગાયેલું છે. જે શ્રી ભાગવતમાં જ્ઞાન, વૈરાગ્ય અને ભક્તિએ સહિત, પોતપોતાના ધર્મે સહિત ભગવાનની આરાધના સ્વરૂપ નૈષ્કર્મ્ય-**ક્રિયાયોગ** કહેલો છે. તેવું શ્રીમદ્ ભાગવત ભક્તિથી સાંભળનારો અને પાઠ કરનારો વિચારપરાયણ મનુષ્ય સંસારથી મુક્ત થાય છે. (૬૪)

હે રાજન્ ! આ પ્રકારે મેં ભાગવતનું માહાત્મ્ય તમોને કહ્યું. તે માહાત્મ્ય તો નિરંતર સ્વધર્મે સહિત ભક્તિવાળા મનુષ્યોને જ મહાફળ પમાડનારું થાય છે. (૬૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

दुष्पूरं च कृतघ्नं च सदोषं क्षणभङ्गुरम् ॥६०॥ कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् । तेन संसाधयेद्धीमान्स्वकार्यं यः स पण्डितः ॥६१॥ यत्प्रातः संस्कृतं चान्नं सायं तत्तु विनश्यति । तदीयरससम्पुष्टे काये का नाम नित्यता ॥६२॥ बुद्बुदा इव तोयेषु मशका इव जन्तुषु । जायन्ते मरणायैव कथाश्रवणवर्जिताः ॥६३॥

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन् पारहंस्यमेकममलं ज्ञानं परं गीयते । अत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥६४॥ इत्थं मया भागवतस्य तुभ्यं माहात्म्यमुक्तं नृपते ! तु तत्स्यात्। महाफलप्रापकमेव नृणां स्वधर्मयुग्भक्तिमतां सदैव ॥६५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे विशेषतः श्रीमद्भागवतमाहात्म्यनिरूपणनामा तृतीयोऽध्यायः ॥३॥

श्रीनरायणमुनिरुवाच - **अथैतस्य पुराणस्य विधानं श्रवणस्य ते । कथयामि नृपश्रेष्ठ ! श्रोतृणां हितकारकम् ॥१॥ आरम्भणीया स्वगृहे धनिकैः पुरुषैः कथा । अन्यैर्नरैस्तु संहत्य देवतामन्दिरादिषु ॥२॥ विवाहे यादृशं चित्तं स्वपुत्रस्य नृणां भवेत् । कथाप्रारम्भणे तादृक् कार्यमुत्साहितं नृप! ॥३॥ निर्विघ्नेन समाप्त्यर्थमादौ गणपतिं यजेत् । सिन्दूरेण च दुर्वाभिः शुभैश्च गुडलड्डुकैः ॥४॥ प्रत्यहं संहितापाठं शृणुयाद्यदि पूरुषः । तदा तु भोजनात्पूर्वं सार्थं चेद्भोजनोत्तरम् ॥५॥ आनुकूल्यं यदि श्रोतुं नित्यं न स्यात्तदा नृप! । अवश्यमेव शृणुयाच्चातुर्मास्ये तु पूरुषः ॥६॥ पौषमासं विनैकं तु**

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણ શ્રવણોત્સવે વિશેષતઃ શ્રીમદ્ ભાગવત માહાત્મ્યનિરૂપણનામા તૃતીયોऽધ્યાયઃ (૩)*

## અધ્યાય : ૪

### શ્રીમદ્ ભાગવતના શ્રવણના વિધિમાં પૂજાવિધિ વિસ્તારથી કહ્યો છે.

**શ્રીનારાયણ મુનિ  બોલ્યા** : હે ઉત્તમરાજા ! હવે આ પુરાણના શ્રવણનો શ્રોતાજનોને હિતકારી વિધિ તમોને કહું છું. (૧) ધનાઢ્ય પુરુષોએ પોતાના ગૃહમાં કથાનો આરંભ કરાવવો. અને નિર્ધન પુરુષોએ તો બધા ભેગા થઈને દેવતાનાં મંદિરો વગેરેમાં કથાનો આરંભ કરાવવો. (૨) હે રાજન્ ! પોતાના પુત્રના વિવાહમાં મનુષ્યોનું ચિત્ત જેવું ઉત્સાહે યુક્ત હોય, કથાના આરંભમાં તેવું **ઉત્સાહે યુક્ત** કરવું. (૩) નિર્વિઘ્ન સમાપ્તિ માટે પ્રથમ સિંદૂર, દૂર્વા, ઘણા ઘીથી યુક્ત શોભાયમાન ગોળના લાડુઓથી ગણપતિને પૂજે (૪) શ્રોતાજન જો દરરોજ અર્થ વિના કેવળ સંહિતાપાઠ સાંભળે તો ભોજનથી પ્રથમ સાંભળે અને અર્થ સહિત સાંભળે તો ભોજન કર્યા પછી સાંભળે. (જેમ પોતાને સ્વાસ્થ્યમાં અનુકૂળતા આવે તેમ સાંભળે.) (૫)

હે રાજન્ ! દરરોજ જો સાંભળવાની અનુકૂળતા ન હોય તો ચાતુર્માસમાં પુરુષ અવશ્ય જ સાંભળે. (૬) હે ભૂપતે! એક પોષ માસ વિના સર્વે માસો શ્રીમદ્ ભાગવતના **આરંભ**માં પુણ્ય આપનારા છે. અને અધિક માસ પણ પુણ્ય આપનારો છે. (૭) આ માસોમાં જે માસમાં પોતાના મનની સ્થિરતા હોય, તે માસમાં પાપસમુદાયનો નાશ કરનાર ભાગવતપુરાણ સાંભળવું; (૮) અથવા કહેલા માસોમાં બે માસ સુધી મનુષ્ય સાંભળે અથવા ભાદરવા માસમાં સુદી નવમીથી કથાનો આરંભ કરી કારતક સુદી પૂનમ સુધી ૬૬ દિવસોએ સાંભળે. (૯) અથવા કારતક સુદી નવમીથી આરંભીને માઘ માસની પૂર્ણિમામાં સમાપ્તિ કરે, અથવા માઘ સુદી નવમી તિથિમાં આરંભ કરી ચૈત્ર માસની પૂર્ણિમા સુધી મનુષ્ય સાંભળે. (૧૦)

જ્યારે સાત દિવસ સુધી કથા સાંભળે, ત્યારે તો કહેલા માસોમાં કોઈ પણ એક માસમાં નવમી તિથિથી આરંભીને પૂર્ણિમા સુધી મનુષ્ય સાંભળે. (૧૧) પોતાની જ્ઞાતિ તથા મિત્રમંડળોને જેમને સાંભળવામાં શ્રદ્ધા હોય તે પોતાની જ્ઞાતિ અને સુહૃદ જનોને આરંભદિનથી પ્રથમ જ દેશાન્તરથી બોલાવે અને બીજા જનોને પણ બોલાવે. (૧૨) નાના દેશમાં રહેલા વૈરાગ્યવાળા, દંભેરહિત, ભગવાનના ભક્ત સાધુઓને બોલાવવા માટે પણ પત્ર લખવો. આવેલા વૈષ્ણવોને અન્નજળાદિથી સત્કાર કરવો. (૧૩) પાંચ દિવસ આગળથી પ્રયત્ન પૂર્વક આસનો વગેરે ઉપાયોગી વસ્તુઓને ભેગી કરવી. જે દેશમાં ભૂમિ વિશાળ હોય તે પ્રદેશમાં **કથાનું સ્થાન** રાખવું. (૧૪)

અતિ પવિત્ર વિશાળ સ્થાનમાં કેળના સ્તંભો, સુંદર વસ્ત્રો, ફળો અને  પુષ્પોથી શોભાયમાન માટે જ મનને પ્રિય મંડપ

प्रारम्भेऽस्याखिला अपि । मासाः पुण्यावहाः सन्ति मलमासश्च भूपते! ॥७॥ मासेष्वेतेषु यत्र स्यात्स्वस्थता स्वस्य चेतसः । तस्मिन्भागवतं श्रव्यं पुराणं पापसङ्घहृत् ॥८॥ मासद्वयं वा शृणुयादुक्तमासेषु मानवः । भाद्रे नवम्यां वारभ्य कार्तिकीपूर्णिमावधि ॥९॥ प्रारभ्योर्जनवम्यां वा माघ्यां तत्तु समापयेत् । तपोनवम्यां वारभ्य चैत्र्यन्तं शृणुयान्नरः ॥१०॥ सप्ताहं शृणुयाद्यर्हि तदा तूक्तेषु मास्सु च । नवम्यादि पूर्णिमान्तमेकस्मिञ्छृणुयान्नरः ॥११॥ देशान्तरान्निजान् ज्ञातीनाह्वयेच्च सुहृज्जनान् । येषां तच्छ्रवणे श्रद्धा तांश्चारम्भदिनात्पुरा ॥१२॥ देशे देशे विरक्ता ये वैष्णवा दम्भवर्जिताः । पत्रं तेभ्योऽपि संलेख्यमागतांस्तांश्च मानयेत् ॥१३॥ अर्वाक्पञ्चाहतो यत्नादासनादीनि मेलयेत् । विशाला वसुधा यत्र कुर्यात्तत्र कथास्थलम् ॥१४॥ कुर्वीत मण्डपं तत्र शुचौ स्थाने मनःप्रियम् । रम्भास्तम्भैश्च सद्वस्त्रैः फलैः पुष्पैश्च शोभनम् ॥१५॥ तत्रोपवेशस्थानानि स्त्रीणां पुंसां यथोचितम् । व्यासासनं च रुचिरं रचयेच्चतुरो नरः ॥१६॥ तस्मिन्पीठे पृथावुच्चे मृदुले तु पुराणिनम् । संस्थापयेत्पुस्तकं च चतुरङ्गे निधारयेत् ॥१७॥ ततः पुराणाधिदेवं कृष्णं भागवताकृतिम् । मन्त्रैः समर्चयेदेतैर्मुख्यः श्रोता कृताह्निकः ॥१८॥ प्रथमादिद्वादशान्ताः स्कन्धा यस्य पदादयः । प्रोक्ता अवयवा दिव्यास्तं कृष्णं चिन्तयाम्यहम् ॥१९॥ नवीननीरदोद्रिक्तश्यामसुन्दरविग्रहम् । शरत्पार्वणचन्द्राभाविनिन्दास्यमनुत्तमम् ॥२०॥ शरत्सूर्योदयाब्जानां प्रभामोचनलोचनम्। स्वाङ्गसौन्दर्यशोभाभी रत्नभूषणभूषणम् ॥२१॥ गोपीलोचनकोणैश्च प्रसन्नैरतिवक्रितैः ।

---

કરવો. (૧૫) તે મંડપમાં ચતુર માણસ સ્ત્રીઓ અને પુરુષોને બેસવાનાં સ્થાનો મનોહર અને વ્યાસાસન યથાયોગ્ય રચના કરે. (૧૬) વિશાળ અને સર્વ શ્રોતાઓના આસનથી અતિ ઊંચા કોમળ વ્યાસાસનમાં પુરાણીને બેસાડે અને વ્યાસાસન કરતાં ઊંચા બાજોઠમાં પુસ્તક પધરાવે. (૧૭) પછી નિત્યવિધિ કરીને મુખ્ય શ્રોતા પુરાણના અધિદેવ શ્રીમદ્‌ભાગવતના આકારવાળા શ્રીકૃષ્ણનું આ મંત્રોથી પૂજન કરે. (૧૮)

પ્રથમ સ્કંધ મુખ્ય જેમાં છે અને દ્વાદશ-સ્કંધ છે અન્તમાં એવા સ્કંધો શ્રીકૃષ્ણના ચરણાદિ દિવ્ય અવયવો કહેલા છે, તે શ્રીકૃષ્ણનું હું **ચિન્તવન** કરું છું. (૧૯) નવીન મેઘની સમાન સ્નિગ્ધ અને શ્યામસુંદર શરીર જેમનું છે, શરદ ઋતુના પૂર્ણ ચન્દ્રમાની કાંતિને તિરસ્કાર કરનાર મુખ જેમનું છે એવા, અનુપમ, સૂર્યથી વિકાસ જેમનો છે એવાં શરદ ઋતુનાં કમળોની શોભાને તિરસ્કાર કરતાં નયનો જેનાં છે એવાં, પોતાનાં અંગોના સૌન્દર્યથી રત્નજડિત આભૂષણોને શોભાવનાર, પ્રેમથી પરિપૂર્ણ હોવાથી નિર્મલ અતિકુટિલ ગોપીઓનાં નયનોના ખૂણાથી વારંવાર જોવાયેલાં, માટે તેમના પ્રાણોથી નિર્માણ કરાયેલા હોયને શું ? પોતાની પૂજા પરાયણ જે રમા અને રાધા તેમના નયનરૂપી જ્યોત્સ્નાપ્રિય ચકોરપક્ષીઓએ ચન્દ્રમાની માફક (રાધા અને લક્ષ્મીએ) જોવાયેલા, સુંદર શ્રેષ્ઠ રત્નોથી જડિત મુકુટમાં ઉજ્જ્વળ ચળકતા તોરાઓવાળા, આનંદ (ક્રીડાજન્ય વિનોદ) માટે મુરલી હાથમાં જેમને છે એવા, દેવો અને અસુરોએ સેવા કરાયેલા, કૌસ્તુભમણિથી શોભાયમાન વક્ષઃસ્થળ જેમનું છે એવા સમગ્ર ઐશ્વર્યના નિધિ શ્રીકૃષ્ણને હું ભજું છું. આ રીતે આ છ શ્લોકોથી શ્રીકૃષ્ણનું ધ્યાન કરીને પછી श्रीभागवताकृतिश्रीकृष्णपरमात्मने नमो ध्यायामि । ભાગવતાકૃતિ પરમાત્માને નમસ્કાર કરી **ધ્યાન** કરું છું એમ બોલવું. (૨૦-૨૪) કળિયુગના પાપને નાશ કરવા માટે પ્રાદુર્ભાવ પામેલા શ્રીમદ્ ભાગવતાકાર શ્રીકૃષ્ણને હું આવાહન કરું છું. (૨૫) હે કૃષ્ણ ! હે પ્રભો ! સુવર્ણ અને રત્નથી નિર્માણ કરેલું, તમારી પ્રીતિ કરનારું, મેં અર્પણ કરેલું આ સિંહાસન કૃપા કરીને ગ્રહણ કરો. (૨૬) એકાંતિક ભાવથી પોતાનો આશ્રય કરનારાં જનોને સંસારસાગરથી તારનારા, હે દેવેશ ! હે શ્રીકૃષ્ણ ! મારી ઉપર કૃપા કરી પગ ધોવા માટે જળ ગ્રહણ કરો. (૨૭) નાના અવતારોનાં ચરિત્રોથી, હે સાધુઓનાં સંકટ નાશ કરનાર ! હે શ્રીકૃષ્ણ ! ચંદન વગેરે આઠ અંગ સહિત પૂજાને યોગ્ય જળ ગ્રહણ કરો. (૨૮) હે ગોકુળને ક્રીડા કરવાથી આનંદ કરાવનાર ! હે મહેન્દ્રાદિના મદને હરનાર, હે શ્રી વૃન્દાવનના પૂર્ણ ચન્દ્રમા, આચમન કરવા યોગ્ય જળને ગ્રહણ કરો. (૨૯) યમુનાના જળમાં ગરુડના ભયથી સંચરણ કરનારા કાલીય નાગની ફણાઓને મર્દન કરનારા, જલક્રીડામાં પ્રીતિવાળા, હે કૃષ્ણ ! સ્નાન કરવા માટે જળ ગ્રહણ કરો. (૩૦) હે કૃષ્ણ ! હે નંદનંદન ! નવીન સુવર્ણની માફક પીળા રંગના રૂપવાળું તમારે પહેરવા યોગ્ય, આ પીતામ્બર ગ્રહણ કરો. (૩૧) હે દેવોના પણ નિયન્તા ! ગાયત્રી મંત્રના જપપૂર્વક ત્રણ ગ્રંથિઓથી યુક્ત સુવર્ણના તંતુથી કરેલું શોભાયમાન યજ્ઞોપવીત ગ્રહણ કરો. (૩૨) હે સત્પતે ! કૃષ્ણ !



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शश्वन्निरीक्ष्यमाणं तत्प्राणैरिव विनिर्मितम् ॥२२॥ स्वार्चापररमाराधादृक्चकोरसुधाकरम् । सद्रत्नसारनिर्माणकिरीटोज्ज्वलशेखरम् ॥२३॥ विनोदमुरलीहस्तं सेवितं च सुरासुरैः । कौस्तुभोद्भासितोरस्कं तमीश्वरमहं भजे ॥२४॥ कलिकल्मषनाशाय प्रादुर्भूतं कृपाभरात् । श्रीमद्भागवताकारं कृष्णमावाहयाम्यहम् ॥२५॥ सिंहासनमिदं कृष्ण! स्वर्णरत्नविनिर्मितम् । तव प्रीतिकरं दत्तं गृहाण कृपया प्रभो! ॥२६॥ अनन्यभावाश्रयिणां संसारार्णवतारक! । पाद्यं गृहाण देवेश! श्रीकृष्ण! कृपया मयि ॥२७॥ नानावतारचरितैः साधुसंकष्टनाशन! । अर्घ्यं गृहाण श्रीकृष्ण! गन्धाद्यष्टाङ्गसंयुतम् ॥२८॥ गोकुलक्रीडनानन्द! महेन्द्रादिमदापह!॥ श्रीवृन्दावनपूर्णेन्दो ! गृहाणाचमनीयकम् ॥२९॥ यमुनाजलसञ्चारिकालीयफणमर्दन ! । जलक्रीडारते! कृष्ण ! स्नानीयं प्रतिगृह्यताम् ॥३०॥ पीताम्बरमिदं कृष्ण ! नवीनं स्वर्णवर्णकम् । तवैव परिधानार्हं गृह्यतां नन्दनन्दन! ॥३१॥ सावित्रीग्रन्थिसंयुक्तं स्वर्णतन्तुविनिर्मितम् । गृह्यतां देवदेवेश! ब्रह्मसूत्रमिदं शुभम् ॥३२॥ आभूषणानि दिव्यानि कुण्डलादीनि सत्पते ! । गृहाण कृपया कृष्ण ! दत्तानीमानि भक्तितः ॥३३॥ घनसाररसोपेतं कुङ्कुमेन सुशोभितम्। गृहाण चन्दनं दिव्यं देवकीनन्दन ! प्रभो ! ॥३४॥ नानासुगन्धिपुष्पाणां हारापीडौ तथैव च । तुलसीवनमालां च श्रीकृष्ण! स्वीकुरु प्रभो! ॥३५॥ सुगन्धिद्रव्यवासाढ्यं विष्णुतैलं मनोहरम् । वाञ्छितं सर्वलोकानां भगवन्प्रतिगृह्यताम् ॥३६॥ बालक्रीडाविनोदेन पूतनाप्राणहारक ! । कंसादिदुष्टशमन! धूपः स्वीक्रियतां त्वया ॥३७॥ स्वयंप्रकाशमानेश! नैकभास्करभास्वर ! । गृहाण कृपया दीपमन्धकारनिवारकम् ॥३८॥ नानापक्वान्ननैवेद्यं रसैः षड्भिर्मनोहरम् । विश्वम्भर! गृहाणेदं प्रीत्या मे वरदो भव ॥३९॥ पवित्रं निर्मलं तोयमुशीरैलादिवासितम् । जीवनं सर्वजीवानां पानार्थं गृह्यतां हरे! ॥४०॥ निर्मलं यामुनं तोयं सुपवित्रं सुवासितम् । पुनराचमनीयं च गृह्यतां मधुसूदन!

---

રમણીય, શ્રદ્ધાથી મેં અર્પણ કરેલાં કુણ્ડલાદિ આભૂષણો **કૃપા કરીને ગ્રહણ કરો.** (૩૩) હે દેવકીનંદન ! હે પ્રભો ! કર્પૂરરસથી યુક્ત કુંકુમથી સુશોભિત આ દિવ્ય ચંદન ગ્રહણ કરો. (૩૪) હે શ્રીકૃષ્ણ ! હે પ્રભો ! નાના પ્રકારના સુગંધિમાન પુષ્પોના હારો, અને તોરાઓ કડાં-બાજુબંધ તથા તુલસીની માળાઓ ગ્રહણ કરો. (૩૫) હે ભગવન્ ! સુગંધી દ્રવ્યો, ચંદન, એલાયચી વગેરેના સંસ્કાર યુક્ત-મનોહર-સર્વ લોકોએ ઇચ્છેલું વિષ્ણુતેલ (અત્તર) ગ્રહણ કરો. (૩૬) બાળકની રમત માત્રથી, હે પૂતનાના પ્રાણનાશક ! હે કંસાદિ દુષ્ટનું શમન કરનારા ! તમો ધૂપ સ્વીકાર કરો. (૩૭) હે સ્વયં પ્રકાશી ! હે ઈશ! હે અનેક સૂર્યસમાન પ્રકાશમાન ! હે અન્ધકારને નિવારણ કરનારા ! તમો દીપને કૃપાથી ગ્રહણ કરો. (૩૮) હે વિશ્વંભર! મધુરાદિ રસોથી મનોહર આ વિવિધ પ્રકારનાં પકવાનો અર્પણ કરેલાં પ્રીતિપૂર્વક ગ્રહણ કરો. મને વર આપનારા થાઓ. (૩૯) હે હરે ! પવિત્ર જળ વીરણનાં મૂળો અને એલાયચી વગેરે જેમાં છે એવા ગુલાબ વગેરેથી સુગંધીમાન-સર્વ જીવોના જીવનમાં કારણરૂપ જળ પીવા માટે ગ્રહણ કરો. (૪૦) હે મધુસૂદન ! નિર્મળ યમુનાનું અતિપવિત્ર સુગંધીમાન જળ ફરીથી આચમન માટે ગ્રહણ કરો. (૪૧) હે કૃષ્ણ ! સોપારીના ચૂર્ણથી યુક્ત લવિંગ, એલાયચી મિશ્રિત જાયફળ, તજ, ખદિર ચૂર્ણાદિથી યુક્ત આ પાનબીડી ગ્રહણ કરો. (૪૨) હે મથુરાપતે ! સર્વે ફળોમાં દિવ્ય-સર્વ દેવોને પ્રીતિ કરનારું આ નાળિયેર ગ્રહણ કરો. (૪૩) હે દ્વારિકાપુરના અધીશ્વર ! મેં શક્તિ પ્રમાણે આપેલી સોના-રૂપાની મુદ્રા દક્ષિણા તમો ગ્રહણ કરો. (૪૪) હે દેવેશ ! હે જ્યોતિઓના સ્વામી ! હે કમલાપતે ! હું તમારી આરતી કરું છું, તમોને નમસ્કાર થાઓ. મેં આપેલી આરતી ગ્રહણ કરો. (પછી અહીં અનુક્ત એવી પણ પુષ્પાંજલિ મંત્ર સહિત સમર્પણ કરવી.) (૪૫) હે દેવદેવેશ ! હે શંખચક્રગદાધર ! હે કૃષ્ણ ! તમોને નમસ્કાર. તમારી પ્રદક્ષિણાથી બ્રહ્માંડોની પ્રદક્ષિણા થાય. (૪૬) ભૂતલમાં સર્વ જનોના ઉદ્ધાર માટે પ્રાદુર્ભાવ પામેલા **શ્રીભાગવતરૂપ શ્રીકૃષ્ણ તમોને હું પ્રણામ કરું છું.** (૪૭) હે દેવેશ ! હે કરુણાનિધે ! હું પોતાનાં કર્મોના ફળરૂપ પરિણામથી સંસારસાગરમાં પડેલો છું, તો મારો કૃપા કરીને ઉદ્ધાર કરો. (૪૮) હે જગત્પતે! તમો શ્રીમદ્ ભાગવતરૂપે શ્રીકૃષ્ણ જ છો. તમારે શરણે આવેલા મારા ઉપર કૃપા કરો. (૪૯) હે રાજન્ ! આ પ્રકારે ભાગવતાત્મક કૃષ્ણનું વિધિથી સંપૂજન કરી ચન્દન-પુષ્પની માળા વગેરેથી ભક્તિપૂર્વક વક્તા પુરાણીનું પૂજન કરે. (૫૦) નવીન વસ્ત્રોથી અને અલંકારોથી વક્તાને પૂજીને દક્ષિણા આપ્યા પછી 'હે ભગવન્ ! હે વ્યાસ, તમોને નમસ્કાર.' આ મંત્રથી નમસ્કાર કરીને મુખ્ય શ્રોતા પુરુષ તેમની પ્રાર્થના કરે : (૫૧) હે વ્યાસરૂપ ! શ્રોતાજનોને પુરાણના અર્થનો બોધ આપવામાં પ્રવીણ ! હે સર્વ શાસ્ત્રવિશારદ ! આ કથાના પ્રકાશથી મારું અજ્ઞાન નાશ કરો. (૫૨)

।।४१।। ताम्बूलं पूगसंयुक्तं लवङ्गैलाविमिश्रितम् । जातीफलादिसंयुक्तं श्रीकृष्ण! प्रतिगृह्यताम् ।।४२।। दिव्यं फलानां सर्वेषां सर्वदेवप्रियङ्करम् । नालिकेरीफलमिदं गृहाण मथुरापते! ।।४३।। यथाशक्ति मया दत्ताः स्वर्णरूप्यादिमुद्रिकाः । श्रीद्वारिकापुराधीश! दक्षिणा गृह्यतां त्वया ।।४४।। नीराजयामि देवेश! नमस्ते ज्योतिषांपते! । आरार्त्रिकं मया दत्तं गृहाण कमलापते! ।।४५।। नमस्ते देवदेवश! शङ्खचक्रगदाधर! । त्वत्प्रदक्षिणया कृष्ण! ब्रह्माण्डानां प्रदक्षिणा ।।४६।। उद्धारणाय सर्वेषां प्रादुर्भूतं धरातले । श्रीभागवतरूपं त्वां श्रीकृष्णं प्रणमाम्यहम् ।।४७।। निजकर्मविपाकेन भवाब्धौ पतितोऽस्म्यहम्। तं मामुद्धर देवेश! कृपया करुणानिधे ! ।।४८।। श्रीमद्भागवताख्यस्त्वं प्रत्यक्षः कृष्ण एव हि । मयि त्वच्छरणायाते कृपां कुरु जगत्पते! ।।४९।। इत्थं सम्पूज्य विधिना कृष्णं भागवतात्मकम् । वक्तारं पूजयेद्भक्त्या गन्धपुष्पस्त्रगादिभिः ।।५०।। नवीनवस्त्राभरणैर्दत्त्वा सम्पूज्य दक्षिणाम् । ततः पूर्वोक्तमन्त्रेण नत्वा तं प्रार्थयेत्पुमान् ।।५१।। व्यासरूप ! प्रबोधज्ञ! सर्वशास्त्रविशारद! । एतत्कथाप्रकाशेन मदज्ञानं विनाशय ।।५२।। सम्प्रार्थ्य पौराणिकमित्थमन्यान् श्रोतॄंश्च विप्रान्स यथार्हमर्चेत्। श्रोता स्वकीयैर्नियमैरुपेतः शृणोतु भूपाल! पुराणमेतत् ।।५३।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे श्रीमद्भागवतश्रवणविधौ पूजाविधिनिरूपणनामा चतुर्थोऽध्यायः

---

હે ભૂપાળ ! આ પ્રકારે પુરાણવક્તાની પ્રાર્થના કરી પોતાના નિયમોથી યુક્ત શ્રોતા બીજા શ્રોતા બ્રાહ્મણોની યથાયોગ્ય પૂજા કરે પછી આ પુરાણ સાંભળે. (૫૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણશ્રવણોત્સવે શ્રીમદ્‌ભાગવતશ્રવણવિધૌ પૂજાવિધિનિરૂપણનામા ચતુર્થોઽધ્યાયઃ (૪)*

## અધ્યાય : ૫

**શ્રીમદ્‌ભાગવતનાં વક્તાના લક્ષણો અને નિયમો સહિત વિરામમાં નિષેધ કરેલા અધ્યાયો કહેલા છે.**

**શ્રીનારાયણ મુનિ બોલ્યા :** હે રાજન્ ! હવે શ્રોતા અને વક્તાના હિત કરનારા જે નિયમો પુરાણોમાં પ્રસિદ્ધ છે તે નિયમોને હું યથાર્થપણે કહું છું. (૧) વાંચનારા (વક્તા) અને શ્રોતાઓ સત્ત્વાદિ ગુણોના ભેદથી ત્રિવિધ પ્રકારના માનેલા છે. તેમાં સાત્ત્વિકો જ ઉત્તમ છે અને શાસ્ત્રોક્ત ફળને પ્રાપ્ત કરનારા છે. (તેમાં વક્તા અને શ્રોતાઓના નિયમો, અને ગુણભેદથી ત્રણ પ્રકાર અનુક્રમે કહેવાય છે.) (૨)

**તામસ વક્તાના લક્ષણો :-** સંગતિ વિના, સ્પષ્ટાર્થથી રહિત, બહુ વિસ્તારવાળું, વીર-કરુણાદિ રસે રહિત, પદોના છેદથી રહિત, શ્લોકમાં આવેલા સ્પષ્ટાર્થનો ભાવ કહ્યા વગર, ઉત્સાહથી રહિત જેમ હોય તેમ વાંચનાર પુરાણી વાંચે, અને યથાર્થ બોધ નહીં હોવાથી પોતાના મનમાં આવે તેમ કહેવાથી ગ્રન્થને દૂષણ પમાડનાર, ક્રોધ કરનાર, કઠોર અક્ષરો બોલનાર, સ્ત્રીઓની સામું દૃષ્ટિ કરતો થકો જે કથા વાંચે, ગ્રન્થના અર્થને સારી રીતે નહીં જાણનાર-ભગવાનની ભક્તિ રહિત કથા વાંચનાર તમોગુણપ્રધાન જાણવો અને તે અધમ કહેલો છે. (૩-૪-૫)

**રાજસ વક્તા :-** ક્યારેક શ્લોકોનાં પદોને સ્પષ્ટાક્ષરોથી ઉચ્ચારણ કરે (ક્યારેક તેનાથી રહિત એમ પણ જાણવું)- કદાચિત્ શાંત (ક્યારેક મૃદુતાએ રહિત) તથા અતિ ઊંચા સ્વર યુક્ત-ક્યારેક સમય પ્રમાણેનાં સારંગાદિ સ્વરોથી યુક્ત- રસભાવથી રહિત, અસંગત જેમ હોય તેમ, જે વાંચનાર વાંચે અને ક્યારેક લોભી, કયારેક ક્રોધી, રસાસ્વાદમાં અને વસ્ત્રાલંકાર ધારવામાં પ્રીતિવાળો, જે વાચક ભગવાનનો ભક્ત હોય તો પણ ગ્રન્થના અર્થને યથાર્થ પણે નહીં જાણનાર તે વાચક તો રજોગુણ પ્રધાન જાણવો અને તે મધ્યમ કહેલો છે. (૬ થી ૮)

**સાત્ત્વિક વક્તા :-** વર્ણન કરવામાં જે જે સ્થાનમાં હાસ્ય-અદ્‌ભુત વગેરે રસોએ સહિત, યથાયોગ્ય સ્વરે સહિત, ધીરજતા સહિત, તેતે ભાવે સહિત-સ્પષ્ટ અક્ષરભેદે સહિત, ઉત્સાહ-પૂર્વક, અતિ વિસ્તારે રહિત, શાંતપણે જેમ હોય તેમ

॥४॥

श्रीनारायणमुनिरुवाच – **अथ ये नियमा राजन्! श्रोतृवक्तृहितावहाः । कथयामि यथावत्तान्पुराणप्रथितानहम् ॥१॥ गुणभेदाद्वाचकाश्च श्रोतारस्त्रिविधा मताः । उत्तमाः सात्त्विका एव यथोक्तफलभागिनः ॥२॥ असङ्गतमविस्पष्टं विस्तरं रसवर्जितम् । पदच्छेदविहीनं च तत्तद्भावविवर्जितम् ॥३॥ उत्साहवर्जितं यश्च वाचयेद्ग्रन्थदूषकः । क्रोधनोऽप्रियवादी च लोभिष्टः स्त्रीसमीक्षकः ॥४॥ सम्यग्ग्रन्थार्थमविदन्भगवद्भक्तिवर्जितः । वाचकस्तामसो ज्ञेयः स चाधम इतीरितः ॥५॥ स्पष्टाक्षरपदं शान्तं क्वचिद्दीर्घतरं तथा । कालस्वरसमायुक्तं रसभावविवर्जितम् ॥६॥ अद्भुतं वाचयेद्यश्च लुब्धः क्रुद्धः क्वचित्क्वचित्। प्रीतिमांश्च रसास्वादे वस्त्रालङ्कारधारणे ॥७॥ अबुध्यमानो ग्रन्थार्थं भक्तो भगवतोऽपि सन् । वाचकः स तु विज्ञेयो राजसो मध्यमश्च सः ॥८॥ सरसं सुस्वरं धीरं तत्तद्भावसमन्वितम् । स्पष्टाक्षरविभेदं च सोत्साहं नातिविस्तृतम् ॥९॥ शान्तं च वाचयेद्यस्तु श्रद्धालुर्दृढनिश्चयः । सम्प्रदायाध्ययनवान् ग्रन्थार्थं कृत्स्नशो विदन् ॥१०॥ जितेन्द्रियः सुशीलश्च दुराग्रहविवर्जितः । यथार्थवादी वाग्मी च श्रोतृबोधननैपुणः ॥११॥ यदृच्छालाभसन्तुष्टः करुणो निरहङ्कृतिः । मृदुस्वभावः शान्तश्च भगवद्भक्तिसंयुतः ॥१२॥ लोकापवादरहितः प्रतिग्रहपराङ्मुखः । जितकामो जितक्रोधो जितलोभश्च निःस्पृहः ॥१३॥ मैत्रो धीरः साधुवृत्तिर्निर्दम्भोऽकिञ्चनस्तथा । उपकारी वाचकस्तु सात्त्विकश्चोत्तमो मतः ॥१४॥ सात्त्विकैर्लक्षणैर्युक्तः श्रीभागवतवाचकः । प्रत्यहं स्वाह्निकं कुर्यादुषस्युत्थाय बुद्धिमान् ॥१५॥ ततः श्रोतृभिराहूतः स कथामण्डपं व्रजेत् ।**

---

જે વક્તા વાંચે અને જે શ્રદ્ધાવાળો, દ્રઢ નિશ્ચયવાળો, સંપ્રદાયના અધ્યયનવાળો, સંપૂર્ણપણે ગ્રંથના અર્થને જાણનાર અને જે જિતેન્દ્રિય, સારા સ્વભાવવાળો, સારી વર્તણૂકવાળો, દુરાગ્રહથી રહિત, સત્યાર્થ કહેનાર, શાસ્ત્રને અનુસરીને પ્રત્યુત્તર આપનાર, શ્રોતાઓને બોધ આપવામાં પ્રવીણ, અને જે દૈવઈચ્છાથી પ્રાપ્ત થયેલાથી સંતોષી, દયાળુ, અહંકારે રહિત, કોમળ પ્રકૃતિવાળો, શાન્ત ભગવાનની ભક્તિયુક્ત અને જે લોકાપવાદથી રહિત, પ્રતિગ્રહ નહિ લેનારો; કામક્રોધ અને લોભને જીતનારો, સ્પૃહાએ રહિત અને જે મિત્રભાવ યુક્ત મહાધીરજવાળો, સારા આચારવાળો, કપટે રહિત,અકિંચન, ભગવાન વિના બીજા કોઈને પણ અધિક નહિ માનનારો તથા પરોપકારી વક્તા તો સત્ત્વગુણપ્રધાન અને ઉત્તમ માનેલો છે. (૯ થી ૧૪) સાત્ત્વિક લક્ષણો યુક્ત બુદ્ધિમાન શ્રીમદ્‌ભાગવતનો વક્તા દરરોજ પ્રાતઃકાળમાં ઊઠીને પોતાનો સ્નાન-સંધ્યાદિક આહ્નિક-વિધિ કરે. (૧૫) પછી વાંચનાર, (વક્તા) શ્રોતાઓએ બોલાવેલા સતા કથા-મંડપમાં જાય પછી હાથ-પગ મુખ ધોઈ ને ત્રણ વાર આચમન કરે. (૧૬) ધોયેલા શ્વેત વસ્ત્રને ધારણ કરનાર, પોતાના મનમાં પોતાને વૈષ્ણવી દીક્ષા આપનાર સદ્‌ગુરુ (આચાર્ય)ને ચિંતવન કરતો વક્તા બ્રાહ્મણો અને સાધુઓને નમસ્કાર કરી શ્રીમદ્‌ભાગવતને નમસ્કાર કરે. (૧૭) પછી વિનયવાન વક્તા પોતાના પૂજ્ય ગુરુ વગેરેની આજ્ઞાથી ઉત્તર દિશા તરફ મુખથી અથવા પૂર્વ મુખે વ્યાસાસન ઉપર બેસે. (૧૮) પછી શ્રોતાઓએ પૂજેલા વક્તા મંગલાચરણ કરે 'यं प्रव्रजन्तम्', 'यः स्वानुभावं' તથા 'नारायणं नमस्कृत्य' આ ત્રણ શ્લોક બોલે. (૧૯) વળી 'कस्मै येन' આ શ્લોક બોલીને પછી પોતાના ઈષ્ટદેવનાં ગુણચરિત્રોના શ્લોકો બોલીને શ્રીમદ્‌ભાગવત પુસ્તકને નમસ્કાર કરી પછી આ શ્લોક બોલે. (૨૦) હે દેવ ! હે દેવેશ ! હે નારાયણ ! હે જગત્પતે ! સાંભળો. તમારા સ્વરૂપ ગુણ-ચરિત્રોના સ્મરણના અવધાનથી શુભ કથા કહીશ. (૨૧) આ પ્રમાણે શ્લોક બોલીને જ બુદ્ધિમાન પુરાણી કથા વાંચે, સાધુઓ અને વિપ્રોને સન્મુખ જોઈને જ શ્લોકનો અર્થ કરે. શ્રવણ માટે આવેલી સ્ત્રીઓને જોઈને અર્થ કરે નહિ. (૨૨) હે રાજન્ ! જે અધ્યાયના અન્તમાં કથાની સમાપ્તિ અર્થાત્ જે વાંચ્યા પછી તે કથા વાંચવાની ના હોય તે અધ્યાયો મુનિઓએ પ્રમાણ કરેલા ના હોય તો તે તે અધ્યાયોના અન્તમાં સમાપ્તિ ના કરવી. વિશ્રામમાં નિષેધ કરેલા અધ્યાયોને પણ તમોને કહું છું. (૨૩) શ્રીમદ્‌ભાગવતના પ્રથમ સ્કંધમાં પ્રથમ, આઠમો, દશમો, ચૌદમો, સોળમો આ અધ્યાયો વિશ્રામમાં નિષેધ કરેલા છે. (૨૪) બીજા સ્કંધમાં ત્રીજો-આઠમો આ બે અધ્યાયો સપ્તર્ષિઓએ વિરામમાં નિષેધ કરેલા છે. (૨૫) હે રાજન્ ! ત્રીજા સ્કંધમાં પ્રથમ, સાતમો, દશમો, અઢારમો તથા તેવીસમો અધ્યાય, આ અધ્યાયોમાં વિશ્રામ કરવો નહિ. (૨૬) ચોથા સ્કંધમાં પ્રથમ, ત્રીજો, દશમો સત્તરમો તથા અઠ્ઠાવીશમો આ અધ્યાયોના અન્તમાં વિશ્રામ; વક્તા અને શ્રોતાઓને શુભ ફળ આપનારા નથી. માટે એમના અન્તમાં વિશ્રાંતિ કરવી નહિ. (૨૭) પાંચમા સ્કંધમાં પાંચમો અને તેરમો આ બે અધ્યાયોના અન્તમાં વિશ્રાંતિ કરવી નહિ. છઠ્ઠા સ્કંધમાં પ્રથમ, પાંચમો,

प्रक्षाल्य पाणिपादास्यं कुर्यादाचमनत्रयम् ॥१६॥ धौतश्वेताम्बरधरः सद्गुरुं हृदये स्मरन् । विप्रान्साधून्नमस्कृत्य श्रीमद्भागवतं नमेत् ॥१७॥ ततः स्वपूज्यगुर्वादेराज्ञया विनयान्वितः । उदङ्मुखः प्राङ्मुखो वा व्यासासनमुपाविशेत् ॥१८॥ श्रोतृभिः पूजितः सोऽथ कुर्यान्मङ्गलमादितः । यं प्रवजन्तमित्यादिश्लोकत्रयमुदीरयेत् ॥१९॥ कस्मै येनेति पद्यं च स्वेष्टपद्यान्यतः परम् । पठित्वा पुस्तकं नत्वा ततः पद्यमिदं पठेत् ॥२०॥ श्रूयतां देव! देवेश! नारायण! जगत्पते! । त्वदीयेनावधानेन कथयिष्ये शुभाः कथाः ॥२१॥ इति पद्यं पठित्वैव वाचयेत्स कथां बुधः । साधून्विप्रान्विलोक्यैव कुर्यादर्थं न योषितः ॥२२॥ समाप्तिरन्तेऽध्यायस्य यस्य यस्य न सम्मता । न तत्र तत्र विरमेदध्यायांस्तानपि ब्रुवे ॥२३॥ तत्राद्ये स्कन्ध आद्यश्च ह्यष्टमो दशमस्तथा । चतुर्दशः षोडशश्च निषिद्धा विरताविमे ॥२४॥ तृतीयश्चाष्टमश्चेति द्वौ द्वितीये निषेधितौ । सप्तर्षिभिस्ततः कार्या तदन्ते विरतिर्नहि ॥२५॥ दशमः सप्तमश्चाद्यस्तृतीये-ऽष्टादशस्तथा । त्रयोविंशश्च विरतौ सम्मता न बुधैर्नृप! ॥२६॥ आद्यस्तृतीयो दशमस्तुर्ये सप्तदशस्तथा । अष्टाविंशश्च नाध्याया विरतौ शुभदा नृणाम् ॥२७॥ पञ्चमे पञ्चमोऽध्यायो निषिद्धश्च त्रयोदशः । षष्ठे षष्ठः पञ्चमश्च प्रथमो दशमस्तथा ॥२८॥ सप्तमे प्रथमस्तुर्यः षष्ठः स्कन्धेऽथ चाष्टमे । आद्योऽष्टमो द्वितीयश्च दशमश्चैकविंशकः ॥२९॥ नवमे पञ्चदशको दशमस्तुर्य आदिमः । अध्याया विरतौ नैते गृहीता मुनिभिर्नृप! ॥३०॥ दशमे दशमश्चाद्यो द्वाविंशो नवमस्तथा । त्रय एकोनत्रिंशाच्च द्विषष्टितम एव च ॥३१॥ षट्सप्ततितमः सप्तसप्ततितम इत्यमी । निषिद्धा विरतौ सन्ति षड्भिः पौराणिकैरपि ॥३२॥ एकादशे तु दशमो द्वाविंशस्त्रिंश एव च । द्वादशे नवमस्त्वेक

---

છઠ્ઠો તથા દશમો આ અધ્યાયોના અન્તમાં વિશ્રાંતિ કરવી નહિ. (૨૮) પછી સાતમા સ્કંધમાં પ્રથમ, ચોથો, છઠ્ઠો આ અધ્યાયો નિષેધ કરેલા છે. અષ્ટમા સ્કંધમાં પ્રથમ, દ્વિતીય, અષ્ટમો, દશમો અને એકવીશમો આ નિષેધ કરેલા છે. (૨૯) હે રાજન્ ! નવમા સ્કંધમાં પ્રથમ, ચોથો, દશમો, પંદરમો, આ અધ્યાયો મુનિઓએ વિશ્રામમાં નિષેધ કરેલા છે. (૩૦) દશમ સ્કંધમાં પ્રથમ, નવમો, દશમો, બાવીસમો, ઓગણત્રીસમો, ત્રીસમો, એકત્રીસમો, બાસઠમો, છોંતેરમો, સિત્તોતેરમો આ અધ્યાયો; **છ પુરાણીઓએ વિશ્રામમાં નિષેધ માનેલાં છે.** (ત્ર્યાઋણ, કશ્યપ, સાવર્ણિ, શિશંપાયન, હારીત આ છ પુરાણીઓ છે.) (૩૧-૩૨) એકાદશ સ્કંધમાં દશમો, બાવીસમો અને ત્રીશમો આ અધ્યાયો નિષેધ કરેલા છે. બારમા સ્કંધમાં કેવળ નવમો અધ્યાય નિષેધ માનેલો છે. આ પ્રકારે વિશ્રામમાં નિષેધ કરેલા અધ્યાયો મેં કહ્યા. (૩૩) આ નિષેધ કરેલા અધ્યાયોના અંતમાં પુરાણીઓએ વિશ્રામ ક્યારેય કરવો નહિ. નિત્ય એક અધ્યાયનો પાઠ કરવાના નિયમવાળાઓએ પણ આ વિધિ કરવાનો છે. જે દિવસે નિષેધનો અધ્યાય આવે ત્યારે તેના અંતમાં વિશ્રામ નહિ કરીને તેના આગલા અધ્યાયમાં વિશ્રામ કરવો. (૩૪) માસ, પક્ષ, ઋતુપારાયણ વગેરેમાં આટલા અધ્યાયો દરરોજ વાંચવા, આવા નિયમવાળા તે અનુસારે પ્રતિદિન અધ્યાયો વાંચે. પછી કથાની સમાપ્તિ કરે. (૩૫) દરરોજ કથાની વિશ્રાંતિમાં બે ઘડી વાર અથવા એક ઘડી સુધી પણ શ્રીકૃષ્ણ ભગવાનનું નામસ્મરણ કરવું, ત્યાર બાદ આસનથી ઉતરવું. (૩૬) વિદ્વાન પુરાણી ફરીથી પોતાના ગુરુઓને નમસ્કાર કરી પોતાને ઘેર જાય. આ પ્રમાણે કથાની સમાપ્તિ સુધી દરરોજ સમાચરણ કરે. (૩૭) પાપથી બીક રાખનાર પુરાણી કથાના આરંભ દિવસથી કથાની સમાપ્તિ સુધી બીજા માણસનું અન્ન તથા ગોદાનાદિ **દાન** ગ્રહણ કરે નહીં. (૩૮) જ્યારે દરરોજ પોતાને જોઈએ તેટલું (પોતાના કુટુંબનું પોષણ થાય તેટલું) અન્ન શ્રોતાઓ આપે નહીં તો શ્રોતા વિના બીજાએ આપેલું અન્ન ગ્રહણ કરે તેમાં દોષ નથી. (૩૯) પુરાણીને બીજાથી અન્ન ન ગ્રહણ કરવા રૂપ વિધિ સપ્તાહ, દશાહ, પક્ષ, તથા માસાદિ પારાયણમાં પણ સમાન જ કહેલો છે. (૪૦) પુરાણીએ ઉદરમાં વાયુ કરે તેવા પદાર્થો ખાવા નહીં. વાત, પિત્ત, કફ વગેરે રોગ કરે તેવા પદાર્થો શાકાદિનું ભોજન કરવું નહીં. તેલ, મરચું વગેરે સ્વરને રોકનારા પદાર્થોનો ત્યાગ કરવો. (૪૧) બ્રહ્મચર્ય તથા અહિંસા, સત્ય, ચોરી ન કરવી; તેનું પાલન કરવું. કથામાં વિઘ્ન કરનારું જે કર્મ હોય તે ક્યારેય પણ કરવું નહીં. (૪૨)

હે રાજન્ ! આ પ્રકારે પુરાણવક્તાનાં લક્ષણો મેં કહ્યાં અને સર્વે નિયમો કહ્યા. હાલમાં શ્રીમદ્ ભાગવતના શ્રોતાજનોનાં લક્ષણો અને તેમને પાલન કરવા યોગ્ય નિયમો તમોને કહીશ. (૪૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણશ્રવણોત્સવે ભાગવતશ્રવણવિધૌ વક્તૃલક્ષણનિયમ-નિરૂપણનામા પંચમોઽધ્યાયઃ (૫)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

इत्यध्याया मयोदिताः ॥३३॥ एषामन्ते न विरतिः कार्या पौराणिकैः क्वचित् । नित्यैकाध्यायपाठानामप्येष विधिरिष्यते ॥३४॥ मासपक्षादिनियतदिनसङ्ख्यानुरूपतः । अध्यायान्वाचयेन्नित्यं ततः कुर्यात्समापनम् ॥३५॥ मुहूर्तं घटिकां वापि कथान्ते नामकीर्तनम् । कुर्यात्प्रतिदिनं विष्णोरुत्तरेदासनात्ततः ॥३६॥ पुनर्नत्वा स गुर्वादीन् गच्छेद्विद्वान्निजं गृहम् । कथासमाप्तिपर्यन्तं नित्यमेवं समाचरेत् ॥३७॥ कथारम्भदिनाद्यावत्समाप्त्यन्यस्य नाऽऽददेत् । अन्नं प्रतिग्रहं वापि पापभीरुः स पण्डितः ॥३८॥ न दद्युः स्वस्य पर्याप्तं श्रोतारः प्रत्यहं यदि । अन्नं तदा त्वन्यदत्तं गृह्णीयान्नात्र पातकम् ॥३९॥ सप्ताहे वा दशाहे च पक्षपारायणे तथा । मासपारायणेऽप्येष विधिस्तस्य प्रकीर्तितः ॥४०॥ वातुलं नैव भुञ्जीत न कुर्याच्चातिभोजनम् । न रोगकृच्च शाकादि तैलं कटु च वर्जयेत् ॥४१॥ ब्रह्मचर्यमहिंसां च सत्यास्तेये च पालयेत् । कथाविघ्नकरं यत्तत्कर्म कुर्यान्न कर्हिचित् ॥४२॥ पुराणवक्तुर्नृपते! मयेत्थं प्रोक्तानि लक्ष्माणि यमाश्च सर्वे । लक्ष्माणि वक्ष्याम्यधुना च तुभ्यं तच्छ्रोतृपुंसां नियमांश्च पाल्यान् ॥४३॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे भागवतश्रवणविधौ वक्तृलक्षणनियमनिरूपणनामा पञ्चमोऽध्यायः ॥५॥

श्रीनारायणमुनिरुवाच – **श्रद्धाभक्तिविहीनो यो लोभिष्ठो दूषकस्तथा । हेतुवादपरो राजन्नभ्यसूयासमन्वितः ॥१॥ वक्त्रे न दक्षिणां दद्यात्पुण्याहे च समापने । अतिप्रश्नांश्च यः कुर्यात्स श्रोता तामसोऽधमः ॥२॥ कथां**

## અધ્યાય : ૬

### શ્રીમદ્ ભાગવતના શ્રવણવિધિમાં શ્રોતાનાં લક્ષણો અને તેના જે નિયમો તે પણ કહ્યા છે.

**શ્રીનારાયણ મુનિ બોલ્યા :** હે રાજન્ ! જે શ્રોતા શ્રદ્ધા અને ભક્તિએ રહિત હોય, સત્પાત્રમાં પણ દ્રવ્યાદિ દાન કરતો ના હોય, ગ્રન્થને દૂષણ આપતો હોય, યુક્તિઓથી ગ્રન્થના અર્થમાં કલ્પિત સંશય કરતો હોય, શ્રોતાના ગુણોમાં દોષ આરોપણ કરતો હોય. (૧) જે શ્રોતા પર્વાદિ પુણ્ય દિવસોમાં અને કથાની સમાપ્તિમાં વકતા પુરાણીને દક્ષિણા આપે નહીં, અતિ પ્રશ્નો કરે, તે શ્રોતા **તમોગુણ પ્રધાન, અધમ** કહેલો છે. (૨) જે શ્રોતાજન શ્રદ્ધા રહિત હોવાં છતાં પણ કથા શ્રવણમાં શ્રદ્ધાવાળા જનોના પ્રસંગથી કથા સાંભળે, સો રૂપિયા આપવાના હોય ત્યાં દસ આપે, પોતાની વિદ્વત્તા બતાવે. અને જે શ્રોતા દાંભિક, બીજાના ઉત્કર્ષને સહન નહિ કરનારો માની, અસ્થિર આસનવાળો, ક્ષણમાં ક્રોધ કરે અને ક્ષણમાં પ્રસન્ન થાય તે શ્રોતા **રજોગુણ પ્રધાન, મધ્યમ** કહેલો છે. (૩-૪) જે શ્રોતા સર્વ કાર્યોને ત્યાગ કરી ભક્તિ અને શ્રદ્ધાથી યુક્ત વિનયથી શ્રીમદ્ ભાગવત પુરાણને નિત્ય સાંભળે; (૫) અને જે શ્રોતા નિત્ય પુરાણ વક્તાની ચન્દનાદિથી પૂજા કરે, સ્કન્ધની સમાપ્તિમાં અને વ્રત-ઉત્સવ તથા પર્વોમાં યથાયોગ્ય દક્ષિણા વક્તાને આપે અને સર્વે શ્રોતાઓનું સન્માન કરે. (૬) જે શ્રોતા મત્સરે રહિત, ભગવાનમાં અતિશય સ્નેહને ઈચ્છનાર, કથા શ્રવણમાં આદરવાળો, એકાગ્ર મને સાંભળે તે શ્રોતા **સત્ત્વગુણ પ્રધાન** અને **ઉત્તમ** કહેલો છે. (૭)

સાત્ત્વિક લક્ષણો યુક્ત શ્રોતા પુસ્તક અને પુરાણીની પૂર્વે કહેલા વિધિથી પૂજા કરી કથા સાંભળે. (૮) શ્રોતા કથા-શ્રવણ સમયે મસ્તક ઉપર પાઘડી વગેરે ધારણ કરે નહિ, અને લાંબા પગ કરીને બેસે નહીં, તથા કથાના સ્થાનથી બીજે જાય નહીં, સોપારી વગેરે ખાય નહીં, પવિત્રતા યુક્ત, મૌનવ્રત રાખીને કથા સાંભળવી. (૯) શ્રોતા વીરાસનથી ન બેસે, આજુબાજુએ જુએ નહિ, પરસ્પર વાર્તા ન કરે, કથામાં એક ચિત્ત રાખીને સાંભળે. (૧૦) કથામાં કોઈ સ્થાનમાં શંકા થાય ત્યારે શ્રોતા વ્યાસને (વક્તાને) નમસ્કાર કરતો ધીમે રહીને પૂછે, કથાની સભામાં હાથ-પગ વગેરેની વારંવાર ચંચળતાનો ત્યાગ કરે. (૧૧) જિતેન્દ્રિય શ્રોતા બ્રહ્મચર્યાદિ નિયમોનું પાલન કરે, સ્કંધની સમાપ્તિ અને ઉત્સવાદિમાં શક્તિ પ્રમાણે વક્તાને દક્ષિણા આપે. (૧૨) હે રાજન્ ! દરેક સ્કંધની સમાપ્તિમાં સો સો બ્રાહ્મણો જમાડવા અને તે બ્રાહ્મણોને શક્તિ પ્રમાણે દક્ષિણા આપવી. (૧૩) દરેક સ્કંધે સો બ્રાહ્મણ જમાડવામાં અશક્ત શ્રોતા તો શ્રીમદ્ ભાગવતની સમાપ્તિમાં સો બ્રાહ્મણોને ઈષ્ટ ભોજનોથી જમાડે અને દક્ષિણાથી સંતોષ પમાડે. (૧૪) કથાના આરંભ દિવસે પ્રથમ ગણપતિને પૂજીને ગાયત્રીના જપ માટે એક બ્રાહ્મણને વરે. (૧૫) તે બ્રાહ્મણ કથાની સમાપ્તિ પર્યન્ત દરરોજ ત્રણ હજાર ગાયત્રી મંત્રનો જપ કરે; તથા બીજા પાંચ વૈષ્ણવ બ્રાહ્મણોની વરણી કરવી. (૧૬) બ્રહ્મચર્યાદિ દઢવ્રતવાળા વૈષ્ણવ પાંચ બ્રાહ્મણોએ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रसङ्गाच्छ्रुणुयाच्छ्रद्धाहीनोऽपि यः पुमान् । दद्याद्दश शतस्थाने स्वपाण्डित्यं च दर्शयेत् ॥३॥ दाम्भिको मत्सरग्रस्तो मानी चाप्यस्थिरासनः ॥ क्षणं रुष्टः क्षणं तुष्टः श्रोता राजसमध्यमः ॥४॥ सन्त्यज्य सर्वकार्याणि भक्तिश्रद्धासमन्वितः । पुराणं शृणुयान्नित्यं विनयेनान्वितश्च यः ॥५॥ वाचकं पूजयेन्नित्यं काले काले च दक्षिणाम् । यथोचितं प्रदद्याच्च श्रोतृन्सर्वांश्च मानयेत् ॥६॥ निर्मत्सरो भगवति प्रेमवृद्धीप्सुरादृतः । शृणुयाच्चैकचित्तो यः स श्रोता सात्त्विकोत्तमः ॥७॥ सात्त्विकैर्लक्षणैर्युक्तः श्रोता पुस्तकवाचकौ । पूर्वोक्तेन विधानेन सम्पूज्य शृणुयात्कथाम् ॥८॥ अनुष्णीषोऽप्रौढपादो न गच्छंश्च स्थलान्तरम् । पूगाद्यनश्नंश्च शुचिर्वाग्यतः शृणुयात्कथाम् ॥९॥ वीरासनेनोपविशेन्न च पश्येदितस्ततः । वार्तां कुर्याच्च नान्योन्यं तदेकाग्रमना भवेत् ॥१०॥ संशये सति वक्तारं पृच्छेच्च शनकैर्नमन् । करपादादिचापल्यं श्रोता कुर्यान्न संसदि ॥११॥ पालयेद्ब्रह्मचर्यादीन्नियमान्विजितेन्द्रियः । स्कन्धान्त उत्सवादौ च दद्याच्छक्त्या च दक्षिणाम् ॥१२॥ स्कन्धे स्कन्धे समाप्ते च विप्रा भोज्याः शतं शतम् । दक्षिणा च यथाशक्ति तेभ्यो देया नराधिप!॥१३॥ अशक्तस्तु पुराणस्य समाप्तौ भोजयेच्छतम् । तदिष्टभोजनैर्विप्रान्दक्षिणाभिश्च तोषयेत् ॥१४॥ कथाप्रारम्भदिवसे सम्पूज्यादौ गणाधिपम् । ब्राह्मणं वरयेदेकं गायत्रीजपहेतवे ॥१५॥ स सहस्त्रत्रयं नित्यं समाप्त्यवधि सञ्जपेत् । वरणीयास्तथा चान्ये ब्राह्मणाः पञ्च वैष्णवाः ॥१६॥ सहस्त्रपञ्चकं नित्यं मन्त्रस्तु द्वादशाक्षरः । वासुदेवस्य सम्प्रीत्यै जप्तव्यस्तैर्दृढव्रतैः ॥१७॥ अन्नवस्त्राणि तेभ्योऽपि दद्यादन्ते च दक्षिणाम् । श्रोतृभ्यश्चापि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणाम् ॥१८॥ मलमूत्रजयार्थं च स्वल्पाहारः सुखावहः । हविष्यान्नेनैकभक्तं श्रोता कुर्यात्ततो नृप ! ॥१९॥ उपवासाः प्रकर्तव्याः सप्ताहे सप्तवासरान् । फलहारमशक्तस्तु

---

શ્રીકૃષ્ણભગવાનની પ્રીતિ માટે દ્વાદશાક્ષર 'ૐ નમો ભગવતે વાસુદેવાય' આ મંત્રના દરરોજ પાંચ હજાર જપ કરવા. (એક એક બ્રાહ્મણે હજાર જપ કરવાથી પાંચ હજારની સંખ્યા પૂરી થાય.) (૧૭) તે બ્રાહ્મણોને પણ અન્ન-વસ્ત્ર આપવાં અને કથાની સમાપ્તિમાં દક્ષિણા આપવી. (૧૮) હે રાજન્ ! મળમૂત્રના જય માટે **સ્વલ્પ આહાર સુખ કરનારો છે.** માટે શ્રોતા હવિષ્યાન્નથી એક વાર ભોજન કરે. ('હવિષ્યાન્ન ડાંગર-જવ-ઘઉં-મગ-તલ, ગાયનું દૂધ - દહીં - ખાંડ - સાકર-સૈન્ધવ (નમક), કેળાં, આમલી, આંબાના ફળ (કેરી), જીરું, સૂંઠ, નાળિયેર, શ્યામો નમાર વગેરે. (૧૯) સાત દિવસના પારાયણમાં ઉપવાસો કરવા, અસમર્થ તો ફળાહાર કરે અથવા દૂધ પાન કરે. (૨૦) અથવા મીઠા વિનાનું ખાય અથવા એક વાર ભોજન કરે. આ પક્ષોમાં જે સુખ સાધ્ય હોય તે શ્રવણ કરનારાએ કરવું. (૨૧) જો અન્નનું ભોજન કથા સાંભળવામાં અનુકૂળ હોય તો ભોજન શ્રેષ્ઠ છે એમ હું માનું છું. જો ઉપવાસ કથા સાંભળવામાં વિઘ્ન કરનારો હોય તો શ્રેષ્ઠ માનેલો નથી. (૨૨) જો વિષ્ણુની સ્થિર પ્રતિમા ના હોય તો કથાના આરંભમાં દરરોજ વક્તાની આગળ અસ્થિર વિષ્ણુની પ્રતિમા સ્થાપન કરે. (૨૩) સાત દિવસના પારાયણમાં સુવર્ણની હરિની પ્રતિમા કરાવે, સાત દિવસ વક્તાની આગળ જ સંસ્થાપન કરી પૂજે. (૨૪) કથાની સમાપ્તિ થાય ત્યારે દક્ષિણા સહિત સુવર્ણની પ્રતિમા પાત્ર બ્રાહ્મણને આપે. આ પ્રમાણે કરવા અસમર્થ તો ઘટે તે પ્રમાણે યથાશક્તિ કરે. (૨૫) આ સપ્તાહમાં પ્રાતઃ સમયે આરંભ કરવો. **સાડાત્રણ પહોર કથા વાંચવી** તેમાં બપોરે બે ઘડી વિશ્રાંતિ કરવી. (૨૬) મધ્યાહ્નમાં પુરાણી (વક્તા) વિશ્રાંતિ કરે ત્યારે શ્રોતાજનોએ બે ઘડી સુધી શ્રીકૃષ્ણ ભગવાનનું નામસંકીર્તન કરવું. (૨૭) શ્રી ભાગવતની સમાપ્તિ થાય ત્યારે શ્રીકૃષ્ણ ભગવાને અર્જુનને કહેલી ગીતા અર્થ સહિત અથવા મૂળ માત્રનું શ્રવણ કરવું, જે સર્વે અર્થની પૂરનારી છે. (૨૮) સમાપ્તિને દિવસે સંપત્તિ પ્રમાણે મુખ્ય શ્રોતાએ મહાપૂજા કરવી. (૨૯) મુખ્ય શ્રોતા નવીન રેશમી વસ્ત્રો, કુંડલો, કડાં વગેરે આભૂષણો અને સહસ્ત્ર સુવર્ણ દક્ષિણા આપે. (સોળ માષાનો એક સુવર્ણ જાણવો.) (૩૦) આ પ્રમાણે કરવા અસમર્થ શ્રોતા તો એક સો આઠ સુવર્ણો આપે, તેમાં પણ અશક્ત હોય તો પોતાની શક્તિ પ્રમાણે ધન આપે. (૩૧) બીજા શ્રોતા પણ શક્તિ પ્રમાણે વસ્ત્ર, અલંકારો અને દક્ષિણા આપે. અથવા ગૃહસ્થ ધર્મને ઉપયોગી જે કંઈ પણ વસ્તુઓ આપે. (૩૨) અલ્પ વિત્તવાળા શ્રોતાઓ વક્તાને જુદી જુદી દક્ષિણા આપે. સુવર્ણમાષ અથવા રૂપિયો આપે, એમ સપ્ત ઋષિઓએ કહ્યું છે. (૩૩) પછી મુખ્ય શ્રોતા મંત્ર બોલીને પલના માપવાળા સુવર્ણના સિંહને પૂજીને વક્તાને જ આપે. (૩૪) તેના **દાનનો મંત્ર** કહે છે : 'મહાવનો-સાધારણ વનો-દુર્ગમ માર્ગોમાં તથા ચોર સર્પોવાળા માર્ગમાં સિંહદાનના પ્રભાવથી હિંસક પ્રાણીઓ મને મારે

कुर्याद्वापि पयः पिबेत् ॥२०॥ अद्यान्निर्लवणं वान्नमेकभक्तं च वा चरेत् । सुखसाध्यं भवेद्यत्तत्कर्तव्यं श्रवणार्थिना ॥२१॥ भोजनं तु वरं मन्ये कथाश्रवणकारकम् । नोपवासो मतः श्रेष्ठः कथाविघ्नकरो यदि ॥२२॥ स्थिरा तु प्रतिमा विष्णोर्यदि न स्यात्तदा चलाम् । अग्रे संस्थापयेद्वक्तुः कथारम्भे दिने दिने ॥२३॥ सौवर्णीमेव सप्ताहे कारयेत्प्रतिमां हरेः । संस्थाप्य पूजयेन्नित्यं तत्रैव दिनसप्तकम् ॥२४॥ कथासमाप्तौ तां दद्याद्ब्राह्मणाय सदक्षिणाम् । अशक्तस्तु यथाशक्ति विधिं कुर्यात्समाहितः ॥२५॥ प्रातः कार्यः कथारम्भः सार्धयामत्रयावधि । वाच्यात्र विरतिः कार्या मध्याह्ने घटिकाद्वयम् ॥२६॥ पौराणिके तु विश्रान्ते मध्याह्ने श्रोतृभिर्नरैः । नामसङ्कीर्तनं कार्यं मुहूर्तं रुक्मिणीपतेः ॥२७॥ समाप्ते श्रीभागवते गीता भगवतोदिता । सहार्था संहिता वापि श्रव्या सर्वार्थपूरिका ॥२८॥ समाप्तिदिवसे कार्या महापूजा यथाधनम् । सर्वेऽपि श्रावकाः कुर्युर्वक्तुः पूजां यथोचितम् ॥२९॥ नूत्नकौशेयवस्त्राणि कुण्डले कटकादि च । दद्याच्छ्रोताग्रिमो वक्त्रे सहस्त्रस्वर्णदक्षिणाम् ॥३०॥ शक्तस्तु सुवर्णानां दद्यादष्टाधिकं शतम् । तत्राप्यशक्तः पुरुषो धनं दद्यात्स्वशक्तितः ॥३१॥ अन्येऽपि शक्तितो दद्युर्वस्त्रालङ्कारदक्षिणाः । गृहस्थधर्मोपयिकं देयं यत्किञ्चिदेव वा ॥३२॥ स्वर्णमाषो रौप्यको वा दक्षिणोक्ता महर्षिभिः । श्रोतृणामल्पवित्तानां वक्त्रे देयाः पृथक् पृथक् ॥३३॥ मुख्यः श्रोता ततो दद्याद्धेमसिंहं पलोन्मितम् । सम्पूज्य वाचकायैव मन्त्रमेनमुदीरयन् ॥३४॥ कान्तारवनदुर्गेषु चोरव्यालाकुले पथि । हिंसका मां न हिंसन्तु सिंहदानप्रभावतः ॥३५॥ असद्गतेश्चापमृत्युसम्भवायाः प्रशान्तये। राजा परीक्षित्प्रददौ हेमसिंहं पुरा नृप! ॥३६॥

---

નહીં.' આ પ્રમાણે ઉચ્ચારણ કરે. (૩૫) હે રાજન્ ! પૂર્વે પરીક્ષિત રાજાએ અપમૃત્યુની સંભાવનાથી અસદ્‌ગતિની નિવૃત્તિ માટે સુવર્ણસિંહ આપ્યો હતો. (૩૬) શીંગડાવાળાં, દાઢ્યોવાળાં (સર્પ, વ્યાઘ્ર ) વગેરે હિંસક પ્રાણીઓના સ્વામી સિંહ જ છે માટે સિંહદાન કરતાઓને અપ-મૃત્યુના સંભવવાળી અસદ્‌ગતિ થાય નહીં. (૩૭) પછી વક્તા-પુરાણીને શ્રેષ્ઠ દૂધવાળી ગાય પ્રયત્નપૂર્વક પણ આપવી, પછી ગાયત્રી મંત્ર અને દ્વાદશાક્ષર મંત્રથી જપના દશાંશથી જ હોમ કરવો. (૩૮) દૂધપાક યુક્ત ઘૃત દ્રવ્યથી હોમ કરે, પછી મનુષ્ય ભૂરાદિ વ્યાહૃતિથી તલ, ડાંગર એ દ્રવ્યોથી હોમ વિધિ પ્રમાણે કરે. (૩૯) જો હોમની અનુકૂળતા ના હોય તો પુરુષ તેના બદલે નિષ્ક્રય-(ખર્ચ થાય તેટલું) ધન આપે. તેથી પણ સંપૂર્ણપણે ફળ પામે. આમાં સંશય રાખવો નહિ. (૪૦) હે રાજન્ ! આ પ્રમાણે શ્રીમદ્ ભાગવતની કથાના શ્રવણમાં વિશેષ તમોને કહ્યો. બીજો પણ વિધિ પૂર્વે કહેલો તમોએ જાણવો. (૪૧)

હે ભૂમિપતે ! આ વિધિથી જે જે મનુષ્યો આ શ્રીમદ્ ભાગવતને સાંભળે છે તે મનુષ્યો પહેલાં કહેલા સર્વ પોતાના અભીષ્ટ ફળને આ લોકમાં અને પરલોકમાં પણ નિશ્ચે પામે છે. (૪૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણશ્રવણોત્સવે ભાગવત શ્રવણવિધૌ શ્રોતૃધર્મનિરૂપણનામા ષષ્ઠોऽધ્યાયઃ (૬)*

## અધ્યાય : ૭

### શ્રીમદ્ ભાગવતનાં લક્ષણોની ઉક્તિપૂર્વક વિસ્તારથી દાનવિધિ કહ્યો છે.

**શ્રીનારાયણ મુનિ કહે છે** : હે રાજન્ ! શ્રીમદ્ ભાગવતના દાનનો વિધિ તમોને કહું છું, જે વિધિથી પૃથ્વીમાં શ્રીમદ્ ભાગવતના દાન કરનારાં જનોને સંપૂર્ણ ફળ થાય. (૧) શ્રી ભાગવતના દાનમાં ભાદરવા માસની પૂર્ણિમા મુખ્ય કાળ કહેલો છે. અથવા સમગ્ર પૂર્ણિમાઓ અથવા વ્રતોત્સવ દિવસોએ પણ તેના દાનના સમયો કહેલા છે. (૨) પ્રથમથી દઢ કાગળ, સ્પષ્ટ અક્ષરવાળું, પરસ્પર નહિ મળેલી પંક્તિવાળું, શ્રીમદ્ ભાગવતનું **પુસ્તક** લખાવે. (૩) નવીન લખાયેલું શ્રીમદ્ ભાગવત પુસ્તક શોધાવીને નવીન યથાયોગ્ય સુંવાળાં પાટિયાં સહિત બાંધણ યુક્ત વસ્ત્રાદિથી બાંધીને સ્થાપન કરવું.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शृङ्गिदंष्ट्र्यादिहिंस्त्राणामधिपः सिंह एव हि । अतस्तद्दायिनां न स्याद्दुर्गतिर्ह्यपमृत्युजा ॥३७॥ धेनुं प्रयत्नतो दद्यात्ततो वक्त्रे पयस्विनीम् । दशांशेनैव गायत्र्या होमं कुर्यात्ततः परम् ॥३८॥ द्रव्येण पायसाज्येन ततो व्याहृतिभिर्नरः । तिलव्रीहिद्रव्यहोमं कुर्वीत च यथाविधि ॥३९॥ होमानुकूल्यं न स्याच्चेत्तन्निष्क्रयधनं पुमान्। दद्यात्तेनापि सम्पूर्णं फलं स्यान्नात्र संशयः ॥४०॥ विशेष इति ते प्रोक्तः श्रीमद्भागवतश्रुतौ । प्रागुक्तोऽन्योऽपि च विधिर्ज्ञातव्योऽत्र त्वया नृप! ॥४१॥ इत्थं विधानेन पुराणमेतच्छृण्वन्ति ये भूमिपते ! नरास्ते । फलं पुरोक्तं सकलं लभन्ते स्वाभीष्टमत्रापि परत्र नूनम् ॥४२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे भागवतश्रवणविधौ श्रोतृधर्मनिरूपणनामा षष्ठोऽध्यायः ॥६॥

श्रीनारायणमुनिरुवाच – **श्रीमद्भागवतस्याथ विधिं दानस्य वच्मि ते । सम्पूर्णं स्यात्फलं येन भुवि तद्दानकारिणाम् ॥१॥ पौर्णमासी प्रौष्ठपदी मुख्यः कालोऽत्र कीर्तितः । पौर्णमास्योऽखिला वापि व्रतोत्सवदिनान्यपि ॥२॥ पुस्तकं लेखयेदादौ श्रीमद्भागवतस्य तु । दृढपत्रं स्पष्टवर्णमसम्मिश्रितपङ्क्ति च ॥३॥ नवीनं शोधयित्वा तन्नूत्नैः फलकवेष्टनैः । निबध्य स्थापनीयं च लक्षणं तस्य ते ब्रुवे ॥४॥ वेदान्तसूत्रैर्गायत्र्या परब्रह्मनिरूपकैः । यस्यारम्भो भवेज्ज्ञेयं श्रीमद्भागवतं हि तत् ॥५॥ वृत्रासुरवधो यत्र वर्णितः स्यात्सविस्तरम् । यच्च प्रोक्तं शुकेनैव श्रीमद्भागवतं च तत् ॥६॥ अष्टादशसहस्त्राणि श्लोका यस्य च कीर्तिताः । ब्राह्मवाराहपाद्मानां कल्पानां यत्र सत्कथाः ॥७॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ।**

---

શ્રીમદ્ ભાગવતનું **લક્ષણ** તમોને કહું છું. (૪) શ્રીકૃષ્ણ પરમાત્માના સ્વરૂપને પ્રતિપાદક **જન્માદ્યસ્ય યતઃ** ઈત્યાદિ વેદાન્ત સૂત્રોથી અને પરબ્રહ્મના સ્વરૂપ નિરૂપક ત્રિપદી (ગાયત્રી મંત્ર)થી શ્રીમદ્ ભાગવતનો આરંભ થાય. તે શ્રીમદ્ ભાગવત જાણવું. (૫) જેમાં વૃત્રાસુરનો વધ વિસ્તારે સહિત વર્ણન કરેલ હોય અને શુકદેવે કહેલું તે શ્રીમદ્ ભાગવત જાણવું. (૬) જેના અઢાર હજાર શ્લોકો કહેલા છે, જે ભાગવતમાં બ્રહ્મકલ્પ શ્વેતવરાહકલ્પ અને પદ્મકલ્પની-બ્રહ્માના દિવસોની સુંદર કથાઓ કહેલી છે. (૭) જે આદિ મધ્ય અને અન્તમાં વૈરાગ્યનાં આખ્યાનો યુક્ત શ્રીકૃષ્ણનાં લીલાચરિત્રો જેમાં છે એવી કથાઓના સમૂહોરૂપી અમૃતથી આનંદિત કર્યા છે સાધુઓ જેણે એવા; (૮) હે રાજન્ ! વાસુદેવપરાયણ શ્રીમદ્ ભાગવતને દાનવિધિના દિવસે સુવર્ણના સુંદર સિંહાસન ઉપર સ્થાપન કરે. (૯) પૂર્વે પરીક્ષિત રાજા પુસ્તક માટે સુવર્ણનું-રત્નજડિત; માટે જ અમૂલ્ય મહા સિંહાસન કરાવતા હતા. (૧૦) તે સિંહાસનમાં શ્રીમદ્ ભાગવતને મૂકીને ભગવાન શુકદેવ વાંચીને સાતમે દિવસે શ્વેતદ્વીપમાં ગયા. (૧૧) લોભે રહિત, નિઃસ્પૃહી શુકદેવ તે સ્થાનથી ગયા ત્યારે રાજા પરીક્ષિતે સુવર્ણના બાજોઠ ઉપર રહેલા શ્રીમદ્ ભાગવતની પૂજા કરી. (૧૨) પછી રાજા પરીક્ષિતે શ્રી ભાગવતને કૃપાચાર્યને આપ્યું. સુવર્ણોની એક લાખ દક્ષિણા આપીને પરીક્ષિત વૈકુંઠધામને પામ્યા. (૧૩) એ રીતે પરીક્ષિત રાજાની માફક કરવામાં અશક્ત તો વિત્તશાઠ્ય રહિત થઈને પોતાની શક્તિ અનુસાર સુવર્ણનું સુંદર સિંહાસન કરાવે. (૧૪) અલ્પધનવાળો મનુષ્ય તો ત્રણ પળ સુવર્ણનું પત્ર કરે, તે પત્રમાં પુસ્તક સ્થાપે. (૧૫) અતિ અલ્પધનવાળો પુરુષ અર્ધપળ સુવર્ણનું પત્ર કરે, તેમાં સિંહનું ચિહ્ન કરીને પુસ્તકની સ્થાપના કરે. (૧૬) પછી ઉદાર બુદ્ધિવાળો દાતા પુરુષ ગીત-વાજિંત્રપુરઃસર દાનના મંત્રોથી જેવા પ્રાપ્ત થયેલા ઉપહારોથી પુસ્તકની પૂજા કરે. (૧૭) પછી ભાગવતનું દાન કરનાર પુરૂષ શ્રીમદ્ ભાગવત ઉપર પ્રેમ રાખનાર, હરિના ભક્ત-પ્રતિગ્રહકર્તા બ્રાહ્મણનું પૂજન કરે. (૧૮) નવીન રેશમી વસ્ત્રો, સુવર્ણ-મોતી વગેરેનાં આભૂષણો અને ચંદન, પુષ્પોના હારોથી પ્રતિગ્રહ કરનાર બ્રાહ્મણનું પૂજન કરી દાતા પુરુષ તે વિપ્રને નમસ્કાર કરે. (૧૯) દાતા પૂર્વમુખે બેસે તથા ગ્રહણ કરનાર ઉત્તર મુખે બેસે પછી દેશ-કાળાદિનું સ્મરણ કરી આગળ કહીશ તે મંત્રો બોલીને દાતા **શ્રીમદ્ભાગવતનું દાન કરે.** (૨૦) અનેક કરોડ જન્મમાં થયેલાં શ્રીકૃષ્ણ ભગવાનની ભક્તિમાં વિઘ્ન કરનારાં મારાં સમગ્ર પાપો આ દાનથી નાશ પામો. (૨૧) વેદ તુલ્ય દિવ્ય શ્રીમદ્ ભાગવત પુરાણ હે શ્રેષ્ઠ બ્રાહ્મણ હું તમોને આપું છું તેનાથી વાસુદેવ ભગવાન પ્રસન્ન થાઓ. (૨૨) આ દાનથી મને શ્રીકૃષ્ણનો વિરહ થાઓ નહીં. અને શ્રીકૃષ્ણના એકાંતિક સાધુઓનો વિયોગ થાઓ નહીં. આનાથી પ્રસન્ન થયેલા શ્રીહરિ મારું ઈચ્છિત આપો. (૨૩) આ પ્રકારે ઉચ્ચાર કરી દાતા શ્રી ભાગવતને આપીને પછી સો સુવર્ણો (સોળ માષા = એક સુવર્ણ) આપે અથવા સો રૂપા મુદ્રા (રૂપિયા) દક્ષિણા આપે.

हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ॥८॥ वासुदेवपरं तद्वै श्रीमद्भागवतं नृप ! । हैमे सिंहासने रम्ये स्थापयेद्दानवासरे ॥९॥ पुरा राजा परीक्षित्तु हैमं सिहासनं महत् । अमूल्यं रत्ननिचितं पुस्तकार्थमचीकरत् ॥१०॥ श्रीमद्भाभागवतं तस्मिन्निधाय भगवाञ्छुकः । वाचयित्वा सप्तमेऽह्नि श्वेतद्वीपं जगाम ह ॥११॥ निर्लोभे निःस्पृहे तस्मिञ्छुकदेवे गते ततः । आनर्च हेमपीठस्थं तच्छ्रीभागवतं नृपः ॥१२॥ कृपाचार्याय तत्प्रादात्ततो राजा च दक्षिणाम् । लक्षमेकं सुवर्णानां दत्त्वा वैकुण्ठमाप सः ॥१३॥ तथा कर्तुमशक्तस्तु स्वस्य शक्त्यनुसारतः। हैमं सिंहासनं रम्यं कारयेच्छाठ्यवर्जितः ॥१४॥ कुर्याद्धैमं पत्रमेकमल्पवित्तस्तु मानवः । पलत्रयोन्मितं तत्र पुस्तकं स्थापयेत्तु तत् ॥१५॥ कुर्यादत्यल्पवित्तस्तु पलार्धस्वर्णपत्रकम् । सिंहचित्रं तत्र कृत्वा स्थापयेत्पुस्तकं पुमान् ॥१६॥ ततः पूर्वोदितैर्मन्त्रैर्गीतवाद्यपुरःसरम् । उपचारैर्यथालब्धैः पूज्येत्तदुदारधीः ॥१७॥ ततः प्रतिग्रहीतारं पूजयेद्ब्राह्मणं नरः । श्रीमद्भागवतस्निग्धं हरेर्भक्तं जितेन्द्रियम् ॥१८॥ वस्त्रैर्नवीनैः कौशेयैः स्वर्णमुक्तादिभूषणैः । गन्धपुष्पोपहारैस्तं सम्पूज्य प्रणमेत्पुमान् ॥१९॥ निषीदेत्प्राङ्मुखो दाता ग्रहीतोदङ्मुखस्तथा । सङ्कल्प्य दद्यात्तदथो मन्त्रानेतानुदीरयन् ॥२०॥ अनेककोटिजन्मोत्थं कृष्णभक्त्यन्तरायकृत् । दुरितं नाशामायातु दानेनानेन मेऽखिलम् ॥२१॥ श्रीमद्भागवतं दिव्यं पुराणं वेदसम्मितम् । ददामि विप्रवर्याय वासुदेवः प्रसीदतु ॥२२॥ मास्तु कृष्णवियोगो मे मा वियोगोऽस्तु तत्सताम् । दानेनानेन सुप्रीतो हरिर्दत्तां मदीप्सितम् ॥२३॥ इत्युच्चार्य स तद्दत्त्वा ततो दद्याच्च दक्षिणाम् । सुवर्णानां शतं वापि शतं वा रूप्यमुद्रिकाः ॥२४॥ अष्टादश द्वयं वापि शक्त्या दद्यात्तु दक्षिणाम् ।

---

(૨૪) અથવા અઢાર સુવર્ણો અને રૂપિયા બંને શક્તિ પ્રમાણે આપે. (અર્થાત્ અઢાર સુવર્ણ આપે અથવા તેટલી શક્તિ ના હોય તો અઢાર રૂપિયા આપે.) પછી દક્ષિણાને અનુરૂપ બ્રાહ્મણોને જમાડે. (૨૫) જે પુરુષ આ વિધિથી ભાગવત આપે, તે પુરુષ અતિ પ્રકાશયુક્ત વિમાન દ્વારા **વૈકુંઠને પામે છે.** (૨૬) ત્યાં વૈકુંઠમાં મનને ઈચ્છિત સર્વે ભોગો પામે છે. શ્રીમદ્ ભાગવતના દાનકર્તા પુરુષને શ્રીકૃષ્ણની પ્રસન્નતાથી કંઈ પણ અપ્રાપ્ય નથી. (૨૭) અપુત્ર શ્રી ભાગવત દાનથી પુત્ર પામે, નિર્ધન ધન પામે, વિદ્યાર્થી વિદ્યા પામે. (૨૮)

હે રાજન્ ! આ પ્રકારે શાસ્ત્ર દ્વારા દર્શાવેલો ભાગવતનો દાન-વિધિ મેં તમોને કહેલો છે, જે ભાગવત દાનનો વિધિ આચરણ કરનારા પુરુષોને આ ભૂલોકમાં અને પરલોકમાં દુર્લભ કોઈ પણ ઈચ્છા બાકી રહેતી નથી. (૨૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે પુરાણશ્રવણોત્સવે શ્રીમદ્ ભાગવતદાન વિધિનિરૂપણનામા સપ્તમોઽધ્યાયઃ (૭)*

## અધ્યાય : ૮

### શ્રી ભક્તિધર્મના પુત્ર શ્રીહરિએ શ્રીમદ્ ભાગવતની પુરશ્ચર્યાનો વિધિ સ્પષ્ટપણે નિરૂપણ કર્યો છે.

**શ્રીનારાયણ મુનિ બોલ્યા :** હે રાજર્ષે ! હવે શ્રીમદ્ ભાગવતનો પુરશ્ચરણવિધિ કહું છું, જેનાથી ચાર પુરુષાર્થની સિદ્ધિ થાય છે. (૧) જે પુરુષ દરરોજ અર્ધો શ્લોક અથવા શ્લોકનું પાદ માત્ર ભાગવત જાણે તે પુરુષ પણ સંસારથી મુક્ત થાય છે. સમગ્ર ભાગવતનો પાઠ કરનાર **સંસારથી મુક્ત થાય** તેમાં કહેવું જ શું ? (૨) પ્રતિદિન આદરપૂર્વક શક્તિ પ્રમાણે **ભાગવતનો પાઠ કરે, તે જ** બુદ્ધિવાળા પુરુષોની **બુદ્ધિ છે. જે બુદ્ધિથી સંસારનો નાશ થાય.** (૩) નિત્ય પાઠ કરવામાં અશક્ત પુરુષ માસમાં અથવા વર્ષમાં એક વાર પણ નિયમોને પાલન કરતા સતા ભક્તિથી શ્રીમદ્ ભાગવતનો પાઠ કરે. (૪) શક્તિમાન પુરુષ તો એક દિવસમાં જ પાઠ કરે અથવા બે દિવસથી પાઠ કરે અથવા ત્રણ દિવસોથી પાઠ કરે અથવા પાંચ દિવસો અથવા છ દિવસો અથવા સાત દિવસોથી પાઠ કરે.(૫) અથવા જે પુરુષો દસ દિવસો અથવા પંદર દિવસો અથવા માસથી અથવા બે માસથી પણ ભાગવતનો પાઠ કરે તે ભુક્તિ અને મુક્તિને પામે છે. (૬) આ પક્ષોમાં સાત દિવસોથી પારાયણરૂપ પક્ષ ઉત્તમ છે તે ઘણાં જનોએ માનેલો છે. આ સપ્તાહ પક્ષ જ સકામ અથવા નિષ્કામ જનોએ પણ સ્વીકાર કરેલો છે. (૭) **સપ્તાહમાં દરરોજ વાંચવાના અધ્યાયોની** જમદગ્નિ મુનિએ કહેલી સુખકારી **સંખ્યા** તમોને કહું છું. (૮) પહેલા દિવસે અડતાલીશ અધ્યાયો વાંચવા કહેલા છે, બીજે દિવસે એકાવન અધ્યાયો કહેલા છે. ત્રીજે દિવસે

**दक्षिणायाश्चानुरूपं भोजयेद्ब्राह्मणांस्ततः ॥२५॥ य एतेन विधानेन दद्याद्भागवतं पुमान् । स भास्वता विमानेन वैकुण्ठं प्रतिपद्यते ॥२६॥ मनोभिवाञ्छितांस्तत्र भोगान् प्राप्नोति सर्वशः । नाप्राप्यं विद्यते किञ्चित्तस्य कृष्णप्रसादतः ॥२७॥ अपुत्रः प्राप्नुयात्पुत्रं निर्धनो धनमाप्नुयात् । श्रीभागवतदानेन विद्यां विद्यार्थ्यवाप्नुयात् ॥२८॥ इति दानविधिर्मयोदितस्ते नृपते ! भागवतस्य शास्त्रदृष्टः । यमिहाचरतां न कापि वाञ्छा भुवि चामुत्र च शिष्यते दुरापा ॥२९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे श्रीमद्भागवतदानविधिनिरूपणनामा सप्तमोऽध्यायः ॥७॥

श्रीनारायणमुनिरुवाच - **श्रीमद्भागवतस्याथ पुरश्चर्याविधिं ब्रुवे । यया सिद्ध्यति राजर्षे! पुरुषार्थचतुष्टयम् ॥१॥ श्लोकार्धं श्लोकपादं वा नित्यं भागवतं पठेत् । यः पुमान्सोऽपि संसारान्मुच्यते किमुताखिलम् ॥२॥ एषा बुद्धिमतां बुद्धिर्यद्भागवतमादरात् । नित्यं पठेद्यथाशक्ति यतः स्यात्संसृतिक्षयः ॥३॥**
**अशक्तो नित्यपठने मासे वर्षेऽपि वैकदा । पालयन्नियमान्भक्त्या श्रीमद्भागवतं पठेत् ॥४॥ एकाहेनैव शक्तस्तु द्व्यहेनाथ त्र्यहेण वा । पञ्चभिर्दिवसैः षड्भिः सप्तभिर्वा पठेत्पुमान् ॥५॥ दशाहेनाथ पक्षेण मासेन ऋतुनापि वा । पठेद्भागवतं यस्तु भुक्तिं मुक्तिं स विन्दति ॥६॥ एतेष्वप्युत्तमः पक्षःसप्ताहो बहुसम्मतः । सकामैर्वापि निष्कामैः श्रयणीयः स एव हि ॥७॥ तत्रापि पठनीयानामध्यायानां दिनेदिने । जमदग्निप्रणीतां ते सङ्ख्यां वच्मि सुखावहाम् ॥८॥ अष्टचत्वारिंशदुक्ताः प्रथमेऽह्नि द्वितीयके । एकपञ्चाशदेकोनपञ्चाशच्च तृतीयके ॥९॥ अध्यायाश्च चतुर्थेऽह्नि त्रिपञ्चाशदुदीरिताः । ततश्चैकोनपञ्चाशत् पठनीया हि पञ्चमे ॥१०॥ एकचत्वारिंशदुक्ताः षष्ठेऽध्यायाश्च सप्तमे । चतुश्चत्वारिंशदित्थं वाचनीयाः क्रमेण वै ॥११॥**

---

ઓગણપચાસ અધ્યાયો કહેલા છે. (૯) ચોથે દિવસે ત્રેપન અધ્યાયો કહેલા છે. પાંચમે દિવસે ઓગણપચાસ અધ્યાયો કહેલા છે. (૧૦) છઠ્ઠે દિવસે એકતાલીશ અધ્યાયો કહ્યા છે. સાતમે દિવસે ચુંમાલીશ અધ્યાયો કહ્યા છે. આ પ્રમાણે અનુક્રમથી અધ્યાયો વાંચવા. (૧૧) **પુરશ્ચરણમાં** પોષ માસ વિના સર્વે માસો માનેલા છે. તથા શનિ અને મંગળ વિના સર્વે વારો માનેલા છે. (૧૨) પડવો, ચતુર્થી, અષ્ટમી, ચતુર્દશીનો ત્યાગ કરીને **શ્રીમદ્ ભાગવતના આરંભમાં સર્વે તિથિઓ શુભ** છે. (૧૩) અશ્વિની, રેવતી, પુષ્ય, મૃગશીર્ષ, પુનર્વસુ, અનુરાધા, અભિજીત, સ્વાતિ, રોહિણી, શ્રવણ, ધનિષ્ઠા, શતતારકા. હે રાજન્ ! પુરશ્ચરણ કર્મોમાં આ નક્ષત્રો પુણ્યકારક છે, માટે જ ગ્રહણ કરવાનાં કહ્યાં છે. તે નક્ષત્રોમાં પુરશ્ચરણનો આરંભ કરવો. (૧૪-૧૫) શુભમુહૂર્તમાં પૂર્વે કહેલાં વક્તાનાં લક્ષણયુક્ત, સાત્ત્વિક વાચકનાં લક્ષણોથી યુક્ત પાંચ બ્રાહ્મણોને ધર્મ, અર્થ,કામ અને મોક્ષની સિદ્ધિ માટે વરે. (૧૬) નિત્ય ધારવા યોગ્ય શ્વેત વસ્ત્રો, સુવર્ણની વીંટીઓ, આસનો, જળપાત્રો અને કામળીઓ વરણી કરેલા બ્રાહ્મણોને આપે. (૧૭) પછી વરણી કરેલા બ્રાહ્મણોની સેવામાં બીજા બ્રાહ્મણોને રાખે. વરણી કરેલા બ્રાહ્મણોની સેવામાં રાખેલા બ્રાહ્મણો સ્નાન માટે ઊનું પાણી, અંગમર્દન, પગ ચાંપવા અને રસોઈ આદિક કરે. વસ્ત્રો ધૂએ, વાસણો માંજે, વગેરે સેવા કરે. (૧૮) પ્રસિદ્ધ શિવાદિ દેવમંદિર અથવા હરિમંદિરમાં પુરશ્ચરણનો આરંભ કરવો. (૧૯) હરિમંદિરના અભાવમાં પોતાને ઘેર જ પવિત્ર સ્થાનમાં સુવર્ણની શ્રીકૃષ્ણની પ્રતિમા સ્થાપીને વરણી કરેલા બ્રાહ્મણો દરરોજ નિયમથી વાંચવાના અધ્યાયોનું ઉલ્લંઘન કર્યા વગર પારાયણ કરે. (૨૦) હે રાજન્ ! **એકસો ને આઠ પારાયણોથી જ** શ્રીમદ્ ભાગવતનું **પુરશ્ચરણ** કહેલું છે. (૨૧) વરણી કરેલા બ્રાહ્મણોએ પ્રતિદિન સંખ્યાક્રમથી કહેલા અધ્યાયોમાં જ વિશ્રામ કરવો. સ્પષ્ટ ઉચ્ચારણ જેમ હોય તેમ વાંચવું, કોઈની સાથે ભાષણ કરવું નહિ. (૨૨) વરેલા બ્રાહ્મણોએ પુરશ્ચરણ કરાવનાર સિવાય કોઈ માણસની દક્ષિણા ન ગ્રહણ કરવી. અથવા અન્નવસ્ત્રાદિ પણ ક્યારેય ગ્રહણ ન કરવું. (૨૩) એક એક સપ્તાહ સમાપ્ત થાય ત્યારે એક એક બ્રાહ્મણને જુદી જુદી સાત સુવર્ણની (સોળ માષાનો એક સુવર્ણ કહેવાય.) દક્ષિણા આપે. (૨૪) અથવા એકસો આઠ શ્રીભાગવત પારાયણોના પાઠની સમાપ્તિમાં પુરુષ સંપૂર્ણ દક્ષિણા ભેગી કરી જુદી જુદી આપે. (૨૫) સાત સુવર્ણ આપવા માટે અશક્ત પુરુષ હોય તો વરેલા બ્રાહ્મણોને સાડા ત્રણ સુવર્ણ આપે. અલ્પવિત્તવાળો પોણા બે સુવર્ણ આપે. (૨૬) જે પુરશ્ચરણ કરાવનાર માણસ કનિષ્ઠ દક્ષિણા આપવા પણ અશક્ત હોય તે બ્રાહ્મણને શ્રમ આપે નહિ. પોતાના સામર્થ્ય પ્રમાણે શ્રીભાગવતના પુરશ્ચરણ વિના બીજું



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सर्वे मासा विना पौषं पुरश्चरणकर्मणि । मताः सन्ति तथा वाराः शनिभौमौ विनाऽखिलाः ॥१२॥ आद्याचतुर्थ्यष्टमीश्च विहाय च चतुर्दशीम् । श्रीमद्भागवतारम्भे तिथयोऽप्यखिलाः शुभाः ॥१३॥ अश्विनी रेवती हस्तः पुष्यो मृगपुनर्वसू । अनुराधाभिजित्स्वाती रोहिणी श्रवणात्त्रयम् ॥१४॥ ऋक्षाण्येतानि पुण्यानि ग्राह्याण्यत्रोदितानि वै । पुरश्चर्यासमारम्भः कर्तव्यस्तेषु भूपते! ॥१५॥ शुभे मुहूर्ते वरयेत्पूर्वोक्तैर्वक्तृलक्षणैः । सम्पन्नान्ब्राह्मणान्पञ्च चतुर्वर्गस्य सिद्धये ॥१६॥ श्वेतानि नित्यधार्याणि तेभ्यो वस्त्राणि चोर्मिकाः । हैमीर्दद्याच्चासनानि जलपात्राणि कम्बलान् ॥१७॥ शुश्रूषायां नियुञ्जीत तेषामन्यान्द्विजांस्ततः । उष्णोदकं च पाकादि कुर्युस्ते चाङ्गमर्दनम् ॥१८॥ देवालये प्रसिद्धे वा पुण्यक्षेत्रे पुरातने । पुरश्चरणस्यारम्भः कर्तव्यो हरिमन्दिरे ॥१९॥ स्थापयित्वाथ वा हैमीं श्रीकृष्णप्रतिमां गृहे । कुर्युः पारायणं विप्रा यथानियतमन्वहम् ॥२०॥ अष्टाधिकशतेनैव पुरश्चरणमीरितम् । पारायणानां नृपते! श्रीमद्भागवतस्य हि ॥२१॥ पूर्वोक्ताध्यायपूर्तौ च कार्यैव विरतिश्च तैः । स्पष्टाक्षरं वाचनीयं भाषणीयं न केनचित् ॥२२॥ न वृतैर्ब्राह्मणैर्ग्राह्या दक्षिणान्यस्य कस्यचित् । न चान्नवस्त्राद्यपि वा ग्रहीतव्यं कदाचन ॥२३॥ एकैकस्मिंश्च सप्ताहे समाप्ते सति दक्षिणाम् । सुवर्णसप्तकं दद्यादेकैकस्मै पृथक् पृथक् ॥२४॥ नियतानां संहितानां पाठान्ते वाखिला अपि । एकीकृत्यैव दद्यात्ता दक्षिणास्तु पृथक् पृथक् ॥२५॥ सुवर्णसप्तकं दातुमसमर्थस्तु पूरुषः । दद्यात्तदर्धं विप्रेभ्यस्तदर्धं वाल्पवित्तवान् ॥२६॥ कनिष्ठां दक्षिणां दातुमपि शक्तो न यो भवेत् । स विप्राञ्छ्रमयेन्नैव कुर्यादन्यत्स्वशक्तितः ॥२७॥ विष्णोर्नामसहस्रस्य पुरश्चरणमादरात् । स्वयमेव प्रकुर्वीत तेनाऽऽपच्छान्तिमाप्नुयात् ॥२८॥ पुरश्चरणकर्ताथ दिने यस्मिन्द्विजोत्तमान् । वृणुयात्तद्दिने चासौ

---

સત્કાર્ય કરે. (૨૭) સ્વયં સકામી યજમાન પોતે જ વિષ્ણુ સહસ્રનામ સ્તોત્રનું પુરશ્ચરણ કરે, તેનાથી આપત્તિની શાંતિ થાય. (૨૮) પછી પુરશ્ચરણકર્તા જે દિવસે પુરશ્ચરણ વિધિમાં વક્તા બ્રાહ્મણોની વરણી કરે તે દિવસે પુરશ્ચરણકર્તા ગાયત્રીમંત્ર (દ્વાદશાક્ષર, અષ્ટાક્ષર, ષડક્ષર) વગેરેના જપ માટે બ્રાહ્મણો વરે અને જપનો દશાંશ હોમ કરે, તેના દશાંશથી બ્રાહ્મણોને જમાડે. (ચકારથી તર્પણ માર્જનાદિનું પણ ગ્રહણ કરવું) અહીં એ **ભાવાર્થ** છે : સમર્થ તો મુખ્ય કલ્પથી હોમ કરે. અશક્તને તો જપ - સંખ્યાના દશાંશથી હોમ, તેના દશાંશથી તર્પણ, તેના દશાંશથી માર્જન, તેના દશાંશથી બ્રાહ્મણભોજન શાસ્ત્રાન્તરથી કહેલું જાણવું. (૨૯-૩૦) કશ્યપમુનિએ જ (કાશ્યપ સંહિતામાં) જપ અને હોમની સિદ્ધિ માટે શ્રીમદ્ ભાગવતનો મંત્ર વિભાગ કર્યો છે. (૩૧) હે ભૂપતે ! જો પુરશ્ચરણ કરાવનારની શક્તિ, ધન વ્યયનું સામર્થ્ય હોય ત્યારે તો ભાગવતના મંત્રોથી જ હોમ કરવો. અથવા કશ્યપ મુનિએ વિભાગ કરેલા દશમસ્કંધના મંત્રોથી હોમ કરવો. (૩૨) કેટલાક ઋષિઓએ તો ગાયત્રી મંત્રથી જ હોમ કરવો એમ કહેલું છે. બીજા કેટલાક ઋષિઓએ વાસુદેવના દ્વાદશાક્ષર મંત્રથી હોમ કહેલો છે. (૩૩) હે અનઘ ! આ હોમમાં દૂધપાક અને ઘી હોમવાનાં હુતદ્રવ્ય જાણવાં, હોમની અનુકૂળતા ન હોય તો તેટલા મંત્રનો જપ કરવો. (૩૪) અથવા વરણી કરેલા જ બ્રાહ્મણો હોમ નિમિત્તે શ્રીમદ્ ભાગવતનાં બાર પારાયણો કરે. (૩૫) પુરશ્ચરણના આરંભના દિવસથી સમાપ્તિના દિવસ સુધી યજમાને સહિત વરણી પામેલા બ્રાહ્મણોએ બ્રહ્મચર્ય પાલન કરવું. (૩૬) બ્રહ્મચર્યનું પાલન ના કરે તો શાસ્ત્રમાં કહેલું ફળ થાય નહીં. આવો સિદ્ધાંત છે. બ્રહ્મચર્યવ્રત પાલન કરે તો સર્વ મનોરથો સિદ્ધ થાય છે જ. (૩૭) હે રાજન્ ! આ પ્રકારે મેં **સ્કંદ પુરાણમાં કહેલો ભુક્તિ અને મુક્તિરૂપી ફળ આપનારો પુરશ્ચરણનો વિધિ** સંક્ષેપથી કહ્યો. (૩૮)

હે ભૂમિપતે ! આ પ્રમાણે ભાગવતના શ્રવણ-પુરશ્ચરણાદિનો સમગ્ર વિધિ મેં તમોને કહ્યો. તમો પણ તે શ્રવણાદિની અનુકૂળતા જ્યારે હોય ત્યારે શ્રીમદ્ ભાગવતનું શ્રવણ વગેરે વિધિએ સહિત કરો. (૩૯)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણશ્રવણોત્સવે શ્રીમદ્ ભાગવત પુરશ્ચરણવિધિ નિરૂપણનામાષ્ટમોऽધ્યાયઃ (૮)*

## અધ્યાય : ૯

**સ્વયં શ્રીહરિએ શ્રીમદ્ ભાગવતાદિ સત્શાસ્ત્રોનું શ્રવણ તથા વક્તાનું સન્માન કર્યું તે કહેલું છે.**

गायत्र्यादिजपाय च ॥२९॥ पूर्ववद्वृणुयाद्विप्रान् जपस्य च दशांशतः । होमं कुर्याद्ब्राह्मणांश्च भोजयेत्तद्दशांशतः ॥३०॥ कृतो मन्त्रविभागोऽस्ति श्रीमद्भागवतस्य तु । कश्यपेनैव मुनिना जपहोमादिसिद्धये ॥३१॥ तैरेव मन्त्रैर्होतव्यं कर्तुः शक्तिर्भवेद्यदि । दशमस्कन्धमन्त्रैर्वा विभक्तैस्तेन भूपते! ॥३२॥ होमं केचित्तु गायत्र्या मन्त्रेणैवर्षयोऽवदन् । द्वादशाक्षरमन्त्रेण वासुदेवस्य केऽपि च ॥३३॥ पायसं च घृतं ज्ञेयं होमद्रव्यमिहानघ!। होमानुकूल्याभावे तु तावान्मन्त्रजपो मतः ॥३४॥ पारायणानि कुर्वीरन् श्रीमद्भागवतस्य वा । होमार्थानि द्वादशैव त एव ब्राह्मणा वृताः ॥३५॥ पुरश्चर्यारम्भदिनात्समाप्तिदिवसावधि । पालनीयं ब्रह्मचर्यं विप्रैः सयजमानकैः ॥३६॥ यथोक्तं तु फलं न स्यादन्यथेत्यस्ति निश्चयः । तस्मिंस्तु पालिते सर्वे सिद्ध्यन्त्येव मनोरथाः ॥३७॥ इति सङ्क्षेपतः प्रोक्तः पुरश्चर्याविधिर्मया । राजन्! स्कन्दपुराणोक्तो भुक्तिमुक्तिफलप्रदः ॥३८॥

इति भागवतस्य ते मया निखिलं भूमिपते ! विधानमुक्तम् । त्वमपि श्रवणादि तस्य कुर्याः सह तेनैव यदा तदानुकूल्यम् ॥३९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे श्रीमद्भागवतपुरश्चरण-विधिनिरूपणनामाष्टमोऽध्यायः ॥८॥

सुव्रत उवाच - **इति श्रुत्वा भगवतो वाक्यं राजा स उत्तमः । प्रहृष्टमानसो भूप ! प्रणनाम तमीश्वरम् ॥१॥**

---

**સુવ્રત મુનિ બોલ્યા,** હે પ્રતાપસિંહ રાજન્ ! આ પ્રકારે શ્રીહરિનું વાક્ય સાંભળી ઉત્તમનૃપે પ્રસન્ન અંતઃકરણપૂર્વક શ્રીહરિને પ્રણામ કર્યા. (૧) વળી, સ્વયં ઉત્તમરાજા દેશકાળની અનુકૂળતા હોવાથી શ્રીમદ્ ભાગવતનું પુરશ્ચરણ ઉત્તમ બ્રાહ્મણો દ્વારા કરાવવા ઈચ્છતા હતા. (૨) પછી આ (પૂર્વોક્ત) પ્રમાણે ઉત્તમરાજાને કહ્યા પછી ભગવાન શ્રીહરિ નીલ, પીત, લાલ વગેરે નાના પ્રકારના રંગોથી રંગાયેલા વસ્ત્રો અને કેળના થાંભલાઓથી અત્યંત શોભાયમાન મંડપ ત્યાં કરાવતા હતા. (૩) પછી બીજે દિવસે માગશર સુદી સપ્તમીને દિવસે પ્રાતઃકાળમાં નિત્યવિધિ થકી પરવારીને મંડપમાં રમણીય વ્યાસાસન કરાવતા હતા. (૪) પ્રયાગજી પુરાણીને પાર્ષદો દ્વારા બોલાવડાવીને પુરાણીને વ્યાસાસન ઉપર બેસાડીને પુસ્તકની પૂજાપૂર્વક શ્રીહરિએ પુરાણીની પૂજા કરી. (૫) શ્રીહરિ કથાના આરંભમાં અમૂલ્ય રેશમી સૂક્ષ્મ નવીન વસ્ત્રો પુરાણીને આપતા હતા. (૬) પ્રભુ શ્રીહરિ સુવર્ણનાં કુંડળો, કડાં અને શુભ સોનાની વીંટીઓ આપતા હતા. પછી પુરાણનો આરંભ કરાવતા હતા. (૭) હે રાજન્ ! કથા શ્રવણ કરવાનાં આચારમાં નિષ્ઠાવાળા રામપ્રતાપ અને ઈચ્છારામ શ્રીહરિના બન્ને ભાઈઓ શ્રીહરિની સમીપમાં યથાયોગ્ય આસનો ઉપર બેઠા. (૮) સોમવર્મા વગેરે પાર્ષદો, ઉત્તમ વગેરે રાજાઓ અને મુકુંદાદિ વર્ણીઓ કથાની સભામાં યથાયોગ્ય બેસતા હતા. (૯) મુક્તાનંદાદિ મુનિઓ તે સભામાં બેઠા હતા. અને જયા, રમા વગેરે સ્ત્રીઓ સભાના એક પ્રદેશમાં બેઠાં હતા. (૧૦) સભામાં પોતાના ભક્તો સર્વ શ્રોતાઓ પણ શ્રીહરિએ પ્રથમથી સારી રીતે સદ્ધર્મની શિક્ષા આપેલા સાત્ત્વિક ગુણોથી યુક્ત શ્રોતાઓનાં લક્ષણોથી યુક્ત હતા. (૧૧) સભામાં પ્રત્યક્ષ સ્વયં હરિ સર્વજ્ઞ હોવા છતાં પણ માનુષ્યનું અનુકરણ કરતા ધર્મ પ્રવર્તક, મુમુક્ષુ શ્રોતાજનોની માફક પુરાણ સાંભળતાં હતા. (૧૨) શ્રીહરિ કથામાં કોઈ કોઈ સ્થળોમાં આવતા **કઠિન અધ્યાત્મભાગને** શ્રોતાજનો યથાર્થપણે સરળતાથી સમજી શકે તેમ પોતાના અનુભવજ્ઞાનથી સ્ફુટપણે વિવેચન કરતા સતા શ્રોતા અને વક્તાને આનંદ પમાડતા હતા. (૧૩) શ્રીહરિએ કથાની સમાપ્તિમાં શ્રીકૃષ્ણના નામોનું કીર્તન શ્રોતાઓની સાથે કરીને પછી સાત્ત્વિક લક્ષણો યુક્ત વક્તા પ્રયાગજીતને કહ્યું. (૧૪) હે દ્વિજ શ્રેષ્ઠ ! તમોએ અમારા મોદીને ત્યાંથી પોતાને ઈચ્છિત કાચું અન્ન અને ઘી, સાકર વગેરે લાવવું. (૧૫) તમોએ હંમેશા ચૂરમાના લાડુ, મોતિયા લાડુ વગેરે ઈચ્છા પ્રમાણે ભોજન કરવું. કારણકે તમારે દરરોજ શ્રમ કરવાનો છે. (૧૬) સવારમાં દૂધપાન કરવા માટે બે ગાયો ગ્રહણ કરો. આ પ્રમાણે કહીને શ્રીહરિએ બે સુંદર દૂધવાળી ધોળી ગાયો પુરાણીને આપી. (૧૭) પછી પુરાણી શ્રીહરિને કહેવા લાગ્યા, હે સ્વામિન્ ! હે કૃપાનાથ ! જેવી તમારી આજ્ઞા, દરરોજ તમારા કહ્યા પ્રમાણે પાલન કરીશ એમાં સંશય નથી. (૧૮) હે પ્રભો ! જો શાકની સામગ્રીની અનુકૂળતા થાય ત્યારે તો આજ્ઞાનું સારી રીતે પાલન થાય. (૧૯) તે સમયે શ્રીહરિએ હસતા હસતા પુરાણીને ઈચ્છિત શાક તમારે

देशकालानुकूल्ये च पुरश्चर्यां द्विजोत्तमैः । स्वयमैच्छत्कारयितुं श्रीमद्भागवतस्य सः ॥२॥ ततः स भगवांस्तत्र कारयामास मण्डपम् । विचित्रवर्णैर्वसनै रम्भास्तम्भैश्च शोभितम् ॥३॥ ततो द्वितीये दिवसे विधाय प्रातराह्निकम् । तस्मिन्व्यासासनं रम्यं कारयामास मण्डपे ॥४॥ पौराणिकं समाहूय पूर्वोक्तविधिनैव तम् । उपवेश्यासने चार्चत्पुस्तकार्चनपूर्वकम् ॥५॥ तस्मै वासांसि नूत्नानि बहुमूल्यानि स प्रभुः । कौशेयानि च सूक्ष्माणि प्रारम्भसमये ददौ ॥६॥ कुण्डले कटके हैमे प्रादाद्धैमोर्मिकाः शुभाः । ततः पुराणप्रारम्भं कारयामास स प्रभुः ॥७॥ रामप्रतापेच्छारामौ हरेरन्तिक आसने । निषेदतुरुभौ बन्धू श्रोतृधर्मस्थितौ नृप! ॥८॥ यथोचितं सभायां च निषेदुस्तत्र पार्षदाः । उत्तमप्रमुखा भूपा मुकुन्दाद्याश्च वर्णिनः ॥९॥ मुक्तानन्दाद्या मुनयो निषेदुस्तत्र संसदि । जयारमादयो योषा निषेदुश्चैकतोऽखिलाः ॥१०॥ सर्वेऽपि तत्र श्रोतारः सात्त्विकैर्लक्षणैर्युताः । आसन्सुशिक्षितास्ते वै प्रागेव हरिणा निजाः ॥११॥ सर्वज्ञोऽपि हरिस्तत्र नृनाट्यमनुशीलयन् । शुश्रावेतरवत्साक्षात्स्वयं धर्मप्रवर्तकः ॥१२॥ अध्यात्मभागं कठिनं तत्र स्वानुभवेन सः । क्वचित्क्वचिद्विशदयन् वक्तृश्रोतॄनमूमुदत् ॥१३॥ कथान्ते कीर्तनं कृत्वा श्रोतृभिः सह स प्रभुः । नाम्नां भगवतोऽथाह तं पौराणिकमुत्तमम् ॥१४॥ अस्मन्मोदिवणिग्गेहादामान्नं स्वेप्सितं त्वया । ग्रहीतव्यं द्विजश्रेष्ठ! घृतं च सितशर्करा ॥१५॥ नित्यं च लड्डुकाद्येव यथेष्टं भोजनं त्वया । कर्तव्यं हि श्रमो यस्मात्कर्तव्योऽस्ति तवान्वहम् ॥१६॥ प्रातः कर्तुं पयःपानं धेनुद्वन्द्वं गृहाण च । इत्युक्त्वा स पयस्विन्यौ धेनू तस्मै ददावुभे ॥१७॥ ततः पौराणिकः प्राह स्वामिन्नाज्ञां तवान्वहम् । एवमेव कृपानाथ! पालयिष्ये न संशयः ॥१८॥ किञ्चिद्व्यञ्जनसामग्र्या आनुकूल्यं भवेद्यदि । तदा तु सम्यगाज्ञायाः पालनं स्यात्तव प्रभो ! ॥१९॥ तदान्तिकस्थं स प्राह प्रहसन्वृद्धमालिकम् । अस्येप्सितं त्वया शाकं नित्यं देयमिति प्रभुः ॥२०॥ तदा स ब्राह्मणो

દરરોજ આપવું, એમ પોતાના સમીપમાં બેઠેલા વૃદ્ધ માળી હરનાથને કહ્યું. (૨૦) તે સમયે પ્રયાગજી પુરાણી પ્રસન્ન થઈને હે પ્રભો ! સમગ્ર મારે ઈચ્છિત થયું. આ પ્રકારે બોલતા સતા શ્રીહરિને નમસ્કાર કરી તે સ્થાનથી પોતાના નિવાસમાં ગયા. (૨૧) દરરોજ કથા સાંભળતા અને ભક્તોને આનંદ આપતા શ્રીહરિ શ્રીમદ્ભાગવત સમાપ્ત થયે સતે પોતે ઉત્તમ રાજા પ્રત્યે પૂર્વે કહેલા વિધિ અનુસારે કરતા હતા. (૨૨) શ્રીહરિ વાંચનાર પુરાણીને વસ્ત્રદાન અને સોનાની મુદ્રાઓ અર્પણ કરવામાં હજાર સોનાની મુદ્રાઓ રૂપ દક્ષિણાઓની વિધિને ઉલ્લંઘન કરીને જ તેથી અધિક મુદ્રાઓ આપવાથી સ્વયં પોતાને સદૃશ (અનુપમ) શોભતા હતા. (૨૩) સકળ ઐશ્વર્યસમ્પન્ન શ્રીહરિએ કરેલું પ્રયાગજીત પુરાણીનું આ સન્માન સાંભળી પૃથ્વીમાં સર્વે રાજાઓ પણ આશ્ચર્ય પામ્યા. (૨૪) શ્રીહરિ કથાશ્રવણમાં આવેલા બીજા બ્રાહ્મણોને ઈચ્છા પ્રમાણે વર્ષનારા મેઘની માફક દક્ષિણાઓથી સંતોષ પમાડતા હતા. (૨૫) શ્રીહરિ એક માસે શ્રીમદ્ ભાગવત સાંભળીને દશમસ્કન્ધ વિશેષપણે સાંભળતા હતા. (૨૬) શ્રીહરિ બે માસે **દશમ અને પંચમસ્કન્ધ** સાંભળીને પછી ફાગણ માસમાં મહા સામગ્રીઓથી પુષ્પદોલોત્સવ કરતા હતા. (૨૭) હે રાજન્ ! પછી શ્રીહરિ શ્રીરામાનુજાચાર્યે કરેલા ભાષ્યે સહિત **ભગવદ્ગીતા** સાંભળતા હતા. તેટલામાં અતિપવિત્ર કરનારી ચૈત્ર સુદી નૌમી તિથિ આવી. (૨૮) શ્રીહરિજયંતીના ઉત્સવમાં દુર્ગપુરમાં સ્ત્રીઓએ સહિત ઘણા પુરુષો અને હજારોહજાર મુનિઓ દેશાન્તરથી આવ્યા. (૨૯) કપટે રહિત ઉત્તમરાજા શ્રીહરિની પ્રસન્નતા માટે મહાસંભારથી (ઘણી સામગ્રીથી) શ્રીહરિજયંતીનો ઉત્સવ કરાવતા હતા. (૩૦) તે ઉત્સવ સમાપ્ત થયો ત્યારે શ્રીહરિ ભક્તોને પોત-પોતાના દેશમાં જવા આજ્ઞા આપીને પછી ફરીથી કથાનો આરંભ કરાવતા હતા. (૩૧) શ્રીહરિ રામાનુજાચાર્યના કૃપાપાત્ર ભટ્ટ પરાશરે કરેલા ભાષ્યે સહિત **વિષ્ણુસહસ્રનામ સ્તોત્રને** સાંભળતા હતા. અને ચૈત્ર વદી તેરશને દિવસે વિષ્ણુસહસ્રનામના સ્તોત્રની સમાપ્તિ કરતા હતા. (૩૨) શ્રીહરિ વૈશાખ સુદી પ્રતિપદાને દિવસે કૂર્મ જન્મોત્સવ કરીને ફરીથી બીજને દિવસે કથાનો આરંભ કરાવતા હતા. (૩૩) શ્રીહરિ સ્કન્દપુરાણના વિષ્ણુખંડમાં રહેલુ **શ્રીવાસુદેવ માહાત્મ્ય** એક માસે આનંદપૂર્વક સમગ્ર યથાર્થપણે સાંભળતા હતા. (૩૪) શ્રીહરિ પહેલા જેઠ માસની સુદી બીજને દિવસે આરંભ કરીને સવા માસથી **સામવેદનું પારાયણ** શ્રીનગરના સામવેદી હેમન્તરામ બ્રાહ્મણના મુખથી સાંભળતા હતા. (૩૫) શ્રીહરિ જેઠ સુદી દશમી તિથિમાં મધ્યાહ્ને ગંગાપૂજનનો મહોત્સવ કરી પછી સાંજના પહોરે સામવેદના પારાયણની સમાપ્તિ કરાવતા હતા. (૩૬) નિર્જલા એકાદશીને દિવસે **મિતાક્ષરા,** યાજ્ઞવલ્ક્યસ્મૃતિની ટીકા સાંભળવાનો આરંભ કર્યો. ટીકાને સાંભળતા શ્રીહરિ સંવત્ ૧૮૭૭ ના શ્રાવણ સુદી તૃતીયા

हृष्टो जातं जातं प्रभोऽखिलम् । वदन्नित्थं तमानम्य जगाम स्वालयं ततः ॥२१॥ कथां स प्रत्यहं शृण्वन्भक्तानानन्दयन् हरिः । समाप्ते श्रीभागवते प्रागुक्तमकरोद्विधिम् ॥२२॥ वस्त्रदाने वाचकाय हेममुद्रार्पणे च सः । स्वयं स्वसदृशो नूनमुल्लङ्घ्यैव विधिं बभौ ॥२३॥ कृतं भगवता तेन सन्मानं वाचकस्य तु । श्रुत्वाऽऽपुर्विस्मयं सर्वे भुवि भूपतयोऽपि च ॥२४॥ अन्यानपि द्विजांस्तत्र समायातान् स ईश्वरः । कामवर्षीव पर्जन्यो दक्षिणाभिरतोषयत् ॥२५॥ श्रीमद्भागवतं श्रुत्वा मासेनैकेन स प्रभुः । शुश्राव दशमं स्कन्धं पञ्चमं च विशेषतः ॥२६॥ मासद्वयेन तौ श्रुत्वा ततः फाल्गुनमासि सः । सम्भारेणैव महता चक्रे दोलोत्सवं हरिः ॥२७॥ ततः स भगवद्गीतां भाष्योपेतां नृपाशृणोत् । तावच्च नवमी प्राप्ता चैत्रशुक्लातिपावनी ॥२८॥ देशान्तरेभ्यो बहवस्तत्राजग्मुस्तदुत्सवे । पुरुषाः सस्त्रियो भक्ता मुनयश्च सहस्त्रशः ॥२९॥ महद्भिरेव सम्भारैरुत्सवं प्रीतये प्रभोः । उत्तमः कारयामास राजा निष्कपटान्तरः ॥३०॥ समाप्तेऽथोत्सवे तस्मिन्स्वस्वदेशान्प्रति प्रभुः । भक्तान्प्रस्थाप्य च पुनः कथारम्भमचीकरत् ॥३१॥ विष्णोः सहस्त्रनामाख्यं स्तोत्रं भाष्योपबृंहितम् । शुश्रावाथ त्रयोदश्यां कृष्णायां तत्समापयत् ॥३२॥ वैशाखाद्यप्रतिपदि कूर्मजन्ममहोत्सवम् । कृत्वा पुनर्द्वितीयायां कथारम्भमचीकरत् ॥३३॥ स्कान्दवैष्णवखण्डस्थं शुश्राव सकलं मुदा । श्रीवासुदेवमाहात्म्यं मासेनैकेन स प्रभुः ॥३४॥ आद्यज्येष्ठद्वितीयातो मासेनैकेन साङ्घ्रिणा । शुश्राव सामवेदस्य पारायणमसौ हरिः ॥३५॥ ज्येष्ठशुक्लदशम्यां स कृत्वा गङ्गार्चनोत्सवम् ।

---

તિથિમાં તેને સંપૂર્ણ સાંભળતા હતા. (૩૭) શ્રીહરિ શ્રાવણ સુદી ચતુર્થીને દિવસે શ્રી વરાહનો પ્રાદુર્ભાવનો મહોત્સવ મધ્યાહ્નને કરી સાધુઓ અને બ્રાહ્મણોને જમાડતા હતા. (૩૮) હે રાજન્ ! પછી શ્રીહરિ પોતાના ભક્તજનોને આનંદ આપતા સતા નાગપંચમી જે શ્રાવણ સુદી પંચમી તિથિમાં **વિદુરનીતિ સાંભળવાનો** આરંભ કરાવતા હતા. (૩૯) શ્રી સ્વામિનારાયણ ભગવાન શ્રાવણ માસની પૂર્ણિમાને દિવસે રક્ષાબંધનનો વિધિ કર્યા પછી વિદુરનીતિ સમાપ્ત કરી વસ્ત્રાભૂષણો વગરેથી વાંચનાર પુરાણીને સંતોષ પમાડતા હતા. (૪૦)

આ પ્રમાણે પોતાના ભક્તજનોનાં નયનોને આનંદ આપતા, પૂર્ણિમાના ચન્દ્રની માફક મુખારવિંદ વાળા શ્રીહરિ પોતાના મનુષ્યભાવને પ્રગટ કરતા સતા સમગ્ર સમ્પૂર્ણ અંગવાળા ધર્મનું પણ પોતાના જનોમાં સ્થાપન કરતા થકા પોતાના ભક્તોની હૃદયગુહામાંથી જીતવાને માટે અશક્ય કલિયુગના બળે સહિત અધર્મને મૂળથી વિનાશ કરતા મુનિઓના ગુરુ શ્રીસ્વામિનારાયણ, શ્રીહરિકૃષ્ણ ભગવાન પૃથ્વીમાં પ્રસિદ્ધ થયા. (૪૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પુરાણ શ્રવણોત્સવે શ્રીમદ્‌ભાગવતાદિસચ્છાસ્ત્રશ્રવણ વાચકસન્માનનિરૂપણનામા નવમોઽધ્યાયઃ (૯)*

## અધ્યાય : ૧૦

**સારંગપુરમાં પધારવાપૂર્વક જન્માષ્ટમીના ઉત્સવમાં યથાયોગ્ય થયેલી શુભ સભામાં શ્રીહરિ બિરાજમાન થયા તે કહ્યું છે.**

**સુવ્રતમુનિ બોલ્યા,** હે રાજન્ ! પ્રભુ શ્રીહરિ ગીતવાજીંત્રપુરઃસર પુરાણીને તેના ગૃહમાં લઈ જઈને ઉત્તમરાજાના આંગણામાં રહેલા લીમડાના વૃક્ષ નીચે વેદિકા ઉપર સિંહાસનમાં બેઠા. (૧) તેટલી વારમાં સારંગપુરના રાજા જીવાખાચર શ્રીહરિની સમીપે આવ્યા. દૃઢવ્રતવાળી દેવિકા નામની તેમની પુત્રી આવી. અમર-વ્યાઘ્રજી નામના તેમના પુત્રો આવ્યા. (૨) તથા ક્ષત્રિયોમાં વીર રાઠોડ ભક્ત, માલતી નામે પુત્રીની સાથે ત્યાં આવ્યા અને પ્રત્યક્ષ શ્રીહરિના મહાન અતિશ્રેષ્ઠ પુંજા નામના ભક્ત ત્યાં આવ્યા. (૩) તે જીવવર્માદિ ભક્તો શ્રીહરિને પ્રણામ કરી, શ્રીહરિએ આદરપૂર્વક સત્કાર કરાયેલા; શ્રીહરિના દર્શનથી મહા આનંદવાળા, શ્રીહરિની સમીપમાં બેઠા. (૪) પ્રભુ શ્રીહરિએ સુખેથી આવ્યા એમ પુછાયેલા વિનયનમ્ર જીવવર્માદિ ભકતો બન્ને હાથ જોડી શ્રીહરિને નમસ્કાર કરી બોલ્યા : (૫) હે ભગવન્ ! સંસારરૂપી પાશબંધનોને નાશ કરનાર ! હે પ્રભો ! તમારા ભક્તો અમો તમોને સારંગપુર લઈ જવા માટે તમારી સમીપમાં આવ્યા છીએ. (૬) હે હરે ! ધનવાળા ભક્ત અને નિર્ધન ભકતમાં સમદૃષ્ટિવાળા પરમેશ્વર એવા તમારે ન્યૂન અથવા અધિકભાવ નથી જ, માટે અમારી ઉપર તમારી દયા થાઓ. (૭) હે નાથ ! અમારા પુરમાં જન્માષ્ટમીનો ઉત્સવ કરવા યોગ્ય છો. અમારું જે કંઈ ધન છે, તે તમારું જ છે. (૮) હે સ્વામિન્ ! હે નાથ ! આ પ્રાર્થનાને (મનોરથને) ભક્તવત્સલ તમો પરિપૂર્ણ

**मध्याह्नेऽथापराह्णेऽस्य समापनमकारयत् ।।३६।। एकादश्यां निर्जलायां प्रारम्भन्मिताक्षराम् । शृण्वंस्तां च नभःशुक्लतृतीयायां समापयत् ।।३७।। चतुर्थ्यां श्रीवराहस्य प्रादुर्भावमहोत्सवम् । कृत्वा मध्याह्नसमये साधून्विप्रानभोजयत् ।।३८।। ततश्च नागपञ्चम्यां नयं वैदुरिकं हरिः । श्रोतुमारम्भयामास भक्तानानन्दयन्नृप! ।।३९।। श्रावण्यां पौर्णमास्यां तं रक्षाबन्धोत्तरं हरिः । समाप्य वस्त्रभूषाद्यैस्तोषयामास वाचकम् ।।४०।। इत्थं श्रीवासुदेवो निजजननयनानन्दपूर्णेन्दुवक्त्रो मानुष्यं नाटयन्स्वं सकलमपि भुवि स्थापयन्नेव धर्मम् । स्वीयानां हृद्दरीभ्यः कलिबलसहितं दुर्जयं चाप्यधर्मं मूलादुत्पाटयंश्चाप्रथत मुनिगुरुः स्वामिनारायणाख्यः ।।४१।।** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पुराणश्रवणोत्सवे श्रीमद्भागवतादिसच्छास्त्रश्रवणवाचकसन्माननिरूपणनामा नवमोऽध्यायः ।।९।।

सुव्रत उवाच – **पौराणिकं प्रापयित्वा गीतवाद्यपुरःसरम् । तद्गृहं स प्रभुर्वेद्यां निम्बाधस्तादुपाविशत् ।।१।। तत्राजगाम तावत्तु सारङ्गपुरभूपतिः । जीववर्मा च तत्पुत्री देविकाख्या दृढव्रता ।।२।। क्षत्रवीरस्तथा राठो मालत्या सुतया सह । तत्रागच्छच्च पुञ्जाख्यो भक्तो भगवतो महान् ।।३।। प्रणम्य भगवन्तं ते मानितास्तेन सादरम् । निषेदुस्तस्य पुरतस्तद्दर्शनमहामुदः ।।४।। सम्पृष्टाः स्वागतं तेन प्रभुणा विनयानताः । त ऊचुस्तं नमस्कृत्य बद्धाञ्जलिपुटा वचः ।।५।। भगवन्भवबन्धघ्न ! त्वद्भक्ता वयमीश्वर! । नेतुं सारङ्गनगरं त्वामत्र स्म उपागताः ।।६।। आढ्येऽनाढ्येऽपि वा भक्ते विशेषो नास्ति ते किल । समदर्शिन ईशस्य ततोऽस्मासु दयास्तु ते ।।७।। जन्माष्टम्युत्सवं नाथ! पुरे नः कर्तुमर्हसि । अस्माकं यद्धनं**

---

કરવાને યોગ્ય છો, કારણ કે અમો સર્વે તમારા આશ્રિત છીએ. (૯) હે રાજન્ ! આ પ્રકારે સારંગપુરના નિવાસી ભક્તોએ પ્રાર્થના કરાયેલા શ્રીહરિકૃષ્ણ ભગવાન તે ભક્તોને કપટે રહિત જાણતા સતા બોલ્યા, હે ભક્તો ! તમારા નગરમાં નિશ્ચે આવીશ. (૧૦) હે નિષ્પાપ ભક્તો ! તમો આગળ જઈ ઉત્સવની સામગ્રી સમ્પાદન કરો, હું તમારા નગરમાં શ્રાવણ વદી પાંચમને દિવસે આવીશ. આ મારા વચનમાં સંશય કરવો નહિ. (૧૧) હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વચન સાંભળીને અતિ પ્રસન્ન થયેલા જીવવર્મા વગેરે ભક્તો શ્રીહરિને કહેવા લાગ્યા, હે ભગવન્ ! સમગ્ર ભક્તોને સાથે લઈને પધારજો. (૧૨) હે રાજન્ ! શ્રીહરિએ 'જેમ તમો કહો છો તેમ કરીશું.' આ પ્રમાણે કહેવાએલા જીવવર્મા, ઉત્તમરાજા અને બીજા ભક્તોને શ્રીહરિની સાથે પોતાના પુરમાં આવવા માટે આમંત્રણ આપતા હતા. (૧૩) પછી પોતાના પુરમાં જવાની ઈચ્છાવાળા જીવવર્મા, રાઠોડ તથા બીજા ભક્તોને ઉત્તમરાજા સુંદર ભોજનોથી જમાડતા હતા. (૧૪) તે જીવવર્માદિ ભક્તો જમીને પોતાના પુરમાં જઈને ચોખા, દાળ, ઘઉં વગેરે અન્નો અને જળનાં પાત્રો, ગોદડાં, ઓછાડ, પાથરણા, લાકડાં, શાક, ઘી, સાકર વગેરે સામગ્રીઓ આદરપૂર્વક તૈયાર કરતા હતા. (૧૫) પછી ભગવાન શ્રીહરિ પણ ઉત્તમરાજા-સોમાદિ પાર્ષદો અને બીજા ભક્તોથી વીંટાયેલા **સંવત્ ૧૮૭૭ ના શ્રાવણ વદી પંચમીને દિવસે** જીવવર્માના નગર પ્રત્યે જતા હતા. (૧૬) અતિ વેગવાળા-લાલવર્ણવાળા-સુંદર ગતિવાળા એવા ઘોડા ઉપર બેઠેલા, અત્યંત કોમળ ડાબા કરકમળમાં લગા ધારણ કરતા. જમણા હાથમાં ચાબુક ધારણ કરતા, સમગ્ર શ્વેતવસ્ત્રોવાળા અને પોતપોતાના ઘોડા ઉપર બેઠેલા સોમ ગેરે પોતાના ભક્તજનોથી વિંટાયેલા સર્વના નિયન્તા શ્રીહરિ જતા હતા. (૧૭) રામપ્રતાપ જે શ્રીહરિના મોટાભાઈ કે ર વર્ણવાળી ઘોડી પર બેસીને તત્કાળ શ્રીહરિની પછવાડે ચાલ્યા. (૧૮) જયા-રમા વગેરે સ

ીઓ પોતાને પૂછ્યા વગર જ જતા શ્રીહરિને જોઈને, ઘણો સમય ત્યાં રહેશે એવી શંકા જેમને છે એવી સતી તે પ પછવાડે જતી હતી. (૧૯) હે રાજન્ ! સારંગપુરના નિવાસી ભકતો પોતાના પુરમાં આવતા શ્રીનારાયણમુનિને સાં ળી ગીતવાજિંત્રોના શબ્દોની સાથે શ્રીહરિની સન્મુખ ગયા. (૨૦) સારંગપુરના નિવાસી ભક્તો દૂરથી શ્રીહરિને જોઈને જ સ્નેહથ ી આનંદનાં અશ્રુઓવાળા ભક્તિપૂર્વક પ્રણામ કરતા હતા. પછી સન્મુખ દોડતા હતા. (૨૧) પરમેશ્વર શ્રીહરિએ પોતાના સન્મુખ આવતા ભક્તોને યથાયોગ્ય સંભાવના કરી ભક્તોની સાથે પુરમાં પ્રવેશ કરી જીવવર્માના ઘરમાં નિવાસ કર્યો. (૨૨) શ્રીહરિ જયા વગેરે સ્ત્રીઓને રાઠોડ ભક્તના ઘરમાં નિવાસ માટે આજ્ઞા આપતા હતા. બીજા પોતાની સાથે આવનાર ભક્તોને થાયોગ્ય નિવાસસ્થાનો અપાવતા હતા. (૨૩) જીવવર્મા અને પુરવાસી હરિભક્તો ઉત્સાહવાળા શ્રીહરિને તથા શ્રીહરિની સાથે આવે



**પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર**

किञ्चित्तत्तवैवास्ति निश्चितम् ।।८।। एतावद्याचितं स्वामिन्नस्माकं भक्तवत्सलः । दातुमर्हसि नाथ! त्वं वयं हि त्वत्परायणाः ।।९।। इति तैः प्रार्थितः स्वामी तान्निष्कपटचेतसः । जानन्नुवाच भो भक्तास्तत्राऽऽयास्यामि निश्चितम् ।।१०।। कुरुतोत्सवसम्भारान् यूयं गत्वाग्रतोऽनघाः! । पञ्चम्यामागमिष्यामि तत्राहं नात्र संशयः ।।११।। इति वाक्यं प्रभोः श्रुत्वा तेऽतिसंहृष्टमानसाः । प्रोचुस्तं भगवन् ! भक्तैरागन्तव्यं सहाखिलैः ।।१२।। तथेत्युक्ते भगवता जीववर्मोत्तमं नृपम् । आमन्त्रयामास भक्तानपरांश्चागमाय सः ।।१३।। ततस्तदैव स्वपुरं गन्तुकामं समुत्सुकम् । उत्तमो जीववर्माणं राठादींश्चाप्यभोजयत् ।।१४।। भुक्त्वा ते स्वपुरं गत्वा सम्भारांश्चक्रुरादरात्। अन्नोदपात्रास्तरणकाष्ठशाकघृतादिकान् ।।१५।। भगवानपि पञ्चम्यामुत्तमेन च पार्षदैः । भक्तैश्चान्यैः परिवृतस्तत्पुरं प्रययौ ततः ।।१६।। समारूढो वाहं जविनमरुणं मञ्जुलगतिं दधद्वल्गां वामे करकमलकोशेऽतिमृदुले । परे वेत्रं चेशः सितसकलवासाः परिवृतो हयारूढैः सोमप्रमुखनिजभक्तैश्च स ययौ ।।१७।। रामप्रतापो वडवां समारुह्याशुकैसरीम् । तमन्वगाद्रोहिताश्वमिच्छारामोऽधिरुह्य च ।।१८।। जयारमादयो योषा अपृष्ट्वात्मानमेव तम् । यान्तं दृष्टैवानुययुस्तच्चिरस्थितिशङ्किताः ।।१९।। श्रुत्वाऽऽयान्तं हरिं राजन्! सारङ्गपुरवासिनः । गीतवादित्रनिर्घोषैस्तत्सन्मुखमुपाययुः ।।२०।। दूराद्दृष्ट्वा हरिं प्रेम्णा स्त्रवदश्रव एव ते । प्रणेमुर्दण्डवद्भक्त्या ततोऽभिमुखमद्रवन् ।।२१।। सम्भाव्य तान् यथायोग्यं साकं तैर्भगवान् पुरम् । प्रविश्यावासमकरोज्जीववर्मालये हरिः ।।२२।। राठालये निवासार्थं जयाद्याश्चादिशत्स्त्रियः । अन्येभ्योऽपि यथायोग्यं

---

ાં ભકતોને યથાયોગ્ય આતિથ્યથી પ્રસન્ન કરતા હતા. (૨૪) ગૃહસ્થ ભક્તોના ઘણા સમુદાયો અને ત્યાગીઓનાં મંડળો પણ ઘણા દેશાન્તરથી **સારંગપુરમાં** આવ્યા. પુરના ભક્તો દેશાન્તરથી આવેલા ગૃહસ્થો અને ત્યાગીઓના સમુદાયોને યથાયોગ્ય નિવાસ કરાવતા હતા. (૨૫) દેશાંતરથી આવેલા સર્વે ભક્તો પ્રત્યક્ષ ભગવન્મૂર્તિ શ્રી સ્વામિનારાયણનાં દર્શન કરી અતિશય આનંદ પામ્યા. શ્રીહરિ પણ દેશાંતરથી આવેલા સર્વ ભક્તજનોને યથાયોગ્ય સંભાવના કરતા હતા. (૨૬) હરિભક્તો, પુરુષો અને સધવા વિધવા સ્ત્રીઓ અને તપસ્વી સાધુઓના સમુદાયોથી સારંગપુર નગર અત્યન્ત સાંકડું થઈ ગયું. (૨૭) પછી શ્રીહરિ **ફલ્ગુ નદીના કિનારાથી** આરંભીને **ધવલા નદીના તીર સુધી** અતિવિશાળ પૃથ્વીના તળમાં **સભા** કરાવતા હતા. (૨૮) શ્રીહરિ સપ્તમીની રાત્રિએ સભામાં અતિ ઊંચા સિંહાસનમાં બેઠા, પછી ભક્તો શ્રીહરિના સિંહાસનના આગલા પ્રદેશમાં બેઠા. (૨૯) સભામાં જ્ઞાન અને તપથી વૃદ્ધ મુનિઓ શ્રીહરિની આગળ બેઠા. તેમની પાછળ વયોવૃદ્ધ તપસ્વીઓ બેઠા; (૩૦) તથા તેમની પાછળ યુવાન મુનિઓ બેઠા. તેમની પાછળ કિશોર અવસ્થાવાળા મુનિઓ બેઠા. (૩૧) નાના ભાઈ ઈચ્છારામે સહિત રામપ્રતાપ, શ્રીહરિના મોટાભાઈ, શ્રીહરિની આગળ સિંહાસનની સમીપમાં ઉત્તમ આસનમાં બેઠા. (૩૨) સત્શાસ્ત્રના અધ્યયન, જન્મ, જ્ઞાન અને તપથી શ્રેષ્ઠ બ્રાહ્મણો શ્રીહરિના જમણા ભાગે બેઠા. તેમની પાછળ વયોવૃદ્ધ બ્રાહ્મણો બેઠા. (૩૩) સોમવર્માદિ મુખ્ય પાર્ષદો શ્રીહરિના ડાબે પડખે બેઠા. સારંગપુરના જીવવર્માદિ રાજાઓ સોમાદિ પાર્ષદોની પાછળ બેઠા. (૩૪) શ્રીહરિની સેવામાં સદા પ્રીતિવાળા મુકુંદાનન્દાદિ નૈષ્ઠિક બ્રહ્મચારીઓ સિંહાસનની સમીપમાં જ ઊભા રહ્યા. (૩૫) જેમના હાથમાં તલવાર વગેરે આયુધો છે એવા ભગુજી, નાજો ભક્ત, ભીમો, રતનજી વગેરે ક્ષત્રિયો ચોતરફ પ્રસરતી દૃષ્ટિવાળા, શ્રીહરિની પાછળ ઊભા રહ્યા. (૩૬) નૈષ્ઠિક વ્રતને આશરેલા વાસુદેવાનંદ વગેરે બ્રહ્મચારીઓ મુનિઓ અને પાર્ષદોની વચમાં બેઠા. (૩૭) એ મુનિ વગેરે સર્વે ભક્તો સ્વસ્તિક આસનને આશરીને પોતાનાં અંગોની ચપળતાનો ત્યાગ કરી સભામાં બેઠા. (૩૮) ક્ષત્રિય જાતિવાળા, શ્રીહરિના ભક્તો મુનિ વગેરે સર્વેની પાછળ બેઠા. અને તેમની પાછળ ભગવાનના વૈશ્ય ભક્તો બેઠા. (૩૯) તેમની પાછળ ભગવાનના શૂદ્ર ભક્તો બેઠા અને તેમના પછી શૂદ્રથી બીજા અનુલોમ, પ્રતિલોમથી થયેલા ભગવાનના ભક્તો બેઠા. આ પ્રમાણે સર્વે જનો પણ શ્રીહરિના મુખરૂપી ચન્દ્રમામાં સમર્પિત કરેલી છે, ચકોર પક્ષીની માફક નેત્રોની વૃત્તિઓ જેમણે એવા સતા મર્યાદા પ્રમાણે બેઠા હતા. (૪૦) સ્ત્રીઓના સમુદાયો સિંહાસનમાં બેઠેલા શ્રીહરિને જોતા સતા પુરુષોની સભાથી થોડેક દૂર પોતપોતાની મર્યાદા પ્રમાણે બેઠા. (૪૧)

वासस्थानान्यदापयत् ॥२३॥ जीववर्मा च पौराश्च हरिं भागवतांश्च तान्। यथोचितेनातिथ्येन प्रीणयामासुरुत्सुकाः ॥२४॥ गृहिणां त्यागिनां चापि तत्र यूथानि भूरिशः । देशान्तरेभ्य आजग्मुः पौरास्तानि न्यवासयन् ॥२५॥ भगवद्दर्शनं कृत्वा सर्वे ते परमां मुदम् । लेभिरे सोऽपि तान् सर्वान् यथोचितममानयत् ॥२६॥ तत्पुरं हरिभक्तानां यूथैः पुंसां च योषिताम् । तपस्विनां मुनीनां च बभूवातीव सङ्कुलम् ॥२७॥ ततः फल्गोस्तटान्नद्या धवलायास्तटावधि । कारयामास स सभां विशाले वसुधातले ॥२८॥ उच्चं सिंहासनं तत्र सप्तम्या निशि स प्रभुः । अध्यारुरोहाथ भक्ता निषेदुस्तस्य चाग्रतः ॥२९॥ तत्र ज्ञानतपोवृद्धा मुनयः पुरतः प्रभोः । निषेदुः पृष्ठतस्तेषां वयोवृद्धास्तपस्विनः ॥३०॥ तेषां च पृष्ठतः सर्वे मुनयस्तरुणास्तथा । तेषां पृष्ठे किशोराश्च निषेदुर्मुनयोऽखिलाः ॥३१॥ रामप्रतापस्तस्यैव पुरतः सानुजः प्रभोः । सिंहासनं च निकषा न्यषीदत्पीठ उत्तमे ॥३२॥ प्रभोश्च दक्षिणे भागे शास्त्रज्ञानतपोधिकाः । विप्रा निषेदुस्तत्पश्चाद्वयोवृद्धा द्विजातयः ॥३३॥ वामभागे भगवतः सोमाद्या मुख्यपार्षदाः । निषेदुः पृष्ठतस्तेषां जीववर्मादयो नृपाः ॥३४॥ मुकुन्दानन्दमुख्याश्च नैष्ठिकब्रह्मचारिणः । प्रान्ते सिंहासनस्यैव तस्थुस्तत्सेवने रताः ॥३५॥ भृगुजिन्नाञ्जभीमाद्याः क्षत्रियाः शस्त्रपाणयः । तस्थुर्भगवतः पश्चात्सर्वतः प्रसरद्दृशः ॥३६॥ मुनीनां पार्षदानां च मध्येऽथ ब्रह्मचारिणः । निषेदुर्वासुदेवाद्या नैष्ठिकं व्रतमाश्रिताः ॥३७॥ स्वस्तिकासनमेवैकमाश्रित्यैतेऽखिला अपि । अकुर्वन्तोऽङ्गचापल्यं निषेदुस्तत्र संसदि ॥३८॥ एतेषामथ सर्वेषां पृष्ठतः क्षत्रजातयः । उपाविशंश्च तत्पश्चाद्भक्ता भगवतो विशः ॥३९॥ तेषां च पृष्ठतः शूद्रास्तत्पश्चादपरे जनाः । मर्यादया

આ પ્રમાણે પોતાના સમગ્ર આશ્રિતો સભામાં બેઠા ત્યારે પુરાણ મુનિ શ્રીહરિ સમગ્ર જનોને આનંદ આપતા સતા અમૃતની માફક આચરણ કરનારું વચન બોલ્યા. (૪૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે સારંગપુરે જન્માષ્ટમ્યુત્સવે ભગવતઃ સભોપવેશન નિરૂપણનામા દશમોઽધ્યાયઃ (૧૦)*

## અધ્યાય : ૧૧

### જન્માષ્ટમી-વ્રતના નિર્ણયપૂર્વક તેનો વિધિ ઉધાપને સહિત કહ્યો છે.

**શ્રીનારાયણમુનિ બોલ્યા** : હે ભક્તો ! તમો સર્વે તમારા પરમ હિતને કરનારુ મારું વચન સાંભળો. આવતે દિવસે સાક્ષાત્ વસુદેવના ઘરમાં પ્રકટ થયેલા શ્રીકૃષ્ણ ભગવાનની લોક અને શાસ્ત્રમાં પ્રસિદ્ધ જન્મતિથિ છે. (૧) મારાં આશ્રિત સર્વ જનોએ શ્રીકૃષ્ણની જન્મતિથિનું વ્રત કરવું, કારણ કે અમોને શ્રીકૃષ્ણ જેમ ઈષ્ટ છે, તેમ આ શ્રીકૃષ્ણની જન્મતિથિ પણ ઈષ્ટ છે. (૨) હે જનો ! આ **જન્મતિથિનો સમગ્ર વિધિ** તમોને શાસ્ત્ર પ્રમાણે કહું છું. તે વિધિ સાંભળીને તે વ્રત તે પ્રમાણે જ કરવું. (૩) સપ્તમીના વેધે રહિત રોહિણી નક્ષત્ર અને બુધવારથી યુક્ત મધ્યરાત્રી સુધી અષ્ટમી હોય તે અષ્ટમી કૃષ્ણ જન્માષ્ટમી માનેલી છે. (૪) જે મધ્યરાત્રિમાં રોહિણીયુક્ત અષ્ટમી હોય એ મુખ્ય સમય જાણવો. જે માટે તે સમયે શ્રીકૃષ્ણ પ્રાદુર્ભાવ પામેલા છે. (૫) આ જન્માષ્ટમી વ્રતના નિર્ણયમાં ઘણા પંડિતો પોતાના મતનું સ્થાપન કરતા સતા વિવાદ કરે છે. (૬) કેટલાક વિદ્વાનો જન્માષ્ટમી અને જયંતી એ બે વ્રતો કહે છે. કેટલાક વિદ્વાનો એક જ કહે છે. (૭) કેટલાક કૃષ્ણ-જન્મની રાત્રિને જ જયન્તી કહે છે. કેટલાક અષ્ટમી અને રોહિણીના યોગને જયન્તી કહે છે. (૮) ઉદય સમયે લગારેક અષ્ટમી આ પ્રકારે સ્કાન્દવાક્યમાં કેટલાક પંડિતો ઉદય શબ્દથી ચન્દ્રોદય કહે છે. કેટલાક સૂર્યના ઉદયને ઉદય શબ્દથી કહે છે. (૯) કેટલાક વાદીઓ તિથિના અન્તમાં જ પારણાં કરવાં, આ પક્ષને ગ્રહણ કરી વ્રતમાં સપ્તમીના વેધ સહિત અષ્ટમી ગ્રહણ કરે છે. કેટલાક વાદીઓ 'ઉત્સવના અંતમાં પારણા કરવા' એવો પક્ષ ગ્રહણ કરીને તેને નવમીના યોગની અપેક્ષા છે એમ નિશ્ચય કરીને સપ્તમીના વેધવાળી અષ્ટમીનો વ્રતમાં આદર કરતા નથી. (તિથિના અન્તમાં અથવા ઉત્સવના અન્તમાં વ્રતધારી પારણાં કરે : એમ કાળાદર્શ ગ્રંથનું પ્રમાણ કહે છે. (૧૦-૧૧) કેટલાક વિચક્ષણ પુરુષો ઉપવાસ તિથિને સૂર્યોદયનો સંબંધ મુખ્ય કહે છે. કેટલાક વિચક્ષણો પૂજનનો ઉત્સવાદિ સમય મુખ્ય કહે છે. (૧૨) કેટલાક વિદ્વાનો સપ્તમી વેધયુક્ત અષ્ટમી અથવા વેધરહિત શુદ્ધ અષ્ટમીનો આદર કરતા નથી, રોહિણીનું આલંબન કરીને વ્રત કરે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**निषेदुस्ते तदेकार्पितदृष्टयः ॥४०॥ स्त्रीणां वृन्दानि दूरे च स्वस्वमर्यादयैव हि । निषेदुर्वीक्षमाणानि प्रभुं सिंहासनस्थितम् ॥४१॥ तेषूपविष्टेष्वखिलेषु राजन्नित्थं सभायां निजसंश्रितेषु । आनन्दयंस्तानमृतायमानं वचो जगादेत्थमृषिः पुराणः ॥४२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे सारङ्गपुरे जन्माष्टम्युत्सवे भगवतः सभोपवेशननिरूपणनामा दशमोऽध्यायः ॥१०॥

श्रीनारायणमुनिरुवाच – **सर्वे शृणुत भो भक्ता! मम वाक्यं हितावहम् । श्वोऽस्ति जन्मतिथिः साक्षाद्वासुदेवस्य विश्रुता ॥१॥ तस्या व्रतं प्रकर्तव्यं सर्वैरेव मदाश्रितैः । श्रीकृष्णो हि यथास्माकमिष्टोऽस्त्येषापि तादृशी ॥२॥ विधानमस्याः सकलं यथाशास्त्रं च वो जनाः! । कथयामि तदाश्रुत्य कर्तव्यं तद्व्रतं तथा ॥३॥ सप्तमीवेधरहिता रोहिणीबुधसंयुता । निशीथगाष्टमी या सा कृष्णजन्माष्टमी मता ॥४॥ अष्टमी रोहिणीयुक्ता निशीथे यत्र दृश्यते । मुख्यः कालः स विज्ञेयस्तत्र जातो यतो हरिः ॥५॥ जन्माष्टमीव्रतस्यास्य निर्णये बहवो द्विजाः । विवदन्ते हि विद्वांसः स्वमतस्थापनोद्यताः ॥६॥ जन्माष्टमी जयन्ती च व्रते द्वे इति केचन । एकमेवेति केचिच्च विद्वांसः कथयन्ति हि ॥७॥ कृष्णजन्मनिशामेव जयन्तीं केचिदूचिरे । अष्टमीरोहिणीयोगं जयन्त्याख्यं तु केचन ॥८॥ उदये चाष्टमी किञ्चिदित्यत्रेन्दूदयं बुधाः । केचिद्वदन्ति केचिच्च सूर्यस्यैवोदयं द्विजाः ॥९॥ तिथ्यन्तपारणापक्षं गृहीत्वा केऽपि वादिनः । अष्टमीं सप्तमीविद्धां प्रशंसन्ति व्रते किल ॥१०॥ गृहीत्वा पारणापक्षमुत्सवान्तेऽथ केचन । नाद्रियन्ते पूर्वयुक्तां प्राशस्त्यान्नवमीयुजेः ॥११॥ सूर्योदयस्य**

---

છે. (૧૩) આ પ્રકારના વાદો જન્માષ્ટમી વ્રતમાં ઘણા છે. તે વાદો વિદ્વાનોએ ઋષિઓના વચનનું અવલંબન કરીને ગૂંથેલા છે. (૧૪) તે સર્વે વાદો ઋષિવાક્યોના અવલંબનથી સપ્રમાણ છે. **તે સર્વ પક્ષોમાં બુદ્ધિશાળી પુરુષોએ સારો નિર્ણય કરેલો પક્ષ** સર્વેને સંશય નાશ કરવા માટે હાલમાં કહું છું. (૧૫) જ્યારે સપ્તમીના દિવસે જ રોહિણી-બુધવારે યુક્ત મધ્યરાત્રિ વ્યાપિની અષ્ટમી હોય, બીજા દિવસે અષ્ટમી જો મધ્યરાત્રિ વ્યાપિની ના હોય, ત્યારે તો સપ્તમી વેધવાળી પણ અષ્ટમી વ્રતના આચરણમાં ગ્રહણ કરવી. બીજે દિવસે વ્રત કરનારાઓએ અષ્ટમી તિથિના અંતે પારણાં કરવાં. (પ્રાતઃકાળમાં જ ન કરી લેવા.) (૧૬-૧૭) આ પ્રમાણે યોગવિશેષથી સપ્તમીના વેધે સહિત અષ્ટમી અગ્નિપુરાણાદિમાં ગ્રહણ કરવી, એમ કહ્યું છે. જો એમ ના હોય તો રોહિણી અને બુધવારે રહિત સપ્તમીને દિવસે મધ્યરાત્રિ માત્રમાં વ્યાપિની ગ્રહણ કરવી નહિ. (૧૮) જો પૂર્વે કહેલો સમગ્ર યોગ સપ્તમીને દિવસે હોય અને બીજે દિવસે તો મધ્યરાત્રે રોહિણી અને બુધવારના યોગે રહિત અષ્ટમી હોય તો બે ઉપવાસ કરવા. શક્તિમાન પુરુષોએ બે ઉપવાસ કરવા. અશક્ત તો અષ્ટમીને દિવસે એક ઉપવાસ કરે. (૧૯-૨૦) મધ્યરાત્રિએ બુધવાર, અષ્ટમી અને રોહિણીના યોગ વિના વિદ્વાનોએ સપ્તમીના વેધ સહિત જન્માષ્ટમી ક્યારેય ના કરવી. (૨૧) જો બુધવાર ના હોય તો મધ્યરાત્રિએ રોહિણી સહિત એવી પણ સપ્તમીવેધયુક્ત અષ્ટમીનો ત્યાગ કરી સપ્તમીના વેધે રહિત અષ્ટમી ગ્રહણ કરવી. (૨૨) રોહિણી નક્ષત્ર વિના પણ નવમીએ યુક્ત અષ્ટમી કરવી. રોહિણી સહિત સપ્તમી સહિત અષ્ટમી ન કરવી. (૨૩) જ્યારે કૃષ્ણાષ્ટમી તિથિ બે ઘડી સુધી, ઘડી માત્ર અથવા પળમાત્ર હોય ત્યાર બાદ નવમી હોય તો નવમીએ યુક્ત અષ્ટમી જ વ્રતમાં ગ્રહણ કરવી. પરંતુ પળમાત્ર સપ્તમી સહિત અષ્ટમી વ્રતમાં ગ્રહણ કરવી નહીં. (૨૪) જો સપ્તમી વેધયુક્ત અષ્ટમીનો ક્ષય હોય અર્થાત્ એક દિવસે સૂર્યોદયાદિમાં સપ્તમી અને ત્યારબાદ અષ્ટમી હોય અને બીજે દિવસે સૂર્યોદયથી આરંભીને નવમી જ હોય તો અષ્ટમી સપ્તમીના સંયોગવાળી થાય ત્યારે તો શ્રીકૃષ્ણની જન્મતિથિ વ્રતમાં કેવળ નવમી જ ગ્રહણ કરવી. (૨૫) જો અષ્ટમી સાઠ ઘડી પરિણામવાળી, બીજે દિવસે એક, બે અથવા ત્રણ ઘડી સુધી હોય તો પણ નવમીના સંબન્ધવાળી બીજી અષ્ટમી શ્રેષ્ઠ છે. આ પ્રમાણે કેટલાક વૈષ્ણવો કહે છે. (૨૬) બે અષ્ટમીઓ હોય ત્યારે પૂર્વની અષ્ટમી ઘણા સમય સુધી વ્યાપતી હોવાથી અને સર્વ પ્રકારે સપ્તમીના વેધનો અભાવ હોય, માટે પૂર્વેની સાઠ ઘડીવાળી ગ્રહણ કરવી : આ પ્રકારે **ગોસ્વામીનો મત** છે. તે અમારે ઉપાદેય છે. (૨૭) આ પ્રકારે સમગ્ર નિર્ણયનો સારાંશ મેં સંક્ષેપથી નિરૂપણ કર્યો આ મારા કહેલા મત-સિદ્ધાંતને અનુસરીને જ જન્માષ્ટમીનો નિર્ણય તમોએ જાણવો. (૨૮) વ્રતને કરનાર પુરુષ સપ્તમીને દિવસે મિતાહારી થાય, જિતેન્દ્રિય થઈ શ્રીકૃષ્ણને જ ચિંતન કરતો થકો રાત્રિમાં સૂએ. (૨૯) બ્રાહ્મમુહૂર્તમાં ઊઠીને નિત્યવિધિ કરી પછી મધ્યાહ્નને નદીમાં જઈને વિધિપૂર્વક સ્નાન કરવું. (૩૦) પ્રથમ અંઘેડાનું દાતણ કરી તીર્થાદિની મૃત્તિકાથી પ્રથમ સ્નાન

सम्बन्धमुपवासतिथेर्जगु: । मुख्यं केचिच्च केचित्तु कर्मकालं विचक्षणाः ॥१२॥ नादियन्ते द्विजाः केचिद्विद्धां शुद्धां च वाष्टमीम् । आलम्ब्य रोहिणीमेव विद्वांसः कुर्वते व्रतम् ॥१३॥ इत्यादयो बहुविद्या वादाः सन्त्यत्र हि व्रते । अवलम्ब्यार्षवाक्यानि विद्वद्भिर्ग्रथिताश्च ते ॥१४॥ सप्रमाणा हि ते सर्वे तेषु शिष्टैः सुनिश्चितम्। पक्षं प्रदर्शयाम्यद्य सर्वसंशयनुत्तये ॥१५॥ यदा पूर्वदिने ह्येव रोहिणीबुधसंयुता । निशीथगाष्टमी सम्यक् नोत्तरा तु निशीथगाः ॥१६॥ तदा विद्धाऽपि सप्तम्या ग्रहीतव्याष्टमी व्रते । परेद्युः पारणा कार्या तिथ्यन्ते व्रतचारिभिः ॥१७॥ प्रोक्ता योगविशेषेण सप्तमीसहिताष्टमी । ग्राह्येत्यग्निपुराणादौ नान्यथा केवलाष्टमी ॥१८॥ पूर्वेद्युरेव योगश्च प्रागुक्तः सकलो यदि । भवेदथ परेद्युस्तु निशीथे केवलाष्टमी ॥१९॥ उपवासद्वयं कुर्यात्तदा शक्तस्तु पुरुषः । उपवासमशक्तस्तु कुर्यादेकं परेऽहनि ॥२०॥ बुधाष्टमीरोहिणीनां निशीथे योगमन्तरा । पूर्वविद्धा न कर्तव्या बुधैर्जन्माष्टमी क्वचित् ॥२१॥ बुधवारो न चेत्तर्हि रोहिणीसहितामपि । पूर्वविद्धां विहायैव शुद्धा ग्राह्याष्टमी मता ॥२२॥ विना ऋक्षेणापि कार्या नवमीसंयुताष्टमी । सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी ॥२३॥ पलं घटीं मुहूर्तं वा यदा कृष्णाष्टमी ततः ॥ नवमी सैव ग्राह्या स्यात्सप्तमीसंयुता न तु ॥२४॥ विद्धायाश्च क्षयः स्याच्चेत्सप्तमीसंयुताष्टमी । तदा परा ग्रहीतव्या व्रते जन्मतिथिः प्रभोः ॥२५॥ शुद्धाऽधिकाष्टमी यर्हि तदापि नवमीयुजेः । प्राशस्त्यादुत्तरा ग्राह्येत्यूचुः केचन वैष्णवाः ॥२६॥ बहुकालव्यापकत्वाद्द्वेधाभावाच्च सर्वथा । पूर्वा ग्राह्येति गोस्वामिमतं तद्ग्राह्यमस्ति नः ॥२७॥ इति सङ्क्षेपतो ह्येष सर्वसारो निरूपितः । निश्चित्यैतन्मतं ज्ञेयो जन्माष्टम्यास्तु निर्णयः ॥२८॥ व्रतं करिष्यन्पुरुषः सप्तम्यां लघुभुग्भवेत् ।

કરી તલ અને ધાત્રીના ફળના ચૂર્ણથી (ત્રિફળાના ચૂર્ણથી) સ્નાન કરે. (૩૧) પછી માધ્યાહ્નિક સંધ્યા કરી પવિત્ર વ્રતકર્તા પુરુષ ગૃહમાં આવી કેળના સ્તંભોથી શોભાયમાન મનોહર મંડપ કરાવે. (૩૨) નાના પ્રકારે રંગેલાં વસ્ત્રો અને વિવિધ પ્રકારનાં પુષ્પોથી અને આંબાનાં પલ્લવોથી શોભાયમાન નાના પ્રકારના રંગોથી તે પ્રદેશમાં સારાં ચિત્રો કરાવવાં. (૩૩) શ્વેત-પીળાં-લાલ-લીલાં તથા કર્બૂર વસ્ત્રોથી અને નવીન કળશોથી ચોતરફ સુશોભિત કરે. (૩૪) અનેક પ્રકારનાં અશોક (આસોપાલવ)નાં પાંદડાં વગેરે, લીંબુ આદિક ફળો અને દીવાઓની પંક્તિઓથી ચોતરફ શોભાયમાન નાના પ્રકારનાં પુષ્પોના હારોથી વિચિત્ર અને અગરુ ચન્દનનો ધૂપ કરે. (૩૫) તેના મધ્ય પ્રદેશમાં **દેવકીનું સૂતિકાગૃહ** કરે. સૂતિકાગૃહમાં એક ઉપમાતા અને નાળનો છેદ કરનારીને કરે. (૩૬) પછી સૂતિકાગૃહના મધ્યભાગમાં રમણીય પલંગમાં દેવકીની સ્થાપના કરે. દેવકીના ખોળામાં સ્તનપાન કરતા બાલકૃષ્ણની સ્થાપના કરે. (૩૭) મંડપના એક પ્રદેશમાં ગોકુળમાં સૂતિકાના ગૃહમાં દેવકીની માફક પ્રસવ કર્યો છે સુંદર કન્યાનો જેણીએ એવી યશોદાનું સ્થાપન કરવું. (૩૮) વ્રજના રાજા નંદ અને વસુદેવ-ગોપો-રાધિકાદિ ગોપીઓ અને ગાયો તથા શ્રીકૃષ્ણ પરમાત્માની બાળલીલાઓ (ક્રીડા યોગ્ય રમકડા આદિકની) મંડપમાં યથાયોગ્ય કલ્પના કરવી. (૩૯) બલરામને જન્મ આપનારી રોહિણી, બળરામ, ષષ્ઠીદેવી-વસુંધરા-બ્રહ્મા-રોહિણી નક્ષત્ર તથા કૃષ્ણાષ્ટમી તિથિ, માર્કણ્ડેય, બલિ, વ્યાસ, હનુમાન, વિભીષણ, કૃપાચાર્ય અને પરશુરામ એ સાત ચિરંજીવીઓ-અપ્સરાઓના સમૂહોએ સહિત નૃત્ય કરતા ગાયનમાં ઉદ્યમવાળા ગંધર્વો અને યમુનાના ધરામાં કાળીનાગ; આ રોહિણ્યાદિ સર્વે મંડપમાં જ ચિતરવા. (૪૦-૪૧-૪૨) એ આદિક જે કંઈ શક્તિ અને બુદ્ધિ પ્રમાણે ચિતરીને વ્રતધારી પ્રયત્નથી પૂજે. (૪૩) શ્રી બાલકૃષ્ણ આદિકની સુવર્ણની મૂર્તિઓ યથાશક્તિ કરવી. અને તેમની પૂજા ભક્તિપૂર્વક કરવી. (૪૪) વ્રત કરનાર પુરુષ સમય પ્રમાણે પ્રાપ્ત થયેલા શુદ્ધ ઉપહારોથી વ્રત ગ્રન્થમાં કહેલા મંત્રોથી અંગ-દેવતા સહિત કૃષ્ણનું પૂજન કરે. (૪૫) શ્રીકૃષ્ણનો ભક્ત વ્રતધારી, દેવકી વગેરે સહિત કૃષ્ણને ગીત વાજિંત્ર યુક્ત જેમ હોય તેમ વિધિથી પૂજન કરી અને શ્રીકૃષ્ણના પાર્ષદોનું પૂજન કરે. (૪૬) અને સર્વ દેવોનું પૂજન કરી પૃથ્વીમાં પ્રણામ કરી, પછી બ્રાહ્મણોને પૂજીને તે બ્રાહ્મણોને દક્ષિણા આપે. (૪૭) પછી વ્રતી પુરુષ **બાલકૃષ્ણને હિંડોળામાં** પધરાવીને પૂજા કરી, આરતી ઉતારી આદરપૂર્વક મુહૂર્ત પર્યન્ત ધીમે ધીમે હિંડોળે. (૪૮) વ્રતધારી પુરુષ શ્રીભાગવતના દશમ સ્કંધમાં શ્રીકૃષ્ણના પ્રાદુર્ભાવની કથા દર્ભાસનમાં બેસીને ભક્તિભાવથી સાંભળે પછી જાગરણ કરે. (૪૯) પ્રાતઃકાળમાં ઉત્તર પૂજન કરી મૂર્તિનું દાન કરે. પછી બ્રાહ્મણોને ભોજન કરાવીને વ્રતી પારણાં કરે. (૫૦) સમગ્ર ઉપવાસોમાં દિવસે જ પારણાં ઈષ્ટ છે. માટે રાત્રિમાં પારણાં ન કરવાં, પરંતુ શ્રીહરિનું પંચામૃત લગારેક પીએ. (૫૧) જે પુરુષ મેં કહેલા આ વિધિથી દરેક માસમાં વદી અષ્ટમી વ્રત કરે, તે પુરુષ પોતાના ઈચ્છિત ફળને પામે. (૫૨) આ પ્રકારે જિતેન્દ્રિય પુરુષ સંપૂર્ણ વર્ષ સુધી વ્રત કરે ને વર્ષ પૂરૂં થયે સતે **મહાપૂજા** કરીને શય્યા

जितेन्द्रियः स्वपेद्रात्रौ कृष्णमेव विचिन्तयन् ॥२९॥ ब्राह्मे मूहुर्त उत्थाय कृत्वा नित्यविधिं ततः । मध्याह्ने च नदीं गत्वा विधिना स्नानमाचरेत् ॥३०॥ कृत्वापामार्गसमिधा दन्तधावनमादितः। तिलामलककल्केन स्नायान्मृत्स्नानपूर्वकम् ॥३१॥ ततो माध्याह्निकं कृत्वा गृहमेत्य शुचिर्व्रती । मण्डपं कारयेद्रम्यं कदलीस्तम्भशोभितम् ॥३२॥ विचित्रवस्त्रैः पुष्पैश्च मण्डितं चाम्रपल्लवैः । शुभैर्नानाविधै रङ्गैस्तत्र तत्र सुचित्रितम् ॥३३॥ सितैः परीतैस्तथा रक्तैः कर्बुरैर्हरितैरपि । वासोभिः शोभितं कुर्यात्समन्तात्कलशैर्नवैः ॥३४॥ पत्रैः फलैरनैकैश्च दीपालिभिरितस्ततः । पुष्पमालाविचित्रं च चन्दनागुरुधूपितम् ॥३५॥ तन्मध्ये सूतिकागारं देवक्या विदधीत च । धात्रीं कुर्यात्तत्र चैकां नालच्छेदनकर्तरीम् ॥३६॥ तन्मध्ये मञ्चके रम्ये स्थापयेद्देवकीं ततः । तदुत्सङ्गे बालकृष्णं स्थापयेच्च स्तनन्धयम् ॥३७॥ यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे । स्थापयेद्गोकुले तद्वत्प्रसूतवरकन्यकाम् ॥३८॥ नन्दश्च वसुदेवश्च गोपा गोप्यश्च धेनवः । बाललीला च कृष्णस्य कल्प्या यथोचितम् ॥३९॥ रोहिणी बलदेवश्च षष्ठीदेवी वसुन्धरा । ब्रह्मा च रोहिणीऋक्षं तथा कृष्णाष्टमी तिथिः ॥४०॥ मार्कण्डेयो बलिर्व्यासो हनुमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥४१॥ नृत्यन्तश्चाप्सरोवृन्दैर्गन्धर्वा गीततत्पराः । लेखनीयाश्च तत्रैव कालियो यमुनाह्रदे ॥४२॥ इत्येवमादि यत्किञ्चिद्यथाशक्ति यथामति । लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्परः ॥४३॥ यथाशक्ति प्रकर्तव्याः कृष्णादीनां तु मूर्तयः । सौवर्ण्याद्याश्च तत्पूजा कर्तव्या निशि भक्तितः ॥४४॥ उपहारैर्यथालब्धैः शुद्धैः श्रीकृष्णमर्चयेत् । सहाङ्गदेवतं मन्त्रैर्व्रतग्रन्थोदितैः पुमान् ॥४५॥ देवक्यादियुतं कृष्णं गीतवाद्यसमन्वितम् । सम्पूज्य विधिना भक्तः पार्षदांस्तस्य चार्चयेत् ॥४६॥ सम्पूज्य सर्वदेवांश्च प्रणम्य दण्डवत् भुवि । ब्राह्मणान् पूजयित्वाथ तेभ्यो दद्याच्च दक्षिणाम् ॥४७॥ ततो मुहूर्तं दोलायां बालकृष्णं तमादरात्। सम्पूज्य नीराजयित्वा शनैरान्दोलयेत्पुमान् ॥४८॥ कथां च जन्माध्यायोक्तां शृणुयाद्भक्तिभावतः । ततः कुशासने स्थित्वा कुर्याज्जागरणं व्रती

---

અને ગાયોનું **દાન** કરે અર્થાત્ **ઉધાપન** કરે. (૫૩) વ્રતના આરંભમાં વ્રતસંપૂર્તિમાં અથવા આરંભ કરેલા વ્રતની મધ્યમાં ઉદ્યાપન કરે, તે ઉદ્યાપનથી વ્રત અંગે સહિત થઈને સર્વ કામનાઓને પમાડે છે જ. (૫૪) જન્માષ્ટમીનું વાર્ષિક વ્રત વિધિ પ્રમાણે કરવું. તેનાથી વ્રત કરનારાઓ ઉપર શ્રીકૃષ્ણ પ્રસન્ન થાય છે જ. (૫૫)

**અષ્ટમી વ્રતનો ઉધાપન વિધિ** :- હવે આ વ્રતનો ઉદ્યાપન વિધિ સંક્ષેપથી કહું છું. રમણીય મંડપ કરાવીને તેમાં સર્વતોભદ્રમંડળ કરવું. તે સર્વતોભદ્રમંડળના મધ્યમાં સ્વચ્છ જળનો ભરેલો, નવરત્નો સહિત તાંબાના ઘડાની પ્રસ્થાપના કરી શ્વેત વસ્ત્રથી વીંટાળવો. (૫૬-૫૭) પાંચ પલ્લવોથી યુક્ત, પૂર્ણપાત્રથી યુક્ત એક સુવર્ણ (સોળ ભાષા) પરિમિત સુવર્ણથી દેવકી-સહિત હરિ કરવા. (મૂર્તિ સોની પાસે કરાવવી.) (૫૮) સુવર્ણની પ્રતિમા કરવા અશક્ત વ્રતધારી અર્ધા સુવર્ણથી કૃષ્ણની પ્રતિમા કરે, રોહિણી નક્ષત્રે સહિત ચન્દ્રને ચાંદીથી પૂજે. (૫૯) દૂધપાકથી ભરેલી ચોવીશ સંખ્યાવાળી તપેલીઓ શ્રીહરિને નિવેદન કરી તે તપેલીઓ બ્રાહ્મણોને આપે. (૬૦) હરિમંદિરમાં ઘીથી જ દીવાઓની પંક્તિઓ કરે, હોમ પુરૂષસૂક્ત અથવા નામમંત્ર-મૂળમંત્રથી કરવો. (૬૧)

પછી ચોવીસ સંખ્યાવાળા બ્રાહ્મણોને ભોજન કરાવે અને શક્તિ પ્રમાણે ચંદન-પુષ્પ-વસ્ત્રો અને અલંકારોથી તે બ્રાહ્મણોને પૂજે. (૬૨) ઉપસ્કરે સહિત તાંબાનો ઘડો, શકિત પ્રમાણે સોનું અને વિધિ પ્રમાણે ગાયો; બ્રાહ્મણોને શ્રીકૃષ્ણની પ્રસન્નતા માટે આપે. (૬૩) ઘૃતપાત્ર-તિલપાત્ર-સુવર્ણમુદ્રા, કમંડલુ, પગરખાં, વસ્ત્રો અને શૈયા વિશેષપણે આપે. (૬૪) જો અધિક દ્રવ્ય પામવાની ઈચ્છા હોય તો શ્રાદ્ધ, દાન, હોમ અને તીર્થયાત્રા અને વ્રતોમાં ધનની સમૃદ્ધિ હોય તો લોભ કરવો નહીં. લોભ કરે તો મહાદોષ લાગે છે. (૬૫) જે પુરુષ દાનને યોગ્ય સત્પાત્રોમાં અને ધર્મકાર્યોમાં વિત્તનો લોભ કરે છે તે પુરુષ સર્વ ધર્મથી રહિત થઈને નર્કમાં બૂડે છે (૬૬) સર્વ વ્રતોમાં સામાન્ય, બ્રહ્મચર્યાદિ યમો સર્વે પુરુષો અને સ્ત્રીઓએ પ્રયત્નપૂર્વક પાલન કરવા. (૬૭) મથુરામાં પ્રાદુર્ભાવ પામેલા શ્રીરુક્મિણીપતિ, દ્વારિકાના અધિપતિ શ્રીહરિનું પુણ્યકારી વ્રત સર્વ મનોરથોને પૂર્ણ કરનારું કહેલું છે. (૬૮) **જે પુરુષ શ્રીકૃષ્ણના જન્મના દિવસે અન્ન જમે છે તે નરાધમ પુરુષ માતૃગામી થાય** અર્થાત્ તેના સમાન પાપને પામે છે. તથા **બ્રહ્મહત્યા**ને પામે છે (૬૯)

જો ઉપવાસમાં અસમર્થ હોય તો ફળાહાર વગેરેથી વ્રત કરે, ક્યારેય પણ આ જન્માષ્ટમીના વ્રતનો ત્યાગ કરવો નહિ. (૭૦) હે ભક્તો ! આ પ્રમાણે મેં તમોને જન્માષ્ટમી વ્રતનો વિધિ સંક્ષેપથી કહ્યો, જે જન્માષ્ટમી વ્રતનો વિધિ મારાં આશ્રિતોએ અવશ્ય કરવો. (૭૧) જે પુરુષ નિયમિત ચિત્તવાળો થઈને ભક્તિપૂર્વક આ જન્માષ્ટમી વ્રતનો વિધિ સાંભળે

।।४९।। प्रातः कुर्यान्मूर्तिदानं कृत्वैवोत्तरपूजनम् । ब्राह्मणान्भोजयित्वाथ स्वयं कुर्वीत पारणाम् ।।५०।। सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते । न रात्रौ पारणं कुर्यादाश्यात् पञ्चामृतं हरेः ।।५१।। एतेनैव विधानेन प्रतिमासं च यः पुमान् । कृष्णाष्टमीव्रतं कुर्यात्प्राप्नुयात्स्वेप्सितं हि सः ।।५२।। एवं संवत्सरं पूर्णं व्रतं कृत्वा जितेन्द्रियः । महापूजां विधायान्ते दद्याच्छय्यां च गाः पुमान् ।।५३।। आदावन्तेऽथवा मध्ये कुर्यादुद्यापनं व्रती । तेन साङ्गं व्रतं सर्वान्कामान् फलति निश्चितम् ।।५४।। वार्षिकं तु व्रतं कार्यं प्रतिवर्षं यथाविधि । कृष्णः प्रसन्नो भवति व्रतिभ्यस्तेन निश्चितम् ।।५५।। उद्यापनं व्रतस्यास्य कथयामि समासतः । मण्डलं सर्वतोभद्रं कर्तव्यं मण्डपोत्तमे ।।५६।। तस्योपरि प्रतिष्ठाप्य ताम्रकुम्भं जलान्वितम् । वेष्टयेच्छ्वेतवस्त्रेण नवरत्नसमन्वितम् ।।५७।। पञ्चपल्लवसंयुक्तं पूर्णपात्रसमन्वितम् । कार्यः सुवर्णेनैकेन देवकीसहितो हरिः ।।५८।। अशक्तस्तु तदर्धेन कुर्यात्प्रतिकृतिं हरेः । रोहिण्या सहितं चेन्दुं रौप्यं कृत्वार्चयेद्व्रती ।।५९।। चतुर्विंशतिसङ्ख्याकाः स्थालीः पायससम्भृताः । निवेदयित्वा हरये दद्याद्विप्रेभ्य एव ताः ।।६०।। दीपमाला घृतेनैव कर्तव्या हरिमन्दिरे । होमः पुरुषसूक्तेन कार्यो वा नाममन्त्रतः ।।६१।। चतुर्विंशतिसङ्ख्याकान्ब्राह्मणान्भोजयेत्ततः । यथाशक्त्यर्चयेत्तांश्च गन्धवस्त्रविभूषणैः ।।६२।। सोपस्करं ताम्रकुम्भं सुवर्णं गाश्च शक्तितः । यथाविधि ब्राह्मणेभ्यो दद्याच्छ्रीकृष्णतुष्टये

અથવા પાઠ કરે તે પુરુષ પણ વ્રતનું ફળ પામે છે, એમાં સંશય નથી. (૭૨) હે રાજન્ ! આ પ્રકારે શ્રીહરિ પોતાના ભક્તોને જન્માષ્ટમીનો વિધિ કહીને પ્રસન્ન થયેલા પોતાના ભક્તોએ નમસ્કાર કરાયેલા એવા ફરીથી પોતાના નિવાસમાં ગયા અને હરિભક્તો પોતપોતાના સ્થાનમાં ગયા. (૭૩)

હે નરેન્દ્ર ! શ્રીહરિ પોતાના નિવાસસ્થાનમાં સમગ્ર સંધ્યાવિધિ કરી એક પ્રહર સુધી મુખથી શ્રીકૃષ્ણનાં નામોને ઉચ્ચારણ કરતા સતા સપ્તમીની રાત્રિના વચલા બે યામમાં પૃથ્વી ઉપર સાદડી પાથરીને તે ઉપર યોગનિદ્રાને અંગીકાર કરતા હતા. (૭૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે સારંગપુરે જન્માષ્ટમ્યુત્સવે વ્રતવિધિનિરૂપણ નામૈકાદશોऽધ્યાયઃ (૧૧)*

## અધ્યાય : ૧૨

### શ્રીહરિએ યથાર્થપણે કરેલું જન્માષ્ટમીના વ્રતના આચરણનું સારી રીતે નિરૂપણ કરેલ છે.

**સુવ્રતમુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિએ જન્માષ્ટમીને દિવસે પ્રાતઃકાળમાં ઊઠીને નિત્યકર્મ કરીને શ્રી રામાનંદ સ્વામીની મહાપૂજા કરી (આ તિથિના પ્રાતઃકાળમાં રામાનંદ સ્વામિનો જન્મ છે.) (૧) ઉદ્ધવાવતાર શ્રી રામાનંદ મુનિની પૂજા સમાપ્ત કરી, વર્ણિઓને પૂજીને પછી પાર્ષદો દ્વારા જ રમણીય મંડપ-વળીઓ, લીલા વાંસડાઓ વગેરેથી બંધાવતાં હતા. (૨) રંગબેરંગી વસ્ત્રોથી શોભાયમાન, કદળીના સ્તંભોથી શણગારેલા મંડપમાં અતિસુશોભિત શ્રીકૃષ્ણ પરમાત્મા અને અંગભૂત દેવોનું સિંહાસન કરાવતા હતા. (૩) જન્માષ્ટમીના દિવસે સર્વ ભક્તજનોની સાથે આહારે રહિત શ્રીહરિ રાત્રિમાં પૂજા કરવા માટે સુવર્ણની શ્રીકૃષ્ણ વગેરેની પ્રતિમાઓ કરાવતા હતા. (૪) શ્રીહરિએ સમગ્ર દિવસ તો કૃષ્ણનાં કીર્તનો ગાવાથી કાઢ્યો. રાત્રિમાં નદી તળાવ વગેરેમાં સ્નાન કરી મહા પૂજા કરતા હતા. (૫) શ્રીહરિ શ્રીકૃષ્ણ, દેવકી, નન્દ અને યશોદા વગેરે દેવતાઓને પંચામૃત સ્નાન કરાવી, શુદ્ધ જળથી અભિષેક કરતા હતા. (૬) મહાભિષેક કરીને નવીન વસ્ત્ર-આભૂષણો, કેસરે યુક્ત ચંદન અને શુભ અક્ષતો, નાના પ્રકારનાં સુગંધિમાન પુષ્પો અને તુળસીપત્રો, દુર્વા બિલીપત્રો અને કેવડાથી પૂજતા હતા. (૭-૮) શ્રીહરિ દરેક પત્રે ભગવાનના નામ-મંત્ર 'શ્રી હરયે નમઃ' વગેરે બોલીને સુંદર તુળસીનાં પત્રોથી શ્રીકૃષ્ણને પૂજતા હતા. (૯) પછી શ્રીહરિ ધૂપદીપ કરીને ચાર પ્રકારનું નૈવેદ્ય સમર્પણ કરી ફળ- તાંબૂળ-દક્ષિણાથી પૂજતા હતા. (૧૦) પછી શ્રીહરિએ મહાનીરાજન કરી, પુષ્પાંજલિ આપી નમસ્કાર કર્યા અને બ્રાહ્મણોને પૂજીને તે પૂજા સમાપ્ત કરી. (૧૧) હિંડોળામાં બાળમુકુન્દને હિંચકાવતા સતા શ્રીહરિએ ભાગવતમાં કહેલી શ્રીકૃષ્ણના

।।६३।। घृतपात्रं तिलपात्रं मुद्रिकां च कमण्डलुम् । उपानहौ च वस्त्राणि शय्यां दद्याद्विशेषतः ।।६४।। श्राद्धे दाने तथा होमे तीर्थयात्राव्रतेषु च । वित्तशाठ्यं न कुर्वीत यदीच्छेद्विपुलं धनम् ।।६५।। पात्रेषु धर्मकार्येषु वित्तशाठ्यं करोति यः । सर्वधर्मविनिर्मुक्तो नरके स निमज्जति ।।६६।। सर्वव्रतेषु सामान्या ब्रह्मचर्यादयो यमाः । पालनीयाः पयत्नेन स्त्रीभिः पुम्भिश्च सर्वशः ।।६७।। व्रतं प्रोक्तमिदं पुण्यं श्रीहरेर्मथुराभुवः । कामदं रुक्मिणीभर्तुः सर्वेषां द्वारिकापतेः ।।६८।। श्रीकृष्णजन्मदिवसे यश्च भुङ्क्ते नराधमः । स भवेन्मातृगामी च ब्रह्महत्यां लभेत च ।।६९।। उपवासासमर्थश्चेत् फलहारादिना व्रतम् । यथाशक्ति प्रकुर्वीत हापयेन्न त्विदं क्वचित् ।।७०।। इति प्रोक्तो मया भक्ता ! युष्यभ्यं हि समासतः । जन्माष्टमीव्रतविधिः कर्तव्यो यो मदाश्रितैः ।।७१।। य इति शृणुयाद्भक्त्या पठेद्वापि समाहितः । पुमान् सोऽपि व्रतफलं प्राप्नुयान्नात्र संशयः ।।७२।। सुव्रत उवाच – इत्यादिश्य निजान्भक्तान्प्रहृष्टैस्तैः स वन्दितः । स्वावासं पुनरागच्छत्स्वस्वस्थानं ययुर्जनाः ।।७३।। सान्ध्यं विधिं तत्र विधाय सर्वं श्रीकृष्णनामानि पठन्मुखेन । समास्तृतायां भुवि मध्ययामद्वये स सुष्वाप निशो नरेन्द्र! ।।७४।।

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे सारङ्गपुरे जन्माष्टम्युत्सवे व्रतविधिनिरूपणनामैकादशोऽध्यायः ।।११।।

सुव्रत उवाच – उषस्युत्थाय भगवानष्टम्यामाह्निकं नृप! । कृत्वा चकार स्वाचार्यसमर्चनमहोत्सवम् ।।१।। उद्धवस्वामिनः पूजां समाप्याभ्यर्च्य वर्णिनः । ततः स मण्डपं रम्यं बन्धयामास पार्षदैः ।।२।। विचित्रवस्त्रशोभाढ्ये कदलीस्तम्भमण्डिते । तस्मिंश्च देवतापीठं कारयामास शोभनम् ।।३।। सर्वैर्भक्तजनैः साकं निराहारः स तद्दिने । प्रतिमाः कारयामास हैमीः पूजयितुं निशि ।।४।। दिनं तु सकलं निन्ये कृष्णकीर्तनगायनैः । निशि स्नात्वा महापूजां पूर्वोक्तविधिनाकरोत् ।।५।। कृष्णं

---

જન્મચરિત્રની કથા સાંભળતા સતા તે રાત્રિ **જાગરણ**થી નિર્ગમન કરી. (૧૨) નવમીના પ્રાતઃકાળમાં સંધ્યાદિ નિત્યકર્મ કરીને ફરીથી ઉત્તરપૂજન કરી શ્રીકૃષ્ણાદિની પ્રતિમાઓ બ્રાહ્મણને આપી ઘણા બ્રાહ્મણોને સુંદર ભોજનોથી તૃપ્તિ પમાડ્યા. (૧૩) શ્રીહરિએ પોતાના ચરણનાં દર્શન કરીને જ પારણાં કરવાની ઈચ્છાવાળા ભક્તોને પોતાનાં દર્શન આપીને પછી પારણાં કર્યાં. (૧૪) સાંજના પહોરે અતિ રમણીય ફાલ્ગુનદીના તટમાં સભામાં રહેલાં પોતાનાં ભકતજનોએ વીંટળાયેલા શ્રીહરિએ તે ભક્તોને **ભાગવત ધર્મોનો ઉપદેશ** આપ્યો. (૧૫) પોતાનું નિર્મળ યશ પ્રસિદ્ધ કરતા શ્રીહરિ વિદ્વાન ભક્તોના પણ સંશયોને અનેક પ્રશ્નોના ઉત્તરોથી છેદતા હતા. (૧૬) બધા ભક્તજનો શ્રીહરિનું આદરપૂર્વક પૂજન કરતા હતા. શ્વેત-પીળાં-લાલ વસ્ત્રોથી તથા સુવર્ણનાં અલંકારો, ચન્દન, પુષ્પના હારો-મોતીઓના તોરાઓની પંક્તિઓ અને ઘણા પ્રકારના ઉપહારોથી શ્રીહરિને પૂજીને નમસ્કાર કરતા હતા. (૧૭-૧૮) સ્ત્રીઓએ સહિત, કપટે રહિત સર્વ પુરનાં જનો શ્રીહરિની તથા સાથે આવેલા ભક્તોની સેવા કરતા સતા શ્રીહરિને સંતોષ પમાડતા હતા. (૧૯) દેશાન્તરના સોએ સો હરિભક્તો, મુનિઓ અને પાર્ષદોએ સહિત ભક્તવત્સલ શ્રીહરિને ભોજન કરાવવા માટે પ્રાર્થના કરતા હતા. (૨૦) હે રાજન્ ! પછી ભગવાન શ્રીહરિએ દેશાન્તરથી આવેલા પોતાના ભક્તજનોના મનોરથ પૂર્ણ કરવા માટે ઈચ્છતા સતા તેમની પ્રાર્થનાના સમયમાં જ અનુમોદન આપ્યું. (૨૧) પછી ધનવાન ભક્તો, મુનિઓ અને પાર્ષદો વગેરેની સાથે શ્રીહરિને અનુક્રમે દરરોજ ભક્તિથી જ સુંદર ભોજનો કરાવતા હતા. (૨૨) આ પ્રકારે શ્રી **સારંગપુર**માં નિવાસ કરતા ભક્તોના આનંદનિધિ શ્રીહરિને શ્રાવણ માસ ચાલ્યો ગયો. અને ભાદરવા સુદી પંચમી આવી. (૨૩)

નિર્મળ ધર્મનું પોષણ કરનારા શ્રીહરિ, સ્ત્રીઓને આખા વર્ષમાં થયેલા જે રજોદૂષણ થયે સતે ચાંડાલી આદિ ભાવમાં ઘરનાં વાસણ વગેરેના સ્પર્શથી થતા પાપની શુદ્ધિ કરવા માટે ઋષિપંચમીનું વ્રત સપ્તર્ષિની પૂજા સહિત સર્વે સ્ત્રીઓને કરાવતા હતા. (૨૪)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે સારંગપુરે જન્માષ્ટમ્યુત્સવે વ્રતાચરણ નિરૂપણનામા દ્વાદશોઽધ્યાયઃ (૧૨)*

## અધ્યાય : ૧૩



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

च देवकीं नन्दं यशोदाद्याश्च देवताः । पञ्चामृतेन संस्नाप्य सोऽभ्यषिञ्चत्सदम्बुभिः ॥६॥ महाभिषेकं कृत्वैव नवीनैर्वस्त्रभूषणैः
। सुगन्धिना चन्दनेन कौङ्कुमेनाक्षतैः शुभैः ॥७॥ नानाविधैः सुरभिभिः पुष्पैश्च तुलसीदलैः। दूर्वया बिल्वपत्रैश्च पूजयामास
केतकैः ॥८॥ उच्चारयन्नाममन्त्रं प्रतिपत्रं स वैष्णवम् । कृष्णमानर्च रुचिरैः सहस्त्रतुलसीदलैः ॥९॥ धूपं दीपं ततः कृत्वा
नैवेद्यं स चतुर्विधम् । समर्प्य फलताम्बूलदक्षिणाभिरपूजयत् ॥१०॥ महानीराजनं कृत्वा दत्त्वा पुष्पाञ्जलिं ततः । नत्वाभ्यर्च्य
ब्राह्मणांश्च स पूजां तां समापयत् ॥११॥ कृष्णमान्दोलयन् प्रेङ्खे तज्जन्मचरितं स च । शृण्वन्भागवतप्रोक्तं निनाय रजनीं
तु ताम् ॥१२॥ प्रातः पुनर्नित्यकृत्यं विधायोत्तरपूजनम् । कृत्वा मूर्तीर्ब्राह्मणाय दत्त्वा विप्रानभोजयत् ॥१३॥ स्वं दृष्ट्वा
पारणां कर्तुमीहमानेभ्य आत्मनः । भक्तेभ्यो दर्शनं दत्त्वा ततश्चक्रे स पारणाम् ॥१४॥ अपराह्णे सभायां च नदीतीरे
सुशोभने। स्थितः परिवृतो भक्तैः सद्धर्मांस्तानशिक्षयत् ॥१५॥ प्रश्नोत्तरैरनेकैश्च भक्तानां विदुषामपि । उदच्छिनत्संशयांश्च
प्रथयन्स्वं यशोऽमलम् ॥१६॥ सर्वेऽपि तं भक्तजनाः पूजयन्ति स्म सादरम् । सितैः पीतैस्तथा रक्तैर्वस्त्रैर्हैमैर्विभूषणैः
॥१७॥ चन्दनैः पुष्पहारैश्च मुक्ताशेखरपङ्क्तिभिः । उपहारैर्बहुर्विधैस्तं सम्पूज्य ववन्दिरे ॥१८॥ पौराः सर्वेऽपि तं भक्त्या
सेवमानाश्च तज्जनान् । प्रभुं सन्तोषयामासुः सस्त्रियो दम्भवर्जिताः ॥१९॥ देशान्तरीयाः शतशो जनास्तं भक्तवत्सलम् ।
मुनिभिः पार्षदैः साकं सम्भोजयितुमार्थयन् ॥२०॥ ततस्तेषां स भगवान्पूर्णं कर्तुं मनोरथम् । इच्छंस्तत्प्रार्थनां

---

**શ્રીહરિએ કારીયાણી ગામમાં આવીને ભક્તોને આનંદ આપનારી સ્થિતિ કરી તે કહ્યું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી ભાદરવા સુદી અષ્ટમી (રાધાઅષ્ટમી) પ્રાપ્ત થઈ, શ્રીહરિએ રાધા અષ્ટમીને દિવસે કૃષ્ણ અને રાધિકાનું મધ્યાહ્ન સમયે પૂજન કરીને ઉત્સવ કર્યો. (૧) પછી ભગવાન શ્રીહરિ હજારો બ્રાહ્મણોને ભોજન કરાવી, પોતે પણ ભાઈઓના નિવાસમાં ભોજન કરી ભક્તજનોની સાથે સર્વોત્તમ રત્નજડિત સિંહાસનમાં વિરાજમાન થયા. (૨) કારીયાણીનાં નિવાસીજનો શ્રીહરિના ભકતો સારંગપુરમાં શ્રીહરિનાં દર્શન માટે દરરોજ આવતા હતા અને પાછા જતા હતા. (૩) કારીયાણી ગામનાં ભક્તજનો પોતાના ગામમાં આગમન કરાવવા માટે દરરોજ શ્રીહરિને પ્રાર્થના કરતા હતા. પ્રભુ શ્રીહરિએ 'તમારા ગામમાં આવીશું' આ પ્રમાણે ભક્તોને કહ્યું. (૪) એક ચિત્તવાળા શ્રીહરિને પોતાના ગામમાં લઈ જવા માટે દૃઢ નિશ્ચયવાળા તે ગામના મુખ્ય ભક્તો **રાધાષ્ટમી**ને દિવસે સારંગપુરમાં આવ્યા. (૫) ક્ષત્રિયોમાં મહાશૂરવીર વસ્તા ખાચર, સિતા નામની તેમની પત્ની, બીજી સ્વમરી નામની ભાર્યા અને માનશૂર નામનો પુત્ર, વેલો નામનો બીજો એક ક્ષત્રિય તથા વીરો, કામો, રાઘવ આ ત્રણ વૈશ્યો અને દેવિકા નામની તેમની ભગિની તથા કર્ણ, દેવ આદિક બીજા ભક્તો આ સર્વે સારંગપુર આવીને ' હે ભગવન્ ! અમારા ગામે આપ પધારો.' આવી રીતે પ્રાર્થના કરતા હતા. (૬-૭-૮) વસ્તા ખાચર વગેરે ભક્તોનો કપટે રહિત ભાવ જોઈને શ્રીહરિએ તે ભક્તજનોને કહ્યું, 'હે ભક્તો ! તમો મારા છો, તમારું ગામ પણ મારું જ છે; માટે હું તમારી પ્રીતિ માટે મુનિઓએ સહિત કારીયાણી ગામમાં સવારમાં નિશ્ચે આવીશ, તમો આજે જ આગળ જાઓ.' (૯-૧૦) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા અતિ હર્ષ પામેલા ભક્તો ઉત્સાહ યુક્ત પોતાના ગામમાં ગયા. શ્રીહરિના આગમન માટે જે સામગ્રી જોઈએ તે તો ભક્તોએ પ્રથમ જ સંપાદન કરેલી હતી. (૧૧) પછી ભાદરવા સુદી નૌમી તિથિમાં સમગ્ર મુનિમંડળોથી વીંટાયેલા, આંસુઓની ધારાથી આક્રાન્ત થયેલાં ચક્ષુઓવાળા સારંગપુર નિવાસી ભક્તોએ વારંવાર અતિશય નમસ્કાર કરાયેલા શ્રીહરિ પણ સારંગપુરથી નીકળીને તત્કાળ કારીયાણી ગામમાં ગયા. (૧૨) સ્ત્રી, પુત્રાદિ સહિત વસ્તાખાચર વગેરે ભક્તો તાસાદિ વાદ્યોના ધ્વનિઓથી ગાજતી કરી છે દિશાઓ જેણે એવા સતા પોતાના ગામમાં આવતા શ્રીસહજાનંદ સ્વામીની સન્મુખ જઈ પ્રણામ કરી પોતાના પ્રાણપતિ શ્રીહરિને ગામમાં લાવતા હતા. (૧૩) સોમ-સુરાદિ પાર્ષદોએ સહિત શ્રીહરિએ વસ્તાખાચરના ગૃહમાં પોતાનો નિવાસ કર્યો. પોતાના બીજા ભક્તોને યથાયોગ્ય ઉતારો કરાવ્યો. (૧૪) તે સમયે શ્રીહરિની સાથે આવીને પોતપોતાના ગૃહમાં નિવાસ કરાયેલા ભક્તોની સેવા કરતા નિષ્કપટભાવવાળા ગામના હરિભક્તોના ઘરઘરમાં અતિશય આનંદઉત્સવ થયો. (૧૫) જે જે ભક્તોએ જ્યાં જ્યાં નિવાસ કર્યો હતો ત્યાં ત્યાં તે તે ભક્તો જાણે કે ગૃહપતિ ન હોય ? એમ જણાતા હતા અને ગૃહપતિઓ હતા તે આગન્તુક મહેમાનની માફક શોભતા હતા. (૧૬) સિતા-સ્વમરી બંને ભાર્યાઓની સાથે વસ્તા ખાચર ઉપકરણોએ સહિત પોતાનું ગૃહ શ્રીહરિને સમર્પણ કરી પોતે આવેલા મહેમાનની માફક રહ્યા. (૧૭)

राजंस्तदानीमन्वमोदत ॥२१॥ ततः क्रमेण धनिका भक्तास्तं मुनिभिः सह । पार्षदाद्यैश्च भक्त्यैव भोजयन्ति स्म तेऽन्वहम् ॥२२॥ एवं निवसतस्तस्य भक्तानन्दनिधेर्हरेः । व्यतीयाय नभोमासः प्राप्ता च ऋषिपञ्चमी ॥२३॥ सप्तर्षिपूजासहितं स तत्तु स्त्रीः कारयामास व्रतं च सर्वाः । तासां रजोदूषणमब्दजातं संशोधयन् निर्मलधर्मपोष्टा ॥२४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे सारङ्गपुरे जन्माष्टम्युत्सवे व्रताचरणनिरूपणनामा द्वादशोऽध्यायः ॥१२॥

सुव्रत उवाच - अथ राधाष्टमी प्राप्ता तस्यां कृष्णं च राधिकाम् । पूजयित्वोत्सवं चक्रे मध्याह्ने नृपते! प्रभुः ॥१॥ भोजयित्वा ततो विप्रान् भगवान्स सहस्रशः । भुक्त्वा भक्तजनैः साकं न्यषीदत्पीठ उत्तमे ॥२॥ तस्मिन्पुरे तदीक्षार्थं कार्यायननिवासिनः । भक्तास्तस्य प्रतिदिनमाजग्मुश्च पुनर्ययुः ॥३॥ नित्यं ते प्रार्थयन्ति स्म स्वग्रामागमनाय तम् । आगमिष्यामि वो ग्राममित्युवाच च तान्प्रभुः ॥४॥ एकचित्ताः प्रभुं नेतुं स्वग्रामं दृढनिश्चयाः । तद्ग्राममुख्या आजग्मुस्तद्दिने तत्र पत्तने ॥५॥ क्षत्रवीरो वास्तुनामा तत्पत्नी च सिताभिधा । अन्या तत्स्त्री स्वमर्याख्या मानशूरश्च तत्सुतः ॥६॥ वेलाख्यः क्षत्रियश्चान्यो वीरः कामश्च राघवः । एते वैश्यास्तथैतेषां भगिनी देविकाभिधा ॥७॥ कर्णो देवादयश्चान्ये भक्ता भगवतो दृढम् । तत्रैत्य प्रार्थमायासुर्भगवन्! । ग्राममेहि नः ॥८॥ तेषां निष्कपटं भावं दृष्ट्वोवाच हरिः स तान् । यूयं मदीया भो भक्ता! ग्रामो वोऽपि ममैव हि ॥९॥ युष्माकं प्रीतये तत्र सहमुन्यादिभिः किल । आगमिष्याम्यहं प्रातर्यूयमद्यैव गच्छथ ॥१०॥ इत्युक्तास्तेऽतिसंहृष्टा जग्मुः स्वं ग्राममुत्सुकाः । तदर्थं यच्च साहित्यं तत्तु तैः प्रागुपार्जितम् ॥११॥ ततो नवम्यामखिलैः

પરદેશથી આવેલા ભક્તજનોને મુનિમંડળે સહિત શ્રીહરિને જમાડવા માટે શ્રીહરિએ રસોઈ આપવાની કરેલી આજ્ઞાથી ગામનાં નિવાસીઓ તે રસોઈ આપવાનો અવકાશ પામ્યાં નહીં. (૧૮) શ્રીહરિએ ભાદરવા માસની નવમી તિથિથી આરંભીને કારતક સુદી એકાદશી સુધી સમગ્ર મુનિઓની સાથે **કારીયાણી ગામ**માં નિવાસ કર્યો. (૧૯) કારીયાણી ગામમાં પણ નિવાસ કરતા શ્રીહરિ પોતાના ભક્તજનોની સભામાં અતિરમણીય સિંહાસનમાં બેસીને પ્રતિદિન ઘણી સુંદર વાર્તાઓ કરતા હતા. (૨૦) શ્રીહરિ સાધુઓના ધર્મો, યમાદિ અષ્ટાંગ સહિત યોગ અને સમગ્ર આત્મા-પરમાત્માનું જ્ઞાન સમગ્રપણે કહેતા હતા. (૨૧) હે રાજન્ ! શ્રીહરિ કારીયાણી ગામમાં દરરોજ સાંજના પહોરે રામાનુજાચાર્યે કરેલા ભાષ્યે સહિત **વ્યાસસૂત્ર** અત્યંત હર્ષથી સાંભળતા હતા. (૨૨) શ્રી નારાયણમુનિ રામાનુજાચાર્યની કૃતિની પ્રશંસા કરતા સતા આસો વદી તેરસ જે ધનત્રયોદશીએ ભાષ્યે સહિત વ્યાસસૂત્રની કથાની સમાપ્તિ કરી કથાના વક્તા શ્રી મુક્તાનંદમુનિની ચંદન-પુષ્પાદિથી પૂજા કરતા હતા. (૨૩) પછી શ્રીહરિએ કારીયાણી ગામમાં, દુર્ગપુરમાં જ જેમ તેમ દીપોત્સવ અને અન્નકૂટોત્સવ તથા પ્રબોધિનીનો ઉત્સવ કર્યો. (૨૪)

સર્વે ભક્તજનો અમૂલ્ય વિવિધ પ્રકારનાં વસ્ત્રો, સોનાનાં વિભૂષણો, ચંદન, પુષ્પના હારો, શ્રેષ્ઠ તોરાઓ અને શ્રેષ્ઠ ઉપહારોથી શ્રીહરિને પૂજતા હતા. (૨૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે ભગવતઃ કાર્યાયનગ્રામે સંસ્થિતિ-ઉત્સવનિરૂપણનામા ત્રયોદશોઽધ્યાયઃ (૧૩)*

## અધ્યાય : ૧૪

### સ્વયં શ્રીહરિએ નરકગામી અને સ્વર્ગગામી મનુષ્યોનાં લક્ષણો કહેલાં છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ પ્રબોધિનીની રાત્રિમાં મહાન ભક્તોની સભામાં જાગરણ કરતા સતા પ્રબોધિનીની કથા સાંભળતા હતા. (૧) શ્રીહરિએ તે કથાની સમાપ્તિમાં પોતાના ભક્તોની શિક્ષા માટે સત્કર્મોની પ્રશંસા અને નિષેધકર્મોની અતિશય નિંદા ઘણા પ્રકારે કરી. (૨) તે સમયે પ્રશ્ન કરવાના સમયને જાણનારા **ઉત્તમ-રાજાએ** શ્રીહરિને પ્રણામ કરી બહુ વિનયપુરઃસર બન્ને હાથ જોડીને પૂછ્યું : (૩) હે ભગવન્ ! આ લોકમાં લૌકિક વ્યવહારાદિ કર્મમાં આસક્ત મનવાળા સર્વે દેહધારીઓની નાના પ્રકારની ક્રિયાઓમાં પ્રવૃત્તિઓ દેખાય છે જ. (૪) તે કર્મોમાં કયાં કર્મોથી કર્મ કરનારાઓને નર્કની પ્રાપ્તિ થાય અને કયાં કર્મોથી સ્વર્ગની પ્રાપ્તિ થાય ? તે સ્વર્ગ અને નર્કને પમાડનાર કર્મો મને તમો કહેવા યોગ્ય છો. (૫) **સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે ઘણી બુદ્ધિવાળા ઉત્તમ રાજાએ પૂછેલા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

परीतः स्वभक्तसङ्घैर्हरिरप्ययासीत् । नंनम्यमानोऽश्रुकलाकुलाक्षैः पौरैः स कार्यायनमाप शीघ्रम् ॥१२॥ वादित्रनिध्वाननिनादिताशास्तं वास्तुमुख्या हरिमभ्युपेत्य । भक्ताश्च सस्त्रीतनयाः प्रणम्य ग्रामं नयन्ति स्म तमात्मनाथम् ॥१३॥ वास्तोर्गृहे स भगवानुत्ततार सपार्षदः । भक्तानन्यान् यथायोग्यमुदतारयदात्मनः ॥१४॥ उत्सवोऽभून्महांस्तेषां ग्रामस्थानां गृहे गृहे । भक्तांस्तान्सेवमानानां तत्र निष्कपटात्मनाम् ॥१५॥ ये ये भक्ता यत्र यत्र ह्युत्तीर्णास्तत्र तत्र ते । आसन् गृहेशा गृहिणस्त्वागन्तुकसमा बभुः ॥१६॥ पत्नीभ्यां सह वास्तुश्च स्वगृहं सपरिच्छदम् । समर्प्य हरये तस्थौ स्वयमागन्तुको यथा ॥१७॥ दूरदेशस्थलोकेभ्यः पाकदानाज्ञया प्रभोः । लेभिरे नावकाशं वै तत्कर्तुं ग्रामवासिनः ॥१८॥ न्यवसद्भगवांस्तत्र मुनिभिः सह सर्वशः । आरभ्य भाद्रनवमीं प्रबोधन्युत्सवावधि ॥१९॥ स च तत्रापि निवसन्प्रत्यहं भक्तसंसदि । दिव्यमासनमारूढः सद्वार्ता बहुशोऽकरोत् ॥२०॥ सतां धर्मानशेषेण योगं चाष्टाङ्गमप्यसौ । कथयामास सर्वं च ज्ञानमात्मपरात्मनोः ॥२१॥ श्रीभाष्येण सहैवासौ व्याससूत्राणि तत्र च । अपराह्णेऽन्वहं राजन्! शुश्राव परया मुदा ॥२२॥ रामानुजाचार्यकृतिं प्रशंसंस्तत्कथां हरिः । तिथौ धनत्रयोदश्यां समाप्याऽऽर्चच्च वाचकम् ॥२३॥ दीपोत्सवं ततश्चक्रे तत्र दुर्गपुरे यथा । अन्नकूटोत्सवं चेशः प्रबोधिन्युत्सवं तथा ॥२४॥ तमार्चिचन् भक्तजनाश्च सर्वे वस्त्रैरनर्घ्यैर्विविधैश्च हैमैः । विभूषणैश्चन्दनपुष्पहारैरापीडवर्यैश्च महोपदाभिः ॥२५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे भगवतः कार्यायनग्रामे संस्थित्युत्सवनिरूपणनामा त्रयोदशोऽध्यायः ॥१३॥

---

**શ્રીહરિએ** ફળે સહિત **બે પ્રકારનાં કર્મો કહ્યાં.** (૬) જે પુરુષો પારકી સ્ત્રીઓનું હરણ કરે છે, બળાત્કારથી પરસ્ત્રીઓનો સંગ કરનારા તથા જે પારકી સ્ત્રીને લોભ પમાડીને બીજાની સાથે જોડી આપે આ ત્રણેય જણા નર્કમાં જનારા થાય છે. (૭) જે મનુષ્યો પારકા દ્રવ્યની ચોરી કરનારા અને પારકા ધનનો નાશ કરનારા, બીજાં જનોના દોષને સૂચવનારા આ ત્રણ પ્રકારનાં મનુષ્યો નિશ્ચે નર્કમાં જનારા માનેલાં છે. (૮) હે ભૂપતે ! જે પુરુષો પરબોને તથા સભાસ્થાનો -પૂલો અને ગૃહોને વિનાશ કરનારા, તે ચાર પ્રકારના મનુષ્યો નર્કમાં જનારાં માનેલાં છે. (૯) જે માણસો અનાથ-બાળા-વૃદ્ધા-ભય પામેલી અને તપસ્વિની આ પાંચ પ્રકારની સ્ત્રીઓને ઠગે છે, તે નરો **નરકમાં જનારા** માન્યા છે. (૧૦) જે માણસો બ્રાહ્મણાદિની જીવિકાના સાધનનો વિનાશ અને ગૃહસ્થાશ્રમને ઉપયોગી વસ્તુનો નાશ કરે, વિવાહનો નાશ કરનાર તથા મિત્રતાનો નાશ કરનાર આ ચાર પ્રકારના પુરુષો નરકમાં જનારા માનેલા છે. (૧૧) જે માણસો ચાડિયાપણું કરનારા અને સંધિ (કરાર) નો ભેદ કરનાર, માંસથી જીવનારા હોય અને મિત્રોએ કરેલા ઉપકારને નહિ જાણનારા, તે ચાર પ્રકારનાં મનુષ્યો નરકમાં જનારાં માનેલાં છે. (૧૨) જે મનુષ્યો વેદ વિરોધી (શાક્ય-બૌદ્ધ વગેરે) અને સત્પુરુષોના નિંદક અને ધર્મના સંકેતોને દૂષણ આપનારા અને આરૂઢપતિત અથવા પારકાને ઠગનારા, આ ચાર પ્રકારના મનુષ્યો નરકગામી માનેલા છે. (૧૩) જે માણસો લોક વિરુદ્ધ વિષમ વ્યવહાર કરનારા અને બમણો વ્યાજવટો કરનારા હોય અને સો રૂપિયાથી અન્નાદિ વેચાતું લઈને બસોથી વેચનારા આ ત્રણ પ્રકારના માણસો નરકમાં જનારા હોય છે. (૧૪) જે મનુષ્યો દ્યુતકર્મોથી વ્યવહાર કરનારા અને પરીક્ષા નહિ કરવાપૂર્વક ગુણદોષારોપણ કરનારા, અને પ્રાણીહિંસામાં પ્રવર્તેલા આ ત્રણ પ્રકારના મનુષ્યો નરકમાં જનારાં માનેલાં છે. (૧૫) માલિક પાસે આશાવાળો, (દાસ વગેરે) 'હું તમને આ આપીશ' એવી પ્રતિજ્ઞા કરાયેલો, મૂલ્ય ગ્રહણ કરીને બતાવેલા કાર્યને કરનાર, કોઈ આશાથી વેતન લઈને કામ કરનાર : આ ચાર મનુષ્યોને ભેદ ઉપાયોથી (અર્થાત્ ધણીના કાનમાં આડુઅવળું સમજાવીને) નિરાશા ઉપજાવવા પૂર્વક માલિકથી જુદા કરનારા મનુષ્યો નરકમાં જાય છે. (૧૬) જે મનુષ્યો પોતાની પત્નીને ત્યાગ કરી જમે છે, ધર્મવાળીને પણ કંઈ આપતો નથી, અગ્નિ-ભૃત્ય-અતિથિઓને ત્યાગ કરી જે જમે છે, અને પિત્રિઓ અને દેવોની પૂજા ત્યાગ કરી છે જેણે એવા છો પ્રકારના મનુષ્યો નરકમાં જાય છે. (૧૭) જે મનુષ્યો વેદ (પારાયણનું ફળ) ધન માટે વેચનારા અથવા મૂલ્યથી વેદપાઠકો અને જે વેદોને દૂષણ આપનારા અને વેદોને અશુદ્ધ લખનારા આ ત્રણ પ્રકારના મનુષ્યો નરકગામી માનેલા છે. (૧૮) હે રાજન્ ! જે જનો ચામર-કંબળ વગેરે વાળ વેચનારા અને ઝેર વેચનારા અને શાસ્ત્રે નિષેધ કરેલાં કર્મોથી આજીવિકા કરનારા તે ત્રણ પ્રકારના મનુષ્યો નરકમાં જનારા માનેલા છે. (૧૯) જે મનુષ્યો તલવાર-ભાલા-છરા વગેરે વેચનારા તથા બનાવનારા તથા બાણાદિ તથા ધનુષ્ય કરનારા તે નરકમાં જનારા માનેલા છે. (૨૦) જે મનુષ્યો પથ્થરો ફેંકવાથી, ખીલા રોપવાથી, ખાડા કરવાથી, કાંટા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **प्रबोधिन्या निशि हरिर्महत्यां भक्तसंसदि । शुश्राव जागरं कुर्वन्प्रबोधिन्याः कथां नृप! ॥१॥ कथान्ते बहुधा चक्रे सत्कर्मातिप्रशंसनम् । स्वीयानां शिक्षणायैव सचासत्कर्मगर्हणाम् ॥२॥ तमुत्तमो नरपतिः प्रणम्य विनयान्वितः। बद्धाञ्जलिपुटोऽप्राक्षीत्प्रश्नावसरवित्तदा ॥३॥** राजोवाच – **देहिनामत्र भगवन्! प्रवृत्तिः कर्मसु ध्रुवम् । सर्वेषां दृश्यते लोके व्यवहारक्रियात्मनाम् ॥४॥ नरकाप्तिर्भवेत्तत्र कर्मभिः कैः क्रियावताम् । स्वर्गप्राप्तिर्भवेत्कैश्च तन्मे त्वं वक्तुमर्हसि ॥५॥** सुव्रत उवाच – **इति पृष्टो नरेन्द्रेण तेन बुद्धिमता प्रभुः । द्विविधान्यपि कर्माणि प्रोवाच सफलानि सः ॥६॥** श्रीनारायणमुनिरुवाच – **परदाराभिहर्तारः परदाराभिमर्शिनः । परदारप्रयोक्तारो ये ते निरयगा मताः ॥७॥ ये परस्वापहर्तारः परस्वानां च नाशकाः । सूचकाश्च परेषां ये ते वै निरयगा मताः ॥८॥ प्रपाणां च सभानां च सङ्क्रमाणां च भूपते! । अगाराणां च भेत्तारो नरा निरयगा मताः ॥९॥ अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम् । वञ्चयन्ति नरा ये च ते वै निरयगा मताः ॥१०॥ वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च ये नराः । मित्रच्छेदं तथा कुर्युस्ते वै निरयगा मताः ॥११॥ सूचकाः सन्धिभेत्तारः परवृत्त्युपजीवकाः । अकृतज्ञाश्च मित्राणां ते वै निरयगा मताः ॥१२॥ पाषण्डा दूषकाश्चैव समयानां च दूषकाः । ये प्रत्यवसिताश्चैव ते वै नि० ॥१३॥ विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु । लाभेषु विषमाश्चैव ते वै नि० ॥१४॥ द्यूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः । प्राणिहिंसाप्रवृत्ताश्च ते वै नि० ॥१५॥ कृताशं कृतनिर्देशं कृतभक्तं**

વગેરેથી માર્ગને રોકે છે તે મનુષ્યો નરકમાં જનારા માનેલા છે. (૨૧) આ લોકમાં જે મનુષ્યો, નિર્દોષ (દંભાદિ રહિત) પોતાના આશ્રિત ભક્તોનો ત્યાગ કરે છે અને કામાદિ દોષ રહિત પોતાના આશ્રિત સેવકોનો ત્યાગ કરે છે, જે ભક્ત અને નોકર પરંપરાથી હોય અથવા નવો હોય આ ત્રણ પ્રકારના મનુષ્યોનો ત્યાગ કરે છે તે નરકગામી માનેલા છે. (૨૨) જે મનુષ્યો દમન નહિ કરવા યોગ્ય વાછરડાઓના વૃષણનો ઉચ્છેદ વડે દમન કરે છે અને નાસિકાના વેધથી દમન કરે છે અને પશુઓને સમય વિના બાંધી રાખે છે. તે નરકગામી માનેલા છે. (૨૩) જે રાજાઓ પ્રજાનું ચોરાદિથી રક્ષણ કર્યા વગર છઠ્ઠો ભાગ લે છે અને પોતે ધનવાન થઈને પણ દીન જનોને આપતા નથી તે પણ નરકમાં જનારા માનેલા છે. (૨૪) ઘણા સમય સુધી પોતાને પ્રસન્ન કરવા પોતાની સમીપમાં રહેલા ક્ષમાશીલ, ઇન્દ્રિયોને દમનારા, બુદ્ધિશાળી તથા ઘણાં કામો જેણે કર્યાં છે એવા પુરુષોનો જે મનુષ્યો ત્યાગ કરે છે તે નરક-ગામી માનેલા છે.(૨૫) હે રાજન્ ! દુષ્કર્મ કરનારા, આ મેં કહેલા પુરુષો નરકમાં જનારા માનેલા છે. હવે **સ્વર્ગ લોકને ભોગવનારા** જે મનુષ્યો છે તે તમોને કહું છું. (૨૬) જે મનુષ્યો સત્પાત્રમાં દાન, તપ, સત્ય, શ્રદ્ધાથી પણ ધર્મનું આચરણ કરે છે,તે સ્વર્ગમાં જનારા માનેલા છે. (૨૭) ગુરુની સેવાથી, વિદ્યાર્થીને યોગ્ય તપથી અને ગુરુને પુષ્કળ ધન આપવાથી, વિદ્યાને ગ્રહણ કરી જે મનુષ્યો પ્રતિગ્રહ લેતા નથી, તે સ્વર્ગગામી થાય છે. (૨૮) જે મનુષ્યો ભય, લોભ, ક્રોધ, દરિદ્રતા તથા રોગના પરાભવથી ધર્મકાર્યનો ત્યાગ કરતા નથી. આ પાંચ પ્રકારના મનુષ્યો **સ્વર્ગમાં જનારા** છે. (૨૯) જે પુરુષો ક્ષમાવાળા, ધૈર્યવાળા સતા પોતાના ધર્મનો ત્યાગ કરતા નથી, ધર્મકાર્યોમાં સદા ઉદ્યમવાળા, મંગલાચરણથી સંપન્ન છે, તે મનુષ્યો સ્વર્ગમાં જનારા હોય છે. (૩૦) જે મનુષ્યો સર્વ પ્રકારના માંસના ભક્ષણથી નિવૃત્તિ પામેલા, પારકી સ્ત્રીઓના સંગથી, ગૌડી વગેરે ત્રણ પ્રકારની સુરા અને અગિયાર પ્રકારના મદ્યથી નિવૃત્તિ પામેલા તે સ્વર્ગગામી માનેલા છે. (૩૧) જે મનુષ્યો બ્રહ્મચર્યાદિ આશ્રમોનું રક્ષણ કરનારા, કુળપરંપરાગત સદાચારોનું રક્ષણ કરનારા, પોતાના દેશના મનુષ્યોનું રક્ષણ કરનારા તથા પોતાના નગરનાં નિવાસી જનોનું રક્ષણ કરનારા, દુષ્કાળમાં અન્નદાનથી રક્ષણ કરનારા તે સ્વર્ગગામી માનેલાં છે. (૩૨) જે મનુષ્યો પ્રાણીમાત્રની હિંસાથી રહિત, પોતાના ધર્મની વૃદ્ધિ માટે કલેશને સહન કરનારા તથા સર્વના આશ્રયભૂત અર્થાત્ સર્વેના દુઃખને નિવારણ કરનારા તે ત્રણ પ્રકારના સ્વર્ગગામી થાય છે. (૩૩) જે મનુષ્યો માતા, પિતા, ગુરુઓની યથાયોગ્ય સેવા કરે છે અને જે મિતાહારી અને જિતેન્દ્રિય તે સ્વર્ગગામી માનેલાં છે. (૩૪) જે પુરુષો આ લોકમાં ધનવાન, શારીરિક બળવાળા, યૌવન અવસ્થાવાળા હોવા છતાં પણ સર્વદા ગર્વથી રહિત હોય છે, તે સ્વર્ગમાં જનારા માનેલા છે. (૩૫) જે અપરાધીઓમાં પણ (અતિથિરૂપે આવેલામાં) સ્નેહયુક્ત હોય છે, બીજાનું દુઃખ જોઈને દ્રવી જતા અંતઃકરણવાળા, સજ્જનોની સાથે પ્રીતિવાળા, બીજાને કારણ વગર સ્વધર્મનિષ્ઠ જનોને સુખ આપનારા તે મનુષ્યો સ્વર્ગમાં જનારા માનેલા છે. (૩૬) જે જનો હજારો સાધુ-બ્રાહ્મણોને જમાડનારા, હજારો રૂપિયા સત્પાત્રોમાં આપનારા, તથા હજારો મનુષ્યોને અન્નજળાદિ આપવાથી રક્ષણ

कृतश्रमम् । भेदैर्ये व्यपकर्षन्ति ते वै नि० ॥१६॥ पर्यश्नन्ति च ये दारानग्निभृत्यातिथींस्तथा । उत्सन्नपितृदेवेज्यास्ते वै नि० ॥१७॥ वेदविक्रयिणश्चैव वेदानां चैव दूषकाः । वेदानां लेखकाश्चैव ते वै नि० ॥१८॥ केशविक्रयका राजन्विषविक्रयकाश्च ये । विकर्मभिर्ये जीवन्ति ते वै नि० ॥१९॥ शस्त्रविक्रयिकाश्चैव शस्त्राणां कर्तृकास्तथा । शल्यानां धनुषां ये च ते वै नि० ॥२०॥ शिलाभिः शङ्कुभिर्वापि श्वभ्रैर्वा तीक्ष्णकण्टकैः । ये मार्गमनुरुन्धन्ति ते वै नि० ॥२१॥ उपाध्यायांश्च भृत्यांश्च भक्तांश्च स्वसमाश्रितान्। ये त्यजन्त्यत्र निर्दोषांस्ते वै नि० ॥२२॥ अदान्तदमकाश्चैव नसानां वेधकाश्च ये । बन्धकाश्च पशूनां ये ते वै नि० ॥२३॥ अगोप्तारश्च राजानो बलिषड्भागतस्कराः । समर्थाश्चाप्यदातारस्ते वै नि० ॥२४॥ क्षान्तान्दान्तांस्तथा प्राज्ञान्दीर्घकालं सहोषितान्। त्यजन्ति कृतकृत्यान् ये ते वै नि० ॥२५॥ एते निरयगाः प्रोक्ता नरा दुष्कृतकारिणः । भागिनः स्वर्गलोकस्य ये तान् वच्म्यथ भूपते! ॥२६॥ दानेन तपसा चैव सत्येन श्रद्धयापि च । ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः ॥२७॥ शुश्रूषाभिस्तपोभिश्च विद्यामादाय वा धनैः । ये प्रतिग्रहनिःस्नेहास्ते नराः० ॥२८॥ भयाल्लोभात्तथा क्रोधाद्दारिद्याद्व्याधिधर्षणात्। सत्कृत्यं न विमुञ्चन्ति ते नरा० ॥२९॥ क्षमावन्तश्च धीराश्च धर्मकार्येषु चोत्थिताः । मङ्गलाचारसम्पन्नास्ते नराः० ॥३०॥ निवृत्ताः सर्वमांसेभ्यः परदारेभ्य एव च । सुराभ्यो ये मद्येभ्यस्ते नराः० ~~॥३१॥ आश्रमाणां च पातारः कुलसत्कर्मणां तथा। देशानां नगराणां च ते न० ॥३२॥ सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च~~

કરનારા, તે ત્રણ પ્રકારના મનુષ્યો સ્વર્ગમાં જનારા માનેલા છે. (૩૭) હે નૃપસત્તમ ! જે મનુષ્યો પાત્ર બ્રાહ્મણોને સુવર્ણ આપનારા, ગાયો આપનારા તથા અન્ન-જળ અને વાહનો આપનારા તે પાંચ પ્રકારના મનુષ્યો **સ્વર્ગમાં જનારા** થાય છે. (૩૮) જે પુરુષો, વિવાહસંબંધી ઉપયોગી ધન, અન્ન તથા વસ્ત્રોને યથાયોગ્ય આપનારા તે પુરુષો સ્વર્ગમાં જનારા માનેલા છે. (૩૯) અગ્નિહોત્રની શાળા, ગૃહ, બગીચો, કૂવો, વાવ, ઉપવન, સભા, પાનીયશાળા પોતાની શક્તિ પ્રમાણે ધર્મને માટે કરાવે છે તે મનુષ્યો સ્વર્ગમાં જાય છે. (૪૦) હે ભૂપતે ! વટેમાર્ગુઓને ઊતરવાની ધર્મશાળા-ક્ષેત્ર અને સાધનોએ સહિત ગૃહો અને માગનારાઓને ઈચ્છિત વસ્તુઓ આપનારા સ્વર્ગમાં જનારા માનેલા છે. (૪૧) જે નરો સર્વ ભૂત-પ્રાણીઓમાં દયાવાળા, હિંસાવાળો ધર્મ જેમણે ત્યાગ કર્યો છે, અને સર્વ જનોએ વિશ્વાસ કરવા યોગ્ય આ ત્રણ પ્રકારના મનુષ્યો સ્વર્ગમાં જાય છે. (૪૨) જે મનુષ્યો પારકા ધનમાં મમતા રહિત, હંમેશા પારકી સ્ત્રીઓના પ્રસંગનો ત્યાગ કરનારા, પોતાના ધર્મથી પ્રાપ્ત થયેલા અન્નને ભોગવનારા આ ત્રણ પ્રકારના મનુષ્યો સ્વર્ગમાં જનારા માનેલા છે. (૪૩) જે પરસ્ત્રીઓમાં માતાની બુદ્ધિ, બહેનની બુદ્ધિ અને પોતાની દીકરીની બુદ્ધિ રાખે છે, તે મનુષ્યો સ્વર્ગમાં જાય છે. (૪૪) જે નિરંતર ચોરની ક્રિયાઓથી નિવૃત્તિ પામેલા, પોતાની વૃત્તિથી પ્રાપ્ત થયેલા ધનથી સંતોષ પામેલા, પોતાના ભાગ્ય ઉપર જીવનારા - તે મનુષ્યો સ્વર્ગગામી માનેલા છે. (૪૫) જે જિતેન્દ્રિય બ્રહ્મચર્ય પરાયણ પરસ્ત્રીઓ થકી હંમેશા ચક્ષુની વૃત્તિઓ પાછી વાળનારા (અર્થાત્ નહીં જોનારા) તે મનુષ્યો સ્વર્ગમાં જનારા માનેલા છે. (૪૬) જે સ્નેહવાળી, બીજાને પીડા નહીં કરનારી, મધુર, દોષેરહિત, સ્વાગતવાણી ઉચ્ચારણ કરે છે તે પુરુષો સ્વર્ગમાં જનારા માનેલા છે. (૪૭) ચાડિયાપણાથી રહિત થઈને રૂક્ષ-કર્ણને કઠોર તથા અતિવાદ યુક્ત વચન બોલતા નથી તે સ્વર્ગમાં જાય છે. (૪૮) જે મનુષ્યો ખળતાયુક્ત વાણી બોલતા નથી, મિત્રોને ભેદ કરનારી વાણી બોલતા નથી, સત્ય, મિત્રતાયુક્ત વાક્ય બોલે છે તે સ્વર્ગમાં જનારા માનેલા છે. (૪૯) જે સર્વ ભૂત-પ્રાણીઓમાં સમદૃષ્ટિવાળા, ચતુર હોવા છતાં વાણીની કઠોરતા અને દંડ પારૂષ્યનો ત્યાગ કરે છે અને બીજાનો દ્રોહ નહીં કરનારા - તે મનુષ્યો સ્વર્ગમાં જનારા માનેલા છે. (૫૦) જે માણસો ક્રોધથી પણ બીજાના અંતઃકરણને દુઃખ કરનારી વાણી બોલતા નથી, ક્રોધ પામેલા હોય તો પણ શાંતિથી બોલે તે સ્વર્ગમાં જનારા માનેલા છે. (૫૧) જે ગામમાં, ગૃહમાં અને વનમાં રહેલું જે પારકું ધન તેને ક્યારેય ગ્રહણ કરવા ઈચ્છતા નથી તે મનુષ્યો સ્વર્ગમાં જનારા થાય છે. (૫૨) તેવી જ રીતે પોતે ઉપભોગ બુદ્ધિથી એકાંતમાં પ્રાપ્ત થયેલી પારકી સ્ત્રીઓને મનથી પણ ઈચ્છા કરતા નથી, તે મનુષ્યો સ્વર્ગમાં જાય છે. (૫૩) જે નરો સર્વમાં મિત્રભાવ યુક્ત, શત્રુ અને મિત્રને પામીને હંમેશા સમાન ભાવવાળા મનથી સેવે છે, તે સ્વર્ગમાં જનારા મનાય છે. (૫૪) જે શાસ્ત્રનું અધ્યયન અને શ્રવણવાળા, દયાળુ, પવિત્ર, સત્ય વાણીવાળા, પોતાની વૃત્તિથી પ્રાપ્ત થયેલા ધનથી સંતોષવાળા છે, તે સ્વર્ગમાં નિવાસ કરનારા માન્યા છે. (૫૫) જે હંમેશા શ્રદ્ધાવાળા, સર્વમાં મિત્રભાવવાળા, વ્યવહારમાં શુદ્ધિવાળા, શુદ્ધ માણસો જેમને પ્રિય છે એવા, ધર્મ અને અધર્મને જાણનારા તે જનો સ્વર્ગમાં

ये । सर्वस्याश्रयभूताश्च ते न० ॥३३॥ मातरं पितरं चैव शुश्रूषन्ति गुरूंश्च ये । जितेन्द्रिया मिताहारास्ते न० ॥३४॥ आढ्याश्च बलवन्तश्च यौवनस्था अपीह ये । भवन्ति निर्मदा नित्यं ते न० ॥३५॥ अपराद्धेषु सस्नेहा मृदवो मृदुवत्सलाः । आराधनसुखाश्चापि पुरुषाः स्वर्गगामिनः ॥३६॥ सहस्रपरिवेष्टारस्तथैव च सहस्रदाः । त्रातारश्च सहस्राणां ते नराः स्वर्गगामिनः ॥३७॥ सुवर्णस्य च दातारो गवां च नृपसत्तम! । अन्नाम्बुवाहनानां च ते न० ॥३८॥ वैवाहिकानां द्रव्याणामन्नानां च यथोचितम् । दातारो वाससां चैव पुरुषाः स्वर्गगामिनः ॥३९॥ विहारावसथोद्यानकूपारामसभाप्रपाः । कारयन्ति स्वशक्त्या ये ते न० ॥४०॥ निवेशनानां क्षेत्राणां वसतीनां च भूपते! । दातारः प्रार्थितानां च ते न० ॥४१॥ सर्वभूतदयावन्तो विश्वास्याः सर्वदेहिनाम् । त्यक्तहिंसासमाचारास्ते न० ॥४२॥ परस्वे निर्ममा नित्यं परदारविवर्जिताः । धर्मलब्धान्नभोक्तारस्ते न० ॥४३॥ मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये । परदारेषु वर्तन्ते ते न० ॥४४॥ स्तैन्यान्निवृत्ताः सततं सन्तुष्टाः स्वधनेन च । स्वभाग्यान्युपजीवन्ति ते न० ॥४५॥ परदारेषु ये नित्यं चरितावृत्तलोचनाः । जितेन्द्रियाः शीलपरास्ते न० ॥४६॥ श्लक्ष्णां वाणीं निराबाधां मधुरां दोषवर्जिताम् । स्वागतेनाभिभाषन्ते ते न० ॥४७॥ परुषं ये न भाषन्ते कटुकं निष्ठुरं तथा । अपैशुन्यरताः सन्तस्ते न० ॥४८॥ पिशुनां ये न भाषन्ते मित्रभेदकरीं गिरम् । ऋतं मैत्रं तु भाषन्ते ते न० ॥४९॥ ये वर्जयन्ति पारुष्यं परद्रोहं च ये नराः । सर्वभूतसमा दान्तास्ते न० ॥५०॥ न कोपाद्व्याहरन्ते ये वाचं हृदयदारिणीम् । सान्त्वं वदन्त्यपि क्रुद्धास्ते न० ॥५१॥ ग्रामे गृहे वा यद्द्रव्यं पारक्यं विजने स्थितम्। नाभिनन्दन्ति

જનારા હોય છે. (૫૬) જે ન્યાયયુક્ત ગુણોવાળા, સર્વ પ્રકારે દેવ-બ્રાહ્મણની સેવા-પરાયણ યથોચિત ઉદ્યોગવાળા તે મનુષ્યો સ્વર્ગમાં જનારા માનેલાં છે. (૫૭) હે રાજન્ ! આ પ્રકારે આ લોકમાં જે પુરુષો **સત્કર્મમાં રહેલા** છે, તે પુરુષો જ **સ્વર્ગમાં જાય છે** આ પ્રમાણે તમો જાણો. (૫૮) જે માણસો હજારો ઉપાયોથી પણ દુષ્પ્રાપ્ય મનુષ્ય શરીરને પામીને દુષ્કર્મોનો ત્યાગ કરી સત્કર્મોને જ કરે છે, તે મનુષ્યો ભૂતલમાં ધન્ય છે. (૫૯) **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રમાણે શ્રીહરિનું વચન સાંભળીને હર્ષ પામેલા તે ઉત્તમરાજા અને બીજા સમગ્ર ભક્તો શ્રીહરિને સ્તુતિપૂર્વક નમસ્કાર કરતા હતા. (૬૦) પછી બારસને દિવસે શ્રીહરિ હજારો બ્રાહ્મણોને તેમનાં ઈષ્ટ, મિષ્ટ, શ્રેષ્ઠ ભોજનો વડે જમાડતા હતા. (૬૧) પછી પ્રભુ દૂર દેશોથી આવેલાં જનોને પોતપોતાના દેશમાં જવા માટે આજ્ઞા આપતા હતા. કેટલાક સો ગાઉ દૂરથી,કેટલાક સો ગાઉની અંદરથી આવેલાં જનો તો ઘણું કરીને શ્રીહરિની સમીપથી ગયાં નહી. (૬૨)

હે રાજન્ ! શ્રીહરિકૃષ્ણ ભગવાનનાં ચરિત્ર, કીર્તન, ગુણગાન, સ્મરણ અને ચિંતન તથા અર્ચન, વંદન હંમેશા કરનારાં જનોને શ્રીહરિના સમીપમાં દિવસો ક્ષણવત્ વીતી ગયા. (૬૩)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે કાર્યયિન ગ્રામે સ્વર્ગનરકગામી પુરુષલક્ષણનિરૂપણ નામા ચતુર્દશોऽધ્યાયઃ (૧૪)*

## અધ્યાય : ૧૫

### હેમન્તસિંહ અને સુરસિંહ રાજાએ પોતપોતાનાં પુરોમાં લઈ જવા માટે આમંત્રણ આપ્યું તેના જવાબમાં શ્રીહરિએ મંત્રણા કરી, તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પ્રબોધિની ઉત્સવ વીતી ગયો ત્યારે દૂર દેશના લોકો શ્રીહરિની આજ્ઞાથી જ કારીયાણી ગામથી પોતપોતાના દેશમાં જવા ઉત્સાહવાળા થયા, ત્યારે **હેમન્તસિંહ રાજા** કારીયાણી ગામના વસ્તાખાચર વગેરે ભક્તોમાં શ્રીહરિનું ભક્તવત્સલપણું જોઈને પોતાના ભવનમાં શ્રીહરિની પ્રસન્નતા માટે, શ્રીહરિએ કરેલા ઉત્સવ જેવો **ઉત્સવ** કરવા માટે ઈચ્છા કરતા હતા. (૧-૨) પોતાના જીર્ણ દુર્ગપત્તન (જૂનાગઢ નગર)માં શ્રીનારાયણ મુનિને લઈ જવા ઈચ્છતા હેમન્તસિંહે પોતાનાં જનોની સાથે અને પોતાના પરિવાર સાથે શ્રીહરિની સમીપમાં જ નિવાસ કર્યો. (૩) પોતાના મિત્ર રાજા વસ્તાખાચરના ઘરમાં વસ્તા ખાચરે અતિ સન્માન કરાયેલા સતા પ્રાર્થનાનો અવસર જોતાં હેમન્તસિંહ તેરસથી આરંભીને ત્રણ દિવસ ત્યાં જ રહ્યા. (૪) હેમન્તસિંહ રાજાનાં **ગંગા** નામનાં માતા તથા ઝવેર નામનાં પત્ની અને

**ये नित्यं ते न० ॥५२॥ तथैव परदारान् ये कामवृत्तान् रहोगतान् । मनसापि नहीच्छन्ति ते न० ॥५३॥ शत्रुं मित्रं च ये नित्यं तुल्येन मनसा नराः । भजन्ति मैत्राः सङ्गम्य ते न० ॥५४॥ श्रुतवन्तो दयावन्तः शुचयः सत्यसङ्गराः । स्वैरर्थैः परिसन्तुष्टास्ते न० ॥५५॥ श्रद्धावन्तो मैत्रवन्तश्चोक्षाश्चोक्षजनप्रियाः । धर्माधर्मविदो नित्यं ते न० ॥५६॥ न्यायोपेता गुणोपेता देवद्विजपराः सदा । यथोचितोद्योगपरास्ते नराः स्वर्गगामिनः ॥५७॥ एवं सत्कर्मसंस्था ये भवन्ति पुरुषा इह । स्वर्गं यान्ति त एवेति जानीहि नृपसत्तम! ॥५८॥ मानुष्यं दुर्लभं प्राप्य सत्कर्माण्येव ये नराः । हित्वेतराणि कुर्वन्ति ते धन्याः सन्ति भूतले ॥५९॥** सुव्रत उवाच – **इत्याश्रुत्य प्रभोर्वाक्यं स राजा मुदितो नृप! । अन्येऽपि भक्ताः सकलाः संहृष्टास्तं ववन्दिरे ॥६०॥ ततो द्वितीये दिवसे ब्राह्मणान्स सहस्रशः । भोजयामास भगवांस्तदिष्टैर्मिष्टभोजनैः ॥६१॥ दूरदेशागताँल्लोकान् व्यसृजत्स ततः प्रभुः । शतक्रोशीयलोकास्तु प्रायशो न ययुस्ततः ॥६२॥ श्रवणं गुणकीर्तनं हरेः स्मरणं चार्चनवन्दने तथा। सततं नृप! कुर्वतां ययुः क्षणसाम्येन दिनानि तन्नृणाम् ॥६३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थ प्रकरणे कार्यायनग्रामे स्वर्गनरकगामिपुरुषलक्षणनिरूपणनामा चतुर्दशोऽध्यायः ॥१४॥

सुव्रत उवाच – **प्रबोधिन्युत्सवेऽतीते ततो देशं निजं निजम् । दूरदेशीयलोकेषु गच्छत्स्वेवाज्ञया प्रभोः ॥१॥ हेमन्तसिंहो नृपतिर्भक्तवात्सल्यमीशितुः । तत्र दृष्ट्वा निजगृहे व्यधित्सत्तादृशोत्सवम् ॥२॥ सह स्वदेशीयजनैः परिवारेण चात्मनः । तत्रैवोवास नगरं निनीषुः स निजं हरिम् ॥३॥ वास्तोरेव गृहे सख्युर्वसंस्तेनातिमानितः । प्रार्थनावसरं पश्यन्**

**અનુપસિંહ** નામના  ભાઈ તથા તેમની પત્ની પ્રાણા તથા હેમન્તસિંહનાં **અદિતિ** નામનાં બહેન અને મોટિની નામની દીકરી વગેરે સ્વજનો તથા મયારામ વગેરે પોતાના દેશના પુરુષો અને લાડિની વગેરે પોતાના દેશની સ્ત્રીઓએ સહિત હેમન્તસિંહ રાજા કારતક સુદી ચતુર્થીને દિવસે પ્રાતઃકાળમાં સભામાં બેઠેલા શ્રીહરિને અભિવન્દન કરી પ્રસન્ન શ્રીહરિને જોઈને પ્રાર્થના કરતા હતા. (૫ થી ૮) હે ભગવન્ ! હે સર્વ લોકોના ઈશ્વર, હે ભક્તવત્સલ ! હે સત્પતે ! તમારા ચરણકમળનો અનન્યાશ્રિત સેવક એવો હું તે મારે વિષે કૃપા કરવા માટે યોગ્ય છો. (૯) હે સ્વામિન્ ! હે ભૂમન્ ! હે સદ્ધર્મ પ્રવર્તક ! આ કારીયાણી પુરમાં તમોએ જેવો ઉત્સવ કર્યો તેવો જ ઉત્સવ મારા ભવનમાં કરવો છે. (૧૦) હે નાથ! ભક્તપ્રિય, તમારે નિર્ધન અને ધનવાનોમાં પણ સમગ્ર ભક્તોમાં સમાન દયા છે. (૧૧) હે ભગવન્ ! અમારા દેશનાં જનો, તમારા આશ્રિત સર્વે ભક્તજનો તો **જૂનાગઢમાં તમારું આગમન થાય** તેવી અતિ ઈચ્છા કરે છે અને મારી વૃદ્ધ માતા વિશેષપણે ઈચ્છે છે. (૧૨) હે રાજન્ ! તે સમયે મયારામ ભટ્ટ બન્ને હાથ જોડીને બોલ્યા : હે ભગવન્ ! તમો આ આ હેમન્તસિંહે કહ્યા પ્રમાણે કરવા માટે સર્વથા યોગ્ય છો. (૧૩) હે હરે ! અમારા દેશમાં તમારા ભક્તજનો તમારા આગમનની વાટ જુએ છે. ભક્તના કલ્પવૃક્ષ તમો તમારા ભક્તજનોના મનોરથ પૂર્ણ કરો. (૧૪) હે પ્રભો ! આ રાજાએ તમારા માટે સેવાની સામગ્રી ભેગી કરી રાખી છે, માટે હેમન્તસિંહ રાજાનો મનોરથ પૂર્ણ કરો. (૧૫) હે રાજન્ ! આ પ્રકારે હેમન્તસિંહ રાજા અને મયારામ ભટ્ટે પ્રાર્થના કરાયેલા, તે બન્નેનો નિષ્કપટભાવ જાણનારા નારાયણ મુનિ પ્રસન્ન થઈને બોલ્યા. (૧૬) હે હેમન્તસિંહ ! હું મુનિઓની સાથે તમારા પુરમાં આવીશ. હું તમારો નિષ્કપટ ભાવ જાણું છું. (૧૭) હે રાજન્ ! શ્રી હરિકૃષ્ણ ભગવાન આ પ્રમાણે બોલ્યા. તે સમયે નાગડકાપુરના અધિપતિ **સૂરસિંહ રાજા** બન્ને હાથ જોડી ઉતાવળા થઈને શ્રીહરિની સમીપમાં આવ્યા. (૧૮) સૂરસિંહ રાજાનાં પત્ની સાતિ, તેમની પુત્રીઓ ધન્યા અને વલ્લુ અને નાથો નામના પુત્ર વગેરે સંબંધી જનો સૂરસિંહની પાછળ તત્કાળ આવી પહોંચ્યા. (૧૯) નાગડકાપુરનો વૈશ્યજાતિનો પટેલ **સિંહ (સંઘા પટેલ)** નામવાળો તે પણ તેજસ્વી નામની ભાર્યાની સાથે શ્રીહરિની સમીપમાં આવ્યો. પછી તેમની સાથે સૂરસિંહ રાજા શ્રીહરિને નમસ્કાર કરી બોલ્યા. (૨૦) હે ભગવન્ ! હું તમોને મારા પુરમાં લઈ જવા માટે આવેલો છું, પોતાનાં સંબંધીઓની સાથે અહીંયાં તમારી સમીપમાં રહેલા મને ઘણા દિવસ થઈ ગયા. (૨૧) પોતાના એક જ આશ્રયવાળા મારા વિષે તમો કૃપા કરવા માટે યોગ્ય છો. હે રાજન્ ! આ પ્રકારે પ્રાર્થના કરતા સૂરસિંહને જોઈને  શ્રીહરિ પોતાના મનમાં વિચાર કરવા લાગ્યા : (૨૨) 'આ સૂરસિંહ અને હેમન્તસિંહ બન્ને મારા નિષ્કપટ દૃઢ ભક્તો છે, બન્ને મને પ્રિય છે, બન્ને પણ એક સમયમાં જ પોતપોતાના પુરમાં લઈ જવા યાચના કરે છે. (૨૩) મારે બન્નેનું પણ પ્રિય અવશ્ય જ કરવું, જેવી રીતે બન્નેમાં ભેદ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

व्यत्क्रामद्दिनत्रयम् ॥४॥ गङ्गाख्या तस्य माता च भार्या जवहराभिधा । भ्राता चानूपसिंहाख्यस्तद्भार्या प्राणसंज्ञिका ॥५॥ अदितिर्भगिनी तस्य मोटिन्याख्या च बन्धुजा । इत्यादिभिश्च स्वजनैः सहितः स नराधिपः ॥६॥ मयरामप्रभृतिभिस्तद्देशीयैश्च पूरुषैः । लाडिनीप्रमुखाभिश्च तद्देशस्त्रीभिरन्वितः ॥७॥ चतुर्थे दिवसे प्रातः सभायामास्थितं प्रभुम् । प्रणम्य प्रार्थयामास प्रसन्नं समवेक्ष्य तम् ॥८॥ हेमन्तसिंह उवाच–भगवन्सर्वलोकेश! भक्तवत्सल! सत्पते ! । दासे मयि कृपां कर्तुं त्वत्पदैकाश्रयेऽर्हसि ॥९॥ उत्सवोऽत्र यथा स्वामिन्! कृतस्तद्वन्ममालये । कर्तव्यो भवता भूमन्सद्धर्माध्वप्रवर्तक! ॥१०॥ भक्तप्रियस्य ते नाथ! स्वभक्तेष्वखिलेष्वपि । समाना वृत्तिरेवास्ति निर्धनेषु धनिष्वपि ॥११॥ अस्मद्देशीयलोकास्तु जीर्णदुर्गागमं तव । भृशमिच्छन्ति भगवन्वृद्धेयं जननी च मे ॥१२॥ तदा बद्धाञ्जलिपुटो मयरामद्विजोऽब्रवीत् । भगवन्नेवमेव त्वं कर्तुमर्हसि सर्वथा ॥१३॥ प्रतीक्षन्ते जनाः सर्वे देशेऽस्माकं तवागमम् । भक्तकल्पद्रुमस्तेषां पूरय त्वं मनोरथम् ॥१४॥ त्वदर्थमेव सम्भाराः सम्भृताः सन्त्यनेन च । राज्ञातोऽस्य प्रभो! तूर्णं कुरु पूर्णं मनोरथम् ॥१५॥ इत्यर्थितस्तेन राज्ञा वृद्धभट्टेन तेन च । तन्निष्कपटभावज्ञः प्रीतो भूपावदत्प्रभुः ॥१६॥ आगमिष्यामि नृपते! त्वत्पुरं मुनिभिः सह । तव निष्कपटं भावमहं जानामि निश्चितम् ॥१७॥ इत्थं वदत्येव हरौ नागटङ्कपुराधिपः । सूरो बद्धाञ्जलिपुटस्तत्रागच्छत्त्वरान्वितः ॥१८॥ नाम्ना सातिश्च तत्पत्नी धन्या वल्लूश्च तत्सुते । नाथाख्यस्तत्सुतश्चैते तत्पश्चादाययुर्द्रुतम् ॥१९॥ तत्पुराधिकृतो वैश्यो नाम्ना सिंहः सभार्यकः । सोऽप्यागतोऽथ तैः साकं नत्वा सूरोऽब्रवीद्धरिम् ॥२०॥ भगवन्स्वपुरं नेतुं त्वामहं समुपागतः । बहून्यहान्यतीतानि स्थितस्यात्र मम स्वकैः ॥२१॥ तस्मिन्मयि कृपां कर्तुं

(મારે વિષે વિષમબુદ્ધિ અથવા પરસ્પર અમર્ષ) થાય નહીં તેમ પ્રથમ કોના પુરમાં જઉં.' (૨૪) હે રાજન્ ! આ પ્રમાણે વિચાર કરતા શ્રીહરિ 'તમો બેસો, તમોને વિચાર કરીને કહું છું.' આ પ્રકારે સૂરસિંહ નૃપતિને કહીને તત્કાળ પોતાના ભવનમાં ગયા. (૨૫) હે નિર્દોષ પ્રતાપસિંહ નૃપતે ! શ્રીહરિએ પોતાના નિવાસમાં પલંગ પર બેસીને સર્વજ્ઞ હોવા છતાં પણ મનુષ્ય નાટકનું અનુકરણ કરતા, તેનો **નિર્ણય** પૂછવા માટે **બ્રહ્માનંદ** મુનિ અને **નિત્યાનંદ** મુનિને બોલાવ્યા. (૨૬) મહા સમર્થ શ્રીહરિએ બન્ને મુનિઓની સાથે એકાન્તમાં બેસીને અતિશય શ્રેષ્ઠ બુદ્ધિશાળી, પોતાના શ્રેષ્ઠ ભક્તો બન્ને મુનિઓને પૂછ્યું. (૨૭) હે સદ્‌બુદ્ધિવાળા ! સર્વ કાર્ય અને અકાર્યના જ્ઞાનમાં અત્યંત નિપુણ તમો બન્ને અતિપ્રિય નેત્રની માફક અર્થને બતાવનારા જ છો. (૨૮) માટે આજે ઉત્પન્ન થયેલો સંશય તમોને પૂછું છું. સૂરસિંહ અને હેમન્તસિંહ આ બન્નેના મધ્યે કોના પુરમાં પ્રથમ જવું. (૨૯) બેમાંથી એકના નગરમાં જઈએ ત્યારે બીજાની અપ્રસન્નતા થાય. મારે તો બન્નેના પુરમાં અવશ્ય જવું છે, માટે આ સંકટમાં જે યોગ્ય હોય તે તમો કહો. (૩૦) હે રાજન્ ! આ પ્રકારે ત્રિલોકવાસી જનોને પરમાર્થ જ્ઞાનના ઉપદેશક, સર્વજ્ઞ શ્રીહરિએ પણ મનુષ્યાનુકરણથી અજ્ઞાનીની માફક પુછાયેલા બન્ને મુનિઓએ પોતાના હૃદયમાં વિચાર કર્યો. (૩૧) આ શ્રીહરિ પ્રત્યક્ષ ભગવાન છે તો પણ મનુષ્યભાવનું અનુકરણ કરતા સતા પૂછવાના નિમિત્તથી આપણા બન્નેની ઉપર અનુગ્રહ જ કરે છે. બ્રહ્માદિ દેવો પણ આ લોકમાં શ્રીહરિનાં દર્શન કોઈ સમયે દૂરથી પામે છે, ક્યારેક તો પામતા પણ નથી, તે આ શ્રીહરિ એકાંતમાં આપણી સાથે બેસીને પૂછે છે, આ આશ્ચર્ય છે. (૩૨-૩૩) શ્રીહરિએ આ બન્નેના પુરમાં જવું એવો નિશ્ચય કરેલો છે. માટે નિષેધ કરવો તે હાલમાં યોગ્ય નથી. જે માટે શ્રીહરિ પોતાની ઈચ્છાથી જ બન્નેના પુરમાં જવા ઉત્સાહવાળા છે જ. આ શ્રીહરિ બન્નેના પુરમાં જવા નિષેધની યુક્તિઓ હાલમાં અંગીકાર નહિ કરે, માટે ગમનનું અનુમોદન કરી શ્રીહરિના પ્રશ્નનો જવાબ આપવો જ. (૩૪-૩૫) હે રાજન્ ! આ પ્રકારે મનથી નિશ્ચય કરી મહાસમર્થ શ્રીહરિને મુનિઓ કહેવા લાગ્યા : હે સ્વામિન્ ! તમોએ જે પૂછ્યું, તે તમારા પ્રશ્નમાં અમોને આવો ભાસ થાય છે કે, હે હરે ! જેથી તમારા બન્ને ભક્તો સૂરસિંહ અને હેમન્તસિંહ તુલ્ય છે માટે બન્નેનું પણ પ્રિય અવશ્ય કરવું. તો પણ તમોએ સૂરિસંહના પુર નાગડકામાં પ્રથમ જઈને સૂરસિંહ રાજાનો સત્કાર કરીને પછી જૂનાગઢ જવું. (૩૬-૩૭) હે પ્રભો ! સૂરસિંહનું પુર જૂનાગઢમાં જવાના માર્ગમાં જ આવે છે, સૂરસિંહના પુરનું ઉલ્લંઘન કરીને જૂનાગઢ કેમ જઈ શકાય? જે બીજો માર્ગ છે તે હાલમાં કાળ-દેશાદિકની વિગુણતાને લીધે કુત્સિત થઈ ગયો છ . માટે પ્રથમ નાગડકામાં જવું આ પ્રકારે અમારા બેનો નિર્ણય છે. તમારી જેવી ઈચ્છા હોય તે પ્રમાણે કરો. (૩૮-૩૯) સુ -તમુનિ પ્રતાપસિંહ રાજાને કહે છે, હે રાજન્ ! આ પ્રકારે બન્ને મુનિઓનાં વચન સાંભળીને શ્રીહરિ, મતિમાન

त्वमर्हसि निजाश्रिते । इति सम्प्रार्थयन्तं तं दृष्ट्वा सोऽचिन्तयद्धृदि ॥२२॥ उभावेतावपि दृढं भक्तौ निष्कपटौ मम । सह प्रार्थयतश्च द्वौ प्रेष्ठौ चौभौ समौ मम ॥२३॥ अवश्यमेव हि मया प्रियं कार्यं द्वयोरपि । आदौ कस्य पुरं यामि भेदो न स्याद्यथोभयोः ॥२४॥ चिन्तयन्निति तिष्ठ त्वं विचार्य कथयामि ते । इत्युक्त्वा वासभवनं जगाम सत्वरं हरिः ॥२५॥ मञ्चमास्थाय तत्प्रष्टुं सर्वज्ञोऽपि नृनाट्यधृत् । ब्रह्मानन्दं मुनिं नित्यानन्दं चाऽऽह्वास्त सोऽनघ! ॥२६॥ उपविश्य रहःस्थाने साकं ताभ्यां स ईश्वरः । पप्रच्छ तौ वरीयांसौ निजभक्तौ महामती ॥२७॥ युवां प्रेष्ठतमौ मे स्थो नेत्रे एव हि सद्धियौ । अतीव निपुणौ सर्वकार्याकार्यावबोधने ॥२८॥ अतः पृच्छामि वामद्य जातं संशयमात्मनः । सूरहेमन्तयोर्मध्ये प्रागगम्यं कस्य वा पुरम् ॥२९॥ गते त्वेकस्य नगरं द्वितीयाप्रियता भवेत् । गन्तव्यं तु ममावश्यमतो युक्तमिहोच्यताम् ॥३०॥ इत्थं त्रिलोकीगुरुणा सर्वज्ञेनापि मुग्धवत् । सम्पृष्टौ तौ स्वहृदये विचारं चक्रतुर्मुनी ॥३१॥ अयं हि भगवान् साक्षान्मानुष्यमनुशीलयन् । अनुग्रहं करोत्येव सम्पृच्छनमिषेण नौ ॥३२॥ देवा ब्रह्मादयोऽप्यत्र दूरादेवास्य दर्शनम् । लभन्ते क्वापि न क्वापि स नौ पृच्छत्यहो रहः ॥३३॥ गमनस्य निषेधस्तु कर्तुं शक्योऽस्य नाधुना । उत्कण्ठितो यतोऽस्त्येष गन्तुं नूनं स्वतः प्रभुः ॥३४॥ निषेधस्यावयोर्युक्तीर्मंस्यते नैष साम्प्रतम् । अतोऽनुमोद्य गमनं कार्यं प्रश्नोत्तरं किल ॥३५॥ इति निश्चित्य मनसा ब्रुवाते स्म तमीश्वरम् । यत्पृष्टं भवता स्वामिंस्तत्रेत्थं भाति नौ किल ॥३६॥ उभौ भक्तौ समानौ ते प्रियं कार्यं द्वयोरपि । सूरं

---

જનોમાં શ્રેષ્ઠ બન્ને મુનિઓને માન આપતા સતા પ્રસન્ન ચિત્તવાળા મહાસભામાં આવીને પોતાના સિંહાસનમાં બિરાજમાન થયા. (૪૦)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે કાર્યાયનગ્રામે હેમન્તસિંહ સૂરામંત્રણે તત્પુરગમન સંમંત્રણનિરૂપણનામા પંચદશોઽધ્યાય: (૧૫)*

## અધ્યાય : ૧૬

**શ્રીહરિને પોતાના પુરમાં લઈ જવામાં હેમંતસિંહ અને ઉત્તમરાજા આ બન્નેની પરસ્પર ઉક્તિ અને યુક્તિઓનું નિરૂપણ સારી રીતે કરેલું છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રીહરિએ હેમન્તસિંહને કહ્યું : હે નૃપ ! તમો તમારા દેશનાં જનોની સાથે તમારા પુરમાં જાઓ. હું તમારા પુરમાં આવું છું જ. (૧) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેવાયેલા હેમન્તસિંહ પ્રસન્નતાપૂર્વક તે સમયે જ જવા માટે તૈયાર થયા. પછી શ્રીહરિએ સૂરસિંહને કહ્યું, હે સૂરસિંહ ! તમો તત્કાળ તમારા પુરમાં જાઓ. (૨) હે સૂરસિંહ ! હું કાલે પ્રાતઃકાળે તમારા પુરમાં આવીશ. આ મારા વચનમાં સંશય નથી. માટે બ્રાહ્મણોની પાસે રસોઈ કરાવી અમારા આગમનની પ્રતીક્ષા કરો. (૩) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા સૂરસિંહ અતિહર્ષ પામી પોતાનાં સંબંધીઓ સાથે પોતાના પુરમાં ગયા. આ શ્રીહરિનું સૂરસિંહ અને હેમન્તસિંહને ત્યાં જવારૂપી સમગ્ર વૃત્તાંત રતિ જયાને કહેતી હતી. (૪) તે સમયે ઉતાવળથી **જયા,** લલિતાની સાથે પોતાના આસનથી ઊઠીને સ્નાન કરી નિત્યકર્મ કરતા **ઉત્તમ રાજાને** શીઘ્ર કહેવા લાગી. (૫) હે ભાઈ ! દિવસનો પ્રથમ પહોર પણ વ્યતીત થઈ ગયો. આટલો સમય સુધી પણ તમો ક્રિયામાં વાર લગાડનારા સતા ઘંટાને (પૂજાના અંગભૂત) શા માટે વગાડો છો. આપણું સર્વસ્વ (સર્વાર્થરૂપ શ્રીહરિ) તો હરાઈ જાય છે. (૬) શું ? શું ? આ પ્રકારે બોલતા ઉત્તમરાજાને જયા કહેવા લાગી, હે ભાઈ ! મુનિઓએ સહિત નારાયણમુનિ જીર્ણ દુર્ગપુર (જુનાગઢ) જાય છે. (૭) હે ભાઈ ! જુનાગઢમાં ગયેલા સ્નેહી ભક્તોએ અતિપ્રેમથી ક્ષણે ક્ષણે સેવા કરાયેલા શ્રીહરિ આપણા પુરમાં ફરીથી કેમ પાછા આવે ? (૮) પોતાના એકાંતિક ભક્તોમાં સમદૃષ્ટિવાળા શ્રીહરિને સર્વે ભક્તો પણ અનુગ્રહપણે સમાન છે. માટે તત્કાળ શ્રીહરિની સમીપે જાઓ, શ્રીહરિને પ્રાર્થના કરી નિવારણ કરો. (૯) આ પ્રમાણે લલિતા સહિત જયાએ કહેવાયેલા ઉત્તમરાજા મસ્તકે પાઘડી વિના શ્રીહરિની આગળ તત્કાળ પૂજાની સમાપ્તિ કરીને જતા હતા. તેટલામાં આવતા ઉત્તમરાજાને હેમંતસિંહે માર્ગમાં જોયા. (૧૦) ઉતાવળથી યુક્તની જેમ આવતા પોતાના મિત્ર ઉત્તમરાજાને જોઈને **હેમન્તસિંહ બોલ્યા,** હે મિત્ર ! માથામાં બાંધ્યા વગર ઉતાવળથી દોડતા જ ક્યાં જાઓ

सम्भाव्य गन्तव्यं जीर्णदुर्गं प्रति त्वया ॥३७॥ पुरं सूरस्य मार्गेऽस्ति तदुल्लङ्घ्य त्वया प्रभो! । जीर्णदुर्गं कथं गन्तुं शक्येत च कदध्वना ॥३८॥ तत आदौ नागटङ्कं गन्तव्यमिति नौ मतिः । अतःपरं यादृशीच्छा भवेत्तव तथा कुरु॥३९॥ सुव्रत उवाच – इति तयोर्वचनानि निशम्य तौ मतिमतां प्रवरौ स सभाजयन् । मुदितमानस एत्य महासभां हरिरुपाविशदासन आत्मनः ॥४०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे कार्यायनग्रामे हेमन्तसिंहसूरामन्त्रणे तत्पुरागमनसम्मन्त्रणनिरूपणनामा पञ्चदशोऽध्यायः ॥१५॥

सुव्रत उवाच – हेमन्तसिंहं सोऽथाह स्वदेशीयजनैः सह । स्वपुरं गच्छ तत्राहमायामि पृष्ठतो हि ते ॥१॥ इत्युक्तः स तदा हृष्टो गन्तुं सज्जोऽभवन्नृप! । ततः सूरं हरिः प्राह गच्छ त्वं स्वपुरं द्रुतम् ॥२॥ आयास्यामि प्रातरहं तत्र श्वो नात्र संशयः । कारयित्वा द्विजैः पाकं कुर्या ह्यस्मत्प्रतीक्षणम् ॥३॥ इत्युक्तः सोऽतिसंहृष्टः सह स्वैः स्वपुरं ययौ । वृत्तान्तमेतं सकलं जयामचकथद्रतिः ॥४॥ ससम्भ्रमं समुत्थाय तदा ललितया सह । स्नात्वा नित्यं प्रकुर्वन्तमुत्तमं प्राह सत्वरम् ॥५॥ दिनाद्ययामोऽपि गतो दीर्घसूत्रो भवान्किमु । घण्टां वादयतेऽद्यापि सर्वस्वं ह्रियते हि नः ॥६। किं किं कथं कथमिति वदन्तं तमुवाच सा । नारायणमुनिर्याति जीर्णदुर्गं सहर्षिभिः ॥७॥ गतस्तत्र स्निग्धभक्तैरतिप्रेम्णा ह्यनुक्षणम् । सेव्यमानः पुनर्भ्रातः कस्मान्नः पुरमेष्यति ॥८॥ सर्वेऽपि भक्ताः सन्त्यस्य समानाः समदर्शिनः । तस्मात्सम्प्रार्थ्य नत्वा तं निवारय व्रज द्रुतम् ॥९॥ इत्युक्तः स द्रुतं प्रायादनुष्णीषः प्रभोः पुरः । हेमन्तसिंहोऽद्राक्षीत्तं तावदायान्तमध्वनि ॥१०॥ हेमन्त उवाच –

છો ? હું તમોને આમંત્રણ કરવા માટે તમારા સમીપમાં આવ્યો છું. (૧૧) શ્રીહરિ મુનિઓની સાથે જુનાગઢ આવશે તે શ્રીહરિની સાથે તમોએ પોષ્યવર્ગની સાથે જીર્ણ દુર્ગપુરમાં આવવું. (૧૨) હે રાજન્ ! આ પ્રકારે હેમન્તસિંહનું વચન સાંભળીને બુદ્ધિથી ઉદ્ધવ સમાન **ઉત્તમ ભૂપતિ** શ્રીનારાયણમુનિને જુનાગઢ જવાના નિષેધની ઉક્તિ-પ્રયુક્તિઓ = ભાષણોની કલાઓ હેમંતસિંહ રાજાને સ્પષ્ટ કહેતા હતા. (૧૩) હે ભાઈ ! તમો બુદ્ધિમાન છો. માટે જ કાર્યાકાર્યને જાણનારા-સુજ્ઞ છો માટે લોક સંમત છો. તમારી બુદ્ધિને અવલંબીને મનુષ્યો ધર્મમાં જ રહે છે. (૧૪) તમોએ હાલમાં શ્રીહરિને પોતાના પુરમાં લઈ જવા માટે જે આમંત્રણ આપ્યું તે વિચાર કર્યા વગર જ કર્યું હોય, એમ મને નિશ્ચય ભાસે છે. (૧૫) દેહધારીઓની ચામડીને વિદારણ કરનારો શીતકાળ હાલમાં છે. જ્યાં રૂવાળી ડગલી વિંટાયેલી હોય તો પણ પોતાના ભવનમાં પણ ઠંડી સહન કરવા માટે અશક્ય છે. (૧૬) માર્ગમાં ઘણો વાયરો વાય છે. તેમાં પણ સવારમાં પગને લાંબા પ્રસારી અશ્વારૂઢ થયેલા શ્રીહરિએ તે અસહ્ય ઠંડીનું દુઃખ કેમ સહન થઈ શકે એમ છે ? નથી જ. ગૃહમાં ગોદડી ઓઢીને સંકુચિત શરીરવાળાને પણ ઠંડી સહન ન થઈ શકે, તો માર્ગની વાત જ શી કહેવી ? (૧૭) અષ્ટાંગ યોગના અભ્યાસથી કોમળ શરીરવાળા આ મુક્તાનંદ, ગોપાળાનંદ, અખંડાનંદાદિ સાધુઓ પોતાની પાસે ગોદડી પણ રાખતા નથી. માટે માર્ગમાં તેઓ આ હેમંતઋતુમાં હિમથી પીડાવાળા થશે. (૧૮) અલ્પ ભોજનવાળા, ભક્તિયોગને આશરેલી પગરખાં નહિ રાખનારી વિધવા સ્ત્રીઓ માર્ગમાં કેવી રીતે ચાલશે ? ( આ રીતે ઉપહાસ્યને પાત્ર થશો.) (૧૯) પ્રાતઃકાળમાં ઠંડા જળથી સ્નાન કરી ચાલતા, માટેજ ઠંડીથી કંપારાવાળાં સત્સંગીજનોને જોઈને માર્ગમાં અલ્પ બુદ્ધિવાળાં જનો પણ તમોને શાપ આપશે. અર્થાત્ આવો પ્રવાસ કરાવનારને ધિક્કાર છે એમ કહેશે. (૨૦) હે ભાઈ ! આ ન સહન થઈ શકે તેવા સમયમાં શ્રીહરિને લઈ જવારૂપી કર્મથી તમારુ હેમંતસિંહ નામ (હેમ=ઠંડીથી, અન્ત=દુઃખ આપનાર) સાર્થક ક્યારેય પણ ન જ થાઓ. માટે ગ્રીષ્મ ઋતુ આવે ત્યારે શ્રીહરિને સુખેથી લઈ જાઓ. (૨૧) હે બંધો ! તેટલા સમય સુધી તમોએ પોતાનાં દેશજનોની સાથે ગઢપુરમાં રહીને નિત્ય શ્રીહરિનાં દર્શન કરવાં. (૨૨) ગઢપુરમાં તમારે શ્રીહરિની સાથે મુનિઓને પકવાન્નોથી જમાડવા અને શ્રીહરિની સાથે સત્પુરુષોનું પૂજન કરવું. (૨૩) શ્રીહરિને પોતાના ગૃહમાં લઈ જઈને પણ આથી શું વિશેષ છે ? કંઈ વિશેષ નથી. હે ભાઈ ! ગૃહને ગૃહ કહેવાતું નથી. સ્મૃતિકાર મુનિઓ તો ગૃહિણીને ગૃહ કહે છે. (૨૪) જો સાત માળની હવેલીમાં પણ પત્ની ના હોય તો તે હવેલી પણ અરણ્ય સમાન છે. પત્ની જે સ્થળમાં હોય ત્યાં ગૃહસ્થાશ્રમ કહેલો છે. (૨૫) અમારાં ભાભી તો અહીંયાં તમારી સાથે જ છે, માટે પત્નીની સાથે રહીને ઘણા પ્રકારના ઉપચારોથી શ્રીહરિનું સારી રીતે પૂજન કરી ગૃહસ્થાશ્રમનું ફળ પામો. (૨૬) પોતાના મિત્રનું ગૃહ પોતાના ગૃહથી જુદું નથી એમ શાસ્ત્રમાં કહેલું છે, માટે મારા ગૃહમાં વસતા તમો શ્રીહરિને સ્નેહપૂર્વક પ્રસન્ન કરો. (૨૭) હે ભાઈ ! મેં આ તમને પ્રેમથી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सखे! क्व यास्यनुष्णीषो धावन्नेव ससम्भ्रमम्। आमन्त्रयितुमायामि त्वत्समीपमहं किल ॥११॥ भगवान्मुनिभिः साकं जीर्णदुर्गमुपैष्यति। तेन साकं त्वयाऽऽगम्यं तत्र पोष्यैर्निजैः सह ॥१२॥ इत्याश्रुत्य स तद्वाक्यं बुद्धयोद्धवसमो नृपः। हरियाननिषेधोक्तियुक्तिभिस्तमुवाच ह ॥१३॥ उत्तम उवाच - बुद्धिमानसि सुज्ञोऽसि भ्रातस्त्वं लोकसम्मतः । त्वद्बुद्धिमवलम्ब्यैव धर्मे तिष्ठन्ति मानवाः ॥१४॥ आमन्त्रितस्त्वया स्वामी स्वपुरं नेतुमद्य यत् । अविचार्यैव तन्नूनं कृतमित्येव भाति मे ॥१५॥ शीतकालोऽधुना प्राप्तो देहिनां त्वग्विदारणः । नीशारं प्रावृतस्यापि हिमं गेहेऽपि दुःसहम् ॥१६॥ भूरिवाते पथि प्रातर्हरिणा दुःसहं न किम् । तथासत्युपहास्या ते भविता प्रेमभक्तता ॥१७॥ अनादियन्तः स्वाः कन्था अप्येते योगकोमलाः। सन्तो मार्गे भविष्यन्ति हेमन्ते हिमपीडिताः ॥१८॥ अल्पाहाराश्च विधवा भक्तियोगमुपाश्रिताः । अनुपानत्पदा योषाश्चलिष्यन्ति कथं पथि ॥१९॥ प्रातः शीताम्भसा स्नात्वा चलतो हिमवेपितान् । दृष्ट्वा हरिजनान्मार्गे त्वां शप्स्यन्त्यल्पका अपि ॥२०॥

कर्मणानेन ते भ्रातः ! संज्ञाऽन्वर्थास्तु मा क्वचित् । उष्णकाले तु सम्प्राप्ते सुखेनातः प्रभुं नयेः ॥२१॥ तावत्कालं त्वया बन्धो! स्वदेशीयजनैः सह । स्थित्वा दुर्गपुरे कार्यं नित्यं श्रीहरिदर्शनम् ॥२२॥ भोजनीया हि मुनयः पक्वान्नैस्तत्र च त्वया । सम्यक् च पूजनं तेषां कर्तव्यं हरिणा सह ॥२३॥ को वा विशेषः स्वगृहं हरौ नीतेऽप्यतः परः । न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ॥२४॥ सौधेऽपि सा न चेत्तर्हि सोऽरण्यमिति कीर्तितः । सा तु यत्र भवेत्तत्र गृहस्थाश्रम ईरितः ॥२५॥ भ्रातृजायास्मदीयात्र वर्ततेऽतस्तया सह । हरिं सम्पूज्य बहुधा गार्हस्थ्यफलमाप्नुहि ॥२६॥ न मित्रगेहं स्वगृहादन्यच्छास्त्रे

કહ્યું, હવે ઉદાર બુદ્ધિવાળા તમો હિત અને અહિતનો વિચાર કરીને જે હિત હોય તે કરવા માટે યોગ્ય છો. (૨૮) **સુવ્રતમુનિ કહે છે :** હે નૃપ ! આ પ્રકારે ઉત્તમરાજાનું વચન સાંભળીને યુક્તિનાં વાક્યોમાં પ્રવીણ, નીતિનિપુણ માટે જ ઉત્તમરાજાનો અભિપ્રાય જાણનારા **હેમંતસિંહ રાજાએ ઉત્તમરાજાને કહ્યું.** (૨૯) હે ભ્રાતઃ ! પોતાના કાર્યને સારી રીતે રક્ષણ કરતાં તમોએ બહુ જ સારું કહ્યું. નાના હોવા છતાં પણ તમારી બુદ્ધિ વૃદ્ધોની બુદ્ધિથી પણ અતિ અધિક છે. (૩૦) પરોપકારના સ્વભાવવાળા, સત્પુરુષોનો હંમેશા સમાગમ કરતા હોવા છતાં પણ તમો આ સ્વાર્થબુદ્ધિ કોની પાસે શીખ્યા ? (૩૧) હે ભદ્ર ! યુક્તિઓને જાણનારા તમો ઠંડીના કારણથી જે શ્રીહરિનું જુનાગઢ આવવાનું નિષેધ કરો છો, ત્યાં હું કહું છું. (૩૨) હે સખે ! હું વાયુ વિનાના ગૃહ સમાન શિબિકામાં શ્રીહરિને બેસાડીને લઈ જઈશ એટલે શ્રીહરિને ઠંડી નહિ લાગે. (૩૩) જે તપસ્વિની સમગ્ર સ્ત્રીઓ છે તે સર્વેને વસ્ત્રનાં ગૃહોમાં જ જેમ તેમ રથોમાં અને ગાડાંઓમાં બેસાડીને માર્ગમાં સુખપૂર્વક લઈ જઈશ. (૩૪) સર્વે મુનિઓ દિવસના પ્રથમ પહોરનો અર્ધો ભાગ પસાર થાય ત્યારે માર્ગમાં સુખેથી ચાલશે. જે માટે તડકાનો તો ભય જ નથી. (૩૫) ઉનાળામાં લૂવાળા વાયુથી માર્ગમાં ચાલનારાં જનોના પ્રાણને હરનારો ઉષ્ણકાળ તમોએ હિમના સમયથી શ્રેષ્ઠ શું વિચારીને કહ્યો ? (૩૬) તમોએ યુક્તિઓથી ગૃહસ્થાશ્રમની સફળતા કહી, તે તમોએ મારા પુરમાં આવીને તે પ્રમાણે જ કરવું. (૩૭) શ્રીહરિને પ્રાર્થના કરતાં મારે ઘણાં વર્ષો ચાલ્યાં ગયાં, ત્યારે હાલમાં જ શ્રીહરિએ તમારા પુરમાં આવીશ એમ મને કહ્યું. (૩૮) હાલમાં જ સમીપમાં ફળવાળા મારા મનોરથરૂપી કલ્પવૃક્ષને મૂળમાંથી ઉખેડી નાખનાર તમોએ મિત્રનું લક્ષણ હાલમાં અપૂર્વ પ્રગટ કર્યું છે. (૩૯) ભગવાન શ્રીહરિ જુનાગઢમાં આવે ત્યારે માર્ગમાં રોડો માણસો શ્રીહરિને સારીરીતે જોઈને મનુષ્યદેહની સફળતા તત્કાળ જ પામશે. (૪૦) વળી દર્શનમાત્રથી પાપોને નાશ કરનાર હજારો સાધુઓને પણ જોઈને ઘણાં ગ્રામ્યજનો પણ સંસારબંધનથી મુક્ત થશે. (૪૧) આ પ્રકારના પુણ્યની ત્પત્તિસમયમાં અતિ ઉત્તમ જ્ઞાનવાળા હોવા છતાં પણ તમો શ્રીહરિના મારા પુરમાં આગમનનો નિષેધ કરો છો તે ી લોકમાં અન્વર્થ સંજ્ઞાવાળા ઉત્કૃષ્ટ તમ = અજ્ઞાનવાળા, ઉત્તમ એવી અન્વર્થ સંજ્ઞા ન થાઓ. (૪૨) આ લોકમાં ભાઈઓએ સમાનપણે અનુભવવા યોગ્ય પિતા સંબંધી સુખ તમો એકલા જ ઘણા સમયથી સેવતા સતા શું બોલો છો ? અર્થાત્ યોગ્ય બોલતા નથી. (૪૩) કેટલાક વિવેકી બંધુજનો પોતે પિતાની પ્રેરણા વિના જ પિતા સંબંધી સુખ વિભાગ કરીને ભોગવે છે, તમો તો ભગવાને મને આપવા માંડેલા સુખને નિષેધ કરતાં લજ્જા પામતા નથી. (૪૪) તમોએ મારી પ્રેરણા વિના પણ શ્રીહરિને લઈને જ મારા પુરમાં આવવું જોઈએ. આ મિત્રનું લક્ષણ છે. (૪૫) શરીરને બન્ને હાથની જેમ, નેત્રોને

च कथ्यते । अतो वसन्मम गृहे प्रभुं प्रीणय सादरम् ॥२७॥ स्नेहादेतन्मया प्रोक्तमतःपरमुदारधीः । हिताहिते विचार्य त्वं कर्तुमर्हसि यद्धितम् ॥२८॥ सुव्रत उवाच - इत्युक्तमवचः श्रुत्वा युक्तिवाक्यविशारदः । बुद्ध्या विदुरतुल्योऽसौ प्राह तद्भावविन्नृप! ॥२९॥ हेमन्तसिंह उवाच - सम्यगेवोच्यते भ्रातस्त्वया स्वार्थं सुरक्षता । कनीयसोऽपि बुद्धिस्ते वृद्धधीभ्योऽतिरिच्यते ॥३०॥ परोपकारशीलानां सतां नित्यं समागमम् । कुर्वन्नपि भवानेतां स्वार्थबुद्धिं कुतोऽध्यगात् ॥३१॥ शीतेन हेतुना भद्र! जीर्णदुर्गागमः प्रभोः । निषिध्यते युक्तिविदा त्वया तत्रोत्तरं ब्रुवे ॥३२॥ निवाताल्पगृहाभेऽहं नरयाने हरिं सखे! । उपवेश्यैव नेष्यामि शीतबाधा क्व तद्भवेत् ॥३३॥ तपस्विन्योऽखिला योषा रथेषु शकटेषु ताः । गर्भागारेष्विवाऽऽस्थाप्य नेष्यामि सुखमध्वनि ॥३४॥ यामार्धं आद्येऽतिक्रान्ते सन्तः सर्वे च वर्त्मनि । चलिष्यन्ति सुखेनैव नास्त्यातपभयं यतः ॥३५॥ घर्मकालस्तु पान्थानां प्राणहा विषवायुना । किं विचार्य त्वया श्रेष्ठः प्रोच्यते शीतकालतः ॥३६॥ गृहस्थधर्मसाफल्यं यत्त्वयोक्तं च युक्तिभिः । तत्तथैव त्वया कार्यं जीर्णदुर्गमुपेत्य वै ॥३७॥ अब्दा व्यतीता बहवो हरिं प्रार्थयतो मम । तदेदानीं स मामाह ह्यायाता त्वत्पुरं त्विति ॥३८॥ फलोन्मुखस्य मेऽद्यैव मनोरथमहातरोः । उन्मूलके त्वयीदानीमपूर्वं स्नेहलक्षणम् ॥३९॥ तत्रायाते भगवति जनास्तं कोटिशः पथि । संवीक्ष्य नरदेहस्य सद्यः प्राप्स्यन्ति वै फलम् ॥४०॥ वीक्षामात्रेण पापघ्नान्सतश्चापि सहस्रशः । वीक्ष्यानेके ग्राम्यजना अपि मोक्ष्यन्ति संसृतेः ॥४१॥ ईदृक्पुण्योत्पत्तिकालेऽप्युत्कृष्टज्ञानवान्भवान् । तन्निषेधेन लोकेषु माभूदन्वर्थसंज्ञकः ॥४२॥ उपभोग्यं समं ह्यत्र भ्रातृभिः पैतृकं सुखम् । एक एव चिरं तत्त्वं जुषमाणो ब्रवीषि किम् ॥४३॥ स्वयमेव विभज्यैके भुञ्जते सुज्ञबन्धवः । पित्राऽन्यस्मै

---

પાંપણો જેમ, પોતાના મિત્રની પ્રેરણા વિના મિત્રનું હિત કરે તે મિત્ર કહેવાય છે. (૪૬) હે મિત્ર ! તમારે વિષે મિત્ર શબ્દ હંમેશા નપુંસક લિંગમાં રહો, પણ ક્યારેય મિત્રપદની પુલ્લિંગ (સૂર્યવાચકતા)ના રહો. માટે મારી સહાય કરો ( મિત્ર શબ્દ નપુંસકલિંગમાં હિતકારી છે અને પુલ્લિંગમાં સંતાપ કરનારો છે.) (૪૭) **સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે હેમંતસિંહ રાજાએ કહેલા **ઉત્તમ ભૂપતિ હસતા સતા બોલ્યા,** હે મિત્ર ! શ્રીહરિની જેવી ઈચ્છા હશે તેમ સર્વ થશે. (૪૮) હે રાજન્ ! આ પ્રકારે કહીને શ્રીહરિની સમીપમાં ગયા. અને હેમંતસિંહ રાજાએ પોતાના નિવાસસ્થાનમાં જઈને પોતાના મનમાં વિચાર કર્યો. (૪૯) કલ્યાણકાર્યોમાં ઘણાં વિઘ્નો હોય છે. આ વિદ્વાનોની વાણી સાચી જ છે. તો પણ બુદ્ધિ પ્રમાણે પ્રયત્ન કરવો. તેનું ફળ પ્રભુ આપશે. (૫૦) હે પ્રતાપસિંહ રાજન્ ! આવો વિચાર કરી હેમંતસિંહ રાજા વિઘ્નોના નિયામકરૂપ **શ્રીગણપતિ સ્વરૂપ શ્રીકૃષ્ણ ભગવાનને** પોતાના કાર્યમાં વિઘ્નની શાંતિ માટે આદરપૂર્વક **પ્રાર્થના** કરવા લાગ્યા. (૫૧) હે ગણેશ ! તમોને આવતી કાર્તિક કૃષ્ણચતુર્થી તિથિએ ગોળના લાડુઓ, દુર્વાના અંકુરો અને સિન્દૂર વડે તમારું પૂજન કરીશ. મારા કાર્યમાં અચાનક આવી પડેલા આ વિઘ્નને નાશ કરનારા આપ થાઓ. (૫૨) હે રાજન્ ! આવી રીતે ગણપતિને પ્રાર્થના કરી હેમંતસિંહ રાજા દેશનાં નિવાસી સર્વે જનોને તથા પોતાનાં સંબંધી જનોને પોતાના પુરમાં મોકલતા હતા. અને પોતે તો શ્રીહરિની અનુજ્ઞાથી ગયા નહીં. (૫૩)

**दीयमानं त्वं निषेधन्न लज्जसे ॥४४॥ भगवन्तं गृहीत्वैव विनापि प्रेरणं मम । त्वया मत्पुरमागम्यमेतत्सौहार्दलक्षणम् ॥४५॥ कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी । अप्रेरितं हितं कुर्यात्तद्धि मित्रं प्रचक्षते ॥४६॥ नित्यं षण्ढत्वमेवास्तु त्वयि मित्रपदस्य भोः । पुंस्त्वं तु कर्हिचिन्मास्तु साहाय्यं कुरु मे सखे! ॥४७॥** सुव्रत उवाच - **इत्युक्तस्तेन स हसन्नुवाचोत्तमभूपतिः । यादृशीच्छा भगवतो भविष्यति तथाऽखिलम् ॥४८॥ इत्युक्त्वा स हरेः पार्श्वं जगाम नृपतिः स च । स्वावासं समुपेत्येत्थं विचारमकरोद्धृदि ॥४९॥ श्रेयांसि बहुविघ्नानीत्येषा वाग्विदुषामृता। यतितव्यं यथाबुद्धि तत्फलं दास्यति प्रभुः ॥५०॥ विचार्येति नृपो राजन्कृष्णं विघ्नेशरूपिणम् । स्वकार्यविघ्नशान्त्यर्थं प्रार्थयामास सादरम् ॥५१॥ आगामिन्यां चतुर्थ्यां त्वां गणेश! गुडलड्डुकैः । यक्ष्ये च दूर्वासिन्दूरैर्मत्कार्ये विघ्नहृद्भव ॥५२॥ इति सम्प्रार्थ्य विघ्नेशं स्वदेशीयाञ्जनांस्तथा । स्वजनान् स्वपुरं सर्वान्प्रैषयन्न त्वगात्स्वयम् ॥५३॥ ततो नृपोऽसौ नृप ! सत्यवाक्यतां हरेर्विदंस्तस्य च भक्तवश्यताम् । तदन्तिकाशुद्रुतमित्रशङ्कितः पुनश्च तत्पार्श्वमुपेत्य तस्थौ ॥५४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे कार्यायनग्रामे भगवद्यानें हेमन्तसिंहोत्तमयोः परस्परोक्तियुक्तिनिरूपणनामा षोडशोऽध्यायः ॥१६॥

सुव्रत उवाच - **अथ यानाय पेटासु पुस्तिका दृढबन्धनाः । शुकर्षिणा धापयन्तं हरिं प्रापोत्तमो नृपः ॥१॥ तथ्यमेव प्रयाणस्य विदित्वा निश्चयं प्रभोः । शनकैः प्रहसन्नूचे भक्त एकान्तिकः स तम् ॥२॥** उत्तम उवाच - **प्रयाणनिश्चयं स्वामिंस्तव श्रुत्वा जयादयः । योषितो हृदि खिद्यन्ते शीतग्लानेस्तवाध्वनि ॥३॥** श्रीनाराणमुनिरुवाच - **हिमाचलोपत्यकैव जन्मभूमिर्ममास्त्यतः । अस्ति शीतसहिष्णुत्वं देहे स्वाभाविको गुणः ॥४॥ अतश्चिन्ता न कार्येति ब्रूहि तास्त्वं नराधिप! ।**

હે નૃપ ! પછી શ્રી નારાયણ મુનિની સત્ય પ્રતિજ્ઞા અને એકાંતિક ભક્તોની આધીનતાને જાણતા સતા ફરીથી પણ શ્રીહરિની સમીપમાં તત્કાળ પોતાના મિત્રની શંકાથી જઈને પૂર્વની માફક બેઠા. (૫૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ-પ્રકરણે કાર્યાયનગ્રામે ભગવદ્યાને હેમન્તસિંહોત્તમયોઃ પરસ્પરોક્તિ-યુક્તિનિરૂપણનામા ષોડશોऽધ્યાયઃ (૧૬)*

## અધ્યાય : ૧૭

### શ્રીહરિનું લોયા અને નાગડકાપુરમાં આગમન અને તે તે ગામના ભક્તોને આપેલા આનંદનું નિરૂપણ કર્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી ઉત્તમ રાજા, પોતાના જવાના નિમિત્તે દઢ બાંધણા યુક્ત પુસ્તકો શુકાનંદમુનિ પાસે પેટીઓમાં મુકાવતા શ્રીહરિને તત્કાળ પામ્યા. (૧) શ્રીનારાયણ મુનિનો જીર્ણદુર્ગપત્તનને ઉદ્દેશીને જવાનો નિશ્ચય સત્ય જ છે એમ જાણીને એકાંતિક ભક્ત ઉત્તમરાજાએ, હસતા સતા ધીમે રહીને કહ્યું. (૨) હે સ્વામિન્ ! તમારો જવાનો નિશ્ચય જાણીને જયા વગેરે સ્ત્રીઓ માર્ગમાં અતિશય ઠંડીથી તમોને દુઃખ થવાનો સંભવ છે, માટે પોતાના મનમાં ખેદ પામે છે. (૩) ઉત્તમરાજાનું વાક્ય સાંભળીને **શ્રીહરિ બોલ્યા :** હે રાજન્ ! મારી જન્મભૂમિ હિમાલયની સમીપની ભૂમિ છે, માટે ઠંડીને સહન કરવાનો મારા શરીરમાં સ્વાભાવિક ગુણ છે. (૪) હે રાજન્ ! માટે મારી ચિન્તા ન કરવી. આ પ્રમાણે તમો જયા વગેરે સ્ત્રીઓને કહો. **સુવ્રત મુનિ પ્રતાપસિંહ રાજાને કહે છે,** હે રાજન્ ! આ પ્રમાણે શ્રી હરિએ કહેલા ઉત્તમરાજા શ્રીહરિનું સ્વતંત્રપણું જાણતા સતા મૌન રહ્યા. (૫) પછી જયા અને લલિતા સહિત ઉત્તમ રાજાએ શ્રીહરિને પોતાના પુરમાં ફરીથી લાવવા માટે શ્રીહરિની સાથે આપણે પણ જવું, એવો નિશ્ચય કર્યો. (૬) પછી મયારામ ભટ્ટ વગેરે બ્રાહ્મણો 'મંગળ થાઓ' આવા આશીર્વાદો આપ્યા છે જેમને એવા શ્રીહરિએ તાજણ નામની ઘોડી ઉપર બેસીને પોતાના પાર્ષદોથી વીંટાયેલા સતા સમગ્ર સાધુઓની સાથે અને પોતાના બન્ને ભાઈઓ સાથે નાગડકાપુર પ્રતિ પ્રયાણ કર્યું. (૭) હેમન્તસિંહરાજા, ઉત્તમરાજા, વાસ્તુનૃપ આદિક ઘણા ઘોડેસ્વારો હાથમાં ભાલાઓ લઈને શ્રીહરિની પાછળ ચાલતા હતા. જયાદિ સ્ત્રીઓ પોતાના રથોમાં બેસીને શ્રીહરિની પાછળ જતી હતી. (૮) પછી શ્રીહરિ, પુસ્તકની ભરેલી પેટીઓ સારાં દઢ ગાડાઓમાં મૂકીને તે ગાડાઓની સાથે સર્વની આગળ ચાલતા શુકમુનિને ઉલ્લંઘન કરીને, ઘોડેસવારો સાથે તત્કાળ ચાલતા હતા. (૯) સમગ્ર અસવારોના સમૂહને પાછળ કરીને આગળ ચાલતી મનના સમાન વેગવાળી પોતાની શ્રેષ્ઠ ઘોડીથી પણ આગળ ચાલતા નિષ્કુળાનંદાદિ સાધુઓને જોઈને શ્રીહરિ આશ્ચર્યપૂર્વક હસતા હતા. (૧૦) તે સમયે મહામુનિઓનાં ઘણાં મંડળો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इत्युक्तः सोऽभवत्तूष्णीं तत्स्वातन्त्र्यं विदन्नृपः ॥५॥ निश्चिकाय ततो राजा भगिनीभ्यां सहैव तम् । स्वपुरं पुनरानेतुं गम्यं तेन सहेति सः ॥६॥ अथ द्विजेन्द्रैः कृतमङ्गलाशीर्हयीं समारुह्य च तज्जिनाख्याम् । साकं मुनीन्द्रैर्निजपार्षदैश्च वृतः प्रयाति स्म स नागटङ्कम् ॥७॥ तमन्वयुर्वास्तुनृपप्रधानाः सत्कुन्तहस्ता बहवोऽश्ववाराः । हेमन्तसिंहो नृप उत्तमश्च योषा जयाद्याः स्वरथाधिरूढाः॥८॥ निधाय पेटा भृतपुस्तकाश्च स्वनस्सु सर्वाग्रचरं समं तैः । शुकं मुनिं सोऽथ हरिर्व्यतीत्य सहाश्ववारैः प्रचचाल शीघ्रम् ॥९॥ पृष्ठे विधायाखिलसादिवृन्दं मनोजवायाः स्वहयीवरायाः । पुरश्चलन्त्या अपि सोऽग्रयानान् दृष्ट्वा मुनीन्द्रानहसत्सचित्रम् ॥१०॥ यूथानि भूयांसि महामुनीनां हरेः पुरस्तादथ पृष्ठतश्च । तदा व्यदृश्यन्त च पार्श्वयुग्मे तस्मिंस्तु दीर्घेऽध्वनि सर्वतश्च ॥११॥ स सङ्गवान्ते भगवानवाप ग्रामं तु सूरस्य च लौहसंज्ञम् । सूरोऽपि यत्रैत्य हरेः प्रतीक्षां करोति पाकं स विधाप्य विप्रैः ॥१२॥ श्रुत्वागतं तं स उपेत्य नेमुर्ग्राम्याश्च पौराश्च जनाः सहर्षम् । ग्राम्याः प्रभुं ग्राममुदारभावा वादित्रघोषैः स ततश्च निन्युः ॥१३॥ तत्र मुख्यः सिंहसंज्ञः पट्टलोऽन्ये च ये विशः । ते सर्वे सह सूरेण समुनिं ते सिषेविरे ॥१४॥ दिनानि कतिचित्तत्र ग्राम्यानानन्दयन्प्रभुः । तैरर्च्यमानो न्यवसद्वस्त्रालङ्कारभोजनैः ॥१५॥ सभायां प्रत्यहं तत्र धर्मान्वर्णाश्रोमचितान् । जनेभ्यः कथयामास भक्तिज्ञानोपबृंहितान् ॥१६॥ सूरसिंहादिभिर्भक्तैरनर्घ्याण्यंशुकानि च । ~~स्वस्मै दत्तानि स ददौ भ्रातृभ्यां तत्र संसदि ॥१७॥ ग्रामे तस्मिन्वाटिकाभ्यो वृन्ताकादीनि भूरिशः । ग्रामीणा आहरन्ति~~

મોટા માર્ગમાં શ્રીનારાયણમુનિના આગળ પ્રદેશમાં અને પાછળ, બન્ને પડખાઓમાં અર્થાત્ ચારે દિશાઓમાં મુનિઓનાં મંડળોને જનોએ જોયાં. (૧૧) ભગવાન શ્રીહરિ **કારતક વદી** બીજનો ક્ષય હોવાથી **ત્રીજ**ને દિવસે દશ વાગ્યાના સમયે **સૂરસિંહના લોયા ગામમાં પધાર્યા.** જ્યાં સૂરસિંહ પણ કારીયાણીથી આવેલા બ્રાહ્મણોની પાસે સુંદર રસોઈ કરાવીને શ્રીનારાયણમુનિની પ્રતીક્ષા કરે છે. (૧૨) સૂરસિંહ રાજા, લોયા ગામનાં નિવાસી જનો અને શ્રીહરિના દર્શન માટે આવેલા નાગડકાના જનો શ્રીહરિને આવેલા સાંભળી હર્ષપૂર્વક સામા જઈને સાષ્ટાંગ નમસ્કાર કરતા હતા. પછી સૂરસિંહ તથા અતિ પ્રીતિ યુક્ત લોયા ગામના નિવાસી ભક્તો વાજિંત્રોના શબ્દો સાથે શ્રીહરિને લોયા ગામમાં લઈ ગયા. (૧૩) લોયા ગામમાં મુખી-સિંહ નામના (સંઘા) પટેલ તથા બીજા વૈશ્ય જાતિના ભક્તો તે સર્વે સૂરસિંહની સાથે સમગ્ર મુનિઓએ સહિત શ્રીહરિને સેવતા હતા. (૧૪) શ્રીહરિએ ગામનાં જનોને આનંદ આપતા સતા ગામના જનોએ વસ્ત્ર અલંકાર અને ભોજનોથી પૂજાયેલા સતા લોયા ગામમાં કેટલાક દિવસો સુધી (કારતક વદી ત્રીજથી પોષ સુદી ત્રીજ સુધી-દોઢ માસ) નિવાસ કર્યો. (૧૫) લોયા ગામમાં દરરોજ સભામાં શ્રીહરિ ભક્તિ અને જ્ઞાનથી વૃદ્ધિ પામેલા વર્ણાશ્રમને યોગ્ય ધર્મો જનોને કહેતા હતા. (૧૬) સૂરસિંહ તથા સિંહ નામના પટેલ વગેરે ભક્તોએ પોતાને પૂજામાં અર્પણ કરેલાં અમૂલ્ય વસ્ત્રો અને અલંકારો શ્રીહરિએ લોયા ગામની સભામાં પોતાના ભાઈ રામપ્રતાપ તથા ઈચ્છારામને આપ્યાં. (૧૭)

**શાકોત્સવ લીલા :-** લોયા ગામના નિવાસી ભક્તો ગામમાં વાડીમાંથી વૃંતાક વગેરે ઘણાં શાકો દરરોજ શ્રીહરિને સમર્પતા હતા. (૧૮) સ્વયં શ્રીહરિ પણ શાકોનો સંસ્કાર-વઘાર કરવામાં પોતાની ચાતુર્યતા રસોયાને બતાવતા સતા પુષ્કળ ઘીથી તેને વઘારીને પકવતા હતા. (ભગવાનની આ લીલા, આ સમયની મૂર્તિનું ભક્તજનો ચિંતન કરે; અને ભક્તોએ આ રીતે ભગવદ્-ભક્તજનોની સેવા કરવી જોઈએ એ બતાવવા સારુ છે.) (૧૯) ચૂલામાં અગ્નિ પ્રજ્વલિત કરીને તેના ઉપર મૂકેલા વિશાળ દઢ કઢાયામાં ઘણું ઘી મૂકીને અગ્નિતાપથી અત્યન્ત કડકડ શબ્દવાળા ઘીમાં બીજ વિનાના કોમળ વૃંતાક શાકને નાખીને છુંકાર શબ્દ કરાવવા પૂર્વક પકવતા તેને વારે વારે ફેરવવા માટે હસ્તકમળમાં કાષ્ઠનો સુંદર હાથલો ધારી રહેલા શાકમાં હળદર ખોબે ખોબે નાખતાં હળદરવાળા હાથ પોતે પહેરેલાં વસ્ત્રોમાં સાફ કરતા વારંવાર સાફ કરવાથી જેમનું પહેરવાનું વસ્ત્ર પીળું થઈ ગયું છે એવા હાસ્યયુક્ત છે મુખ જેમનું એવા ભક્તજનોને જોતા મંદહાસ્ય યુક્ત મુખકમળવાળા સ્વયં શ્રીહરિ અત્યન્ત શોભતા હતા. (૨૦) શ્રીહરિ વૃંતાક શાકને સંસ્કારપૂર્વક પકવીને અનુક્રમે કરેલી મહાપંક્તિઓથી મુનિ વગેરે પોતાના ભક્તજનોને બેસાડીને પોતાના ભક્તજનોનાં ભોજન-પાત્રોમાં અતિ પ્રસન્નતાથી સુંદર મોટા ચમચાથી અતિ ઉતાવળથી શાક પીરસતા, અતિ સ્વાદિષ્ટપણાથી ઘણું શાક જમતા બ્રહ્માનંદાદિ પોતાનાં એકાંતિક ભક્તજનોને શાકની મિષ્ટતા પૂછતા તેમણે કરેલી શાકની પ્રશંસા 'હે ભગવન્ ! રસમૂર્તિ તમોએ રસથી પકવેલા, રસથી પીરસતા તમોએ અનુગ્રહ કરી આપેલા રસરૂપ મહાપ્રસાદીભૂત શાકનો ઉત્કર્ષ શું કહીએ ?' આવી પ્રશંસા સાંભળતા

**स्म तस्मै शाकानि चान्वहम् ॥१८॥ तेषां संस्कारचातुर्यं पाचकेभ्यः प्रदर्शयन् । संस्कृत्य भूरिणाज्येन पपाचापि स्वयं प्रभुः ॥१९॥ सन्धुक्ष्योद्धानकेऽग्निं तदुपरि पृथुलं सत्कटाहं निधाय क्षिप्तवाज्यं भूरि तस्मिन्नतिकडकडिते चारुवृन्ताकशाकम् । क्षिप्त्वा छुंकारकारी करकमललसद्धस्तको वीक्षमाणः पीतपीतांशुकः स्वान्प्रहसितवदनान्सोऽद्युतत्स्मेरवक्त्रः ॥२०॥ शाकं संस्कृत्य भक्तान् क्रमरचितमहापङ्क्तिभिश्चोपवेश्य प्रीत्या पात्रेषु तेषां चपलतरमसौ सन्ददच्चारुदर्व्या । पृच्छंस्तत्स्वादमार्यानतिसुरसतया चाश्नतो भूरि भक्तान् शृण्वंस्तस्य प्रशंसां प्रभुरतिमुमुदे सञ्चरन्पङ्क्तिमध्ये ॥२१॥ इत्थं नृनाट्यचरितैर्भक्तानानन्दयन्प्रभुः । नागटङ्कं ततः प्रायात्पुरं परिवृतो निजैः ॥२२॥ स्वावासं तत्र सूरस्य गृहे चक्रे स चापरान्। पुर्यामावासयामास भक्तान्सर्वान् यथोचितम् ॥२३॥ सभार्यः ससुतः सूरस्तस्य तेषां यथोचितम् । आतिथ्यमकरोद्भक्त्या श्रद्धया चाप्युदारधीः ॥२४॥ पूजां चकार महतीं भक्त्या राजा निजप्रभोः । वस्त्रैराभरणैः शक्त्या रूप्यमुद्रार्पणेन च ॥२५॥ चन्दनैः पुष्पहारैश्च सद्वस्त्रैः श्रद्धयान्वितः । स पुपूज सतः सर्वान्भोज्यैर्नानाविधैरपि ॥२६॥ तेनातिमानितो भक्त्या भगवान् दिनपञ्चकम् । उवासानन्दयन्भक्तान्स्थापयन्धर्ममेव सः ॥२७॥ चतुर्थे दिवसे तत्र सभायामास्थितः प्रभुः । उवाच भक्तान् सकलान् गृहिणस्त्यागिनस्तथा ॥२८॥** श्रीनारायणुनिरुवाच– **भक्ताः! शृण्वन्तु सर्वेऽपि श्वो भवत्युत्तरायणम् । स्नानं दानं यथाशक्ति कर्तव्यं तत्र सर्वथा ॥२९॥ चत्वारिंशत्तु घटिका मकरेऽर्कस्य सङ्क्रमात् । उत्तरः पुण्यकालोऽत्र ~~ज्ञेयः स्नानादिकर्मसु ॥३०॥ माघस्नानस्य चारम्भः पौष्यामत्राखिलैर्जनैः । कर्तव्यस्तत्र मुख्यं तु तिलदानं प्रकीर्तितम्~~ ॥३१॥ चान्द्रायणव्रतं चात्र माघमासे विशेषतः । कर्तव्यमुदितं भक्ताः! सर्वपातकशोधनम् ॥३२॥ कृच्छ्रव्रतेषु सकलेष्वपि पुम्भिरेतत् स्त्रीभिस्तथा सुकरमस्ति बृहत्फलं च । प्रोक्तं ततो निजशरीरविशुद्धिहेतोः कार्यं तपःप्रियरमापतितुष्टये वा ॥३३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे भगवतो लौहग्रामनागटङ्कपुरागमननिरूपणनामा सप्तदशोऽध्यायः ॥१७॥

**સાધુની પંક્તિઓમાં ફરતાં, અત્યંત આનંદ પામતા હતા. (૨૧) શ્રી હરિ આ પ્રમાણે માનુષ્ય-લીલાઓથી લોયા ગામનાં ભક્તજનોને આનંદ આપતા સતા પોતાનાં મુનિમંડળોથી વીંટાયેલા સતા નાગડકાપુરમાં આવ્યા. (૨૨) શ્રીહરિએ નાગડકામાં સુરસિંહના ગૃહમાં પોતાનો નિવાસ કર્યો. બીજા સર્વે ભક્તજનોને પુરમાં યથાયોગ્ય નિવાસ કરાવ્યો. (૨૩) સાતિ (શાંતિબાઈ) નામનાં પત્નીએ અને નાથા નામના પુત્રે સહિત ઉદાર બુદ્ધિવાળા સુરસિંહે ભક્તિપૂર્વક અને શ્રદ્ધાથી શ્રીહરિ અને શ્રીહરિની સાથે આવેલા મુનિ વગેરે હરિભક્તોનો યથાયોગ્ય આતિથ્યસત્કાર કર્યો. (૨૪) સુરસિંહ રાજાએ શક્તિ પ્રમાણે વસ્ત્રો, આભૂષણો અને રૂપાની મુદ્રાઓના આપવાથી પોતાના સ્વામી શ્રીહરિની પૂજા ભક્તિપૂર્વક કરી. (૨૫) શ્રદ્ધાયુક્ત સુરસિંહ રાજાએ ચન્દન-પુષ્પના હારો અને સુંદર વસ્ત્રો વડે પૂજા કરી અને તેમને નાનાવિધ ભોજ્યાન્ન વડે તૃપ્ત કર્યા. (૨૬) સૂરસિંહ રાજાએ ભક્તિપૂર્વક ઘણી સંભાવના કરાયેલા ભગવાન શ્રીહરિએ ભક્તોને આનંદ આપતા સતા, ધર્મનું સ્થાપન કરતા સતા પાંચ દિવસ નાગડકામાં નિવાસ કર્યો. (૨૭) તે પાંચ દિવસોમાં ચોથે દિવસે સભામાં રહેલા શ્રીહરિએ ગૃહસ્થોના તથા ત્યાગીઓના સમગ્ર ધર્મો પણ કહ્યા. (૨૮) શ્રીનારાયણ મુનિ કહે છે : હે ભક્તો ! તમો સર્વે સાંભળો, આવતી કાલે ઉત્તરાયણ નામનું પર્વ છે. તેમાં શક્તિ પ્રમાણે સ્નાન-દાનાદિ સર્વ પ્રકારે કરવું. (૨૯) મકર રાશિમાં સૂર્યના સંક્રમણથી આરંભીને ચાલીશ ઘડી સ્નાનાદિ કર્મમાં પુણ્યકાળ જાણવો. (૩૦) આ પોષ માસની પૂર્ણિમામાં સમગ્ર જનોએ માઘસ્નાનનો આરંભ કરવો. માઘ સ્નાનમાં તલનું દાન મુખ્ય કહેલું છે. (૩૧) હે ભક્તો ! પોષ સુદી પૂર્ણિમાથી આરંભીને માઘ માસની પૂર્ણિમાના અન્તે માઘ માસમાં સર્વ પાતક નાશ કરનાર ચાન્દ્રાયણ વ્રત વિશેષપણે કરવું એમ કહ્યું છે. માસ બે પ્રકારના છે - પૂર્ણિમાના અન્તવાળા અને અમાસના અંતવાળા-માઘસ્નાનમાં પૂર્ણિમાના અંતવાળો પક્ષ ગ્રહણ કરવો એમ સર્વે ગ્રન્થકારો કહે છે. (૩૨)**

**આ ચાંદ્રાયણ વ્રત સમગ્ર કૃચ્છ્ર વ્રતોમાં પુરુષો અને સ્ત્રીઓએ સુખેથી કરવા યોગ્ય અને મહાફળને આપનારું કહેલું છે, માટે પોતાના શરીરની શુદ્ધિ માટે અથવા તપઃપ્રિય એવા ભગવાનની પ્રસન્નતા માટે ચાંદ્રાયણ વ્રતનું અનુષ્ઠાન કરવું. (૩૩)**

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે ભગવતો લૌહગ્રામનાગટંકપુરાગમન નિરૂપણનામા સપ્તદશોऽધ્યાયઃ (૧૭)*

सुव्रत उवाच - **इति नारायणमुनेः स्वामिनो वचनं नृप! । श्रुत्वा शुकानन्दमुनिस्तं नत्वा प्रश्रितोऽब्रवीत् ॥१॥** शुकानन्द उवाच-**माघस्नानविधिं स्वामिन्! श्रोतुमिच्छाम्यहं प्रभो! । चान्द्रायणव्रतस्यापि विधिं मे वक्तुमर्हसि ॥२॥** सुव्रत उवाच - **इत्थं तपस्विना तेन मुनिना पृष्ट आदरात् । जगादानन्दयन्भक्तान्सर्वांस्तं च स सर्ववित् ॥३॥** श्रीनारायणुनिरुवाच - **माघस्नानविधिं तुभ्यं कथयामि मुने! शृणु । तीर्थ एव विशेषेण माघस्नानं विधीयते ॥४॥ यस्य हस्तौ च पादौ च वाङ्मनश्च सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥५॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिन्दारतश्चैते न तीर्थफलभागिनः ॥६॥ प्रयागं पुष्करं प्राप्य कुरूक्षेत्रमथापि वा । यत्र तत्र च वा स्नायान्माघे नित्यमिति स्थितिः ॥७॥ त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः । समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥८॥ अरुणोदयमारभ्य प्रातःकालावधि ध्रुवम् । माघस्नानस्य कालो हि पुण्यदो मुनिभिः स्मृतः ॥९॥ उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमम् । सवितर्युदिते स्नानं ततो हीनं प्रकीर्तितम् ॥१०॥ वृथैवोष्णोदकस्नानं वृथा जप्यमवैदिकम् । अश्रोत्रिये वृथा दानं वृथा भुक्तमसाक्षिकम् ॥११॥ ब्रह्मक्षत्रविशां चैव मन्त्रवत्स्नानमिष्यते । तूष्णीमेव तु शूद्राणां स्त्रीणां च मुनिसत्तम!॥१२॥ पौर्णमासीं तु पौषस्य प्रारभ्य**

---

## અધ્યાય : ૧૮

### શુકાનંદમુનિએ પૂછેલા મહાબુદ્ધિશાળી શ્રીહરિએ માઘસ્નાનનો વિધિ સારી રીતે કહ્યો છે.

**સુવ્રતમુનિ બોલ્યા,** હે રાજન્ ! આ પ્રમાણે પરમેશ્વર નારાયણમુનિનું વચન સાંભળીને શુકાનંદ મુનિએ શ્રીહરિને નમસ્કાર કરીને પૂછ્યું : (૧) હે સ્વામિન્ ! હે પ્રભો ! હું માઘસ્નાનનો અને ચાન્દ્રાયણ વ્રતનો વિધિ સાંભળવા ઈચ્છું છું. માટે મને તે કહેવા માટે તમો યોગ્ય છો. (૨) હે રાજન્ ! આવી રીતે તપમાં સ્થિતિવાળા શુકાનંદમુનિએ આદરથી પુછાયેલા સમગ્ર શાસ્ત્રના અર્થને જાણનારા **શ્રીહરિ શુકાનંદમુનિ અને સમગ્ર ભક્તોને આનંદ આપતા સતા બોલ્યાઃ** (૩) હે મુને ! તમોને **માઘ-સ્નાનનો વિધિ** કહું છું. તે તમો સાંભળો, માઘસ્નાન વિશેષપણે તીર્થમાં જ કરાય છે. (૪) જે માણસના બન્ને હાથ-પગ-વાણી-મન નિયમમાં છે અને વિદ્યા-તપ અને કીર્તિ નિયમમાં છે, તે માણસ તીર્થનું ફળ પામે છે. દુષ્પરિગ્રહ અને પારકાને પીડા કરવાથી નિવૃત્તિ તે હાથનો સંયમ છે. દૃષ્ટિથી પવિત્ર દેશમાં પગ મૂકવો તે પગનો સંયમ છે, પારકા અથવા પોતાના દ્રોહને વર્જીને વાણી ઉચ્ચારણ કરવી તે વાણીનો સંયમ છે, પારકાના અનિષ્ટ ચિન્તનનો અભાવ તે મનનો સંયમ છે. વ્યભિચારાદિથી રહિતપણું તે વિદ્યાનો સંયમ છે. દંભથી રહિત થવું તે તપનો સંયમ છે. પાપકીર્તિથી રહિતપણું તે કીર્તિસંયમ છે. (૫) શ્રદ્ધા વિનાનાં, પાપકર્મોમાં મનવાળા, નાસ્તિક, તીર્થફળ વિષે જેના સંશયો નાશ પામ્યા નથી તેવા, શાસ્ત્રોક્ત સત્કર્મોમાં કુતર્કથી સંદેહ કરનારા અને નિંદામાં પ્રીતિવાળા : આ છ પ્રકારના મનુષ્યો તીર્થના ફળને ક્યારેય પણ પામતા નથી. (૬) તીર્થરાજ પ્રયાગ, પુષ્કર અથવા કુરુક્ષેત્રને પામીને તેમાં માઘમાસમાં નિત્ય સ્નાન કરે અથવા જે કોઈ તીર્થમાં નિત્ય સ્નાન કરે : આવી શાસ્ત્ર મર્યાદા છે. (૭) સમુદ્રને નહિ પામનારી નદીઓ માઘમાસમાં એક દિવસના સ્નાનથી ત્રણ દિવસના સ્નાનનું ફળ આપે છે. સમુદ્રમાં જનારી નદીઓમાં એક દિવસ સ્નાન કરે તો તે પંદર દિવસના સ્નાનનું ફળ આપે છે અને સમુદ્ર તો એક દિવસના સ્નાનથી એક માસના સ્નાનનું ફળ આપે છે. (૮) અરુણોદયથી આરંભીને પ્રાતઃકાળ સુધી માઘસ્નાનનો સમય મુનિઓએ પુણ્ય આપનારો કહેલો છે જ. (૯) તારાના દર્શને સહિત સ્નાન **ઉત્તમ** કહેલું છે. તારા ન દેખાય તે સ્નાન **મધ્યમ** કહેલું છે. સૂર્યનારાયણના ઉદય વખતનું સ્નાન તે મધ્યમ સ્નાનથી **કનિષ્ઠ** કહેલું છે. (૧૦) માઘ માસમાં ઊના જળથી સ્નાન તે વૃથા જ કહેલું છે. (જેવી રીતે) વેદ-પુરાણાદિ મંત્રોએ રહિત જપ વૃથા છે. વેદાધ્યયનથી રહિત બ્રાહ્મણમાં દાન વૃથા છે. બ્રાહ્મણાદિને ભોજને વર્જીત ભોજન કરેલું અન્ન વૃથા છે. (૧૧) હે મુનિસત્તમ ! બ્રાહ્મણ-ક્ષત્રિય અને વૈશ્યોને 'અબ્દૈવત' મંત્રોના ઉચ્ચારણ સહિત સ્નાન ઈચ્છાયેલું છે. શૂદ્રો અને સ્ત્રીઓને તો મૌનથી જ સ્નાન ઈચ્છાયેલું છે. (સર્વ સાધારણ **મંત્ર** પદ્મપુરાણમાં કહેલો છે તે નિર્ણયસિન્ધુમાં કહ્યો છે 'દુખદારિદ્રયનાશાય શ્રીવિષ્ણોસ્તોષણાય ચ । પ્રાતઃ સ્નાનં કરોમ્યદ્ય માઘે પાપવિનાશનમ્ । મકરસ્થે રવૌ માઘે ગોવિન્દાચ્યુત ! માધવ ! । સ્નાનેનાનેન મે દેવ ! યથોક્તફલદો ભવ । ઈમં મંત્રં સમુચ્ચાર્ય સ્નાયાન્મૌનસમન્વિતઃ ॥' આ મંત્રનું ઉચ્ચારણ કરી મૌનવ્રત રાખીને સ્નાન કરે. (૧૨) મકરમાં રહેલા સૂર્યનારાયણ હોય ત્યારે પોષ માસની

स्नानमाचरेत् । त्रिंशत्त्वहानि पुण्यानि मकरस्थे दिवाकरे ॥१३॥ अपावृतशरीरस्तु यः साक्षात्स्नानमाचरेत् । पदेपदेऽश्वमेधस्य फलमाप्नोति मानवः ॥१४॥ ततः स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदम् । वेदोक्तविधिना ब्रह्मन् ! सूर्यायार्घ्यं निवेदयेत् ॥१५॥ पितृन्सन्तर्पयेत्तत्स्थः समुत्तीर्य ततो जलात् । इष्टदेवं नमस्कृत्य पूजयेत्पुरुषोत्तमम् ॥१६॥ भूशायी ब्रह्मचारी च शक्तः स्नानं समाचरेत् । अशक्तो नियमाचारे स्नानमात्रं समाचरेत् ॥१७॥ यथाकथञ्चित्कर्तव्यं माघस्नानमिति स्मृतिः । अतिरुग्णाश्चातिवृद्धाः स्नायुरुष्णेन वारिणा ॥१८॥ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी । तिलभुक् तिलदाता च षट्तिलाः पापनाशनाः ॥१९॥ सरित्तोयाद्यभावे तु नवकुम्भस्थितं जलम् । वायुना ताडितं रात्रौ गङ्गातोयसमं विदुः ॥२०॥ तन्नास्ति पातकं लोके यन्न स्नानाद्विनश्यति । मासोपवासादधिकं माघस्नानं मुने! ध्रुवम् ॥२१॥ जीवता भुज्यते दुःखं मृतो दुःखं न पश्यति । एतस्मात्कारणाद्भूमौ माघस्नानं विशिष्यते ॥२२॥ अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः । त्रयो भागास्तिलानां हि चतुर्थः शार्करो मतः ॥२३॥ माघावसाने रुचिरान् षड्रसान्सम्प्रदापयेत् । दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ॥२४॥ त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः । ताम्रपात्राणि दद्याच्च तिलोपेतानि शक्तितः ॥२५॥ कम्बलाजिनवस्त्राणि नानारत्नानि शक्तितः । चोलकानि तु दिव्यानि प्रच्छादनपटांस्तथा ॥२६॥ उपानहौ पादगुप्ते मोचकौ पापमोचकौ । तथान्यदपि यत्किञ्चिन्माघे स्वस्य प्रियं भवेत् ॥२७॥ तन्माघस्नायिनां देयं विप्राणां भूतिमिच्छता । स्वल्पेऽपि दाने वक्तव्यं माधवः प्रीयतामिति ॥२८॥ नदीतडागप्रहिवापिकादौ गृहेऽपि वा शीतजलेन

---

પૂર્ણિમાથી આરંભીને પવિત્ર ત્રીશ દિવસ સુધી માઘસ્નાન કરે. (અહીંયાં કેટલાકે પોષ માસની સુદી એકાદશી અથવા દ્વાદશીથી આરંભીને પણ માઘસ્નાન કહ્યું છે.) (૧૩) વસ્ત્રાદિથી શરીરને ઢાંકીને પ્રત્યક્ષ સ્નાન કરે, ઘેરથી શરીર ઢાંક્યા વિના નદીમાં સ્નાન કરવા જાય. નદીમાં સ્નાન કરી; ભીનું વસ્ત્ર ઓઢીને જ ફરી ગૃહમાં આવે, તે મનુષ્ય **પગલે પગલે અશ્વમેધ યજ્ઞનું ફળ** પામે છે. (૧૪) હે બ્રહ્મન્ ! સ્નાનના સમયમાં મસ્તકમાં તીર્થની મૃત્તિકાને લેપ કરીને શુભ તીર્થમાં સ્નાન કરી, વેદોક્ત વિધિથી સૂર્યને અર્ઘ્ય આપે. (૧૫) જળમાં રહીને જ પિતૃઓનું તર્પણ કરે પછી જળથી બહાર આવી ઈષ્ટદેવ પુરુષોત્તમને નમસ્કાર કરીને પૂજન કરે. (૧૬) શરીરની શક્તિવાળો પુરુષ ભૂમિમાં શયન કરે અને બ્રહ્મચર્યનું પાલન કરતો થકો સ્નાન કરે. પૃથ્વી પર શયનાદિમાં અશક્ત પુરુષ સ્નાન માત્રનું આચરણ કરે. (૧૭) કોઈ પણ પ્રકારે માઘસ્નાન કરવું આવી સ્મૃતિ છે. બહુ રોગી, અત્યન્ત વૃદ્ધ હોય તે ઊના પાણીથી સ્નાન કરે. (૧૮) તિલોને લઈ ચોપડીને સ્નાન કરનાર-તિલના ચૂર્ણથી અંગમર્દન કરનાર-તિલનો હોમ કરનાર-તિલના જળથી પિતૃઓનું તર્પણ કરનાર-તિલ ખાનાર-તિલદાતા આ છ કાર્યોમાં ઉપયોગ કરેલા તિલ સમગ્ર પાપને નાશ કરનાર છે. (૧૯)નદીના જળના અભાવે નવા ઘડામાં રહેલું જળ રાત્રિમાં વાયુથી ઠંડુ થયેલું, ગંગાના જળ સમાન જાણવું. (૨૦) હે મુને ! જગતમાં જે પાતક કહેલાં માઘસ્નાનથી ના નાશ પામે તેવું કોઈ પાતક નથી. **માઘસ્નાનથી સર્વે પાપો નાશ પામે છે,** માટે માઘસ્નાન માસના ઉપવાસથી પણ અધિક છે. (૨૧) પ્રાણોને ધારણ કરતા મનુષ્યે શીતને સહન કરવાનું કષ્ટ અનુભવાય છે. દેહનો ત્યાગ કરીને પરલોકમાં ગયેલો માઘસ્નાનથી દુઃખ પામતો નથી. માટે પૃથ્વીમાં માઘસ્નાન વિશેષ છે. (૨૨) તે કરનારે દરરોજ સાકરથી યુક્ત તલ આપવા, તલોના ત્રણ ભાગ અને ચોથો ભાગ સાકરનો માનેલો છે. (૨૩) માઘસ્નાનની સમાપ્તિમાં અતિ સુંદર છ રસોથી યુક્ત પદાર્થો શક્તિ પ્રમાણે આપે. સાત ધાન્ય (જવ, ઘઉં, ડાંગર, તલ, ડાંગ, શ્યામો, ચીણો) અને દંપતિ -(સ્ત્રીપુરુષો)ને ઉચિત સૂક્ષ્મ વસ્ત્રો આપે. (૨૪) સાકરથી યુક્ત તલના ત્રીશ લાડુઓ આપવાં. તલથી યુક્ત તાંબાનાં પાત્રો શક્તિ પ્રમાણે આપે. (૨૫) કામળીઓ, મૃગચર્મો અને વસ્ત્રો, નાના રત્નો, સુંદર ડગલાઓ તથા ઓઢવાનાં વસ્ત્રો આપે. (૨૬) પગના રક્ષણ કરનાર જોડાં, દાતાના પાપને નિવૃત્ત કરનાર મોજાં તથા બીજું પોતાનું જેકંઈ પણ પ્રિય હોય; પોતાની ઉન્નતિ ઈચ્છતા માઘસ્નાન કરતાએ તે બધું માઘસ્નાન કરતા વિપ્રોને માઘ માસમાં આપવું. થોડા દાનમાં પણ **'શ્રીહરિ પ્રસન્ન થાઓ'** આ પ્રમાણે બોલવું. (૨૭-૨૮)

હે બ્રહ્મર્ષે ! મારાં આશ્રિત જનોએ માઘ માસમાં દરરોજ નદી, તળાવ, કૂવો અને વાપિકા વગેરેમાં અથવા ગૃહમાં પણ ઠંડા જળથી સૂર્યનારાયણ ઉદય થયા પહેલાં સ્નાન કરવું. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

**माघे । स्नानं विधेयं रविदर्शनात्प्राङ्मदाश्रितैर्ब्रह्मऋषेऽनुघस्रम् ॥२९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे नागटङ्कपुरे माघस्नानविधिनिरूपणनामाष्टादशोऽध्यायः ॥१८॥

श्रीनारायणुनिरुवाच – **चान्द्रायणव्रतस्याथ विधिं शुक ! वदामि ते । वैष्णवादिपुराणेषु यत्प्रोक्तं पापशुद्धये ॥१॥ शुक्लपक्षे चतुर्दश्यां पौषमासे समाहितः । चान्द्रायणव्रतं मासं गृह्णीयात् सर्वपापजित् ॥२॥ भूशय्या ब्रह्मचर्यं च त्रिकालं स्नानमन्वहम् । लक्ष्मीनारायणस्यार्चा कार्याऽखण्डश्च दीपकः ॥३॥ आज्येन तर्पयेद्वह्निं सर्वपापोपशान्तये । चरुं भैक्षं तथा सक्तून कणान् यावकमेव च ॥४॥ शाकं क्षीरं दधि घृतं फलमूलोदकानि च । हुतशिष्टं तु वा पश्चात्प्राशयेदन्नमादरात् ॥५॥ धात्रीफलोपमान् ग्रासान् पौर्णमास्यां तु भक्षयेत् । हृद्यान् पञ्चदशैवाथ ह्रासयेच्च दिने दिने ॥६॥ विंशत्या सहितं येन कृष्णपक्षे भवेच्छतम् । अमावास्यादिने चैव द्विजश्चोपवसेत्ततः ॥७॥ शुक्लां पक्षतिमारभ्य चन्द्रवृद्धिक्रमेण च । विंशत्या सहितं भूयो ग्रासानां स्याच्छतं तथा ॥८॥ एकस्य प्रणवो मन्त्रो भूर्द्वयोश्च भवेदिह । भुवस्त्रयाणां स्वश्चापि चतुर्णां मह एव च ॥९॥ भवेदथ च पञ्चानां षण्णां जन उदाहृतः । सप्तानां तु तपः सत्यमष्टानां परिकीर्तितम् ॥१०॥ ऊर्ग्नवानां भवेदिट् च दशानां मन्त्र एव च । एकादशानामोजश्च तेजश्चातः परं भवेत् ॥११॥ त्रयोदशानां पुरुषस्ततो धर्मः प्रकीर्तितः**

---

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે નાગટંકપુરે માઘસ્નાનવિધિ નિયમનિરૂપણનામાષ્ટાદશોઽધ્યાયઃ (૧૮)*

## અધ્યાય : ૧૯

**પોતાના ભક્તોનું હિત કરનારા શ્રીહરિએ શુકાનંદ મુનિને સ્નેહથી ચાન્દ્રાયણ વ્રતનો વિધિ કહ્યો છે.**

**શ્રી નારાયણ મુનિ બોલ્યા** : હે શુકાનંદ મુને ! હવે ચાન્દ્રાયણ વ્રતનો વિધિ તમોને કહું છું, જે ચાન્દ્રાયણ વ્રત વિષ્ણુપુરાણાદિમાં પાપની શુદ્ધિ માટે કહેલું છે. (૧) સ્થિર ચિત્તવાળો પુરુષ પોષ માસના શુકલપક્ષમાં ચૌદશને દિવસે સર્વ પાપને નાશ કરનાર, ચન્દ્રની ગતિનું ચરણ (કલા)ની માફક જે કર્મમાં જેમ હોય તેમ ગ્રાસનો હ્રાસ અને વૃદ્ધિ થાય તે ચાન્દ્રાયણ કહેવાય છે. એવું વ્રત એક માસ સુધી ગ્રહણ કરવું. (૨) દરરોજ પૃથ્વી ઉપર શયન કરવું. બ્રહ્મચર્યનું પાલન કરવું. ત્રણ સમય સ્નાન કરવું. શ્રી કૃષ્ણની પૂજા કરવી, અખંડ ઘીનો દીવો રાખવો. (૩) સર્વે પાપની શાંતિ માટે ઘૃતથી અગ્નિને તૃપ્ત કરવો, આ વ્રતમાં ચરુ = ઓસાવ્યા વિનાનો ભાત, ભૈક્ષ = ભિક્ષા પ્રાપ્ત જે કાંઈપણ અદૂષિત અન્ન, સાથવો, ચોખા આદિના કણ (કણકી), જવ સંબંધી યાવક તથા શાક, દૂધ, દહીં, ઘૃત, ફળ, મૂળ અને જળ ભક્ષણ કરે. આમાં ઉત્તરોત્તર શ્રેષ્ઠ જાણવું. અથવા હોમમાં અવશેષ રહેલું અન્ન હોય તે અંતે આદરથી જમે. (૪-૫) આ વ્રત ચન્દ્રની કલાની માફક ઘટાડે અને વૃદ્ધિ પમાડે માટે તેની **ચાન્દ્રાયણ** એવી સંજ્ઞા સાર્થક છે. તેમાં **યવમધ્ય અને પિપીલિકા મધ્યનો પ્રકાર** કહું છું. તેમાં પૂર્ણિમાએ લીલા મોટા આંબળા જેવડા કોળિયા પંદર જ જમે. પછી દિવસે દિવસે એક એક ઓછો કરે. અર્થાત્ પડવાને દિવસે ચૌદ, બીજને દિવસે તેર, એ રીતે એક એક ઓછો કરીને અમાવસ્યાને દિવસે તો ઉપવાસ કરે. એમ કરતા કૃષ્ણ પક્ષમાં બધા મળીને એકસો વીશ કોળિયા જમવામાં આવે. તે પછી માઘ માસના શુકલપક્ષમાં પડવાને દિવસે એક કોળિયો, બીજે બે એમ દરરોજ એકએક કોળિયાની વૃદ્ધિ ક્રમથી ચન્દ્રકળાની વૃદ્ધિને અનુસારે ફરીથી પણ એકસો વીશ કોળિયા જમે, એવો નિયમ જાણવો. (૬ થી ૮) તેમાં ગ્રાસના અભિમંત્રણ મંત્રો કહું છું. ચાન્દ્રાયણ વ્રતમાં પ્રથમ ગ્રાસનો પ્રણવ (ઓમકાર) મંત્ર છે. તે નમઃ સ્વાહા શબ્દની સાથે જોડવાથી ૐ નમઃ સ્વાહાઃ એમ અભિમંત્રણ કરવા પૂર્વક પ્રથમ કોળિયાને જમે બે ગ્રાસનો 'ભૂઃ' એવો મંત્ર છે, એટલે 'ભૂર્નમઃ સ્વાહા' એમ અભિમંત્રણ કરવા પૂર્વક; આ પ્રમાણે આગળ જાણવું. ચાર ગ્રાસનો મંત્ર 'સ્વઃ' એવો છે. પાંચ ગ્રાસનો મંત્ર 'મહઃ' છે. છ ગ્રાસનો મંત્ર 'જનઃ' એવો મંત્ર કહ્યો છે. સાત ગ્રાસનો મંત્ર 'તપઃ' છે. આઠ ગ્રાસનો મંત્ર 'સત્ય' છે. નવ ગ્રાસનો મંત્ર 'ઊર્જે નમઃ સ્વાહા' એવો માનેલો છે. દશ ગ્રાસનો મંત્ર 'ઈટ્' છે. અગિયાર ગ્રાસનો મંત્ર 'ઓજઃ' એવો છે. બાર ગ્રાસનો મંત્ર 'તેજઃ' એવો છે. તેર ગ્રાસનો મંત્ર 'પુરુષઃ' એવો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

। शिवः पञ्चदशानां च ग्रासानां मन्त्र उच्यते ॥१२॥ स्वाहाकारनमस्कारयुक्तैर्मन्त्रैः पृथक् पृथक् । अभिमन्त्र्य ग्रसेद्ग्रासान् दिनसङ्ख्याक्रमेण च ॥१३॥ समाप्ते तु व्रते दद्याद्गां वृषं च द्विजातये । चान्द्रायणेन चैकेन सर्वपापक्षयो भवेत् ॥१४॥ उद्यापनेन सहितं कृत्वेदं व्रतमाप्नुयात् । इह लोके धनारोग्यं सुखं सौभाग्यसम्पदम् ॥१५॥ प्राप्नुयात्परलोके च शक्रस्य सदने स्थितिम् । विष्णुप्रीत्यै कृते त्वस्मिन् प्राप्नुयाद्धाम वैष्णवम् ॥१६॥ चान्द्रायणं व्रतमिति प्रोक्तं तुभ्यं मया मुने!। प्रायश्चित्तव्रतेष्वेतत्प्रायो मुख्यतया मतम् ॥१७॥ सुव्रत उवाच – इत्याश्रुत्य प्रभोर्वाक्यं शुकानन्दस्तथेतरे । हृष्टा बभूवुर्नृपते ! प्रणेमुश्च तमीश्वरम् ॥१८॥ ततः प्रभाते भगवान् पर्वस्नानं तिलोदकैः । कृत्वा ददौ ब्राह्मणेभ्यस्तिलपात्राणि काञ्चनम् ॥१९॥ सहस्रशः कम्बलांश्च नीशारांश्च सहस्रशः । सतूलान् कञ्चुकांश्चादात् ब्राह्मणेभ्यः सहस्रशः ॥२०॥ ब्राह्मणान् भोजयामास तदिष्टैर्भोजनैर्बहून् । प्रादाच्च दक्षिणास्तेभ्यो भगवान् धर्मरक्षकः ॥२१॥ सन्तर्प्य धार्मिश्च मुनीन् सदन्नैर्भ्रातुर्निवासे स्वयमप्यभुक्त । रात्रौ सदःस्थ स उपादिशत्स्वान् स्वसम्मतां श्रीऋषभोक्तशिक्षाम् ॥२२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे नागटङ्कपुरे चान्द्रायणव्रतविधिनिरूपणनामैकोनविंशोध्यायः ॥१९॥

सुव्रत उवाच– दिनानि पञ्चैव स नागटङ्क एवं पुरेऽसौ भगवानुषित्वा । सूरेण भक्तैश्च वृतोऽखिलैः स्वैर्हेमन्तसिंहस्य पुरं प्रतस्थे ॥१॥ तं सोऽध्वनि प्राह नृपं सदीशस्त्वद्ग्राममादौ नय नस्ततस्ते । पुरं व्रजिष्याम इति प्रभूक्तं तथेति शीर्ष्णा स

---

છે. ચૌદ ગ્રાસનો મંત્ર 'ધર્મઃ' એવો મંત્ર માન્યો છે. પંદર ગ્રાસનો 'શિવઃ' એવો મંત્ર છે. એ રીતે સ્વાહાકાર અને નમસ્કારે યુક્ત એવા તે તે ૐકારાદિ મંત્રો વડે તે સંખ્યા ગ્રાસોને જુદા જુદા અભિમંત્રણ કરવા પૂર્વક દિવસની સંખ્યાના અનુક્રમથી જમે. ( ૯ થી ૧૩) ચાન્દ્રાયણ વ્રત સમાપ્ત થાય ત્યારે બ્રાહ્મણને ગાય અને બળદ આપે. એક ચાન્દ્રાયણ વ્રતથી સર્વ પાપનો નાશ થાય. (૧૪) આ વ્રત ઉદ્યાપને સહિત કરીને આ લોકમાં ધન, આરોગ્ય, સુખ-સૌભાગ્યની સંપત્તિ પામે છે. (૧૫) અને પરલોક જે ઈન્દ્રલોકમાં સ્થિતિ પામે છે. આ લોકમાં ચાન્દ્રાયણ વ્રત શ્રીકૃષ્ણની પ્રસન્નતા માટે કર્યું હોય તો શ્રીકૃષ્ણનું **ગોલોકધામ વગેરેને પામે છે.** (૧૬) હે મુને ! આ પ્રકારે ચાન્દ્રાયણ વ્રત તમોને મેં કહ્યું. આ ચાન્દ્રાયણ પ્રાયશ્ચિત્તોના વ્રતોમાં ઘણું કરી પ્રધાનપણે માનેલું છે. (૧૭) હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વાક્ય સાંભળીને શુકાનંદ મુનિ તથા બીજા સભામાં બેઠેલા પ્રસન્ન થયા અને પરમેશ્વર શ્રીહરિને સાષ્ટાંગ નમસ્કાર કરતા હતા. (૧૮) પછી પોષ સુદી નોમે પ્રાતઃકાળમાં શ્રીહરિએ તિલમિશ્રિત ઠંડા જળથી ઉત્તરાયણ નિમિત્તે સ્નાન કરી તિલનાં પાત્રો અને સુવર્ણ બ્રાહ્મણોને આપ્યાં. (૧૯) હજારો હજાર કામળીઓ અને હજારો હજાર રજાઈઓ તથા રૂના ભરેલા ડગલાઓ હજારો બ્રાહ્મણોને આપ્યા. (૨૦) ધર્મરક્ષક શ્રીહરિ ઘણા બ્રાહ્મણોને ઈષ્ટ-મિષ્ટાન્ન ભોજનોથી જમાડતા હતા. તે બ્રાહ્મણોને દક્ષિણા આપતા હતા. (૨૧)

ધર્મપુત્ર શ્રીહરિ મુનિઓને સુંદર ભોજનોથી તૃપ્ત કરી પોતાના નાના ભાઈ ઈચ્છારામના નિવાસમાં પોતે પણ જમ્યા. રાત્રિએ સભામાં બેસીને પોતે અત્યંત માનેલા ભાગવતમાં શ્રીઋષભદેવે કહેલાં શિક્ષાનાં વચનો પોતાના ભક્તજનોને ઉપદેશ આપતા હતા. (૨૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે નાગટંકપુરે ચાન્દ્રાયણ-વ્રતવિધિ નિરૂપણનામૈકોનવિંશોઽધ્યાયઃ (૧૯)*

## અધ્યાય : ૨૦

**ભગવાન શ્રીહરિકૃષ્ણે હેમન્તસિંહ આદિક હરિભક્તોની પ્રસન્નતા માટે પંચાળાગામમાં પુષ્પદોલોત્સવ કર્યો તેનું વર્ણન છે.**

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! આ પ્રકારે નાગડકાપુરમાં પાંચ દિવસજ રહીને સુરસિંહ રાજા અને સમગ્ર પોતાનાં ભક્તજનોએ વીંટાયેલા સતા હેમન્તસિંહ રાજાના જૂનાગઢ તરફ પોષ સુદી ૧૦ ના દિવસે પ્રયાણ કર્યું. (૧) સાધુજનોના

उरीचकार ।।२।। षष्ठेऽह्नि स ग्राममवाप तस्य पञ्चालसंज्ञं द्रुमराजिरम्यम् । श्रुत्वा तमायातमनूपसिंहो ग्राम्यैः समं सन्मुखमाजगाम ।।३।। ते तं प्रणम्याच्युतमादरेण हेमन्तसिंहं च समेत्य सर्वे । वादित्रनादैः सममेव निन्युर्ग्रामं सभक्तं तमुदारकीर्तिम् ।।४।। हेमन्तसिंहोऽथ निजे गृहे तं निवासयामास सपार्षदं च । यथोचितं वासयति स्म सर्वानन्यांश्च भक्तानपि भूपवर्य! ।।५।। हरेर्भागवतानां च स्त्रीपुंसानां स भूपतिः । यथोचितं यथावित्तं चकारातिथ्यमादरात् ।।६।। सर्वसम्पत्समृद्धं स्वं गृहं च सपरिच्छदम् । प्रभोरधीनं कृत्वैव तस्थावतिथिवन्नृपः ।।७।। निवृत्तिधर्मवासार्हं ग्रामं तं वीक्ष्य स प्रभुः । पूर्दोषानशुचित्वादीन् विदन्नाह नराधिपम् ।।८।। श्रीनारायणमुनिरुवाच - अयं ग्रामः समीचीनः सतां वासाय सम्मतः । जीर्णदुर्गपुरावासो न सद्भ्यो रोचते किल ।।९।। ग्रामस्तवायं प्राचीनस्तत्पुरं च तवैव हि । विशेषं नैव पश्यामि जीर्णदुर्गे ततस्त्वतः ।।१०।। नयेथा यदि तत्रास्मांस्तर्हि द्वित्रांस्तु वासरान् । वत्स्यामोऽत्र तु राजर्षे! द्वित्रान्मासानपि ध्रुवम् ।।११।। इत्युक्तः स नृपो भूम्ना प्रीतः प्रोवाच तं प्रभो! । यत्रेच्छा ते भवेत्तत्र सद्भिः सह सुखं वस ।।१२।। ममापि न विशेषोऽस्ति पुरे ग्रामात्तु कश्चन । पौरास्त्वद्दर्शनं कर्तुमत्रायास्यन्ति सर्वशः ।।१३।। तत्रोवास ततः स्वामी भक्तैः सह मुदान्वितः । भक्तानानन्दयन् सर्वान्सकुटुम्बं नृपं च तम् ।।१४।। यथोत्तमस्य नृपतेर्गृहं दुर्गपुरे प्रभोः । स्वकीयमेवास्ति तथा गृहं तस्याप्यभूत्किल ।।१५।। सकुटुम्बस्य नृपतेस्तस्य भक्त्या वशीकृतः । सार्धमासं सुखेनैव न्यवसत्तत्र स प्रभुः ।।१६।। तद्दर्शनार्थमाजग्मुर्जीर्णदुर्गनिवासिनः । पुरुषाश्च स्त्रियः सर्वास्तद्भक्ताः स्निग्धचेतसः ।।१७।। ग्रामान्तरेभ्योऽपि

---

એક સ્વામી શ્રીહરિએ હેમન્તસિંહ રાજાને કહ્યું, હે રાજન્ ! પ્રથમ અમોને તમારા પંચાળા ગામમાં લઈ જાઓ. પછી તમારા જીર્ણદુર્ગપુરમાં આપણે સર્વે જઈશું. આ પ્રમાણે શ્રીહરિનું વચન હેમન્તસિંહે એમ થાઓ એમ કહીને મસ્તકે અંગીકાર કર્યું. (૨) શ્રીહરિ તે દિવસે અર્થાત્ પોષ સુદી પૂર્ણિમાને દિવસે પલાશાદિ મહાવૃક્ષોની પંક્તિઓથી રમણીય પંચાળા ગામમાં પહોંચ્યા. પોતાના ગામમાં આવતા શ્રીહરિને સાંભળીને હેમંતસિંહના નાના ભાઈ અનુપસિંહ પોતાના ગામના ભક્તોની સાથે સન્મુખ ચાલ્યા.(૩) તે સર્વે, અનુપસિંહાદિ ભક્તો આદરપૂર્વક પરમેશ્વર શ્રીહરિને પ્રણામ કરી શ્રીહરિની સાથે પોતાના ગામના અધિપતિ હેમંતસિંહને મળીને વાજિંત્રોના નાદોની સાથે જ ભક્તમંડળ સહિત મહાયશસ્વી શ્રીહરિને ગામમાં લઈ ગયા. (૪) હે રાજન્ ! પછી **હેમંતસિંહે પોતાના ભવનમાં** પાર્ષદોએ સહિત **શ્રીહરિને** નિવાસ કરાવ્યો. ઉત્તમાદિને પોતાના ભવનમાં, બીજા ગૃહસ્થોને ગામમાં ગૃહસ્થજનોનાં ગૃહોમાં અને મુનિઓને ગામ બહાર બગીચામાં કેસૂડાના વનમાં પર્ણશાળાઓમાં **યથાયોગ્ય નિવાસ** કરાવ્યો. (૫) હેમંતસિંહ રાજા શ્રીહરિના ભક્તો સ્ત્રી અને પુરુષોનું આતિથ્ય યથાયોગ્ય અને વિત્ત પ્રમાણે આદરપૂર્વક કરતા હતા. (૬) હેમંતસિંહ રાજા સર્વ સંપત્તિ યુક્ત ઉપકરણોએ સહિત પોતાનું ભવન શ્રીહરિને આધીન કરીને અતિથિની માફક જ રહ્યા. (૭) શ્રીહરિએ નિવૃત્તિધર્મમાં રહેલાં ત્યાગી જનોને નિવાસ યોગ્ય પંચાળા ગામ જોઈ અપવિત્રતાદિ નગરના દોષોને જાણતા સતા હેમન્તસિંહ રાજાને કહ્યું. (૮) **શ્રીનારાયણ મુનિ બોલ્યા,** હે રાજન્ ! આ તમારું ગામ સાધુઓના નિવાસ માટે સારું છે. જીર્ણદુર્ગપત્તનમાં સાધુઓને નિવાસ રુચિકર નથી જ. (૯) આ ગામ તમારું પુરાતન છે. અને જૂનાગઢ પણ પ્રાચીન છે. માટે આ ગામથી જૂનાગઢમાં અધિક કાંઈ જોતો નથી. (૧૦) હે રાજર્ષે ! જો અમોને જૂનાગઢમાં લઈ જશો તો બે-ત્રણ દિવસો નિવાસ કરીશું, આ ગામમાં તો બે-ત્રણ મહિના સુધી પણ રહીશું જ. (૧૧) હે રાજન્ ! આ પ્રકારે પરમેશ્વરે કહેવાયેલા હેમન્તસિંહ રાજાએ પ્રસન્ન થઈને કહ્યું, હે પ્રભો ! તમારી ઇચ્છા જે પુરમાં રહેવાની હોય તે પુરમાં સંતો સાથે નિવાસ કરો. (૧૨) હે હરે ! મારે પણ ગામથી નગરમાં કાંઈ વિશેષ નથી. સર્વે નગરજનો તમારા દર્શન કરવા અહીં આવશે. (૧૩) હે રાજન્ ! પછી હર્ષયુક્ત શ્રીહરિ પરિવારે સહિત રાજાને અને સર્વ ભક્તોને આનંદ આપતા સતા મુનિ અને ભક્તોની સાથે **પંચાળા** ગામમાં રહ્યા. (૧૪) ગઢપુરમાં ઉત્તમરાજાનું ગૃહ જેમ શ્રીહરિને પોતાનું જ છે, તેમ હેમંત રાજાનું ઘર પણ શ્રીહરિને પોતાનું જ થયું. (૧૫) શ્રીહરિએ પરિવારે સહિત હેમન્તસિંહ રાજાની ભક્તિથી વશ થઈને પંચાળા ગામમાં **દોઢ માસ સુધી** સુખપૂર્વક નિવાસ કર્યો. (૧૬) જૂનાગઢના નિવાસી અત્યંત પ્રીતિયુક્ત મનવાળા શ્રીહરિના ભક્તો, સર્વ પુરુષો અને સ્ત્રીઓ શ્રીહરિનાં દર્શન કરવા માટે પંચાળા ગામમાં આવ્યા. (૧૭) હજારો હરિભક્તો નાના પ્રકારનાં બીજા ગામોથી પણ પંચાળા ગામમાં આવતા

जनास्तत्राजग्मुः सहस्रशः । मानितास्ते भगवता न्यवसन् दर्शनोत्सुकाः ॥१८॥ उत्सवः शिवरात्र्यां च तत्रादावभवन्महान् । उपवासं हरिश्चक्रे तदा भक्तजनैः सह ॥१९॥ महारुद्राभिषेकं च ब्राह्मणैः शङ्करोपरि । कारयित्वा ददौ तेभ्यो दक्षिणां प्रचुरां ततः ॥२०॥ द्वितीये दिवसे विप्रान् भोजयित्वा सहस्रशः । चकार पारणां स्वामी धर्माध्वपरिरक्षकः ॥२१॥ प्रत्यहं च सभासंस्थो निजभक्तान् स ईशिता । ब्रह्मविद्याप्रकारांश्च वेदोक्तानप्यबूबुधत् ॥२२॥ जन्मोत्सवं भगवतो नरनारायणस्य च । फाल्गुने फल्गुनीऋक्षे महान्तमकरोत्प्रभुः ॥२३॥ वृत्तालये यथा पूर्वं स चकार महोत्सवम् । तथैवात्रापि भगवांश्चकारानन्दयन्निजान् ॥२४॥ नानादेशागता लोका भक्त्याऽऽनर्चुस्तमीश्वरम् । उपचारैर्बहुविधैरनैकैश्चाप्युपायनैः ॥२५॥ हेमन्तसिंहस्तु नृपः प्रत्यहं तस्य पूजनम् । चकार च विशेषेण दिने तस्मिन्निजैः सह ॥२६॥ नानाविधानि वस्त्राणि श्वेतपीतारुणानि सः । अलङ्कारान् बहून् हैमान् ददौ तस्मै च भक्तितः ॥२७॥ काश्मीरकेसरोपेतचन्दनेन सुगन्धिना । अखण्डैरक्षतैः श्वेतैः पौष्पैर्हारैश्च शेखरैः ॥२८॥ अबीरेण गुलालेन महानीराजनेन च। सम्पूज्य पुष्पाञ्जलिना साष्टाङ्गं प्रणनाम सः ॥२९॥ ततो रामप्रतापं च सानुजं समपूजयत् । अमूल्यवस्त्राभरणैर्गन्धमाल्याक्षतादिभिः ॥३०॥ गङ्गादित्यादयो योषास्तं पुपूजुः सतां पतिम् । अन्येऽपि पौरा भक्त्यैव ग्राम्याश्चार्चंस्तमादरात् ॥३१॥ सभ्रातृकः स राजाथ मुनीन्सर्वांश्च भक्तितः । चन्दनाक्षतपुष्पाद्यैर्वसनैः सद्भिरार्चयत् ॥३२॥ सिताज्यमिश्रैः पक्वान्नैर्भक्ष्यैर्भोज्यैश्च भूरिशः । सन्तर्पयामास स तान्नराधिप उदारधीः ॥३३॥ तस्मिन्महोत्सवे रात्रौ महत्यां भक्तसंसदि । स सत्सिंहासनारूढः शशी ऋक्षेष्विवाऽऽबभौ ॥३४॥ तत्रर्षयो गृहस्थाश्च सधवा विधवाः स्त्रियः । वीक्षमाणास्तमेवैकं निषेदुर्निखिला अपि ॥३५॥ तानुवाच हरिर्भक्तान्संशयः कस्यचिद्यदि । कश्चिद्धृदि भवेत्तर्हि पृच्छतेति नराधिप! ॥३६॥ सम्प्रेरणेनाथ सतामखण्डानन्दस्तदा

હતા. શ્રીહરિએ સત્કાર કર્યા થકા દર્શનમાં ઉત્સાહવાળા થઈ પંચાળા ગામમાં નિવાસ કરતા હતા. (૧૮) પ્રથમ પંચાળા ગામમાં શિવરાત્રીનો માઘ વદી ચૌદશને દિવસે મોટો ઉત્સવ થયો. તે સમયે શ્રીહરિએ ભક્તજનોની સાથે ઉપવાસ કર્યો. (૧૯) વળી શ્રીહરિએ બ્રાહ્મણોની પાસે શંકરની ઉપર રુદ્રાભિષેક કરાવીને પછી તે બ્રાહ્મણોને ઘણી દક્ષિણા આપી. (૨૦) ધર્મમાર્ગનું રક્ષણ કરનારા શ્રીહરિએ અમાવસ્યાને દિવસે હજારો બ્રાહ્મણોને ભોજન કરાવીને પારણાં કર્યાં. (૨૧) નિયામક શ્રીહરિએ દરરોજ સભામાં વેદોમાં કહેલી ઉદ્‌ગીથ-શાંડિલ્ય-અક્ષિવિદ્યા વગેરે બ્રહ્મવિદ્યાઓ અને એકાંતિક ભગવાનના ભક્તોના ધર્મોનો પોતાના ભક્તોને બોધ આપ્યો. (૨૨) **શ્રીહરિએ** ફાગણ માસમાં ફાલ્ગુની નક્ષત્રમાં **ભગવાન નરનારાયણનો મોટો જન્મોત્સવ** કર્યો. (૨૩) સમગ્ર ઐશ્વર્ય સંપન્ન શ્રીહરિએ પોતાના ભક્તોને આનંદ આપતાં સતાં પહેલાં વૃત્તાલયપુરમાં જેમ શ્રીનરનારાયણના જન્મનો મહોત્સવ કર્યો હતો, તેજ પ્રકારે આ **પંચાળા ગામ**માં પણ કર્યો. (૨૪) નાના દેશથી આવેલાં હરિભક્તો નાના પ્રકારના ચન્દનપુષ્પાદિ અને ઘણા પ્રકારની રૂપિયાના થાળો ભરેલી ભેટોથી પણ ભક્તિપૂર્વક શ્રીહરિને પૂજતા હતા. (૨૫) હેમન્તસિંહ રાજા તો દરરોજ શ્રીહરિની પૂજા કરતા હતા. તે પુષ્પદોલોત્સવના દિવસે તો પોતાનાં કુટુંબીજનોની સાથે શ્રીહરિનું પૂજન કરતા હતા. (૨૬) હેમતસિંહ રાજા ધોળાં, પીળાં,લાલ નાના પ્રકારનાં વસ્ત્રો અને સુવર્ણનાં ઘણાં અલંકારો ભક્તિથી શ્રીહરિને અર્પણ કરતા હતા. (૨૭) સુગન્ધિમાન કેશર -કુંકુમ યુક્ત ચન્દન અને ધોળા અક્ષત, નાના પ્રકારના પુષ્પોના હારો અને તોરાઓ અને ગુલાલ, મહા આરતી અને પુષ્પાંજલિથી હેમન્તસિંહ રાજા શ્રીહરિનું પૂજન કરીને સાષ્ટાંગ પ્રણામ કરતા હતા. (૨૮-૨૯) પછી હેમન્તસિંહ અમૂલ્ય વસ્ત્રાભૂષણો અને ચંદનપુષ્પના હારો, અક્ષત વગેરેથી નાનાભાઈ ઈચ્છારામે સહિત રામપ્રતાપને પૂજતા હતા. (૩૦) હેમન્ત રાજાનાં માતુશ્રી-ગંગાબા તથા બહેન અદિતિ વગેરે સ્ત્રીઓ સત્પુરુષોના પતિ શ્રીહરિને પૂજતી હતી. (૩૧) બીજા જૂનાગઢનાં નિવાસીજનો અને પંચાળાનાં જનો શ્રીહરિને ભક્તિભાવથી અને આદરપૂર્વક જ પૂજન કરતા હતા. (૩૨) ઉદાર બુદ્ધિવાળા હેમન્તસિંહ રાજા સાકર અને ઘી યુક્ત ઘણાં પકવાનો ભક્ષ્ય અને ભોજ્ય પદાર્થોથી શ્રીહરિ સહિત મુનિઓને તૃપ્તિ પમાડતા હતા. (૩૩) તે પુષ્પદોલના મહોત્સવમાં રાત્રિએ થયેલી મુનિ આદિક ભક્તજનોની મહાસભામાં શ્રીહરિ અશ્વિની આદિ નક્ષત્રોમાં ચંદ્રની માફક શોભતા હતા. (૩૪) સભામાં સર્વે ઋષિઓ, ગૃહસ્થો અને સધવા-વિધવા સ્ત્રીઓ પણ એક શ્રીહરિને જ જોતાં સતાં બેઠાં હતાં. (૩૫) હે રાજન્ ! તે સમયે શ્રીનારાયણ મુનિ તે સર્વે ભક્તોના પ્રત્યે કહેતા હતા : હે ભક્તો ! જો કોઈના મનમાં કોઈ સંશય હોય તો પ્રશ્ન કરો; આ પ્રમાણે ભક્તોને કહ્યું. (૩૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**वर्णिवरः प्रणम्य । बद्धाञ्जलिस्तत्पुरतो निषण्णः पप्रच्छ तं सर्वविदं विनीतः ॥३७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पञ्चालग्रामे दोलोत्सवनिरूपणनामा विंशोऽध्यायः ॥२०॥

अखण्डानन्द उवाच – **भगवन्! ब्रह्मविद्यायाः सम्यग्वेत्ता प्रवर्तकः । एक एव त्वमेवासि यत्र मुह्यन्ति सूरयः ॥१॥ पृच्छाम्यतो महर्षीणामेषां प्रष्टुमभीष्टकम् । प्रश्नमेकं हि तं श्रुत्वा ब्रूहि तस्योत्तरं प्रभो! ॥२॥ एकमेवाद्वितीयं वै ब्रह्मेति वदति श्रुतिः । ब्रह्मैव खल्विदं सर्वमित्यपि श्रुतिशासनम् ॥३॥ एतन्मतमुपाश्रित्य जीवेश्वरजगन्त्यपि। मायामयानि मिथ्येति प्राहुः केचन पण्डिताः ॥४॥ नित्यानां नित्य इत्याद्याः श्रुतीरालम्ब्य केचन । जीवेश्वराणां नित्यत्वं विद्वांसोऽत्र वदन्ति हि ॥५॥ एतयोर्मतयोः स्वामिन्! निर्णयं वक्तुमर्हसि । उभे सत्ये किमथवा तयोरेकमृतं मतम् ॥६॥** सुव्रत उवाच –**इति श्रुत्वा वचस्तस्य प्रोवाच स जगद्गुरुः । हर्षयन्मधुरैर्वाक्यैः सदःसंस्थानृषींश्च तम् ॥७॥** श्रीनारायणमुनिरुवाच–**मुनयः ! शृणुत त्वं चाखण्डानन्द! महामते! । द्वैताद्वैते वदन्तीनां श्रुतीनामाशयं ब्रुवे ॥८॥ ब्रह्मशब्दो मुख्यतया कृष्ण एव प्रवर्तते । भगवच्छब्दवद्विद्वन्निति जानीहि निश्चितम् ॥९॥ स्वरूपेण गुणैश्चापि निरवध्यतिशायिता । तस्यैवास्तीति ब्रह्माख्यामन्वर्थां**

---

પછી શ્રીહરિના સન્મુખ પ્રદેશમાં બેઠેલા વર્ણીશ્રેષ્ઠ **અખંડાનંદવર્ણી** તે સમયમાં મુક્તાનંદાદિ સાધુઓની પ્રેરણાથી બંને હાથ જોડી વિનમ્ર થઈને સર્વજ્ઞ શ્રીહરિને પ્રણામ કરી પૂછતા હતા. (૩૭)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પંચાલ ગ્રામે દોલોત્સવનિરૂપણનામા વિંશોऽધ્યાયઃ (૨૦)*

## અધ્યાય : ૨૧

### શ્રીહરિએ જીવ અને બ્રહ્મ એક છે કે બે તે (દ્વૈત અને અદ્વૈત)નું યથાર્થ પ્રતિપાદન કરનાર શ્રુતિઓના અર્થનો નિર્ણય કર્યો છે.

**અખંડાનંદ બોલ્યા,** હે ભગવન્ ! બ્રહ્મવિદ્યા જે આત્મા અને પરમાત્મા સંબંધી વિદ્યા તેને યથાર્થપણે જાણનારા અને પ્રવર્તાવનારા તમો એક જ છો. જે બ્રહ્મવિદ્યામાં મોટા મુનિવરો પણ મોહ પામે છે. (૧) હે પ્રભો ! માટે તમારી આગળ સભામાં બેઠેલા મુક્તાનંદાદિ મહામુનિઓને પૂછવા માટે પ્રિય એક પ્રશ્ન પૂછું છું. તે પ્રશ્ન સાંભળીને ઉત્તર કરો. (૨) 'એકમેવાદ્વિતીયં' બ્રહ્મ એક જ છે. આ પ્રમાણે શ્રુતિ કહે છે. 'સર્વં ખલ્વિદં બ્રહ્મ' આ બધું બ્રહ્મ જ નિશ્ચે છે. આ પ્રમાણે પણ શ્રુતિનું શાસન છે. (૩) આ મત-અર્થાત્ આ બન્ને શ્રુતિઓના પોતાના મનથી કલ્પિત સિદ્ધાંતને આશરીને કેટલાક પંડિતો (શુદ્ધ અદ્વૈત મતને આશરેલા-માયાવાદી) જીવ ઈશ્વર અને જગતને પણ માયાથી કલ્પાયેલા માટે જ મિથ્યાભૂત કહે છે. (૪) 'નિત્યો નિત્યાનાં ચેતનશ્ચેતનાનાં એકો બહુનાં યો વિદધાતિ કામાન્ । ' નિત્યોની મધ્યે નિત્ય, વગેરે શ્રુતિઓનો આધાર લઈને આ લોકમાં કેટલાંક 'વિશિષ્ટાદ્વૈતમત' આ મતનો આશ્રય કરીને જીવ-ઈશ્વરોનું નિત્યપણું કહે છે. (૫) હે સ્વામિન્ ! એ બે મતોનો નિશ્ચય કહેવા માટે તમો યોગ્ય છો. બે મતમાં સત્ય શું છે ? અથવા બે મતોમાં એક મત સત્ય છે ? (૬) હે રાજન્ ! આ પ્રકારે અખંડાનંદ વર્ણીનું વચન સાંભળીને **જગદ્ગુરુ શ્રીહરિ** મનોજ્ઞ પોતાનાં વચનરૂપી અમૃતોથી સભામાં બેઠેલા મુક્તાનંદાદિ મુનિઓને અને અખંડાનંદ વર્ણીને આનંદ પમાડતા સતા બોલ્યા. (૭) હે મુનિઓ ! સાંભળો. હે મહામતિમાન્ અખંડાનંદ ! તમો પણ સાંભળો. બેપણાનો ભાવ એટલે દ્વિતા, દ્વિતા એ જ દ્વૈત = જીવ ઈશ્વરાદિને પૃથક્પણે જોવું તે દ્વૈત; અને અદ્વૈત = ભગવાનની ઉપાસનાથી પ્રાપ્ત થયેલી નિર્વિકલ્પ સમાધિ સ્થિતિથી કેવળ પરમાત્માકાર વૃત્તિથી તેનાથી બીજાને નહીં જોવારૂપ દ્વૈતનું રહિતપણું તે છે. એમ બોલતી શ્રુતિઓનો અભિપ્રાય તમોને કહું છું. (૮) હે વિદ્વાન ! બ્રહ્મ શબ્દ મુખ્યપણે શ્રીકૃષ્ણ પરમાત્મામાં જ પ્રવર્તે છે, આ પ્રમાણે નિશ્ચિત જ જાણો. ભગવાન-શબ્દાદિની માફક પરમાત્મામાં જ પ્રવર્તે છે. (૯) સ્વરૂપ, સ્વભાવ કે વિભૂતિ અને જ્ઞાનાદિ ગુણો વગેરેથી નિરવધિક અતિશયપણું બ્રહ્મશબ્દ વાચ્ય શ્રીકૃષ્ણનું જ છે. માટે શ્રુતિઓ **અર્થસહિત બ્રહ્મ સંજ્ઞા** શ્રીકૃષ્ણની કહે છે. (૧૦) શ્રીકૃષ્ણથી

श्रुतयो विदु: ॥१०॥ ततोऽन्यत्र तु विज्ञेया तद्ध्यानोपासनेन वै । तत्साधर्म्यात्तदात्मत्वाद्ब्रह्मसंज्ञानुरागत: ॥११॥ स्वरूपं च स्वभावश्च विभूतिश्च तथा गुणा: । नित्या: सन्ति हरौ ह्येतेऽन्यत्र त्वागन्तुका मता: ॥१२॥ सत्यं ज्ञानमनन्तं च य: सर्वज्ञश्च सर्ववित् । इत्याद्या: श्रुतयोऽतस्तं तादृशं वर्णयन्ति हि ॥१३॥ ईदृग्ब्रह्माभिध: कृष्णो लये ह्यात्यन्तिकेऽक्षरे। विलाप्य पुम्प्रकृत्यादि शिष्यते एक एव स: ॥१४॥ तमेकं चाद्वितीयं च वदन्ति श्रुतयो द्विज! । स्थितं दिव्ये ब्रह्मपुरे निर्गुणं चेश्वरेश्वरम् ॥१५॥ उपासनेन यस्तस्य प्राप्त आत्यन्तिकं लयम् । निर्विकल्पस्थितौ तं स योगी पश्यति केवलम् ॥१६॥ ब्रह्मैव ब्रह्मविदिति श्रुतिवर्ण्य: स योगिराट्। महामुक्त इति प्रोक्तस्तत्त्वविद्धिर्द्विजोत्तम! ॥१७॥ स सर्वं खल्विदं ब्रह्म तज्जलानिति पश्यति । शान्त आनन्दरूपं च संशुद्धं ब्रह्मवित्तदा ॥१८॥ विना ब्रह्मस्वरूपं स नोर्ध्वं नाधो न चान्तरे । न विश्वं नेश्वरं नैव जीवान् किञ्चिदपीक्षते ॥१९॥ ईदृक्स्थितिं प्रापयितुं तीव्रवैराग्यवेगिनम् । गुरुश्चैकमिति श्रुत्या शिष्यं बोधयते विदम् ॥२०॥ एकं ब्रह्मास्तीति वर्णिन्नेवं श्रुतिभिरुच्यते । नित्यानां नित्य इत्येवं यथोक्तं तच्च वच्मि व: ॥२१॥ सेश्वराणां हि जीवानां लये प्राकृतिके तथा । आत्यन्तिकेऽपि नैवास्ति स्वरूपस्य विनाशनम् ॥२२॥ लये प्राकृतिके देहौ विराट्सूत्रात्मसंज्ञितौ । ईश्वरस्य विलीयेते द्वावेव वर्णिसत्तम! ॥२३॥ अव्याकृतेन देहेन स आस्ते प्रकृतौ तदा । स्थूलसूक्ष्मौ तथा देहौ जीवानामपि नश्यत: ॥२४॥ तिरोभवन्ति प्रकृतौ ते कारणशरीरिण: । प्रधानसंज्ञा वर्णीन्द्र! सा तु प्रकृतिरुच्यते

બીજા અક્ષરપુરુષાદિમાં **બ્રહ્મ સંજ્ઞા** તો શ્રીકૃષ્ણનું ધ્યાન અને ઉપાસનાના બળથી અનવધિકાતિશય સ્નેહથી શ્રીકૃષ્ણના આકારે નિરંતર પોતાના મનનું અનુસંધાન હોવાથી શ્રીકૃષ્ણના સ્વરૂપગત ગુણોનો આવિર્ભાવ હોવાથી જાણવી. (૧૧) અનાદિ સિદ્ધ દિવ્ય સ્વરૂપ, સ્વભાવ અને વિભૂતિ તથા ગુણો શ્રીકૃષ્ણ પરમાત્મામાં નિત્ય છે. બીજે બ્રહ્મરૂપ એકાંતિક ભક્તજનોમાં તો ભગવાનની ઉપાસનાના બળથી ભગવાનની ઈચ્છાથી આવેલા માનેલા છે, પરંતુ નિત્ય નથી. (૧૨) માટે બ્રહ્મ સત્યસ્વરૂપ, જ્ઞાનસ્વરૂપ અને આનંદ સ્વરૂપ, જે સર્વજ્ઞ-સર્વવિત્ વગેરે શ્રુતિઓ તેવી રીતે સ્વરૂપગુણાદિ વિશિષ્ટ શ્રીકૃષ્ણનું વર્ણન કરે છે. (૧૩) આ પ્રકારે બ્રહ્મનામવાળા કૃષ્ણ આત્યંતિક પ્રલયમાં અક્ષરબ્રહ્મ નામના પોતાના ધામના પ્રકાશમાં મહાપુરુષ મહાપ્રકૃત્યાદિને વિલીન કરી એક જ બાકી રહે છે. વસ્તુતાએ એક જ નથી. (૧૪) હે દ્વિજ ! શ્રુતિઓ, પુરુષ પ્રકૃતિના લયની અપેક્ષાએ કેવળ અદ્વિતીય, (પોતાના સમાન તેમજ અધિક અન્ય નહીં હોવાથી એકમાત્ર) દિવ્ય અક્ષરધામમાં રહેલા, સ્વભાવથી હંમેશા માયિક ગુણે રહિત, ઈશ્વરોના ઈશ્વર શ્રીકૃષ્ણને કહે છે. (૧૫) જે યોગી, કહેલા મહિમાવાળા શ્રીકૃષ્ણની ઉપાસનાથી **આત્યંતિક લયને પામેલો યોગી નિર્વિકલ્પ સ્થિતિમાં કેવળ શ્રીકૃષ્ણને જ જુએ છે.** (૧૬) હે દ્વિજોત્તમ ! શ્રીકૃષ્ણના સ્વરૂપને જાણનારો બ્રહ્મ જ થાય છે. આ પ્રકારે શ્રુતિ વર્ણન કરે છે. આ યોગીને તત્ત્વથી જાણનારા પુરુષો **મહાન મુક્ત** કહે છે. (૧૭) તે સમયે તે મહામુક્ત આ દૃશ્યમાન જગત બધું બ્રહ્મ છે અને તે બ્રહ્મ = મહાપુરુષ દ્વારા અનંત જગતની ઉત્પત્તિ, સ્થિતિ અને લય થાય છે. તેવું આનંદરૂપ સર્વ શુદ્ધથી પણ અતિશુદ્ધ એવા શ્રીકૃષ્ણ નામના બ્રહ્મને નિર્વિકલ્પ સમાધિની સ્થિતિમાં એકને જ જુએ છે. (૧૮) તે યોગી બ્રહ્મસ્વરૂપ શ્રીકૃષ્ણના આકાર વિના ઉપર-નીચે મધ્યમાં કાંઈ પણ જોતો નથી. વિશ્વ તથા ઈશ્વર-જીવોને કોઈને પણ જોતો નથી, પરંતુ કેવળ શ્રીકૃષ્ણના સ્વરૂપને જ જુએ છે. (૧૯)

એકાંતિક ભાવથી શ્રીકૃષ્ણના એકાંતિક ધર્મના ઉપદેષ્ટા આચાર્ય તીવ્ર વૈરાગ્યને પામેલા આત્મા-પરમાત્માના યથાર્થ જ્ઞાનવાળા શિષ્યને **નિર્વિકલ્પ સ્થિતિ પમાડવા માટે** એક જ **અદ્વિતીય** (બીજો નહીં) આ શ્રુતિથી બોધ આપે છે. (૨૦) હે વર્ણિન્ ! આવા પ્રકારની શ્રુતિઓથી એક અદ્વિતીય બ્રહ્મ છે. આ પ્રકારે કહેવાય છે. નિત્યોમાં નિત્ય આ પ્રકારે શ્રુતિઓથી જેવું **જીવ-ઈશ્વરાદિનું નિત્યપણું કહેલું છે,** તે તમોને હું કહું છું. (૨૧) પ્રાકૃત લયમાં તથા આત્યંતિક લયમાં પણ વૈરાજ પુરુષાદિ ઈશ્વર સહિત જીવોના સ્વરૂપનો વિનાશ છે જ નહીં. (૨૨) હે વર્ણિસત્તમ ! પ્રાકૃત લયમાં વિરાટ અને સૂત્રાત્મા આ બે જે વૈરાજ પુરુષના દેહો કાળશક્તિથી લય પામે છે. (૨૩) તે સમયે ઈશ્વર સંજ્ઞાવાળા વૈરાજ પુરુષ અવ્યાકૃત સંજ્ઞાવાળા દેહથી પ્રકૃતિમાં લીન થાય છે. તે પ્રકારે જ જીવોના સ્થૂળ અને સૂક્ષ્મ આ બન્ને દેહો પણ કાળશક્તિથી નાશ પામે છે. (૨૪) કારણ શરીરવાળા જે જીવો છે તે પ્રકૃતિમાં લીન થાય છે. ઉનાળામાં બીજો જેમ લીન થાય છે, તેમ હે વર્ણીન્દ્ર ! જીવ અને ઈશ્વરોના લીન અવસ્થાના આધારભૂત પ્રકૃતિ તો **પ્રધાન** સંજ્ઞાવાળી કહેવાય છે. (૨૫)



**પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર**

॥२५॥ तिरोभवति सा मूलप्रकृतौ च सपूरुषा । नतु स्वरूपतो नाशो ह्येतेषां भवति क्वचित् ॥२६॥ आत्यन्तिके च प्रलये प्रकृतिः सापि पूरुषे । तिरोभवति सूर्यस्य प्रकाशे रजनी यथा ॥२७॥ स महान्पुरुषः साकं महत्या मायया तया । शेतेऽक्षरस्य प्रकाशे तदैकः कृष्ण एव हि ॥२८॥ नष्टकारणदेहा ये मुक्ता ध्यानबलेन तु । कृष्णस्य दिव्यदेहैस्ते ब्रह्मण्येवासतेऽक्षरे ॥२९॥ लयद्वयेऽपि नैतेषां स्वरूपेण विनाशनम् । भवतीति श्रुतिः सर्वान्नित्यानाह महामते! ॥३०॥ उत्पत्तिकाले सर्वेऽपि पुंप्रकृत्यादयः पुनः । आविर्भवन्त्यमी विप्र ! यथापूर्वं तदिच्छया ॥३१॥ अप्राकृतशरीरा ये मुक्तास्ते तु निजेच्छया । आविर्भवन्ति ह्यथवा तेनावतरता सह ॥३२॥ नित्यानेताञ्छ्रुतिप्रोक्ताञ्ज्ञानिमुक्ता विदन्ति हि । कृष्णोपास्तिबलेनापि वीक्षन्ते च यथातथम् ॥३३॥ योगिनस्ते तु सम्पन्ना भक्तिज्ञानविरक्तिभिः समाधिं सविकल्पं हि प्राप्ता इत्यवगम्यताम् ॥३४॥ मेरौ स्थिता यथा तस्मादवरान्पर्वतान्नराः । वीक्षन्ते च द्रुमान्सर्वांस्तदाधारं च भूतलम् ॥३५॥ सविकल्पसमाधिस्था ज्ञानिमुक्तास्तथेश्वरम् । मायां जीवांश्च वीक्षन्ते ब्रह्म चेति पृथक् पृथक् ॥३६॥ लोकालोकाचलस्थाश्च यथा वा पुरुषा द्विज! । पश्यन्त्येकं भूतलं नो सर्वानपि नगान् द्रुमान् ॥३७॥ तथैव ते महामुक्ता निर्विकल्पसमाधयः । ब्रह्मैकमेव वीक्षन्ते जीवेशादीन्न तु पृथक् ॥३८॥ कृष्णोपास्तिबलस्याथ तारतम्यवशादमी । त्रिविधा भुवि कथ्यन्ते निर्विकल्पसमाधयः

---

પોતાના પતિ પુરુષે સહિત પ્રધાનપ્રકૃતિ મૂળ માયામાં લીન થાય છે. જીવ-ઈશ્વર, પ્રધાન-પુરુષોનો સ્વરૂપથી નાશ ક્યારેય પણ નથી. (૨૬) આત્યંતિક પ્રલયમાં જેમાં જીવ-ઈશ્વર પ્રધાનપુરુષો લીન થયેલા છે એવી મહામાયા (મૂળમાયા) પણ સૂર્યના પ્રકાશમાં રાત્રિ જેમ તેમ **મહાપુરુષમાં લીન થાય છે.** (૨૭) તે મહાપુરુષ તે મહામાયાની સાથે અક્ષર બ્રહ્માખ્ય શ્રીકૃષ્ણના ધામના પ્રકાશના એક દેશમાં સૂએ છે. **તે સમયે શ્રીકૃષ્ણ પરમાત્મા એક જ રહે છે.** પરંતુ વસ્તુતાએ એક નથી. (૨૮) પ્રત્યક્ષ શ્રીકૃષ્ણના ધ્યાનના બળથી જેમના કારણદેહ નાશ પામ્યા છે, એવા જે **મુક્તો તે બ્રહ્મમય શરીરોથી અક્ષરબ્રહ્મમાં શ્રીકૃષ્ણની સેવામાં રહે છે.** (૨૯)

હે મહામતે ! પ્રાકૃતિક અને આત્યંતિક લયમાં પણ મહા પુરુષ વગેરેનો સ્વરૂપથી વિનાશ થતો નથી, માટે 'નિત્યોમાં નિત્ય' એ શ્રુતિ સર્વે નિત્ય છે એમ કહે છે. (૩૦) હે વિપ્ર ! ફરીથી શ્રીકૃષ્ણ ભગવાનના સંકલ્પથી બ્રહ્માંડોની **ઉત્પત્તિ સમયે** મહાપુરુષ મહાપ્રકૃતિ વગેરે તથા જીવ-ઈશ્વર વગેરે સર્વે પણ પૂર્વે હતા તેમ **આવિર્ભાવ** પામે છે. (૩૧) બ્રહ્મમય શરીરવાળા જે મુક્તો, આત્યંતિક પ્રલયમાં પણ અક્ષરધામમાં **શ્રીકૃષ્ણની સેવામાં રહેલા મુક્ત પુરુષો;** તે તો **મુમુક્ષુ જનોના કલ્યાણ માટે** શ્રીકૃષ્ણના સંકલ્પરૂપ પ્રેરણારૂપ પોતાની ઈચ્છાથી બ્રહ્માંડમાં આવિર્ભાવ પામે છે અથવા પોતાના ભક્તની રક્ષા કરવા માટે અને સ્વધર્મનું સ્થાપન કરવા માટે બ્રહ્માંડમાં આવિર્ભાવ પામતા શ્રીકૃષ્ણની સાથે **આવિર્ભાવ** પામે છે. (૩૨) પ્રત્યક્ષ શ્રીકૃષ્ણની ઉપાસનાના બળથી જ્ઞાની મુક્તો નિત્યોમાં પણ નિત્ય એમ શ્રુતિમાં કહેલા નિત્ય પૂર્વે કહેલા જીવ-ઈશ્વરાદિ સમગ્રને યથાર્થપણે જાણે છે અને જુએ છે. (૩૩) ધર્મ-ભક્તિ-જ્ઞાન અને વૈરાગ્ય યુક્ત તે જ્ઞાની મુક્તો **સવિકલ્પ સમાધિ**ને પામેલા હોય છે, આ પ્રમાણે જાણો. (૩૪)

જેમ મેરુ પર્વતમાં રહેલા મનુષ્યો મેરુથી સમીપના સર્વ પર્વતો અને સર્વ વૃક્ષો તથા તેના આધારભૂત પૃથ્વીના તળને ભિન્ન ભિન્ન જુએ છે અને ઊંચે સૂર્યાદિને પણ ભિન્ન ભિન્ન જુએ છે (૩૫) તેમ **સવિકલ્પ સમાધિ**માં રહેલા **જ્ઞાની મુક્તો** સમગ્ર પ્રાણીઓ, ઈશ્વર અને બન્ને પ્રકારની પ્રકૃતિને અને સમગ્રના આધારભૂત અક્ષરધામ અને પોતાના ઈષ્ટદેવ શ્રીકૃષ્ણઃ આ સર્વેને ભિન્ન ભિન્ન જુએ છે. (૩૬)

હે દ્વિજ ! લોકાલોક પર્વતમાં રહેલા પુરુષો કેવળ ભૂતળને દેખે છે. સર્વે લોકાલોકથી ઓરા પર્વતો અને સર્વે વૃક્ષોને પણ ભિન્ન ભિન્ન જોતા નથી. (૩૭) તે જ પ્રકારે **નિર્વિકલ્પ સ્થિતિવાળા** પૂર્વે કહેલા **મહામુક્તો** એક કેવળ શ્રીકૃષ્ણ નામના બ્રહ્મને જ જુએ છે, પરંતુ વસ્તુતાએ તેનાથી જુદા જુદા રહેલા જીવ-ઈશ્વરો વગેરેને જોતા નથી. (૩૮) નિર્વિકલ્પ સમાધિવાળા, આ મહામુક્તો કૃષ્ણની ઉપાસનાના બળના અલ્પ અને અધિક ભાવથી ત્રણ પ્રકારે પૃથ્વીમાં કહેવાય છે. (૩૯) હે વર્ણિશ્રેષ્ઠ ! આ લોકમાં સુષુપ્તિ અવસ્થામાં બુદ્ધિ-ઈંદ્રિયો અને મનનો લીનભાવ હોવાથી જીવને જે પ્રકારે સુખ

॥३९॥ सुषुप्ताविह जीवस्य बुद्धीन्द्रियमनोलयात् । सुखं चोपशमो यादृग्वर्तते वर्णिसत्तम! ॥४०॥ साक्षात्कृष्णे यस्य पुंसो बुद्धीन्द्रियमनोलयात् । तादृक् सुखं चोपशमो जाग्रति स्यात्स आदिमः ॥४१॥ सुषुप्तौ प्रलयाख्यायां ब्रह्माण्डस्याभिमानिनः । लयात्त्रिलोक्या ईशस्य सुखं यादृक्च शान्तता ॥४२॥ साक्षात्कृष्णे यस्य पुंसो बुद्धीन्द्रियमनोलयात् । तादृक् सुखं चोपशमो जाग्रति स्यात्स मध्यमः ॥४३॥ विराट् तत्कारणैः साकं प्रधानस्य लयाद्यथा । प्रकृतौ प्राकृतलये सुखं पुंसश्च शान्तता ॥४४॥ साक्षात्कृष्णे यस्य पुंसो बुद्धीन्द्रियमनोलयात् । तथा सुखं चोपशमो जाग्रति स्यात्स चान्तिमः ॥४५॥ कृष्णसम्बन्धि सौख्यं यत्सर्वसौख्याधिकं हि तत् । दृष्टान्तमात्रमेतत्तु सुषुप्त्यादि समीरितम् ॥४६॥ इत्थं हि ते महामुक्ता भवन्ति त्रिविधा द्विज! । उत्तरोत्तरतः श्रेष्ठाः कथ्यन्ते स्थितिवेदिभिः ॥४७॥ निर्विकल्पस्थितिबलादुन्मत्ता ब्रह्मदृष्टयः । जीवेशान्कल्पितान्प्राहुरिति जानीहि निश्चितम् ॥४८॥ एकत्वमेवं वर्णीन्द्र! पृथक्त्वं चावगम्यताम् । श्रुतिप्रामाण्यतो विद्धि सत्यमेव मतद्वयम् ॥४९॥ ये तु नैवं स्थितिं प्राप्ता ब्रह्मैक्यं शास्त्रमात्रतः । बुद्ध्वा यथेष्टाचरणं कुर्वते ते पतन्त्यधः ॥५०॥ तादृशाः स्वकृतं पापं स्वशिष्याणां च पातकम् । आर्तनादं प्रकुर्वन्तो बोभुज्यन्ते यमालये ॥५१॥ ब्रह्मशब्दद्वयं यत्र प्रोक्तं स्यात्तत्र तु द्विज! । आद्यं तु भगवद्धाम ज्ञातव्यं बृहदक्षरम् ॥५२॥ द्वितीयं तु स्वयं कृष्णः सर्वकारणकारणम् । अक्षरात्पर इत्युक्तो दिव्याङ्गश्चेति बुध्यताम् ॥५३॥ भेदो हि वास्तवो नूनं जीवेशब्रह्मणां हरेः ।

---

અને ઉપશમભાવ વર્તે છે. (૪૦) સાક્ષાત્ શ્રીકૃષ્ણના સ્વરૂપમાં બુદ્ધિ, ઈન્દ્રિય અને મનનો લય થવાથી જે પુરુષ નિર્વિકલ્પ સમાધિવાળા, મહામુક્ત યોગીપુરુષને તેવું સુખ અને ઉપશમભાવ જાગ્રત અવસ્થામાં થાય તે મહામુક્ત **પ્રથમ** કહેલો છે. (૪૧) રાત્રિ પ્રલય નામની સુષુપ્તિમાં ભૂરાદિ ત્રણ લોકના લયથી બ્રહ્માંડ રૂપ વિરાટ નામના દેહના અભિમાનવાળા વૈરાજ પુરુષ નામના ઈશ્વરને જેવું સુખ અને ઉપશમ ભાવ વર્તે છે; (૪૨) તેમ સાક્ષાત્ કૃષ્ણમાં બુદ્ધિ-ઈન્દ્રિય અને મનના લયથી જે મહામુક્ત યોગીપુરુષને તેવું સુખ અને તેવો ઉપશમ જાગ્રતમાં થાય તે મહામુક્ત **મધ્યમ** કહેલો છે. (૪૩) પ્રાકૃત પ્રલયમાં પ્રકૃતિરૂપ મહામાયામાં વિરાટ અને તેના કારણભૂત મહત્તત્ત્વાદિની સાથે પ્રધાનપ્રકૃતિના લયથી પ્રધાનના અધિષ્ઠાતા પુરુષને જેવું સુખ અને શાંતિ વર્તે છે; (૪૪) તેમ સાક્ષાત્ કૃષ્ણમાં બુદ્ધિ -ઈન્દ્રિય અને મનના લયથી જે મહામુક્ત યોગી પુરુષને તેવું સુખ અને ઉપશમ જાગ્રતમાં થાય તે મહામુક્ત **ઉત્તમ** કહેલો છે. (૪૫)

કૃષ્ણના સંબંધવાળું જે સુખ તે સર્વ સુખના કરતાં (સુષુપ્ત્યાદિ સુખથી અક્ષરબ્રહ્મના સુખથી પણ) અનવધિકાતિશય અસાધારણ આનંદરૂપ થાય છે તે શ્રુતિ વગેરેમાં પ્રસિદ્ધ છે. (૪૬) હે દ્વિજ ! આ પ્રકારે મહામુક્તો **ત્રણ પ્રકારના** છે. નિર્વિકલ્પ સમાધિના પ્રકારોને જાણનારાઓએ એકબીજા પછી શ્રેષ્ઠ કહેલા છે. (૪૭) બ્રહ્મદષ્ટિવાળા મહામુક્તો નિર્વિકલ્પ સ્થિતિના બળથી ઉન્મત્તની સમાનતાને પામ્યા સતા સ્વરૂપથી જીવ-ઈશ્વર-માયા-પુરુષો સત્ય હોવા છતાં પણ કલ્પિત સ્વરૂપથી અવાસ્તવિક (મિથ્યા) કહે છે. એમ જાણો (૪૮) હે વર્ણીન્દ્ર ! આ પ્રમાણે એકત્વ 'એકમેવાઽદ્વિતીયમ્' આ શ્રુતિમાં કહેલા મહામુક્તની દષ્ટિથી એક શ્રીકૃષ્ણને જ જોવારૂપ અદ્વૈતપણું અને 'નિત્યો નિત્યાનામ્' આ શ્રુતિમાં કહ્યા પ્રમાણે જ્ઞાની મુક્તની દંષ્ટિથી જીવ ઈશ્વરાદિ ઘણાને ભિન્ન જોવારૂપી દ્વૈતપણું જાણો, શ્રુતિ પ્રામાણ્યના બળથી દ્વૈત અને અદ્વૈત બન્ને મત સત્ય જ જાણો. (૪૯) જે પુરુષો આ પ્રમાણે નિર્વિકલ્પ સમાધિ પામ્યા નથી; શાસ્ત્ર માત્રથી બ્રહ્મ એક જ પરમાર્થ સત્ય છે, એમ જાણીને **યથેષ્ટ આચરણ કરે છે તે પુરુષો નરકમાં પડે છે.** (૫૦) તેવા પુરુષો પોતે કરેલા પાપને અને પોતાના શિષ્યોના પાપને દુઃખનો ધ્વનિ ('મરી ગયો, રક્ષણ કરો' એમ) કરતા થકા જમપુરીને વિષે વારંવાર અતિશય ભોગવે છે. (૫૧) હે દ્વિજ ! 'બ્રહ્મૈવ સન્ બ્રહ્માપ્યેતિ' ઈત્યાદિ જે શ્રુતિમાં બ્રહ્મ શબ્દ બે કહ્યા હોય, તેમાં આદિ બ્રહ્મ શબ્દથી અક્ષરબ્રહ્મ સંજ્ઞાવાળું ભગવાનનું ધામ જાણવું. અક્ષરબ્રહ્મના સાધર્મ્યને પામીને બ્રહ્મ= શ્રીકૃષ્ણ નામના પરબ્રહ્મને પામે છે. એવો શ્રુતિનો અર્થ જાણવો. (૫૨) બીજો બ્રહ્મ શબ્દ તો સર્વ કારણના 'અક્ષરાત્પરતઃ પરઃ' આ શ્રુતિથી કહેલા પર એવા અક્ષરથી પર સ્વતઃસિદ્ધ દિવ્યાકારવાળા પોતે અક્ષરધામ-વાસી પુરુષોત્તમ શ્રી વાસુદેવ આ પ્રમાણે જાણો. (૫૩) જીવો, ઈશ્વરો જે વૈરાજાદિ અને અક્ષરબ્રહ્મ અને તેમાં રહેલા બ્રહ્મરૂપ અક્ષરમુક્તોનો અને શ્રીકૃષ્ણનો પરમાર્થભેદ સ્વરૂપથી જ પરસ્પર છે. 'નિત્યાનાં નિત્યઃ' વગેરે શ્રુતિઓએ પ્રતિપાદન કરેલો છે જ. (૫૪) હે સન્મતે ! 'ભગવાનની

नित्यानां नित्य इत्यादिश्रुतिभिः प्रतिपादितः ।।५४।। ब्रह्मवित्परमाप्नोतीत्येषा श्रुतिरपि स्फुटम् । प्राह ब्रह्मविदां सेव्यं परंब्रह्मेति सन्मते! ।।५५।। आत्मा शरीरं यस्यास्ति नैवात्मा वेत्ति यं तथा । य आन्तरो यमयति ह्यात्मानममृतः प्रभुः ।।५६।। शरीरमक्षरं यस्य नैव यं वेत्ति चाक्षरम् । आन्तरो यो यमयति ह्यक्षरं सोऽमृतः प्रभुः ।।५७।। इत्याद्यर्थाः श्रुतिगणास्त्वक्षरब्रह्मणोऽपि च । प्राहुः कृष्णशरीरत्वं तद्भिन्नत्वं तथा स्फुटम् ।।५८।। अक्षरस्यापि चेन्नास्ति ब्रह्मणः कृष्णरूपता । कुतस्तरां तदेशस्य जीवस्य तु कुतस्तमाम् ।।५९।। ततो निःसंशयो भूत्वा मुमुक्षुः सर्वथा हरिम् । यो भजेत स मुक्तः स्यादितरः संसृतिं व्रजेत् ।।६०।। श्रीमद्रामानुजाचार्यैरयमर्थः सविस्तरम् । निर्णीतोऽस्ति महाभाष्ये सङ्क्षेपात्स मयोदितः ।।६१।। सुव्रत उवाच - इत्युक्तं श्रुतिसिद्धान्तं हरिणा स नराधिप!। वर्णी च साधवः श्रुत्वा तं नेमुर्नष्टसंशयाः ।।६२।। स्वस्वस्थानं ततो गन्तुं तानाज्ञाप्याखिलान्निजान् । प्रभुः स्वयं निजावासमाजगाम दयानिधिः ।।६३।। इत्थं हरिस्तत्र च वाग्विलासैरानन्दयन्नन्वहमेव भक्तान् । हेमन्तसिंहस्य मनोरथं च सम्पूरयन्भक्तगणैरुवास ।।६४।। इति श्री सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पञ्चालग्रामे द्वैताद्वैतप्रतिपादकश्रुत्यर्थनिर्णयनिरूपणनामैकविंशोऽध्यायः ।।२१।।

सुव्रत उवाच - तस्माद्ग्रामात्पश्चिमायां दिशि किंशुककानने । उटजाः कारिता राज्ञा मुनीनामभवञ्छुभाः ।।१।। एकदा पापमोचन्यामेकादश्यां निशि प्रभुः । जगाम कतिभिश्चित्स्वैः पार्षदैः सह तत्र सः ।।२।। उत्तमेन च सोमेन हेमन्तेन सबन्धुना । अन्वितश्च मुकुन्देन तथा रत्नजिदादिभिः ।।३।। ददर्श तत्र स मुनीन्कुर्वतो व्रतजागरम् । हल्लीषकेण गीतेन

---

ઉપાસનાથી બ્રહ્મભાવને પામેલા...' 'બ્રહ્મવિત્ પરમાપ્નોતિ' આ શ્રુતિ પણ બ્રહ્મવિદોને સેવા કરવા યોગ્ય પરબ્રહ્મ છે. આ પ્રમાણે સ્ફુટ જેમ હોય તેમ કહે છે. (૫૫) જે પરબ્રહ્મ પરમાત્માનું જીવ શરીર છે. જીવ = આત્મા પરમાત્માને જાણતો નથી તથા જે પ્રભુ આત્માને તેના કર્મનું ફળ પમાડતા સતા નિયમન કરે છે, તે પ્રભુ સ્વયં નિત્ય મુક્ત છે. (૫૬) જે પરમાત્માનું અક્ષર શરીર છે, અક્ષર જેને જાણતું નથી (જેના મહિમાના પારને પામતા નથી) જે અંતરમાં રહીને અક્ષરને નિયમન કરે છે, તે પ્રભુ અમૃત છે, અર્થાત્ નિત્ય આનંદઘન મૂર્તિ છે. (૫૭) એ આદિ મુખ્યાર્થને બોધ કરનારી શ્રુતિના સમૂહો અક્ષરબ્રહ્મને પણ કૃષ્ણનું શરીર તથા તેનાથી ભિન્ન સ્પષ્ટ કહે છે. (૫૮) જો અક્ષરબ્રહ્મનું પણ કૃષ્ણની સાથે સમાનપણું નથી તો વૈરાજ પુરુષ વગેરે ઈશ્વરોનું સાદૃશ્ય તો ક્યાંથી હોય અને જીવોની તો કોઈ પણ પ્રકારે કૃષ્ણરૂપતા હોય જ નહિ. (૫૯) માટે જે મુમુક્ષુ સંશયેરહિત થઈને હરિને ભજે તે મુક્ત થાય. બીજો સંશયયુક્ત હોય તે સંસારને પામે. (૬૦) આ મેં કહેલો શ્રુતિનો સિદ્ધાંત શ્રીમદ્રામાનુજાચાર્યે મહાભાષ્યમાં વિસ્તારે સહિત નિર્ણય કરેલો છે, તે અર્થ મેં સંક્ષેપથી કહ્યો છે. (૬૧) **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલો શ્રુતિસિદ્ધાંત સાંભળીને અખંડાનંદ બ્રહ્મચારી અને મુક્તાનંદાદિ સાધુઓ સંશયે રહિત થઈને શ્રીહરિને નમસ્કાર કરતા હતા. (૬૨) પછી દયાનિધિ શ્રીહરિ પોતાના ભક્તો તથા સમગ્ર મુનિઓ અને બીજા સભામાં બેઠેલાં જનોને પોતપોતાના સ્થાનમાં જવા માટે આજ્ઞા આપી શ્રીહરિ પોતાના નિવાસસ્થાનમાં આવ્યા. (૬૩)

શ્રી હરિ **પંચાળા ગામ**માં આ પ્રકારે વાણીની લીલાઓથી દરરોજ આનંદ આપતા અને હેમંતસિહ રાજાના મનોરથને પરિપૂર્ણ કરતા સતા જ ભક્તગણોની સાથે **નિવાસ** કરતા હતા. (૬૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ચતુર્થપ્રકરણે પંચાલગ્રામે દ્વૈતાદ્વૈતપ્રતિપાદકશ્રુત્યર્થ નિર્ણયનિરૂપણ નામૈકવિંશોऽધ્યાયઃ (૨૧)*

## અધ્યાય : ૨૨

### શ્રીહરિએ અત્યંત આશ્ચર્યકારી ધર્માદિએ સહિત પોતાનું દિવ્ય સ્વરૂપ બતાવ્યું તે નિરૂપણ છે.

**સુવ્રત મુનિ બોલ્યા,** હે રાજન્ ! પંચાળા ગામથી પશ્ચિમ દિશામાં પલાશતરુના વનમાં હેમંતસિંહ ભૂપતિએ મુનિમંડળો માટે કરાવેલી સુંદર પર્ણશાળાઓ હતી. (૧) એક સમયે પાપમોચની ફાગણ વદી એકાદશીને દિવસે રાત્રિમાં શ્રીહરિ પોતાના કેટલાક પાર્ષદો સાથે ત્યાં ગયા. (૨) દુર્ગપુરના ઉત્તમ નૃપતિ, બોટાદના અધિપતિ સોમવર્મા તથા ભાઈ

तालीवाद्येन यूथशः ॥४॥ तेऽपि तं वीक्ष्य संहृष्टा नत्वा सत्वरमुत्तमम् । वटान्तिके ददुः पीठं न्यषीदत्तत्र सोऽच्युतः ॥५॥ तदाज्ञया पुनश्चक्रुस्ते च हल्लीषकं ततः । सिंहासनं तदभितो भ्रमन्तस्तन्मुखेक्षणाः ॥६॥ विचित्रपद्यगीतैस्तं हासयन्तः स्मिताननम्। अचिकीर्तन् गुणांस्तस्य निशीथोऽथाभ्यपद्यत ॥७॥ श्रान्तास्तदानीं मुनयो निषेदुस्ते हरेः पुरः । प्रसन्नं तन्मुखं प्रीत्या वीक्षमाणाः स्थिरासनाः ॥८॥ अथ तत्रेच्छया तस्य ददृशुः सहसैव ते । सहोत्थकोटिसूर्येन्दुतुल्यं श्वेतं महन्महः ॥९॥ श्वैत्यं तेन च ते सर्वे प्रापुर्भूः खं दिशोऽष्ट च । तत्रापश्यन्महःपुञ्जे स्वेशं ते दिव्यदर्शनम् ॥१०॥ दिव्यसिंहासनारूढं नवीनजलदासितम् । सुधांशुकोटिसंकाशं दिव्याभरणभूषितम् ॥११॥ दिव्यपीताम्बरधरं दिव्यगन्धानुलेपनम्। दिव्यैः सुरभिभिः पौष्पैः शोभितं हारशेखरैः ॥१२॥ सुभ्रूलतं सुनासं च पद्मपत्रायतेक्षणम् । स्निग्धबिम्बफलाभोष्ठं सस्मिताननपङ्कजम् ॥१३॥ अनर्घ्यमौक्तिकसमदन्तावलिविराजितम् । धृत्वा कराभ्यां मुरलीं वादयन्तं मनोहरम् ॥१४॥ दधतं कौस्तुभं कण्ठे वनमालां च शोभनाम् । विशालहृदयद्योतच्छ्रीवत्सं सुकिरीटिनम् ॥१५॥ कर्णयुग्मोल्लसद्दिव्यमकराकृतिकुण्डलम् । अकलङ्कितचन्द्राभनखपङ्क्तिविराजितम् ॥१६॥ श्रीदामविष्वक्सेनाद्यैः पार्षदप्रवरैर्निजैः । सेवितं राजचिह्नैश्च छत्रव्यजनचामरैः ॥१७॥ तस्यापश्यन् वामभागे लक्ष्मीं पद्मकरां च ते । कौसुम्भवाससं गौरीं सर्वाभरणभूषिताम् ॥१८॥

---

સહિત હેમંતસિંહ નૃપ અને મુકુંદાનંદવર્ણી તથા રતનજી વગેરે પાર્ષદોએ સહિત શ્રીહરિ પર્ણશાળાઓના આંગણ પ્રદેશમાં ઘણા માણસોની સાથે મંડળાકારે ફરતા ફરતા શ્રીહરિનાં ગુણકીર્તનોના ગાનથી એકાદશીનું જાગરણ કરતા ભેગા થયેલા મુનિઓને જોતા હતા. (૩-૪) તે મુનિઓ પણ પોતાના આંગણામાં આવેલા શ્રીહરિને જોઈને સાષ્ટાંગ નમસ્કાર કરીને પ્રસન્ન થઈને તત્કાળ પર્ણશાળાની નજીક વડના સમીપમાં શ્રેષ્ઠ સિંહાસન આપતા હતા. અખંડિત ઐશ્વર્યવાળા શ્રીહરિ મુનિઓએ આપેલા સિંહાસનમાં બેઠા. (૫) પછી મુનિઓ શ્રીહરિની આજ્ઞાથી, શ્રીહરિ બેઠેલા હતા તે સિંહાસનની ચોતરફ પરિભ્રમણ કરતા સતા શ્રીહરિના મુખારવિંદને જોતા સતા ફરીથી મંડળાકારે કીર્તનો ગાવા લાગ્યા. (૬) મન્દ હાસ્યયુક્ત મુખારવિંદવાળા શ્રીહરિને નાના પ્રકારનાં પદ્યો વડે હસાવતા મુનિઓ શ્રીહરિના ગુણોના કીર્તનોનું ગાન કરતા હતા. પછી રાત્રિના મધ્યભાગનો સમય પ્રાપ્ત થયો. (૭) તે સમયે થાકેલા મુનિઓ પ્રસન્નતાયુક્ત શ્રીહરિના મુખકમળને પ્રેમથી જોતા સતા સ્થિર આસનવાળા, શ્રીહરિની આગળ બેઠા. (૮)

પછી મુનિઓ ત્યાં શ્રીહરિની ઈચ્છાથી એકી સાથે કરોડો સૂર્ય અને ચંદ્ર સમાન ઉજ્જ્વળ મહાતેજ એકદમ જ જોતા હતા. (૯) સર્વે મુનિઓ, પૃથ્વી-આકાશ- આઠ દિશાઓ જે તેજથી શ્વેતપણાને પામી તે તેજના સમુદાયમાં અલૌકિક આકૃતિવાળા-પોતાના એક પતિ **શ્રી નારાયણમુનિને જોતા હતા.** (૧૦) દિવ્ય સિંહાસનમાં બેઠેલા, નવીન મેઘના સમાન શ્યામ સુંદર, કરોડ ચંદ્રમાના સમાન આનંદકારી, સુંદર આભૂષણોથી અલંકૃત, અલૌકિક પીતાંબરને ધારણ કરતા, અલૌકિક સુગન્ધિમાન ચંદનથી ચર્ચિત અંગવાળા, સુગંધિમાન નાના પ્રકારના પુષ્પના હારો-તોરાઓથી શોભાયમાન, સુંદર ભ્રકુટીરૂપી લતાઓ જેમને છે એવા, અતિ સુંદર દીપની શિખાની માફક અથવા પોપટની ચાંચની માફક નાસિકાવાળા, કમળના બન્ને પત્રો સમાન લાંબા કર્ણ પર્યન્ત નેત્રોવાળા, પાકેલા ઘીલોડાંની કાન્તિસમાન કાન્તિવાળા ઓષ્ઠો જેમના છે એવા, મન્દહાસ્ય યુક્ત મુખારવિંદવાળા, અમૂલ્ય મોતીઓની સમાન જે દંતપક્તિથી વિરાજમાન, બન્ને હાથોથી મનોહર વાંસળી ધારણ કરી મનોહર જેમ હોય તેમ વગાડતા, કંઠમાં કૌસ્તુભમણિ અને શોભાયમાન વૈજયંતીમાળાને ધારણ કરતા, વિશાળ હૃદયમાં પ્રકાશમાન શ્રી વત્સના ચિહ્નવાળા, શોભાયમાન રત્નજડિત મુગટને મસ્તકમાં ધારણ કરતા, બન્ને કર્ણોમાં વિલસિત દિવ્ય મીનના આકાર સમાન કુંડળોવાળા, મૃગના ચિહ્નથી રહિત ચંદ્રમાની સમાન કાન્તિ જેની છે એવી નખમણિની પંક્તિથી શોભાયમાન, શ્રીદામા અને વિષ્વક્સેન વગેરે જેમને છે એવા નન્દાદિ પોતાના પાર્ષદ પ્રવરોએ રાજચિહ્નો-છત્ર, ચામર, વિંજણાથી સેવન કરાયેલા **શ્રીહરિને** જોયા. (૧૧ થી ૧૭) મુનિઓ શ્રીનારાયણ મુનિના ડાબા પડખામાં કરકમળમાં ધારણ કર્યું છે પદ્મ જેમણે એવા **લક્ષ્મી**ને જોતા હતા. કૌસુંભી રંગથી રંગેલા વસ્ત્રોને ધારણ કરનારા, ગૌર અંગવાળા, સર્વ આભૂષણોથી સમલંકૃતા, પારિજાતનાં પુષ્પો સહિત કેશસમૂહમાં અતિસુંદર સેંથાનું ભૂષણ જેમને છે એવા, શરદઋતુના પૂર્ણ ચન્દ્રમાના સમાન મુખકમળવાળા, સ્થૂળ ઉન્નત સ્તનોવાળા; સુંદર નાસિકાવાળા,

मन्दारपुष्पकबरीं दिव्यसीमन्तभूषणाम् । शरत्पूर्णेन्दुवदनां पीनोन्नतपयोधराम् ॥१९॥ सुनासां सुदतीं सुभ्रूलतां चारुविलोचनाम् । पादोल्लसद्धंसकयुग्रत्ननूपुरशिञ्जिताम् ॥२०॥ विशालभालविलसद्दिव्यकाश्मीरपत्रिकाम् । सुकपोलां निष्ककण्ठीं स्वेशवक्त्रैकवीक्षणाम् ॥२१॥ रत्नदण्डेन लघुना चामरेणातिभावतः । वीजयन्तीं निजपतिं तादृशीं राधिकां तथा ॥२२॥ दक्षिणेऽथ हरेर्धर्मं ददृशुस्तेऽतिभासुरम् । श्वेताङ्गं श्वेतवसनं दिव्यालङ्कारशोभितम् ॥२३॥ धर्मस्य वामभागेऽथ भक्तिं मूर्तिमतीं च ते । ददृशुः स्वर्णगौराङ्गीं दिव्यवस्त्रविभूषणाम् ॥२४॥ अन्याश्च दिव्यवपुषो दिव्यालङ्कारवाससः । श्रद्धाद्या योषितस्तस्य दिव्याङ्गांस्तत्सुतांस्तथा ॥२५॥ ततः प्रणम्य तान् सर्वान् मुनयस्ते निजेश्वरम् । प्रत्यूचुर्हृष्टमनसः पुलकाञ्चितविग्रहाः ॥२६॥ नमो नमोऽस्तु कृष्णाय वासुदेवाय ते प्रभो! । नारायणाय मुनये स्वामिने धर्मसूनवे ॥२७॥ भगवन्! दृष्टपूर्वोऽसि त्वमतस्त्वां तु विद्महे । योऽस्मत्स्वामी स एवासि कृष्णो राधारमायुतः ॥२८॥ ये त्वेते तव पार्श्वस्था देवा देव्यश्च सन्ति तान् । न जानीमो वयं स्वामिन्! मनोनयननन्दनान् ॥२९॥ श्रुत्वेति तेषां वचनं प्रोवाच भगवान् स तान् । धर्मदेवो ह्ययं साक्षाद्भक्तिरेषाऽस्य च प्रिया ॥३०॥ एताश्च धर्मपत्न्योऽन्याः श्रद्धामैत्रीदयादयः । शुभप्रसादप्रमुखा आसां पुत्रा इमेऽनघाः ! ॥३१॥ दिव्यदेहा इमे नित्यं वर्तन्ते हि मदन्तिके । इदृङ्मद्दर्शनमिव दुर्लभं ह्येतदीक्षणम् ॥३२॥ एकान्तिकास्तु ये भक्तास्ते क्वचित्तु मदिच्छया । पश्यन्त्येतान् हि मुनयो न तु सर्वे निजेच्छया ॥३३॥ युष्माभिरेकादशिकाव्रतं जागरणान्वितम् । क्रियतेऽथ च पाल्यन्ते धर्मा एकान्तिनामपि ॥३४॥ अतोऽहमेभिः सह वै प्रसन्नोऽस्मीति दर्शनम् । दत्तमीदृग्विधमथो

દાડમના બીજ સમાન દાંતની પંકિતવાળા, શોભાયમાન ભ્રકુટિરૂપી વેલીવાળા, સુંદર વિશાળ નેત્રોવાળા, બન્ને ચરણમાં શોભાયમાન કડાથી યુક્ત રત્નજડિત ઝાંઝરના શબ્દો જેમને છે એવા, વિશાળ ભાલમાં શોભાયમાન દિવ્ય કુંકુમથી શૃંગાર કરેલો છે જેમણે એવા, સુંદર કંઠમાં રહેલી સુવર્ણની કંઠી જેમને છે એવા, પોતાના પતિ શ્રીહરિના મુખકમળમાં એક નેત્રની વૃત્તિ જેમને છે, એવાં લક્ષ્મીજીને જોયા તથા રત્નના દંડ યુક્ત નાના ચામરથી અતિશય પ્રીતિથી પોતાના પતિ શ્રીહરિને વિંજણો નાખતા અને લક્ષ્મી સમાન વિશેષણોથી યુક્ત **રાધિકા**ને લક્ષ્મીજીની માફક શ્રીહરિના ડાબા ભાગમાં મુનિઓ જોતા હતા. (૧૮ થી ૨૨) પછી મુનિઓ આવા નારાયણમુનિના જમણા ભાગમાં અતિ પ્રકાશયુક્ત શ્વેત અંગવાળા, ધારણ કર્યાં છે શ્વેત વસ્ત્રો જેમણે એવાં, દિવ્ય અલંકારોથી શોભાયમાન **ધર્મ**ને જોતા હતા. (૨૩) પછી મુનિઓ ધર્મના ડાબા ભાગમાં દિવ્ય આકૃતિવાળા, સુવર્ણની માફક ગૌર અંગવાળા, દિવ્ય આભૂષણોથી સમલંકૃત **ભક્તિદેવી**ને જોતા હતા. (૨૪) તથા દિવ્ય શરીરવાળાં, દિવ્ય અલંકારો અને વસ્ત્રોવાળાં ભક્તિથી બીજી **શ્રદ્ધા વગેરે** ધર્મની સ્ત્રીઓ તથા દિવ્ય દેહવાળા તેમના **શુભાદિ** પુત્રોને મુનિઓ જોતા હતા. (૨૫) પછી મુનિઓ તે શ્રીહરિ સહિત ધર્મ વગેરે સર્વને પ્રણામ કરી હર્ષિત મનવાળા, રોમાંચિત શરીરવાળા સતા પોતાના સ્વામી શ્રીહરિને કહેતા હતા : (૨૬) હે પ્રભો ! કૃષ્ણ એવા તમોને નમસ્કાર થાઓ. વાસુદેવ એવા તમોને નમસ્કાર થાઓ. નારાયણ મુને ! તમોને નમસ્કાર થાઓ, ધર્મપુત્ર તમોને નમસ્કાર થાઓ. (૨૭) હે ભગવન્ ! તમોને પૂર્વે જોયેલા છે, માટે તમોને તો જાણીએ છીએ. જે તમો અમારા સ્વામી ઉપાસ્ય ઈષ્ટદેવ શ્રીહરિ તે જ રાધા-રમાયુક્ત કૃષ્ણ છો. (૨૮) હે સ્વામિન્ ! તમારા પડખામાં જે આ દેવો અને દેવીઓ મનને આનંદ આપનારા છે, તેને અમો જાણતા નથી. (૨૯)

હે રાજન્ ! આવું મુનિઓનું વચન સાંભળીને સમગ્ર ઐશ્વર્યસંપન્ન **દિવ્યાકૃતિ શ્રીહરિએ મુનિઓને કહ્યું,** હે મુનિઓ ! આ પ્રત્યક્ષ અમારા પિતા સ્વયં ધર્મદેવ છે. આ ધર્મનાં પત્ની સાક્ષાત્ અમારાં માતા ભક્તિ છે. (૩૦) હે નિર્દોષ મુનિઓ ! આ શ્રદ્ધા, મૈત્રી, દયા વગેરે બીજા, ધર્મની પત્નીઓ છે. આ શુભ પ્રસાદ આદિ શ્રદ્ધાદિના પુત્રો છે. (૩૧) આ ધર્માદિ દિવ્ય દેહવાળા અમારા સમીપમાં હંમેશાં વર્તે છે, આ પ્રકારનું અમારું દર્શન જેમ-તેમ **એમનું દર્શન પણ દુર્લભ છે જ.** (૩૨) હે મુનિઓ ! જે એકાંતિક ભક્તો છે તે તો ક્યારેક મારી ઈચ્છાથી અને પોતાની ઈચ્છાથી ધર્માદિને જુએ છે. એકાંતિક ભાવથી રહિત સમગ્ર ભક્તો પણ પોતાની ઈચ્છાથી ધર્માદિને જોતા નથી જ, મારી ઈચ્છાથી જુએ છે. (૩૩) તમોએ જાગરણે સહિત એકાદશીનું વ્રત કર્યું છે અને એકાંતિક ભક્તોના ધર્મો પણ તમો પાલન કરો છો, (૩૪) **માટે હું ધર્માદિએ સહિત પ્રસન્ન છું માટે આવા પ્રકારનાં દર્શન આપ્યાં.** આવા દર્શન પછી મારાથી અને ધર્માદિથી **તમો વર માગો.** (૩૫) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ વર માટે પ્રેરણા કરેલા મુનિઓ શ્રીહરિને પ્રણામ કરી પોતાને ઈચ્છિત વરો માટે **પ્રાર્થના**

मदेभ्यो व्रियतां वरः ॥३५॥ इत्थं स्वामिना तेन वरार्थं प्रेरितास्तु ते । प्रणम्य तं वरान् वव्रुरात्माभीष्टान् महर्षयः ॥३६॥ यदि प्रसन्नो भगवंस्तर्हि ते मानुषाकृतेः। नानाविधचरित्रेषु मा मोहोऽस्तु कदापि नः ॥३७॥ साम्प्रतं यादृशो भावस्त्वय्यस्त्यस्माकमीश्वर! । तादृगेवास्तु सततं नराकृतिधरे त्वयि ॥३८॥ लक्ष्म्या इव च नो भक्तिस्त्वयि स्यादिति देहि नः । इत्यर्थितः स तैर्भक्तैस्तथास्त्विति वरान्ददौ ॥३९॥ धर्मादींस्ते ततः प्रोचुर्मुनयो विनयानताः। यदि प्रसन्ना यूयं स्थ वसतास्मासु तत्सदा ॥४०॥ कामात्क्रोधाच्च लोभादेः सर्गादस्मानधर्मजात् । यूयं सदा रक्षतेति दत्त नो विबुधोत्तमाः! ॥४१॥ सुव्रत उवाच – इति तैः प्रार्थितास्तेऽपि प्रीतास्तेभ्यस्तथास्त्विति । वरान् ददुस्ततः स्वामी साकं तैरास पूर्ववत् ॥४२॥ ततोऽतिविस्मिताः सर्वे तं प्रणेमुर्नराकृतिम् । सुखयित्वा प्रभुस्तांश्च स्वावासमगमन्नृप! ॥४३॥ एकादशीजागरणं कुर्वंस्तत्र स ईश्वरः । वृतस्तैः पार्षदाग्र्यैश्च चतुष्पद्यामुपाविशत् ॥४४॥ हेमन्तोत्तमसोमाद्याः साश्चर्यास्तस्य च प्रभोः । दिव्यरूपेक्षणात् नत्वा तमूचुः सस्मिताननम्॥४५॥ कोट्यर्केन्दुप्रकाशस्य राधालक्ष्मीयुतस्य ते । ईक्षणं भक्तिधर्मादेश्चात्यन्तं दुर्लभं नृणाम् ॥४६॥ अहो तदपि नो जातं धन्याः स्मो भाग्यशालिनः । इत्युक्त्वा गद्गदगिरः प्रेम्णाऽऽसन् साश्रवश्च ते ॥४७॥ तदा तानाह भगवान्प्रसन्नः पार्षदान्निजान् । सर्वे शृणुत यूयं मे भो भक्तप्रवरा! वचः ॥४८॥ अनन्यभक्तिर्येषां स्याद्वासुदेवे नराकृतौ । ईदृशं दर्शनं तेषां दुर्लभं नैव निश्चितम्॥४९॥ भारते भगवद्गीतास्वेतदेव निरूपितम् । विश्वरूपं दर्शयित्वा श्रीकृष्णेनार्जुनं प्रति ॥५०॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः

કરતા હતા. (૩૬) હે ભગવન્ ! જો આપ પ્રસન્ન થયા હો તો મનુષ્યભાવને પામેલા તમારાં નાના પ્રકારનાં ચરિત્રોમાં અમોને ક્યારેય પણ મોહ ના થાઓ. (૩૭) હે પરમેશ્વર ! હાલમાં અમારે તમારા ઉપર જેવો ભાવ (દિવ્ય બુદ્ધિ) છે નરાકૃતિ ધારણ કરનારા તમારે વિષે તેવો ભાવ નિરંતર રહો. (૩૮) અમારે તમારે વિષે એકાંતિકી ભક્તિ લક્ષ્મીની માફક થાઓ. આ વરો અમોને આપો. હે રાજન્ ! આવી રીતે એકાંતિક ભાવથી ભજનારા મુનિઓએ પ્રાર્થના કરેલા વરોને યાચના કરાયેલા શ્રીહરિએ 'તમો કહો છો તે પ્રમાણે થાઓ.' આ પ્રમાણે વરો આપ્યા. (૩૯) પછી મુનિઓ વિનયનમ્ર થઈને ધર્માદિને કહેતા હતા : હે ધર્માદિ ! તમો જો પ્રસન્ન થયા હો તો અમારામાં નિરંતર નિવાસ કરો. (૪૦) હે ઉત્તમ દેવો ! કામ-ક્રોધ-લોભ-મોહ વગેરે મુખ્ય જેમાં છે એવા **અધર્મસર્ગથી** અમારું સદા તમો **રક્ષણ** કરો. આ પ્રકારના વરો અમોને આપો. (૪૧) હે રાજન્ ! આ પ્રકારે મુનિઓએ પ્રાર્થના કરાયેલા ધર્માદિ પણ પ્રસન્ન થઈને **'તથાऽસ્તુ'** તમો કહો છો તે પ્રમાણે થાઓ, આ પ્રમાણે મુનિઓને વરો આપતા હતા. પછી શ્રીહરિ ધર્માદિની સાથે પૂર્વની માફક થયા. (૪૨) હે રાજન્ ! પછી અતિ વિસ્મય પામેલા સર્વે મુનિઓ નરાકૃતિ શ્રીહરિને પ્રણામ કરતા હતા. પ્રભુ તે મુનિઓને સુખી કરી પોતાના નિવાસસ્થાનમાં ગયા. (૪૩)

ત્યાં એકાદશીનું જાગરણ કરતા શ્રીહરિ પોતાના ઉત્તમ પાર્ષદો એવા જે સાથે આવેલા ઉત્તમ, હેમન્તસિંહ વગેરેથી વીંટાયેલા સતા ઊંચી પાટયુક્ત સિંહાસનમાં બેઠા. (૪૪) **હેમન્તસિંહ** અને દુર્ગપુરના અધિપતિ ઉત્તમરાજા તથા સોમ, રતનજી આદિ પાર્ષદો શ્રીહરિનાં દિવ્યરૂપનાં દર્શનથી આશ્ચર્ય પામ્યા સતા હાસ્યયુક્ત મુખકમળવાળા શ્રીહરિને નમસ્કાર કરી બોલ્યા. (૪૫) હે સ્વામિન્ ! કરોડ સૂર્ય અને ચંદ્રના સમાન પ્રકાશયુક્ત રાધા અને લક્ષ્મીએ સહિત, દિવ્ય ભાવયુક્ત તમારાં દર્શન અને ભક્તિ અને ધર્માદિનાં દર્શન મનુષ્યોને અતિ દુર્લભ છે. (૪૬) હે ભગવન્ ! સર્વને દુર્લભ એવા તમારાં દર્શન અમોને થયાં. અહો આશ્ચર્ય છે ! માટે અમો કૃતાર્થ અને ભાગ્યશાળી થયા છીએ. હે રાજન્ ! આ પ્રકારે શ્રીહરિને કહીને પાર્ષદો પ્રેમથી ગદ્‌ગદ વાણીવાળા અને આનંદનાં અશ્રુઓ નેત્રોમાં જેમને છે એવા થયા. (૪૭)

તે સમયે **શ્રીહરિએ** પ્રસન્ન થઈને પોતાના પાર્ષદોને કહ્યું : હે શ્રેષ્ઠ ભક્તો ! તમો સર્વે મારું વચન સાંભળો. (૪૮) નરાકૃતિ ભગવાનમાં જે જનોની અનન્ય ભક્તિ હોય તેમને આવા દર્શન દુષ્પ્રાપ્ય નથી જ. (૪૯) શ્રીકૃષ્ણે વિશ્વરૂપ બતાવીને ભારતમાં રહેલી **ભગવદ્ ગીતામાં** અર્જુનના પ્રત્યે આ પ્રમાણે જ- **ભક્તિથી જ દિવ્ય રૂપનું દર્શન થાય એમ નિરૂપણ કરેલું છે.** (૫૦) હે અર્જુન ! મારું જે સમગ્ર ચરાચરના આશ્રયભૂત વિશ્વરૂપ જોનારા છો. તે રૂપ કોઈનાથી પણ જોઈ શકાય તેવું નથી. ઈન્દ્રાદિ દેવો પણ હંમેશાં જોવાની ઈચ્છા રાખનારા છે. પણ તે રૂપ જોઈ શક્યા નથી. (૫૧) વિશ્વરૂપવાળા મને તમોએ જોયા છે. તેવીરીતે હું વેદોથી જોવા માટે શક્ય નથી. ભક્તિ રહિત તપ-દાન અને યજ્ઞથી પણ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥५१॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५२॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन! । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप! ॥५३॥ तथा सनत्सुजातीयेऽप्यन्त्येऽध्याये पुनः पुनः । भक्तियोगवतामेव दर्शनं स्यादितीरितम् ॥५४॥ भयाच्च कालयमयोर्बन्धनात्कर्ममाययोः । भक्त्या च मुच्यते जीवः सतां निश्छद्मसेवया ॥५५॥ वर्णाश्रमेतरेषां च धर्मो यस्त्यागिनामपि। स्वनुष्ठितस्य तस्यैषा भक्तिरेवाक्षयं फलम् ॥५६॥ यज्ञदानव्रतजपस्वाध्यायतपसामपि । तीर्थदेवोपासनानां पूर्तानां साङ्ख्ययोगयोः ॥५७॥ फलं च नियमादीनां भक्तिरेवाक्षयं मतम् । अन्यथा तु क्षयिष्ण्वेव ज्ञेयं तत्तत्क्रियाफलम् ॥५८॥ सेतिहासपुराणानामस्ति तात्पर्यमत्र वै । श्रीमद्भागवतस्यापि तेषां सारस्य सर्वथा ॥५९॥ सास्त्येव भवतां तस्माद्धर्मादिसहितस्य मे । सञ्जातं दर्शनं दिव्यमिति जानीत पार्षदाः ! ॥६०॥ सुव्रत उवाच-इत्युक्तास्ते भगवता तं प्रणम्य मुदान्विताः । आत्मानं मेनिरे धन्यं तत्पदैकदृढाश्रयाः ॥६१॥ द्वादश्यां नैत्यकं कृत्वा भोजयित्वा द्विजान्बहून् । चकार पारणां स्वामी सह स्वैः पार्षदादिभिः ॥६२॥ अथोत्तमेन जयया साकं ललितया भृशम् । प्रार्थितो भगवानैच्छत्प्रयातुं दुर्गपत्तनम् ॥६३॥ ज्ञात्वा हरेर्जिगमिषां नृपते! तदानीं हेमन्तसिंहनृपतिस्तमुपेत्य नत्वा । प्रेमाश्रुनेत्रयुगलः पुलकाङ्कितागस्तुष्टाव बद्धकरसम्पुट ईश्वरं तम् ॥६४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे पञ्चालग्रामे धर्मादिसहितनिजदिव्यस्वरूपदर्शनादिनिरूपणनामा द्वाविंशोऽध्यायः ॥२२॥

જોવા માટે શક્ય નથી. (૫૨) હે અર્જુન ! હે પરંતપ ! આ પ્રકારે તમોએ જોયેલો તેવો હું અનન્ય-એકાંતિક ભક્તિથી તો તત્ત્વથી સાક્ષાત્કાર કરવા માટે અને તત્ત્વથી જાણવા માટે અને પ્રવેશ કરવા માટે શક્ય છું. (૫૩) હે પાર્ષદો ! તે પ્રકારે **સનત્સુજાતીયે** મહાભારતના ઉદ્યોગ પર્વમાં છેલ્લા અધ્યાયમાં **ભક્તિ-યોગવાળા**ને દર્શન થાય છે એમ વારંવાર કહ્યું છે. (૫૪) ભગવાનના એકાંતિક સાધુઓની નિષ્કપટ સેવાથી થયેલી એકાંતિક ભક્તિથી જીવ કાળમાયાના બંધનથી મુક્ત થાય છે. (૫૫) બ્રાહ્મણાદિ વર્ણો અને બ્રહ્મચર્યાદિ આશ્રમો અને બીજા અનુલોમ-પ્રતિલોમાદિના ધર્મ અને ત્યાગી સાધુઓનો જે ધર્મ યથાવિધિ આચરણ કરેલો હોય તેને આ **ભક્તિ જ અક્ષય ફળ આપનારી** થાય છે. (૫૬) યજ્ઞ-દાન-વ્રત-જપ-સ્વાધ્યાય અને તપ તથા તીર્થો અને દેવોની ઉપાસનાઓનું તેમજ વાવ્ય -કૂવા-બગીચા વગેરે પૂર્તકર્મોનું અને પ્રકૃતિ પુરુષના વિવેકરૂપ સાંખ્ય અને અષ્ટાંગયોગનું તથા યમનિયમો જે સ્નાનાદિ - અહિંસાદિઓનું પણ અક્ષય ભક્તિ જ ફળને આપનારી થાય છે. ભક્તિ રહિત હોય તો ધર્માદિ ક્રિયાઓનું ફળ નાશવંત થાય છે. (૫૭-૫૮) મહાભારતે સહિત બ્રાહ્માદિ પુરાણોનું તાત્પર્ય શ્રીકૃષ્ણની ભક્તિમાં જ છે. **ઇતિહાસપુરાણોનો સાર શ્રીમદ્‌ભાગવતનું પણ તાત્પર્ય આમાં જ છે.** (૫૯) હે પાર્ષદો ! આ પ્રકારે માહાત્મ્યે યુક્ત એકાંતિક ભક્તિ તમારે છે જ, માટે ધર્માદિ સહિત મારું દિવ્ય દર્શન થયું. આ પ્રમાણે તમો જાણો. (૬૦) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા શ્રીહરિના ચરણકમળના દ્રઢ આશ્રયવાળા પાર્ષદો હર્ષયુક્ત થઈને શ્રીહરિને પ્રણામ કરીને પોતાને ધન્ય માનતા હતા. (૬૧) શ્રીહરિએ **ફાગણ સુદી બારસ**ને દિવસે સ્નાનાદિ નિત્યકર્મ કરી ઘણા બ્રાહ્મણોને જમાડીને પોતાના પાર્ષદોની સાથે પારણાં કર્યાં. (૬૨) પછી જયા અને લલિતાની સાથે ઉત્તમ રાજાએ પોતાના પુરમાં લઈ જવા માટે અત્યંત પ્રાર્થના કરાયેલા શ્રીહરિ દુર્ગપત્તન જવા માટે ઈચ્છતા હતા. (૬૩)

હે નૃપત્તે ! તે સમયે હેમંતસિંહ રાજા શ્રીહરિની જવાની ઈચ્છા જાણી શ્રીહરિને મળીને નમસ્કાર કરી અત્યંત સ્નેહથી બંને નેત્રોમાં આંસુઓવાળા, રોમાંચિત શરીરવાળા, બન્ને હાથ જોડીને શ્રીહરિની સ્તુતિ કરવા લાગ્યા. (૬૪)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે પંચાલગ્રામે ધર્માદિ સહિત નિજદિવ્યદર્શનાદિ નિરૂપણનામા દ્વાવિંશોઽધ્યાય: (૨૨)*

हेमन्तसिंह उवाच – **देवाधिदेवाय दयालयाय तमःपरायाखिलकारणाय । भक्तप्रियायाद्भुतलक्षणाय नारायणायेश! नमोऽस्तु तुभ्यम् ॥१॥ प्रसन्नवक्त्राय सिताम्बराय सत्पुष्पहाराय मनोहराय । लम्बत्सुपुष्पोत्तमशेखराय नारा० ॥२॥ ब्रह्माख्यसद्धामनिकेतनाय मुक्तैः स्वभक्तैः परिषेविताय । सुश्वेततेजोनिधिमध्यगाय नारा० ॥३॥ शान्ताय दान्ताय तपःप्रियाय शुद्धाय सिद्धाय गुणातिगाय । एकान्तधर्मप्रतिपादकाय नारा० ॥४॥ निष्कामनामव्रतपालकाय निष्कामनामव्रतचारकाय। निष्कामनामव्रतलम्भनाय नारा० ॥५॥ अशेषदुःखौघविनाशकाय प्रकाशकायातिसुखप्रदाय । निःशेषपापप्रशमाभिधाय नारा० ॥६॥ नरोत्तमायाखिलधारणाय प्रपन्नजीवार्तिनिवारणाय । ब्रह्मण्यदेवाय महेश्वराय नारा० ॥७॥ महामुनिव्रातनिषेविताय श्रद्धादयाक्षान्तिपरायणाय । नित्याय जीवोद्धरणोद्यताय नारा० ॥८॥ भगवंश्चिरकालीनो हृत्स्थो मम मनोरथः । त्वयेहागत्य कृपया कृतः पूर्णोऽद्य सर्वथा ॥९॥ इतोऽस्ति नातिदूरे वै जीर्णदुर्गपुरं मम । तत् पावय त्वमिति मे प्रार्थितं भवति प्रभो! ॥१०॥ सहस्रशः पौरजनास्तव सन्दर्शनादिना । प्राप्स्यन्ति जन्मसाफल्यमित्युक्तो हरिरब्रवीत् ॥११॥ एवं चेत्तर्हि भूपाल! यायामाद्यैव तत्पुरम् । त्वदिच्छा तेन पूर्णा स्यात्तीर्थयात्रापि नो भवेत् ॥१२॥ इत्युक्तः सोऽतिमुदितस्तदैव सह बन्धुभिः । योजयित्वा स्वयानानि सज्जोऽभूत्सत्वरक्रियः ॥१३॥ ततो हरिस्तेन नृपेण भक्तैरन्यैस्तथा**

---

## અધ્યાય : ૨૩

### જુનાગઢપુરમાં શ્રીહરિનું પધારવું અને ફરી ગઢપુરમાં પાછું આગમન કહેલું છે.

**હેમન્તસિંહ બોલ્યા** : હે દેવાધિદેવ ! દયાસાગર ! તમ- (માયિક અંધકાર)થી પર, સર્વ કારણના કારણ, એકાંતિક પોતાના જનોને પ્રિય, આશ્ચર્ય કરનારાં ચિહ્નો જેમને છે એવા, નારાયણ મુનિ તમોને નમસ્કાર છે. (૧) પ્રસન્ન મુખારવિંદવાળા, શ્વેત વસ્ત્રો ધારણ કરનારા, સુંદર સુગંધિમાન પુષ્પોના હારો ધારણ કરનારા, પોતાના શરીરના લાવણ્યથી પોતાની મૂર્તિમાં આકર્ષણ કરનારા, મસ્તકના મોળિયામાં લંબાયમાન સુંદર સુગંધિમાન પુષ્પોના તોરાઓવાળા એવા **નારાયણમુનિ તમોને નમસ્કાર થાઓ.** (૨) બ્રહ્મપુર નામનું સુન્દર અક્ષરધામ છે નિવાસ સ્થાન જેનું એવા બ્રહ્મભાવને પામેલા પોતાના ભક્તોએ સેવા કરાયેલા અત્યન્ત-શ્વેત અક્ષરબ્રહ્મના તેજના સમૂહના મધ્યમાં રહેલા એવા, (૩) નિયમિત અંતઃકરણવાળા, નિયમિત બાહ્યેન્દ્રિયવાળા, તપ છે પ્રિય જેમને એવા, સદા શુદ્ધ અને સિદ્ધ-માયાના ગુણોથી પર, એકાન્ત ધર્મને નિરૂપણ કરનારા એવા, (૪) નિષ્કામ નામના વ્રતનું પાલન કરનારા, નિષ્કામ નામના વ્રતને પ્રવર્તાવનારા, નિષ્કામ નામનાં વ્રતથી પ્રાપ્તિ છે જેમની એવા, (૫) સમગ્ર સ્વાશ્રિતોના દુઃખસમૂહોને નાશ કરનારા જગતને પ્રકાશ કરનારા, સૂર્યચન્દ્રાદિને પણ પ્રકાશ કરનારા, અત્યંત સુખ આપનારા, સમગ્ર પાપોને પ્રશમન કરનાર છે નામો જેમનાં એવા. (૬) પુરુષોમાં ઉત્તમ, સમગ્ર બ્રહ્માંડોને અક્ષરબ્રહ્મરૂપે ધારણ કરનારા, શરણે આવેલા જીવોની પીડાને નિવારણ કરનારા, બ્રાહ્મણ સમુદાયોને દેવની માફક પૂજનારા, ઈશ્વરોના પણ નિયન્તા એવા નારાયણ મુનિ તમોને નમસ્કાર થાઓ. (૭) મહામુનિઓ જે મુક્તાનંદાદિના સમૂહોએ શરીર વાણી અને મનથી સેવાયેલા, શ્રદ્ધા, દયા શાન્તિના એક આશ્રયસ્વરૂપ નિત્ય સિદ્ધ-દિવ્યાકૃતિવાળા, સ્થાવર જંગમ પ્રાણીઓના ઉદ્ધાર કરવામાં ઉદ્યમવાળા એવા **નારાયણમુનિ તમોને નમસ્કાર થાઓ.** (૮) હે ભગવન્ ! ઘણા સમયથી થયેલો અન્તઃકરણમાં રહેલો મારો મનોરથ તમોએ કૃપાથી હાલમાં આ મારા ગામમાં આવીને સર્વ પ્રકારે સમ્પૂર્ણ કર્યો. (૯) હે પ્રભો ! મારું **જીર્ણ દુર્ગપુર** આ ગ્રામથી અત્યન્ત દૂર નથી તમો **જુનાગઢપુરને** ત્યાં આવીને આપની ચરણરજથી પવિત્ર કરો, આ મારી પ્રાર્થના છે. (૧૦) હે ભગવન્ ! હજારો પુરના માણસો તમારા દર્શનથી મનુષ્યદેહની સફળતા પામશે. હે રાજન્ ! આ પ્રકારે કહેવાયેલા **શ્રીનારાયણમુનિ તેમના પ્રત્યે બોલ્યા** : (૧૧) હે હેમન્તસિંહ રાજન્ ! જો એમ હોય તો જુનાગઢ આજે જ આપણે જઈએ, તેથી તમારી ઈચ્છા પૂર્ણ થશે, અમારે પણ તીર્થયાત્રા થાય. (૧૨) હે રાજન્ ! આ પ્રમાણે કહેવાયેલા, માટે અતિ પ્રસન્ન હેમન્તસિંહ નૃપતિ, તત્કાળ ક્રિયા કરનારા તે સમયમાં જ રથાદિ પોતાનાં વાહનોને જોડાવીને પોતાનાં સ્વજનોની સાથે તૈયાર થયા. (૧૩) હે નરાધીશ ! તે પછી શ્રીહરિ હેમન્તસિંહ નૃપ, બીજા ઉત્તમ, જયા, લલિતાદિ ભક્તજનો, જુનાગઢથી આવેલા ભક્તો તથા

तत्पुरसङ्गतैश्च । वृतोऽश्ववारैस्तुरगाधिरूढो ययौ नराधीश! सहर्षिरीशः ॥१४॥ प्रतिग्रामं भक्तजनै रक्ष्यमाणोऽपि वर्त्मनि । आवासं नाकरोत्क्वापि दृष्ट्या तान् सुखयन् ययौ ॥१५॥ तस्मिन्नेव दिने राजन्! जीर्णदुर्गं निशामुखे । स प्राप्यावासमकरोद्धेमन्तस्यालये शुभे ॥१६॥ सभ्राता धाविताश्वोऽसौ शीघ्रमेत्य पुरं स्वकम् । हरेःशुश्रूषणपरो हेमन्तोऽभूत्सबान्धवः ॥१७॥ ब्राह्मणा रामजिच्चाम्बाशङ्करो रूपशङ्करः । परिचेरुस्तमन्येऽपि गोकुलश्चोद्धवादयः ॥१८॥ तैः पौरभक्तैः सहितस्तदातिथ्यं यथोचितम्। चकार नृपतिर्भक्त्या मन्यमानः कृतार्थताम् ॥१९॥ तीर्थयात्रां चकारासावमावास्यादिने ततः । प्रशंसन् रैवतगिरिं देवभूमिरियं त्विति ॥२०॥ स्नात्वा गोमुखगङ्गायां कुण्डे दामोदराह्वये । महादानानि स ददौ यथाविधि हरिर्नृप! ॥२१॥ ततो दामोदरस्येक्षां पूजनं च चकार सः । भवेश्वरस्य च ततो महादेवस्य भक्तितः ॥२२॥ ब्राह्मणान् भोजयामास शतशश्च सहस्रशः । तेभ्यश्च दक्षिणां प्रादात् तुतुषुस्तेन तेऽखिलाः ॥२३॥ नागरा ब्राह्मणास्तस्य बहवश्चक्रुराश्रयम् । तैरर्थ्यमानो न्यवसत् तत्र चैत्र्यवधि प्रभुः॥२४॥ संवत्सरप्रतिपदि पौरास्तस्य समर्चनम् । चक्रुश्चन्दनपुष्पैश्च नूत्नवासोधनादिभिः ॥२५॥ भक्तवर्यः स भूपस्तु तज्जन्मतिथिविन्नृप! । नवम्यां पूजनं तस्य चकार परया मुदा ॥२६॥ सितैरनर्घ्यैर्वसनैर्हैमै रम्यैर्विभूषणैः । सच्चन्दनाङ्गरागेण कुङ्कुमाक्तैस्तथाक्षतैः ॥२७॥ मल्लिकादामभी रम्यैर्नानाशेखरराजिभिः । धूपैर्दीपैश्च विविधैः खाद्यैः स्वादुफलैश्च सः ॥२८॥ रूप्यमुद्राभृतस्थालं निधाय पुरतोऽस्य च । नीराजयामास मुदा षट्पदीं स पठन्निमाम् ॥२९॥

સોમ સૂરાદિ અસવારો, રામપ્રતાપ ઈચ્છારામ વગેરેથી વિંટાયેલા ઘોડા ઉપર બેઠેલા મુક્તાનંદાદિ મુનિઓ સહિત જુનાગઢ પ્રતિ ચાલ્યા. (૧૪) માર્ગમાં દરેક ગામનાં ભક્તજનો પોતાના ગામમાં રાખવા ઈચ્છતા હતા તોપણ નિવાસ શ્રીહરિએ કર્યો નહિ, પોતાનાં દર્શન આપવાથી તે તે ગામના ભક્તજનોને સુખ આપતા સતા ચાલ્યા. (૧૫) હે રાજન્ ! શ્રીહરિએ ફાગણ વદી ચૌદશને દિવસે પ્રાતઃકાળે પંચાળા ગામથી ચાલીને તે દિવસે સાયંકાળે જુનાગઢ પુરને પામીને શુભ મનોહર હેમન્તસિંહ રાજાના ભવનમાં પોતાનો નિવાસ કર્યો. (૧૬) અનૂપસિંહ નામના પોતાના ભાઈની સાથે હેમંતસિંહ રાજા ઘોડો દોડાવીને તત્કાળ આગળ જઈને શ્રીહરિની સેવામાં ઉપયોગી વસ્તુઓ ભેગી કરવામાં તત્પર થયા. (૧૭) રામજીત અંબાશંકર રૂપશંકર વગેરે બ્રાહ્મણો, ગોકુળ, ઉદ્ધવ વગેરે બીજા ભક્તો પણ શ્રીહરિની સેવા કરતા હતા. (૧૮) પુરના ભક્તજનો સહિત હેમંતસિંહ ભૂપતિ પોતાને શ્રીહરિની સેવાથી કૃતાર્થ માનતા સતા યથાયોગ્ય સાધુઓના મંડળે સહિત આતિથ્યસત્કાર ભક્તિથી કરતા હતા. (૧૯) પછી શ્રીહરિએ આ દેવભૂમિ છે આ પ્રકારે રૈવતક પર્વતની પ્રશંસા કરતા થકા અમાવાસ્યાને દિવસે તીર્થયાત્રા કરી. (૨૦) હે રાજન્ ! શ્રીહરિએ **દામોદર** નામના કુંડમાં અને **ગૌમુખી ગંગા**માં સ્નાન કરીને વિધિ પ્રમાણે મહાદાનો આપ્યાં, (૨૧) પછી શ્રીહરિએ દામોદર નામના શ્રીકૃષ્ણની મૂર્તિનાં દર્શન કર્યાં અને વિધિપુરઃસર પૂજા કરી. પછી **ભવેશ્વર** નામના **મહાદેવ**નાં દર્શન અને પૂજન ભક્તિપુરઃસર કર્યું. (૨૨) શ્રીહરિ સોએ સો અને હજારો-હજાર બ્રાહ્મણોને જમાડતા હતા. તે બ્રાહ્મણોને દક્ષિણા આપતા હતા. ભોજન અને દક્ષિણાના લાભથી સમગ્ર બ્રાહ્મણો સંતોષ પામ્યા. (૨૩) અનેક નગરવાસી બ્રાહ્મણો શ્રીહરિનો આશ્રય કરતા હતા. નાગર બ્રાહ્મણોએ પોતાના નગરમાં રહેવા માટે પ્રાર્થના કરાયેલા શ્રીહરિએ ચૈત્ર સુદી **પૂર્ણિમા સુધી** જુનાગઢપુરમાં નિવાસ કર્યો. (૨૪) પુરના ભક્તો ચૈત્ર સુદી પડવાને દિવસે ચંદન-પુષ્પો-નવીન વસ્ત્રો અને ધન વગેરેથી શ્રીહરિનું પૂજન કરતા હતા. (૨૫)

હે રાજન્ ! **શ્રીહરિના પ્રાદુર્ભાવની તિથિને જાણનારા શ્રેષ્ઠ ભક્ત હેમંતસિંહ રાજા** પરમ સ્નેહથી **ચૈત્ર સુદી નવમી તિથિમાં શ્રીહરિનું પૂજન** કરતા હતા. (૨૬) હંસની પાંખ જેવાં અમૂલ્ય ઉત્તમ વસ્ત્રો-સુવર્ણ નિર્મિત રમણીય અલંકારો, સુગંધીમાન ચંદનને અંગમાં લેપન કરવાથી તથા કુમકુમથી મિશ્રિત કરેલા અક્ષતો-રમણીય મોગરાના પુષ્પોના હારો-તોરા વગેરેથી ધૂપ-દીપ અને નાના પ્રકારના બરફી - પેંડા વગેરે ખાદ્યપદાર્થો અને કેળાં વગેરે સ્વાદિષ્ટ ફળોથી હેમંતસિંહ રાજા **શ્રીહરિની પૂજા** કરતા હતા. (૨૭-૨૮) હેમંતરાજા શ્રીહરિની આગળ રૂપિયાનો ભરેલો થાળ મૂકીને આ છ પદવાળી આરતી બોલતા સતા હર્ષ પૂર્વક આરતી ઉતારતા હતા. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

जय देव! जय देव! जय मङ्गलकर्ता २ नारायण ऋषिभर्ता २ कलिमलभयहर्ता ॥ ध्रुवपदम् ॥ तेजःसञ्चयराजत्सिततरतनुकान्ते! २ नानामुक्तसमर्चित! २ सुखकर! बहुशान्ते! । सुरगणवन्दितचरणः करुणानिधिरात्मा २ परमं ब्रह्म परात्पर! २ निर्गुण! परमात्मा ॥ जय० ॥३०॥ भूमौ देवसपत्नैः शातिततनुगेहं २ पातुं सात्त्वतधर्मं २ प्रकटितनरदेहम् । धर्मात्मज! निजनन्दन! नन्दितवृषसर्गं २ वन्दे नैष्ठिकवर्यं २ त्वामितमुनिवर्गम् ॥ जय० ॥३१॥ मद्यामिषपरवनितानिरतासुरवारं २ महसा स्वेन निरस्यं २ स्तम इव सविताऽरम् । पाषण्डाध्वसुरक्षितनिजजनभयहारी २ मनसिजदर्पविमोचन! २ कुपथक्षयकारी ॥ जय० ॥३२॥ वरमभयं च कराभ्यां ददतं सितवसनं २ श्यामं सितमुपवीतं २ दधतं मितहसनम् । शारदपूर्णसुधाकर-बिम्बद्युतिवदनं २ हृदि कुर्वे च भवन्तं २ शुभगुणगणसदनम् ॥जय० ॥३३॥ तिलकं कैसरमलिके दधतं दृशिलोभं साक्षतकुङ्कुमचन्द्रक २ रुचिरं बहुशोभम् । चन्दनकौसुमशेखरबहुविधशुभहारै २ स्त्वामहमर्चितमीडे २ निजजनपरिवारैः ॥ जय० ॥३४॥ प्रेमवतीतनुजे त्वयि जलरुहदलनयने २ रमतां मम धीरनिशं २ निजनिजपदनयने । पाहि सदा पुरुषोत्तम! धार्मिकवर! विष्णो! २ त्वच्छरणागतजीवं २ कृष्ण! हरे ! जिष्णो! ॥ जय० ॥३५॥ एवं नीराजयित्वाऽसौ हरेः कृत्वा प्रदक्षिणाम् । प्रणम्य दण्डवद्राजा तस्थौ प्राञ्जलिरग्रतः ॥३६॥ स्वकण्ठाद्धरिरुत्तार्य तुष्टस्तस्मै ददौ स्रजः । महाप्रसाद इत्युक्त्वा स गृहीत्वा मुमोद ह ॥३७॥ वासांसि च धनं भूषा ब्राह्मणेभ्यो ददौ तदा । उदारबुद्धिर्भगवान् पौरान् विस्मापयन् जनान् ॥३८॥ प्रायशो धर्मशास्त्रस्य वार्ताः सदसि सोऽन्वहम् । चकारानन्दयन् विप्रान् कृष्णभक्त्युपबृंहिताः ॥३९॥

---

હે દેવ ! તમો એકાંતિક ધર્મની પ્રવૃત્તિ માટે ઐશ્વર્ય પ્રગટ કરો. (જય-જય) હે નારાયણ !, મંગલકર્તા, મુક્તાનંદાદિ સાધુઓના પતિ, કળીયુગના મળના ભયને નાશ કરનારા તમો જય પામો. હે અક્ષરધામના અનેક પ્રકારના મુક્તોએ હંમેશાં પૂજાયેલા ! હે સુખ કરનારા ! હે અતિશય શાંતિવાળા ! હે પર એવા અક્ષરથી પણ પર ! હે માયિક ગુણોથી રહિત,! બ્રહ્માદિ દેવોએ વંદના કરાયેલા છે ચરણો જેમનાં એવા કરુણાસાગર અક્ષરાદિના અંતર્યામી પરબ્રહ્મ, પરમાત્મા તમો જય પામો. (૩૦) હે ધર્માત્મજ ! હે પોતાના ભક્તોને આનંદ આપનારા, પૃથ્વીમાં દેવોના શત્રુઓએ નાશ કરેલ છે જેની મૂર્તિ (સ્વરૂપ) અને ગેહ અર્થાત્ ગૃહની માફક નિવાસ યોગ્ય; પોતાના ધારક સાધુજનો જેને છે એવા, એકાંતિક ભાગવત ધર્મને રક્ષણ કરવા માટે પોતાની ઈચ્છાથી પ્રાદુર્ભાવ કરી છે મનુષ્યાકૃતિ જેણે એવા, નૈષ્ઠિક વર્ણીન્દ્ર, જેને અગણિત મુનિસમૂહો છે એવા **તમોને નમસ્કાર કરું છું.** (૩૧) હે કામદેવના ગર્વનો નાશ કરનાર ! મદ્ય-માંસ અને પરસ્ત્રીઓમાં પ્રીતિવાળા જે અસુરોના સમૂહને સૂર્ય પોતાના તેજથી અંધકારને જ જેમ તેમ પોતાના પ્રતાપથી તત્કાળ વિનાશ કરતા, વેદ વિરુદ્ધ માર્ગથી અત્યંત રક્ષણ કરાયેલા જે પોતાના આશ્રિતો-તેમના સંસૃતિભયને નાશ કરનારા, કૌલ-કુંડાદિ માર્ગોને વિનાશ કરનારા તમો છો. (૩૨) હે હરે ! વર અને અભય જમણા અને ડાબા હાથથી આપતા, ઘણું કરીને શ્વેત વસ્ત્રો ધારણ કરતા, નવીન મેઘની સમાન શ્યામ સુંદર, અતિ શ્વેત ઉપવીતને ધારણ કરતા, મંદહાસ્ય યુક્ત-શરદઋતુના પૂર્ણ ચંદ્રમાના બિંબ સમાન કાંતિયુક્ત મુખવાળા, શુભ ગુણગણોના ભંડારરૂપ, તમારું **હૃદયમાં ધ્યાન કરું છું.** (૩૩) દર્શન કરનારાં જનોને લોભાવનારા અક્ષતે સહિત કુંકુમના ચાંલ્લાથી અતિ મનોહર ઘણી શોભાયુક્ત, કેસરના, ઊર્ધ્વપુંડ્ર તિલકને ભાલમાં ધારણ કરતા, પોતાના ભક્તજનો રૂપી પરિજનોએ ચંદન અને પુષ્પના હારો અને તોરાઓથી વિધિપૂર્વક પૂજાયેલા **તમારી હું સ્તુતિ કરું છું.** (૩૪) હે પુરુષોત્તમ ! હે ધર્મધુરંધરોમાં શ્રેષ્ઠ ! હે વિષ્ણો ! હે કૃષ્ણ ! હે હરે ! હે જય પામવાના સ્વભાવવાળા, પ્રેમવતી પુત્ર ! કમળના પત્ર સમાન નેત્રવાળા-સ્વાશ્રિતોને પોતાના અક્ષરધામમાં લઈ જનાર તમારે વિષે મારી બુદ્ધિ નિરંતર રમો. **તમારે શરણે આવેલા મારી સર્વદા રક્ષા કરો.** (૩૫) આ પ્રમાણે છ પદો બોલવા પૂર્વક આરતી ઉતારીને હેમંતસિંહ નૃપ શ્રીહરિની પ્રદક્ષિણા કરી દંડવત્ પ્રણામ કરી બંને હાથ જોડીને શ્રીહરિની આગળ ઊભા રહ્યા. (૩૬) પ્રસન્ન થયેલા શ્રીહરિએ પોતાના કંઠથી **પુષ્પના હારો** ઉતારી હેમંતસિંહ રાજાને આપ્યા. હેમંતસિંહ રાજા શ્રીહરિએ આપેલા તે **'મહાપ્રસાદ'**ને એમ ગ્રહણ કરી અત્યંત આનંદ પામ્યા. (૩૭) તે સમયે ઉદાર બુદ્ધિ ભગવાન શ્રીહરિએ જૂનાગઢનાં નિવાસીજનોને વિસ્મય પમાડતા સતા વસ્ત્રો-ધન અને અલંકારો બ્રાહ્મણોને અર્પણ કર્યાં. (૩૮) શ્રીહરિ દરરોજ સભામાં બ્રાહ્મણોને આનંદ આપતા સતા કૃષ્ણની ભક્તિને વૃદ્ધિ પમાડનારી ધર્મશાસ્ત્રની વાર્તાઓ ઘણું કરીને કરતા હતા. (૩૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

**द्वादश्यां पौर्णमास्यां च ब्राह्मणान् स सहस्रशः । तदिष्टभक्ष्यभोज्यैश्च तर्पयामास सत्पतिः ॥४०॥ द्वादश्यामेव च स्वामी सोऽपराह्णे सदःस्थितः । माहात्म्यं द्वारिकायास्तु सर्वानचकथन्निजान् ॥४१॥ रामप्रतापेच्छारामौ तच्छ्रुत्वा हरिमूचतुः । कुर्याव द्वारिकायात्रामाज्ञा चेत्तव साम्प्रतम् ॥४२॥ इत्याश्रुत्य स तद्वाक्यं तयोः सद्धर्मनिष्ठताम् । ज्ञात्वान्वमोदत तथा पाथेयं चाश्वकारयत् ॥४३॥ ततस्तौ प्रेषयामास त्रयोदश्यां कुशस्थलीम् । दत्वा धनं च विपुलमश्वौ च शकटद्वयम् ॥४४॥ प्रैषयत्सह ताभ्यां च मयराममद्विजोत्तमम् । तद्देशमार्गादिविदं पत्तीन् शस्त्रभृतश्च सः ॥४५॥ तदाऽऽतपस्य बाहुल्यात्कौसल्यानितरांस्तु सः । ताभ्यां साकं गन्तुमुत्कान्न्यषेधद्देशकालवित् ॥४६॥ प्रतिपदि ततः साकं स्वीयानुगैः कृतभोजनः सपदि निरगाद्धेमन्तादीननुव्रजतो निजान् । निजविरहतः खेदं यातो निवर्त्य बलाद्धरिः पथि स सुखयन्स्वीयानायान्नृपोत्तमपत्तनम् ॥४७॥ एतां कथां भगवतो भजनीयमूर्तेर्भक्त्या शृणोति पठति प्रयतः पुमान् यः। प्राप्नोति भक्तिममलां स तु वासुदेवे मुक्तो भवत्यखिलसंसृतिबन्धनेभ्यः ॥४८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थ प्रकरणे जीर्णदुर्गगमनदुर्गपुरप्रत्यागमननिरूपणनामा त्रयोविंशोऽध्यायः ॥२३॥

सुव्रत उवाच – **निवसंस्तत्र भगवानेकदा विजने स्थितः । व्यचिन्तयत्स मनसा स्वावतारप्रयोजनम् ॥१॥ कलेः प्राप्य बलं भूमावधर्मः सान्वयोऽसुरैः । वर्धितो नितरां तेन धर्मोऽतिक्षीणतां गतः ॥२॥ सन्तः कष्टं भृशं प्रापुर्देवता ऋषयस्तथा**

મુનિપતિ શ્રીહરિએ ચૈત્ર સુદી બારસને દિવસે જ અને ચૈત્ર સુદી પૂનમે હજારો બ્રાહ્મણોને તેમને ઈષ્ટ ભક્ષ્યભોજ્ય ભોજનોથી તૃપ્ત કર્યા. (૪૦) શ્રીહરિ **ચૈત્ર સુદી બારસ**ને દિવસે જ સાંજના પહોરે સભામાં બેસીને **દ્વારિકાનું માહાત્મ્ય** સર્વે પોતાના ભક્તોને કહેતા હતા. (૪૧) રામપ્રતાપ અને ઈચ્છારામે શ્રીહરિએ કહેલું દ્વારિકાનું માહાત્મ્ય સાંભળીને શ્રીહરિને કહ્યું, હે હરે ! જો તમારી આજ્ઞા હોય તો હાલમાં જ દ્વારિકાની યાત્રા અમો બંને કરીએ. (૪૨) હે રાજન્ ! આવું તેમનું વચન સાંભળી શ્રીહરિએ પોતાના બંને ભાઈઓની ધર્મનિષ્ઠા જાણીને 'એમ કરો' એમ તેમના વચનને અનુમોદન આપ્યું. તત્કાળ માર્ગમાં જમવા ભાથું કરાવ્યું. (૪૩) પછી શ્રીહરિએ ઘણું દ્રવ્ય, બે ઘોડા અને બે ગાડાં આપીને બન્ને ભાઈઓને **તેરસ**ને દિવસે દ્વારિકા પ્રત્યે મોકલ્યા. (૪૪) શ્રીહરિએ દ્વારકાના માર્ગને જાણનાર બ્રાહ્મણશ્રેષ્ઠ મયારામ અને આયુધ ધારણ કરનારા પોતાના પાર્ષદોને તેમની સાથે મોકલ્યા. (૪૫) દેશકાળને જાણનાર શ્રીહરિએ તે સમયે પોતાના ભાઈઓની સાથે જવા માટે ઉત્સાહવાળા બીજા કોસલ દેશથી આવેલા પોતાના ભત્રીજા વગેરેને ઘણો તાપ હોવાથી નિષેધ કર્યો. (૪૬) હે રાજન્ ! પછી શ્રીહરિ **ચૈત્ર વદી પ્રતિપદા**ને દિવસે પોતાના અનુયાયીઓની સાથે ભોજન કરીને તત્કાળ જ જૂનાગઢથી નીકળ્યા. પોતાની પાછળ આવતા પોતાના વિયોગથી દુઃખી થતા હેમંતાદિ પોતાના ભક્તોને બળાત્કારે પાછા વાળીને માર્ગમાં પોતાના ભક્તજનોને સુખી કરતા સતા **ઉત્તમરાજાના પુરમાં** આવ્યા. (૪૭)

હે રાજન્ ! ભજનીય મૂર્તિ શ્રીહરિની આ-ગઢપુરથી નીકળ્યા ત્યારથી આરંભીને ફરી ગઢપુરમાં આવ્યા ત્યાં સુધીની કથા જે પુરુષ નિયમતત્પર થઈને ભક્તિપૂર્વક શ્રવણ કરે અને શ્રોતાજનોને સંભળાવે તે શ્રોતા અને વક્તા બંને પુરુષો **પ્રત્યક્ષ શ્રીહરિમાં એકાંતિક ભક્તિ પામે છે** અને સમગ્ર સંસારનાં બંધનોથી મુક્ત થાય છે. (૪૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે જીર્ણદુર્ગગમન-દુર્ગપુરપ્રત્યાગમનનિરૂપણનામા ત્રયોવિંશોઽધ્યાયઃ (૨૩)*

## અધ્યાય : ૨૪

### શ્રીહરિનો, પોતાના તિરોધાનના હેતુથી પોતાની મૂર્તિ વગેરે સ્થાપવાના અર્થવાળો ગુપ્ત સંકલ્પ નિરૂપણ કરેલો છે.

**સુવ્રતમુનિ બોલ્યા** : હે રાજન્ ! દુર્ગપત્તનમાં નિવાસ કરતા શ્રીહરિએ એક સમયે જન વિનાના એકાંત સ્થળમાં બેસીને મનથી પોતાના અવતારના પ્રયોજનનો વિચાર કર્યો. (૧) 'પૃથ્વીમાં કળિયુગનું બળ પામીને ગુરુ અને રાજારૂપે

**। भूमिश्च पापिनां भारं सहितुं न शशाक च ॥३॥ शापव्याजेन विप्रर्षेः प्रादुर्भूय ततो भुवि । उन्मूलिता मया सर्वे स्वप्रतापेन तेऽसुराः ॥४॥ धर्मो भक्त्या सह परां पुष्टिं च गमितोऽधुना । सन्तो देवाश्च मुनयः प्रापिताः परमं सुखम् ॥५॥ अधर्मः सान्वयः क्वापि नेक्ष्यते भूतलेऽधुना । चातुर्वर्ण्यजनाः सर्वे स्वधर्मस्था भजन्ति माम् ॥६॥ धृत्वावतारं यत्कार्यं तत्कृतं सकलं किल । तथापि भाविनां नृणां कार्यं किञ्चिद्धितं मया ॥७॥ अन्तर्हिते मयि भुवो भक्ता एते च मच्छ्रिताः । निरालम्बा भविष्यन्ति कार्यं किञ्चिच्च तत्कृते ॥८॥ एवं विचार्य भगवान् सर्वेषां स नृणां भुवि । व्यचिन्तयद्धितं त्रेधा दयावात्सल्यवारिधिः ॥९॥ कारयित्वा मन्दिराणि तत्र स्वप्रतिमा अहम् । स्थापयेय ततस्ताश्च सेविष्यन्ते हि मानवाः ॥१०॥ स्वधर्मे वर्तमानानां पुंसां तत्सेवनादिह । सिद्धिमेष्यति सर्वेषां पुरुषार्थचतुष्टयम् ॥११॥ भक्तिमार्गस्य पुष्ट्यर्थं मन्त्रदीक्षाप्यपेक्ष्यते। अतो धर्मान्वये शुद्धे गुरूतां स्थापयेय च ॥१२॥ धर्मज्ञानविरक्तीनां भक्तेश्चावगमाय तु । ग्रन्थं कर्ता शतानन्दो मच्चरित्रोपबृहितम् ॥१३॥ सिद्धान्तं सर्वशास्त्राणां तेन ज्ञास्यन्ति मच्छ्रिताः । एवमेव ततः कृत्वा यायां धाम स्वकं भुवः ॥१४॥** सुव्रत उवाच – **स एवं गूढसङ्कल्पो निवसंस्तत्र पत्तने । लेखयामास सर्वाणि सच्छास्त्राणि सुलेखकैः ॥१५॥ अचीकरद्भूमिपते! महान्तं चैत्रासितैकादशिकोत्सवं सः । सन्तर्पयामास मुनींश्च विप्रान्सहस्त्रशो द्वादशिकादिने च ॥१६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे भगवद्गूढसङ्कल्पनिरूपणनामा चतुर्विंशोऽध्यायः ॥२४॥

---

અવતરેલા દૈત્યોએ પોતાના પરિવારે સહિત અધર્મ અતિશય વૃદ્ધિ પમાડ્યો. તેનાથી વંશે સહિત ધર્મ અતિશય ક્ષીણપણાને પામ્યો. સાધુપુરુષો-ઇન્દ્રાદિ દેવતાઓ તથા ઋષિઓ અત્યંત દુઃખ પામ્યા અને પૃથ્વી પાપીજનોનો ભાર સહન કરવા માટે સમર્થ થઈ નહિ. (૨/૩) પછી દુર્વાસા મુનિના નરનારાયણાદિમાં શાપના નિમિત્તથી ભારતભૂમિમાં પ્રાદુર્ભાવ પામીને મેં પોતાના પ્રતાપથી સર્વે અસુરોને મૂળમાંથી ઉખેડી નાખ્યા છે. (૪) હાલમાં ભક્તિએ સહિત ધર્મ મેં સર્વોત્તમ પુષ્ટિને પમાડ્યો છે. સાધુઓ-દેવો અને મુનિઓને સર્વોપરિ સુખ આપ્યું છે. (૫) પરિવારે સહિત અધર્મ હાલ પૃથ્વીમાં કોઈપણ સ્થાનમાં જણાતો નથી. ચાર વર્ણનાં જનો પોતપોતાના ધર્મમાં રહીને મને ભજે છે. (૬) મેં અવતાર ધારણ કરી જે કાર્ય કરવા યોગ્ય તે સર્વે સંપાદન કરેલું છે, હતું તો પણ **ભવિષ્યમાં થનાર મનુષ્યોનું કાંઈક હિત** મારે કરવું. (૭) હું પૃથ્વીમાંથી અંતર્હિત થાઉં, ત્યારે આ મારા આશ્રિતો આધાર વિનાના થશે. તેમને માટે, મારા ભક્તોના આલંબન માટે કંઈ પણ કરવું. (૮)

હે રાજન્, દયા અને વાત્સલ્યના નિધિ ભગવાન શ્રીહરિએ આ પ્રકારે વિચારીને પૃથ્વીમાં સર્વ મનુષ્યોનું **ત્રણ પ્રકારે હિત** કરવાનો વિચાર કર્યો. (૯) હું મંદિરોમાં **મારા અર્ચાવતારોની પ્રતિષ્ઠા કરાવું** પછી મારી પ્રતિમાઓને મનુષ્યો હાલમાંના ભક્તજનો અને ભાવિ ભક્તજનો સેવા કરશે જ. (૧૦) આ લોકમાં પોતપોતાના વર્ણાશ્રમને યોગ્ય આચારમાં વર્તતા સર્વે પુરુષો તે પ્રતિમાઓનું સેવન કરવાથી ચાર પુરુષાર્થની સિદ્ધિ પામશે. (૧૧) ભક્તિમાર્ગની પુષ્ટિને માટે મંત્રદીક્ષાની પણ અપેક્ષા છે. માટે સર્વ પ્રકારે દોષ રહિત **ધર્મના વંશમાં ગુરુપણું સ્થાપન કરું.** (૧૨) ધર્મ, જ્ઞાન, વૈરાગ્ય અને ભક્તિના બોધ માટે **શતાનંદમુનિ મારાં ચરિત્રોનો મહાન ગ્રંથ કરશે.** (૧૩) મારાં આશ્રિતજનો તે ગ્રંથથી સર્વ શાસ્ત્રોનો સિદ્ધાંત જાણશે. માટે આ પ્રકારે કરીને જ પૃથ્વીથી પોતાના અક્ષરધામને વિષે જઈશ. (૧૪)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે ગૂઢ સંકલ્પવાળા શ્રીહરિ દુર્ગનગરમાં નિવાસ કરતા સતા સારા શુદ્ધ અક્ષરોથી લેખક સવિત્રાનંદ, નિર્ગુણાનંદ, અદ્ભુતાનંદ, વૃદ્ધપ્રજ્ઞાનંદ, વિજ્ઞાનાનંદ, ઋષભાનંદ, નીલકંઠાનંદ, નિઃસ્વાદાનંદ, વૈકુંઠાનંદ, વૈષ્ણવાનંદ, શ્રીધરાનંદાદિ દ્વારાએ સર્વ સત્શાસ્ત્રો શ્રીમદ્ ભાગવતાદિ લખાવતા હતા. (૧૫)

હે ભૂમિપતે ! શ્રીહરિ **ચૈત્ર વદી એકાદશી**ને દિવસે **મહોત્સવ** કરાવતા હતા. બારશને દિવસે હજારો મુનિઓ તથા બ્રાહ્મણોને તૃપ્તિ પમાડતા હતા. (૧૬)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે ભગવદ્ગૂઢસંકલ્પનિરૂપણનામા ચતુર્વિંશોऽધ્યાયઃ (૨૪)*

सुव्रत उवाच - देशान्तरात् समायातो हरिर्दुर्गपुरे नृप! । नवमे मास इत्येवं श्रुत्वा देशान्तरस्थिताः ॥१॥ तद्दर्शनार्थमाजग्मुर्भक्तास्तत्र सहस्रशः । कृत्वा ते दर्शनं तस्य द्वादश्यां लेभिरे मुदम् ॥२॥ सन्मानितास्ते हरिणा तत्रोषुर्वासराष्टकम्। हरिश्चन्दनयात्रायाश्चकार च महोत्सवम् ॥३॥ उत्सवान्ते तमासीनं भक्ताः श्रीनगरौकसः । बद्धाञ्जलिपुटा राजन्! प्रार्थयामासुरादरात् ॥४॥ भगवन्! पुरमस्माकं कृपयाऽऽयातुमर्हसि । विधातुं मन्दिरं तत्र सर्वेषामस्ति मानसम् ॥५॥ गवेन्द्रदत्ताधिकृतिस्तत्रत्यो धरणीपतिः । अनुमोदत एतद्धि प्रीतिमांस्त्वयि सोऽस्ति च ॥६॥ एतं मनोरथं तस्मादस्माकं प्रतिपूरय । करिष्यामो हि शुश्रूषां मुनिभिः सहितस्य ते ॥७॥ इति तैः प्रार्थितो भक्तैर्भक्तिधर्मप्रपोषकः । नारायणस्तथेत्याह ते च हर्षं प्रपेदिरे ॥८॥ आनन्दानन्दनामानं मुनिं प्राह ततो हरिः । एभिः सह श्रीनगरं गच्छ त्वं साम्प्रतं मुने! ॥९॥ तत्रत्यो नृपतिर्भूमिं दास्यते मन्दिराय नः । कारयेर्मन्दिरं तस्यां शिल्पशास्त्रानुसारतः ॥१०॥ जाते हि मन्दिरे तत्र प्रेषयेर्दूतमत्र च । तत्रैत्य स्थापयिष्यामि नरनारायणं ह्यहम् ॥११॥ इत्युक्तः स तथेत्याह ते च भक्ताः प्रणम्य तम् । त्वयाऽऽगम्यमवश्यं हीत्युक्त्वा समुनयो ययुः ॥१२॥ प्राप्य श्रीनगरं तत्र स्वावासोचितवेश्मनि । स्वमण्डलेन सहित उत्ततार मुनिः स च ॥१३॥ पौरा यथोचितं तस्य परिचर्यामकुर्वत । तत्रत्यो नृपतिस्तस्य दर्शनार्थमुपागमत् ॥१४॥ स चाह तं मुने! भूमिर्यावती या तवेप्सिता । तावतीं तां गृहाणाद्य प्रतिरोद्धा न कोऽपि ते ॥१५॥ ततो मुनिः स्वेप्सितायां दत्तायां तेन भूभुजा । मन्दिरं कारयामास भुवि रम्यं दृढं महत् ॥१६॥ चतुरैः शिल्पिभिस्तच्च कारयामास शोभनम् । तदपेक्षितवस्तूनि पौरा आजह्रुरादरात्

## અધ્યાય : ૨૫

**શ્રીહરિએ અમદાવાદ નગરમાં જઈને નર-નારાયણ નામની પોતાની મૂર્તિનું ત્યાં સ્થાપન કર્યું તેનું વર્ણન છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ નવમા મહિને દેશાંતરથી ગઢપુરમાં આવેલા છે. આ પ્રકારે સાંભળીને દેશાંતરમાં રહેલા હજારો હરિભક્તો શ્રીહરિનાં દર્શન કરવા માટે ગઢપુરમાં આવતા હતા. તે ભક્તો બારસને દિવસે શ્રીહરિનાં દર્શન કરીને આનંદ પામ્યાં. (૧-૨) શ્રીહરિએ સત્કાર કરાયેલા ભક્તો આઠ દિવસ સુધી ગઢપુરમાં નિવાસ કરતા હતા. શ્રીહરિએ **અક્ષય તૃતીયા**ને દિવસે **ચંદનયાત્રાનો મહોત્સવ** કર્યો. (૩) હે રાજન્ ! **શ્રીનગરના નિવાસી ભક્તો** બંને હાથ જોડીને ઉત્સવના અંતમાં બેઠેલા શ્રીહરિને આદરપૂર્વક **પ્રાર્થના** કરતા હતા. (૪) હે ભગવન્ ! કૃપા કરીને અમારા પુરમાં આવવા માટે યોગ્ય છો. ત્યાં મંદિર કરવા માટે સર્વ ભક્તજનોનો મનોરથ છે. (૫) સમ્રાટ અંગ્રેજ રાજાએ આપેલા અધિકારવાળા અમારા નગરના અધિપતિ આ મંદિર માટે અનુમોદન આપે છે. જે માટે તે રાજા તમારા ઉપર પ્રીતિવાળા છે. (૬) માટે અમારો આ **મંદિર** કરવા માટે તમારા આગમન રૂપ મનોરથ સંપૂર્ણ કરો. હે ભગવન્, મુનિઓએ સહિત તમારી સેવા કરીશું, જ.(૭) હે રાજન્ ! આ પ્રકારે ભક્તોએ પ્રાર્થના કરાયેલા ભક્તિએ સહિત ધર્મનું પોષણ કરનારા શ્રી નારાયણ મુનિએ 'તમોએ કહ્યું, તેમ થાઓ' એમ કહ્યું. તેથી તે ભક્તો મહાઆનંદ પામ્યા. (૮)

**શ્રીહરિએ આનંદાનંદ નામના મુનિને કહ્યું,** હે મુને ! તમો હાલમાં આ શ્રીનગરવાસી ભક્તજનોની સાથે શ્રીનગરમાં જાઓ. (૯) શ્રીનગરના નિવાસી રાજા મંદિર કરવા માટે આપણને ભૂમિ આપશે. ભૂમિમાં શિલ્પ શાસ્ત્રને અનુસરીને મંદિર કરાવો. (૧૦) ત્યાં મંદિર તૈયાર થાય ત્યારે મારી સમીપમાં દૂત મોકલો. **હું શ્રીનગરમાં આવીને નરનારાયણની સ્થાપના કરીશ.** (૧૧) હે રાજન્ ! આ પ્રમાણે કહેલા આનંદાનંદ મુનિએ કહ્યું કે 'બહું સારું' તથા તે નગરનાં ભક્તો શ્રીહરિને પ્રણામ કરી તમો અવશ્ય આવજો આ પ્રમાણે શ્રીહરિને કહીને આનંદાનંદ મુનિએ સહિત ગઢપુરથી નીકળ્યા. (૧૨) આનંદાનંદ મુનિ શ્રીનગરમાં જઈને ત્યાં પોતાના નિવાસ યોગ્ય ગૃહમાં પોતાના મંડળે સહિત નિવાસ કરતા હતા. (૧૩) પુરનાં જનો મંડલે સહિત આનંદાનંદ મુનિની સેવા યથાયોગ્ય કરતાં હતાં. ત્યાંના રાજા આનંદાનંદ મુનિનાં દર્શન કરવા આવ્યા. (૧૪) **રાજાએ** આનંદાનંદ મુનિને કહ્યું કે મંદિર માટે જેટલી જગ્યા અને જેવી ભૂમિ- તમારી ઈચ્છામાં આવે તેટલી તેવી પૃથ્વી ગ્રહણ કરો. હાલમાં તમોને કોઈ રોકનારો નથી. (૧૫) હે રાજન્ ! પછી **આનંદાનંદ મુનિ** તે રાજાએ આપેલી પૃથ્વીમાં રમણીય **અતિદ્રઢ મોટું મંદિર** કરાવતા હતા. (૧૬) તે મંદિર સ્થાપત્ય

।।१७।। देवप्रतिष्ठायोग्ये च जाते तस्मिन्मुनिः स तु । आपृच्छ्य गणकांश्चक्रे प्रतिष्ठाक्षणनिश्चयम् ।।१८।। प्रेषयामास स ततः साधू द्वौ दुर्गपत्तनम् । हरिमानेतुमृषिराट् वृत्तं तच्च निवेदितुम् ।।१९।। हरिस्तु तत्र निवसन्नार्षं रामायणं नृप! । भ्रातृभ्यां सह शुश्रूषुः प्रत्यैक्षत तदागमम् ।।२०।। तिथौ दशहराख्यायां गङ्गार्चनमहोत्सवम् । भानौ गगनमध्यस्थे कृत्वा विप्रानभोजयत् ।।२१।। भ्रातृजायान्तिके यावद्भोक्तुं याति स्ववासतः । हरिस्तावत्तु तौ तत्राऽऽजग्मतुर्द्वारिकापुरात् ।।२२।। तीर्थं गत्वा य आगच्छेत्तत्प्रत्युद्गमने विदन् । पुण्यं महत्तावभ्येत्य परिरेभे स सादरम् ।।२३।। ज्येष्ठं स्वयं नमस्कृत्य कनिष्ठेन नमस्कृतः । पृष्ट्वा तत्स्वागतादीनि क्षणं व्यश्रमयच्च तौ ।।२४।। स्नात्वा ततः सहैवाभ्यां बुभुजे प्रीणयन् स तौ । श्रीरामचरितं श्रोतुं प्रारम्भत् परेऽहनि ।।२५।। एकादश्या निर्जलाया आरभ्य प्रतिवासरम् । ताभ्यां सह स शुश्राव वाल्मीकीयं यथाविधि ।।२६।। पौषस्य शुक्लैकादश्यां तत्समाप्तिमचीकरत् । वाचकं तोषयामास वासोभूषाधनादिभिः ।।२७।। माघस्नानं चकाराथ नद्यां भक्तजनैः प्रगे । पौष्या आरभ्य माघ्यन्तं कुर्वंश्चान्द्रायणव्रतम् ।।२८।। व्रतान्ते ब्राह्मणान्साधूंस्तर्पयित्वा सहस्त्रशः । स्वयं च पारणां कृत्वा निषसादासने सुखम् ।।२९।। तावच्छ्रीनगरात्साधू तावुपेत्य प्रणम्य तम् । पुरतस्तस्थतू राजन् ! मानया-मास तौ स च ।।३०।। आदौ तौ भोजयित्वा तद्वृत्तं पप्रच्छ स प्रभुः । यथावत्तौ जगदतुस्तच्छ्रुत्वा सोऽन्वमोदत ।।३१।। तपस्याद्यतृतीयायां देवसंस्थापनक्षणम् । स ज्ञात्वा तत्पुरं गन्तुमादिदेशात्मनोऽनुगान् ।।३२।। निषिषेध स योषास्तु

વેદમાં નિપુણ શિલ્પીઓ દ્વારા શોભાયમાન કરાવતા હતા. પુરના હરિભક્તો મંદિર કરવામાં ઉપયોગી જે જે વસ્તુઓ તે (ઈંટો, પથ્થરો, ચૂનો વગેરે) આદરપૂર્વક લાવતા હતા. (૧૭) તે મંદિર શ્રી નરનારાયણદેવની સ્થાપનાને યોગ્ય થયું ત્યારે આનંદાનંદ મુનિએ જ્યોતિષીઓને પૂછીને પ્રતિષ્ઠાનો સમય નિશ્ચિત કર્યો (૧૮) પછી મુનિશ્રેષ્ઠ આનંદાનંદ મુનિએ શ્રીહરિને લાવવા માટે અને મંદિરની રચના વગેરેનું **વૃત્તાંત** નિવેદન કરવા માટે બે સાધુ ગઢપુર મોકલ્યા. (૧૯)

હે રાજન્ ! શ્રી નારાયણ મુનિ તો ગઢપુરમાં નિવાસ કરતા સતા રામપ્રતાપ અને ઈચ્છારામની સાથે વાલ્મીકિ રામાયણ સાંભળતા ઈચ્છતા થકા તે બંનેની દ્વારિકાની યાત્રા કરીને આવવાની રાહ જોતા હતા. (૨૦) શ્રીહરિ દશહરા જે જેઠ સુદી દશમને દિવસે ગગનના મધ્ય ભાગમાં સૂર્ય થયા ત્યારે **ગંગાપૂજન**નો મહોત્સવ કરીને બ્રાહ્મણોને જમાડતા હતા. (૨૧) શ્રીહરિ જેટલામાં પોતાના નિવાસથી રામપ્રતાપનાં પત્ની સુવાસિની સમીપે ભોજન કરવા જાય છે તેટલામાં રામ પ્રતાપ અને ઈચ્છારામ પોતાના બંને ભાઈઓ દ્વારિકાપુરથી ગઢપુરમાં આવ્યા. (૨૨) જે તીર્થ કરીને આવે તેમના સન્મુખ જવામાં અતિશય પુણ્યને જાણતા શ્રીહરિએ બંને ભાઈઓની સન્મુખ જઈને આદરે સહિત આલિંગન કર્યું. (૨૩) શ્રીહરિ મોટાભાઈને નમસ્કાર કરી, ઈચ્છારામે નમસ્કાર કરાયેલા સતા તે બંનેને સુખેથી આવ્યા વગેરે પૂછીને બન્ને ભાઈઓને થોડીવાર વિશ્રાંતિ આપી. (૨૪) પછી શ્રીહરિ સ્નાન કરીને તે બંનેને વિનોદવચનોથી આનંદ પમાડતા સતા બંનેની સાથે ભોજન કરતા હતા. બીજે દિવસે શ્રી રામચરિત સાંભળવાનો આરંભ કરતા હતા. (૨૫) શ્રીહરિ સંવત્ ૧૮૭૭ના જેઠ સુદી એકાદશી જે નિર્જલા-૧૧ને દિવસે આરંભ કરીને દરરોજ બંને ભાઈઓની સાથે **વાલ્મીકિ રામાયણ** વિધિ પ્રમાણે સાંભળતા હતા. (૨૬) શ્રીહરિ સંવત્ ૧૮૭૮ **પોષ સુદી એકાદશી**ને દિવસે રામાયણ કથાની સમાપ્તિ કરાવતા હતા. વસ્ત્રો, આભૂષણો, ધન વગેરેથી વાંચનાર પુરાણીને સંતોષ પમાડતા હતા. (૨૭) પછી શ્રીહરિએ ચાંદ્રાયણ વ્રત કરતા સતા પોષ માસની પૂર્ણિમાથી આરંભીને માઘમાસની પૂર્ણિમા સુધી ભક્તજનોની સાથે પ્રાતઃકાળમાં ઉન્મત્ત ગંગામાં **માઘસ્નાન** કર્યું. (૨૮) વ્રતના અંતે હજારો બ્રાહ્મણો અને સાધુઓને તૃપ્ત કરીને સ્વયં શ્રીહરિ પારણાં કરીને આસનમાં સુખપૂર્વક બેઠા. (૨૯)

હે રાજન્ ! તે સમયે શ્રીનગરથી આનંદાનંદ મુનિએ મોકલેલા બે સાધુ શ્રીહરિની સમીપમાં આવી સાષ્ટાંગ નમસ્કાર કરી શ્રીહરિની આગળ બેઠા. શ્રીહરિ બન્ને સાધુઓને સુખેથી આવ્યા વગેરે પ્રશ્નથી સત્કાર કરતા હતા. (૩૦) શ્રીહરિ પ્રથમ સાધુઓને ભોજન કરાવીને શ્રીનગરનું વૃત્તાંત પૂછતા હતા. બન્ને સાધુ યથાર્થ વૃત્તાંત કહેતા હતા. તે વૃત્તાંત સાંભળીને શ્રીહરિએ અનુમોદન આપ્યું. (૩૧) શ્રીહરિ ફાગણ સુદી તૃતીયાને દિવસે શ્રી નરનારાયણદેવની **પ્રતિષ્ઠાનું મુહૂર્ત** જાણીને શ્રીનગર જવા માટે પોતાના અનુયાયી, સોમાદિ પાર્ષદોને તૈયાર થવા આજ્ઞા આપતા હતા. (૩૨) શ્રીહરિએ શ્રીનગરમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

जयाद्या आगमोद्यताः । जनसम्मर्दबाहुल्यात् पुरे तत्र व्रतस्थिताः ॥३३॥ आयास्यामो वयं शीघ्रमिहेत्याश्वास्य ता हरिः । क्षणे मौहूर्तिकैर्दत्ते सप्तम्यां निर्ययौ ततः ॥ ३४॥ उत्तमेन क्षितिभुजा सह स्वीयैश्च पार्षदैः । सहस्त्रशोऽश्ववारैश्च वृतः क्षत्रियपुङ्गवैः ॥३५॥ आरूढो जविनं चाश्वं सोदराभ्यां सहैव सः । मुनिभिश्च ययौ स्वामी ततः श्रीनगरं नृप! ॥३६॥ तत्र तत्रार्च्यमानोऽसौ पथि भक्तव्रजैः प्रभुः । पञ्चमेऽहनि तत्प्रापत्स्वानुगैः सह पत्तनम् ॥३७॥ पुरोपकण्ठे स्वावासं तडागमभितोऽकरोत् । कार्कराख्यं तत्र पौरा एत्य सेवामकुर्वत ॥३८॥ नथ्थुर्हेमन्तरामश्च गणपत्यादयो द्विजाः । भक्ता भगवतः सेवामकुर्वत मुदान्विताः ॥३९॥ हीरचन्द्रो बर्हिचरो लालगुप्तश्च माणिकः । दामोदरादयो वैश्या भक्ताः पर्यचरंश्च तम् ॥४०॥ गङ्गा रेवा च दीपालिर्लक्ष्मीः श्यामा शिवादयः । योषितो भक्तिमत्यस्तमसेवन्त यथोचितम् ॥४१॥ अन्ये सहस्त्रशः पौरास्तद्दर्शनसमुत्सुकाः। बहिरभ्येत्य तं दृष्ट्वा प्रापुः परमनिर्वृतिम् ॥४२॥ आतिथ्यं विदधुस्तस्य यथार्हं सानुगस्य ते । तमुपेत्यानन्दमुनिर्नत्वा स्वं वृत्तमाह च ॥४३॥ द्वादश्यां पारणां कृत्वा प्रविवेश पुरं हरिः । प्रार्थ्यमानः पौरभक्तैरश्वमारुह्य भूषितम् ॥४४॥ पुरतः पार्श्वतस्तस्य पृष्ठतश्च सहस्त्रशः । शतशो यूथशश्चेरुस्तदा भक्तजना नृप! ॥४५॥ नेदुर्दुन्दुभयस्तत्र वाद्यानि विविधानि च । गायकाश्च जगुर्हृष्टा गुणांस्तस्यैव सुस्वरम् ॥४६॥ सहस्त्रशो यान्त्रिकाश्च बन्धुकीधूष्कृतीर्मुहुः । कुर्वन्तः पुरतश्चेरुर्बद्धनानाविधायुधाः ॥४७॥ निशम्य पौरास्तमुदारकीर्तिं पुरं प्रविष्टं सह भक्तसङ्घैः । ससम्भ्रमं त्यक्तसमस्तकार्या

---

આવવા માટે ઉદ્યમવાળી આઠ પ્રકારે પુરુષોનો ત્યાગ કરનારી જયા વગેરે સ્ત્રીઓને તો જનોના સમૂહનું બહુપણું હોવાથી નિષેધ કર્યો. (૩૩) 'અમો દુર્ગપુરમાં તત્કાળ આવીશું' આ પ્રકારના વચનથી શાંતિ પમાડીને શ્રીહરિએ મયારામ ભટ્ટ વગેરે જ્યોતિષીઓએ બતાવેલા મુહૂર્તમાં માઘ વદી સાતમને દિવસે દુર્ગપત્તનથી પ્રયાણ કર્યું. (૩૪) ઉત્તમરાજાની સાથે પોતાના પાર્ષદો રતનજી, ભગુજી વગેરે તથા હજારો હજાર સોમ-સૂરાદિ ક્ષત્રિય-શ્રેષ્ઠ ઘોડેશ્વારોથી વીંટાયેલા, વેગવાળા ઘોડા ઉપર બેઠેલા શ્રી સ્વામિનારાયણ ભગવાન બન્ને ભાઈઓ અને મુનિઓની સાથે જ ગઢપુરથી શ્રીનગર પ્રતિ ચાલ્યા. (૩૫-૩૬) માર્ગમાં તેતે ગામોમાં પોતાના ભક્તોના સમૂહોએ પૂજેલા શ્રીહરિ પોતાના અનુયાયીઓએ સહિત પાંચમા દિવસે એકાદશીએ **શ્રીનગર**ને પામ્યા. (૩૭)

શ્રીહરિએ નગરના સમીપ પ્રદેશમાં **કાંકરીયા તળાવ**ની ચોતરફ પોતાનો **નિવાસ** કર્યો. પુરના ભક્તો શ્રીહરિની સમીપમાં આવીને શ્રીહરિની સેવા કરતા હતા. (૩૮) નથ્થુરામ, હેમંતરામ, ગણપત વગેરે બ્રાહ્મણ ભક્તો હર્ષપૂર્વક શ્રીહરિની સેવા કરતા હતા. (૩૯) હીરાચંદ, બેચરદાસ, લાલદાસ, માણેકલાલ, દામોદરદાસ વગેરે વૈશ્યવર્ણના હરિભક્તો શ્રીહરિની યથાયોગ્ય સેવા કરતા હતા. (૪૦) ગંગા, રેવા, દિવાળી, શ્યામા, શિવા, વગેરે પ્રત્યક્ષ શ્રીહરિમાં ભક્તિવાળી સ્ત્રીઓ યથાયોગ્ય સેવા કરતી હતી. (૪૧) બીજાં હજારો હજાર પુરવાસીજનો ભગવાનનાં દર્શન કરવામાં ઉત્સાહવાળા સતા પુરથી બહાર શ્રીહરિના નિવાસ-સ્થાનમાં આવીને શ્રીહરિને જોઈને પરમાનંદ પામ્યાં. (૪૨) નથુરામ, હેમંતરામ વગેરે હરિ ભક્તોએ પોતાના અનુયાયીજનોએ સહિત શ્રીહરિનો યથાયોગ્ય આતિથ્યસત્કાર કર્યો. આનંદાનંદમુનિ શ્રીહરિની સમીપમાં આવીને સાષ્ટાંગ નમસ્કાર કરી પોતાનું વૃત્તાંત શ્રીહરિને કહેતા હતા. (૪૩)

પોતાની મૂર્તિમાં આકર્ષણ કરનાર શ્રીહરિએ **બારસને દિવસે** પારણાં કરી પુરના ભક્તજનોએ પ્રાર્થના કરાયેલા સતા નૂપુરાદિ નાના પ્રકારના આભૂષણોથી અલંકૃત ઘોડા ઉપર બેસીને ગુજરાતની રાજધાની શ્રીનગરીમાં પ્રવેશ કર્યો. (૪૪) હે નૃપ ! તે સમયે સો એ સો અને હજારોહજાર ભક્તજનો શ્રીહરિની આગળ અને બન્ને પડખે અને પાછળ ભેગા થઈને ચાલતા હતા. (૪૫) તે સમયે નગારાં તથા તાસાદિ નાના પ્રકારનાં વાજિંત્રો વાગતાં હતાં. ગાયકો પ્રસન્ન થઈને સારા સ્વરોથી શ્રીહરિના ગુણોને જ ગાતા હતા. (૪૬) હજારો હજાર જનો પોતાના શરીરે અનેક પ્રકારના શક્તિ વગેરે આયુધો બાંધી રહેલા અને યંત્રમય બંદૂક આદિકને ધારણ કરી રહેલા રાજભટો બંદૂકોના અવાજો વારંવાર કરતા થકા ભગવાનની આગળ ચાલતા હતા. (૪૭) પુરનાં જનો ભક્તસમુદાયોની સાથે પુરમાં પ્રવેશ પામેલા મહાયશસ્વી શ્રીહરિને સાંભળીને ઉતાવળથી ત્યાગ કર્યાં છે સમગ્ર કાર્યો જેમણે એવા સતા તત્કાળ પોતાનાં ભવનોમાંથી બહાર નીકળતા હતા. (૪૮) હે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

द्राग्निःसरन्ति स्म बहिर्गृहेभ्यः ॥४८॥ तद्दर्शनात्युत्सुकमानसास्ते विहाय मार्गं कृतपङ्क्तिबन्धाः । परस्परांसार्पितबाहवस्तं प्रतीक्षमाणा अभवन्नरेश! ॥४९॥ निशम्य वादित्रनिनादमुच्चैस्तदागमाशैकनिबद्धनेत्राः । प्रदर्शयन्तः करसंज्ञयेशं दूरादपि प्राञ्जलयः प्रणेमुः ॥५०॥ सितातपत्रेण च चामराभ्यां स राजचिह्नेन विराजमानः । पुरं ददर्शाद्भुतभूरिशोभं हरिर्हरन् नागरमानसानि ॥५१॥ सुगन्धितोयैश्च मदैर्गजानां संसिक्तघण्टापथचत्वरं च । समङ्गलद्रव्यसुवर्णकुम्भरम्भादिभिः प्राङ्गणदर्शनीयम् ॥५२॥ अर्कांशुचञ्चत्पृथुसौधपङ्क्तिश्रियैव नाकभ्रमकृत्सुराणाम् । विराजितं चागुरुधूपदीपैर्ध्वजैः पताकाभिरिवाह्वयत्स्वम् ॥५३॥ तं सम्प्रविष्टं सुमनोहराङ्गं पूर्णेन्दुकान्तं मितहासवक्त्रम् । स्वर्णातपत्रेण च चामराभ्यां राजश्रियं सन्ददृशुर्जनास्ते ॥५४॥ आरुह्य हर्म्याणि पुराङ्गनाश्च त्यक्तान्यकार्याः सहसातिहर्षात् । व्यत्यस्तवस्त्राभरणा गवाक्षस्थिरेक्षणैस्तं पपुरानमन्त्यः ॥५५॥ नानोपहारैर्वणिजोऽतिहर्षात्सम्माननं तस्य च तत्र तत्र । समाचरन्नुज्झितपण्यकार्या भावेन भक्ता इव भक्तिनम्राः ॥५६॥ विप्राश्च तं साक्षतचन्दनेन पुष्पैः सहारैरभिवादनैश्च । समर्चयामासुरुदारभावा उच्चैश्च सामानि जगुः सुकण्ठाः ॥५७॥ सम्मानयन् पौरजनान् यथार्हं बद्धाञ्जलीन् स्वाननदत्तनेत्रान् । स्वामी नवावासमुपेत्य राजंस्ततः शनैरुत्तरति स्म वाहात् ॥५८॥ गृहीत्वाथानन्दमुनेः पाणिं पाणौ स सर्वतः । अपश्यन्मन्दिरं नूत्नं शिल्पिनः प्रशशंस च ॥५९॥ ततो मुहूर्तं तत्रासौ न्यषीदद्भक्तमण्डले । प्राहेहेदृग्मन्दिरं तु जातं नारायणेच्छया ॥६०॥ प्रतिष्ठाविधिनिष्णातान् विप्रान् पृष्ट्वाथ सर्वशः ।

---

નરેશ ! શ્રી હરિકૃષ્ણના દર્શનમાં અતિ ઉત્સાહવાળાં છે મન જેમનાં એવાં પુરનાં જનો માત્ર શ્રીહરિને જવાના માર્ગને જ નહિ રોકીને માર્ગની બંને બાજુએ પરસ્પર ખભામાં અર્પણ કર્યા છે બાહુઓ જેમણે એવા સતા પુરમાં આવતા શ્રીહરિની પ્રતીક્ષા કરતા હતા. (૪૯) અતિ મહાન વાજિંત્રોના શબ્દ સાંભળી શ્રીહરિના આગમનની દિશામાં જ કેવળ બાંધી છે દૃષ્ટિ જેમણે એવા દૂરથી પણ શ્રીહરિને હાથની સંજ્ઞાથી બતાવતા પુરનાં જનો બંને હાથ જોડીને પ્રણામ કરતાં હતાં. (૫૦) રાજચિહ્ન, શ્વેત છત્ર અને સફેદ બે ચામરોથી શોભાયમાન નાગરિક જનોનાં મનોને હરતા શ્રીહરિ આશ્ચર્યજનક ઘણી શોભાવાળા નગરને જોતા હતા. (૫૧) સુગંધીમાન જળો અને મદોન્મત્ત હાથીઓના મદનાં જળોથી છંટાયેલા રાજમાર્ગો અને આંગણાઓ જેમાં છે એવા ચંદન-અક્ષત-પલ્લવ-દૂર્વાંકુરો આદિક માંગલિક દ્રવ્યોની સાથે માંગલિક સુવર્ણકળશો-કેળના સ્તંભો વગેરેથી આંગણા દર્શનીય જેમાં છે, (૫૨) સૂર્યનાં કિરણોથી ચળકતી વિશાળ અને ઊંચી હવેલીઓની પંક્તિઓની શોભાથી દેવતાઓને સ્વર્ગનો ભ્રમ કરનારું, અગરુચંદનના ધૂપ અને દીવાઓથી શોભાયમાન, મહાધ્વજો અને પતાકાઓથી પોતાને બોલાવતું હોય ને શું ? (૫૩) એવા પ્રકારના પુરમાં પ્રવેશ કર્યો છે જેમણે એવા રમણીય આકૃતિવાળા, પૂર્ણચંદ્રમાની માફક સુંદર મંદહાસ્ય યુક્ત મુખારવિંદવાળા, રાજાએ મોકલેલ સુવર્ણ છત્ર અને બંને ચામરોથી **મહારાજાની શોભાવાળા શ્રીહરિને પુરના જનો સુંદર રીતે જોતા હતા.** (૫૪) શ્રીહરિના દર્શનની ઈચ્છાથી તત્કાળ જ ત્યાગ કર્યા છે કાર્યો જેમણે અને ઉતાવળને લીધે વસ્ત્ર અને અલંકારો વિપરીત ધારણ કર્યા છે એવી પુરની સ્ત્રીઓ હવેલીની મેડીઓ તથા અગાશીઓ ઉપર બેસીને નમસ્કાર કરતી સતીઓ જાળિયામાં સ્થિર દૃષ્ટિથી શ્રીહરિને આદરપૂર્વક જોતી હતી. (૫૫) તે તે બજારોમાં વણિક વ્યાપારીઓ ત્યાગ કર્યા છે વેચાતું લેવું દેવું વગેરે કાર્યો જેમણે એવા ભક્તિથી નમ્ર થઈને, ભક્તોની માફક નાના પ્રકારના ઉપહારોથી ભાવપૂર્વક અતિ હર્ષથી શ્રીહરિનું સન્માન કરતા હતા. (૫૬) અને બ્રાહ્મણો મહાપ્રીતિવાળા અક્ષતે સહિત ચંદન-હારે સહિત પુષ્પો અને પ્રણામોથી શ્રીહરિની પૂજા કરતા હતા. સારા કંઠવાળા બ્રાહ્મણો ઊંચા સ્વરથી બૃહદ્રથંતરાદિ સામોનું ગાયન કરતા હતા. (૫૭) હે રાજન્ ! અનંત ઐશ્વર્યશાળી શ્રીહરિ જોડ્યા છે બંને હાથ જેમણે એવા અને પોતાના મુખારવિંદમાં અર્પણ કર્યા છે નેત્રો જેમણે એવાં પુરનાં જનોને યથાયોગ્ય સન્માન કરતા સતા **નવાવાસ સંજ્ઞાવાળી** હવેલીને પામીને પછી ઘોડા થકી ધીરેથી ઊતરતા હતા. (૫૮) પછી શ્રીહરિ આનંદાનંદ મુનિના હાથને પોતાના હાથમાં ગ્રહણ કરી નવીન મંદિર ચોતરફથી જોતા હતા. શિલ્પીઓ અને કોતરણીકામ કરનારાઓની પ્રશંસા કરતા હતા. (૫૯) પછી શ્રીહરિએ મંદિરની સમીપમાં ભક્તોના મંડળની સભામાં બે ઘડી વાર બીછાવેલી પાટ ઉપર બેસીને **'આ નગરમાં આવું મંદિર તો શ્રીનરનારાયણના સંકલ્પથી થયું'** એમ કહ્યું. (૬૦) પછી શ્રીહરિ દેવની પ્રતિષ્ઠાના વિધાનમાં અતિકુશળ પ્રાણગોવિંદ વગેરે બ્રાહ્મણોને પૂછીને શુભ એવા પ્રતિષ્ઠા યોગ્ય સર્વ ઉપચારો નગરવાસીઓ દ્વારા મંગાવતા

आहारयामास शुभानुपहारांश्च नागरैः ॥६१॥ ततः स्वस्थानमभ्येत्य निषसादोच्च आसने । तद्दर्शनार्थमाजग्मुः सायाह्ने च पुरौकसः ॥६२॥ दर्शनं तस्य कर्तुं च प्रत्यहं तत्पुराधिपः । आयाच्च प्राञ्जलिस्तस्थौ पुरतस्तस्य दासवत् ॥६३॥ नृपं स मानयामास यथार्हं सोऽपि तं तथा । भूमिदानगुणं तस्य प्रशशंस हरिस्तदा ॥६४॥ यत्ते कार्यं भवेत्तन्मे वाच्यं दासोऽस्मि ते प्रभो! । इत्युक्त्वा च तमानम्य नृपतिः स्वालयं ययौ ॥६५॥ नामसङ्कीर्तनं कृत्वा ततः कृष्णस्य सत्पतिः । पौरान् विसृज्य स्वावासे विधिं सान्ध्यं समाचरत् ॥६६॥ सभायां प्रत्यहं तस्य माहात्म्यं पूर्तकर्मणः । वदतस्तत्र षट् घस्रा व्यतीयुर्नृपसत्तम!॥६७॥ वादित्रघोषैर्विविधैश्च गीतैः सकौतुकं स्वस्वगृहांश्च नीत्वा । पौराः प्रभुं तं विविधोपचारैः सम्पूजयामासुरवाप्तकामाः ॥६८॥ सन्तोषयन्सर्वजनान् हरिश्च तदर्पितं पत्रमपि स्वदोष्णा । गृह्णन् स वै स्वाश्रितजीववृन्दं संस्थापयामास च धर्ममार्गे ॥६९॥ नानाग्रामपुरेभ्यश्च पुंसां स्त्रीणां च सर्वतः । आजग्मुस्तत्र यूथानि द्रष्टुं तमनुवासरम् ॥७०॥ द्वितीयायां तु भगवान् प्रतिष्ठाविधिसिद्धये । पूर्वावासे नवावासे स्वावासमकरोत्पुरे ॥७१॥ विधिज्ञा ब्राह्मणास्तत्र स्वस्तिवाचनपूर्वकम् । कृत्वा ग्रहमखं चक्रुः पूर्वेऽह्न्येवाधिवासनम् ॥७२॥ तृतीयायां मण्डलेषु दर्शनीयेषु वैदिकाः । अङ्गप्रधानदेवानामर्चनं तमकारयन् ॥७३॥ नरनारायणस्याथ प्रतिष्ठां ते यथाविधि । कारयित्वा महापूजां वेदमन्त्रैरकारयन् ॥७४॥ गीतवादित्रनिर्घोषो द्विजानां ब्रह्मघोषयुक् । सकला व्यानशे काष्ठास्तालिकाध्वनिना तदा ॥७५॥ नीराजनं हरिः कृत्वा नरनारायणस्य च । मुहूर्तमीक्षमाणस्तं तस्थौ तत्पुरतः स्थिरः ॥७६॥ तन्मूर्तियुगलं तर्हि भूरितेजोमयं जनाः ।

---

હતા. (૬૧) પછી શ્રીહરિ નગરથી નિવાસસ્થાનમાં જઈને અતિ ઉચ્ચાસનમાં બેઠા. બારસને દિવસે સાયંકાળે પુરવાસીજનો તેમનાં દર્શન કરવા આવ્યા. (૬૨) શ્રીનગરના અધિપતિ પણ શ્રીહરિનાં દર્શન કરવા માટે દરરોજ આવતા તે શ્રીહરિની આગળ દાસની માફક બંને હાથ જોડીને ઊભા રહ્યા. (૬૩) શ્રીહરિએ રાજાનો યથાયોગ્ય સત્કાર કર્યો. તેમજ રાજા પણ શ્રીહરિને યથાયોગ્ય માન આપતા હતા. આ સમયે શ્રીહરિ રાજાની મંદિર માટે ભૂમિ અર્પણ કરવા રૂપ **ઉપકારની પ્રશંસા** કરતા હતા. અને તે રાજા પણ હે પ્રભો ! તમારુ જે કાર્ય હોય તે મને કહેવું . હું તમારો દાસ છું. આ પ્રમાણે કહીને શ્રીહરિને નમસ્કાર કરીને પોતાના નિવાસસ્થાનમાં ગયા. (૬૪-૬૫) ત્યારબાદ સંતપતિ શ્રીહરિ કૃષ્ણનું નામસંકીર્તન કરીને પુરનાં જનોને નગરમાં જવા આજ્ઞા આપીને પોતાના તંબુમાં આવીને **સંધ્યાવિધિ** કરતા હતા. (૬૬) હે નૃપસત્તમ, દરરોજ સભામાં હરિમંદિરાદિક પૂર્તકર્મના આચરણનું માહાત્મ્ય કહેતા શ્રીહરિને પુરથી બહાર નિવાસમાં છ દિવસો ચાલ્યા ગયા. (૬૭) પુરનાં ભક્તજનો શ્રીહરિને વાજિંત્રોના વિવિધ પ્રકારના શબ્દો-ગીતોની સાથે સહર્ષપૂર્વક પોતપોતાના ગૃહોમાં લઈ જઈ, પોતાના ગૃહમાં શ્રીહરિના આગમનથી સંપૂર્ણ મનોરથવાળા નાના પ્રકારના ઉપચારોથી શ્રીહરિની પૂજા કરતા હતા. (૬૮) શ્રીહરિ સર્વજનોને સંતોષ પમાડતા સતા તેમણે અર્પણ કરેલું પત્ર પણ પોતાના હાથથી ગ્રહણ કરતા સતા **પોતાનાં આશ્રિતજનોને ધર્મમાર્ગમાં સ્થાપન** કરતા હતાં. (૬૯) પુરુષો અને સ્ત્રીઓના સમુદાયો શ્રીહરિનાં દર્શન માટે સર્વ સ્થાનોમાંથી (નાના ગામોમાંથી ) દરરોજ શ્રીનગરમાં આવતા હતા. (૭૦) શ્રીહરિએ બીજને દિવસે, પ્રતિષ્ઠાવિધિની સિદ્ધિ માટે નગરમાં પોતે પહેલાં કરેલા નિવાસમાં (નવાવાસમાં) પોતાનો નિવાસ કર્યો. (૭૧) પ્રતિષ્ઠાવિધિમાં વિધિ જાણનારા બ્રાહ્મણો સ્વસ્તિ વાચનપૂર્વક ગ્રહયજ્ઞ કરી પ્રથમ દિવસે જ પ્રતિષ્ઠાના અંગભૂત **અધિવાસન** કરતા હતા. (૭૨) **સંવત્ ૧૮૭૮ના ફાગણ સુદી તૃતીયા**ને દિવસે વૈદિક પ્રાણગોવિન્દાદિ બ્રાહ્મણોએ રમણીય મંડળોમાં યથાવિધિ અંગદેવતાઓ અને પ્રધાન દેવતાઓનું પૂજન શ્રીહરિ પાસે કરાવ્યું. (૭૩) પછી વિપ્રોએ નરનારાયણની પ્રતિષ્ઠા યથાવિધિ કરાવીને પછી તેમની મહાપૂજા વૈદિક મંત્રો વડે શ્રીહરિ પાસે કરાવી. (૭૪) શ્રીનરનારાયણના મહાપૂજન સમયમાં હાથની તાળીઓના ધ્વનિઓ સાથે વૈદિક બ્રાહ્મણોના વેદમંત્રોના ઉચ્ચારણના ધ્વનિઓ સહિત ગીત-વાજિંત્રોનો ધ્વનિ સમગ્ર દિશાઓમાં વ્યાપી ગયો. (૭૫) શ્રીહરિ **નરનારાયણની મહાઆરતી** કરીને શ્રીનરનારાયણને નિર્નિમેષ દૃષ્ટિથી જોતા સતા સ્થિર અંગવાળા બે ઘડી સુધી તેમની આગળ ઊભા રહ્યા. (૭૬) હે રાજન્ ! તે સમયે જનો પણ શ્રીનરનારાયણની બે મૂર્તિઓને અત્યંત મહાતેજોમય જોઈને પરમ વિસ્મય પામ્યા. (૭૭) પછી શ્રીહરિ શ્રીનરનારાયણને સાષ્ટાંગ અભિવાદન કરી મંદિરથી બહાર

सर्वेऽपि दृष्ट्वा परमं विस्मयं लेभिरे नृप! ॥७७॥ तं नत्वा बहिरेत्याथ हविर्भिः सकलान् सुरान् । तर्पयित्वा द्विजवरैः पूर्णाहुतिमजूहवत् ॥७८॥ कर्माचार्याय च ततो दक्षिणां तदभीप्सिताम् । ऋत्विग्भ्यश्च हरिः प्रादाद्विप्रेभ्यो भूयसीमपि ॥७९॥ तत आरूह्योच्चपीठं जनसङ्घाननेकशः । किञ्चिद्विवक्षुरकरोत् तूष्णीं तान् करसंज्ञया ॥८०॥ तदैव मौनमालम्ब्य स्वाननार्पितदृष्टिषु । स्थितेषु तेषु सर्वेषु स ऊर्ध्वैककरोऽब्रवीत् ॥८१॥ श्रीनारायणमुनिरुवाच – सर्वे शृण्वन्तु मद्वाक्यं जना! वच्मि हितं हि वः । अस्माकमिष्टदेवोऽस्ति श्रीकृष्णः पुरुषोत्तमः ॥८२॥ तेजोमण्डलमध्यस्थो गोलोके यः स एव हि । श्रेयसे सर्वभूतानां प्रादुर्भूतोऽस्ति भूतले ॥८३॥ धर्मदेवेन मूर्त्या च ध्यातोऽतिदृढभक्तितः । प्रादुर्भूतस्तयोरङ्गाद्द्विरूपो वर्णिवेषधृत् ॥८४॥ वरदानेन सन्तोष्य तौ ततः श्रेयसे नृणाम् । नरनारायणाख्योऽसौ बदरीवनमागमत् ॥८५॥ कर्मभूमौ भारतेऽत्र मनुष्याणां स्वसंश्रयम् । प्राप्तानां भुक्तिमुक्त्यर्थं तपः कुर्वन्विराजते ॥८६॥ भूमेर्भारापनुत्यर्थं ब्रह्माद्यैः प्रार्थितः स तु । श्रीकृष्णो यादवकुले कृपयाऽऽविर्बभूव ह ॥८७॥ नरोऽर्जुनाख्यया जातः कुरुवंशे सखा हरेः । तेनार्जुनेन युक्तोऽसौ नरनारायणः स्मृतः ॥८८॥ नरनारायणः सोऽयमत्र सुस्थापितो मया । भक्त्यैतस्य नृणां श्रेयो भविष्यति न संशयः ॥८९॥ नियमेन करिष्यन्ति प्रत्यहं येऽस्य दर्शनम् । ते प्राप्स्यन्ति जना नूनं भुक्तिं मुक्तिं च वाञ्छिताम् ॥९०॥ सेवनादस्य पुत्रार्थी पुत्रं प्राप्स्यति निश्चितम् । धनं धनार्थी विद्यार्थी विद्यां कामं च कामुकः ॥९१॥ एतस्याराधनादिच्छा सर्वा पूर्णा भविष्यति । निष्कामाः सेवनादस्य तरिष्यन्ति भवाम्बुधिम् ॥९२॥ श्रीमद्भागवतादीनां सच्छास्त्राणां तु ये बुधाः। करिष्यन्ति पुरश्चर्यां

---

મંડપમાં આવીને વરેલા બ્રાહ્મણો પાસે ઘી વગેરે હુતદ્રવ્યોથી સમગ્ર દેવતાઓને અગ્નિમાં તે તે દેવતાઓના નામથી આહુતિ આપવાથી અતિ તૃપ્ત કરીને પૂર્ણાહુતિ કરાવતા હતા. (૭૮) પછી શ્રીહરિએ પ્રતિષ્ઠા કર્મમાં આચાર્યપણે વરેલા પ્રાણગોવિન્દ વિપ્રને અને યાજક બ્રાહ્મણોને ઈચ્છિત દક્ષિણા આપી. (૭૯) પછી અમૂલ્ય સિંહાસનમાં બેસીને પોતાના દર્શન માટે આવેલા જનસમુદાયોને કંઈ કહેવા ઈચ્છતા શ્રીહરિએ ઘણા જનસમુદાયોને હાથની સંજ્ઞારૂપી મૌનમુદ્રાથી મૌન કર્યા. (૮૦) તે સમયે મૌન ભાવને આશરીને પોતાના મુખારવિન્દ સામે જેમણે નેત્રો અર્પણ કર્યાં છે એવાં સર્વે જનો સ્થિર થયાં ત્યારે શ્રીહરિ એક હાથ ઊંચો કરીને બોલ્યા : (૮૧)

**શ્રીનારાયણમુનિ કહે છે** : હે જનો ! સર્વે તમો મારું વાક્ય સાંભળો. તમારું હિત કહું છું. પુરુષોત્તમ શ્રીકૃષ્ણ આપણા ઈષ્ટદેવ છે. અક્ષરબ્રહ્મ નામના મહાતેજના સમુદાયના મધ્યમાં રહેલા જે શ્રીકૃષ્ણ તેજ પૃથ્વીમાં સર્વભૂતોના કલ્યાણ માટે પ્રાદુર્ભાવ પામેલા છે. (૮૨-૮૩) ધર્મપ્રજાપતિ અને મૂર્તિ નામની તેમની પત્નીએ અતિ દૃઢ ભક્તિથી ધ્યાન કરાયેલા શ્રીકૃષ્ણ, નારાયણ અને નર આ પ્રમાણે બે રૂપને ધારણ કરનારા વર્ણિવેષને ધારણ કરતા સતા ધર્મ અને મૂર્તિના અંગથી પ્રાદુર્ભાવ પામ્યા. (૮૪) નરનારાયણ નામવાળા શ્રીકૃષ્ણ, મૂર્તિ અને ધર્મને તેમને ઈચ્છિત વરદાનથી સંતોષ પમાડીને પછી મનુષ્યોના કલ્યાણ માટે બદરીવનમાં ગયા. (૮૫) **કર્મભૂમિ રૂપ આ ભારતવર્ષમાં** પોતાને શરણે આવેલા મનુષ્યોની ભુક્તિ અને મુક્તિ માટે તપ કરતા **શ્રીનરનારાયણ** વિરાજે છે. (૮૬) હે જનો ! પૃથ્વીનો ભાર હરવા માટે બ્રહ્માદિ દેવોએ પ્રાર્થના કરાયેલા શ્રીકૃષ્ણ કૃપા કરીને યાદવકુળમાં પ્રગટ થયા. (૮૭) હરિમાં સખાભાવથી વર્તતા નર, મૂર્તિ અને ધર્મના પુત્ર, કુરુવંશમાં અર્જુન નામથી ઉત્પન્ન થયા. અર્જુન સંજ્ઞાવાળા નરે સહિત યદુકુળમાં ઉત્પન્ન થયેલા શ્રીકૃષ્ણ નરનારાયણ કહેલા છે. (૮૮) તે આ **નરનારાયણ** મેં હાલમાં આ મંદિરમાં પધરાવ્યા છે. ને આ નરનારાયણની **મન-વાણી અને શરીરથી સેવા કરવાથી મનુષ્યોનું કલ્યાણ થશે** એમાં સંશય નથી. (૮૯) જે જનો દરરોજ નિયમથી દર્શન કરશે, તે જનો ઈચ્છિત ભુક્તિ અને મુક્તિ પામશે જ. (૯૦) નરનારાયણની શ્રદ્ધાપુરઃસર સેવા કરવાથી પુત્રાર્થી પુત્ર, ધનાર્થી ધન, વિદ્યાર્થી વિદ્યા, કામનાવાળો તેના કામને પામે છે જ. (૯૧) નરનારાયણની આરાધનાથી સર્વે ઈચ્છાઓ પૂર્ણ થશે. નિષ્કામી ભક્તો શ્રીનરનારાયણની સેવાથી સંસારરૂપી સમુદ્ર તરી જશે. (૯૨) જે ડાહ્યા પુરુષો શ્રીમદ્ ભાગવતાદિનું પુરશ્ચરણ અથવા ગાયત્રીનું પુરશ્ચરણ નરનારાયણના મંદિરમાં કરશે તે પુરશ્ચરણકર્તાઓના સર્વે મનોરથો સફળ થશે. તે સર્વેનું આ લોકમાં અને પરલોકમાં કંઈ પણ ઈચ્છિત અધૂરું નહીં રહે, અર્થાત્ સર્વે ઈચ્છિત પૂર્ણ થશે જ.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गायत्र्या वास्य मन्दिरे ।।९३।। सर्वे मनोरथास्तेषां सफला भाविनः किल । इह लोके परस्मिन्वा तेषां न्यूनं न किञ्चन ।।९४।। उत्तराफल्गुनीऋक्षे फाल्गुने मासि दर्शनम् । देशान्तरस्थैरप्येत्य कार्यमस्याखिलार्थदम् ।।९५।। सुव्रत उवाच – इत्याकर्ण्य हरेर्वाक्यं जनाः प्राञ्जलयो नृप! । तथेति जगृहुः सर्वे चक्रुः कृष्णेक्षणं ततः ।।९६।। विप्रांश्च भोज्यैः स सहस्रशोऽथ तदीप्सितैस्तोषयति स्म तत्र । दानैरनेकैरपि दक्षिणाभिर्ब्रह्मण्यदेवो भगवानुदारः ।।९७।। अनेकदेशेभ्य उपागतानां वृन्दैर्नराणामपि योषितां च । वादित्रगीतध्वनिनादिताशैः सुसङ्कुलं तन्नगरं तदासीत् ।।९८।। स्वावासमेत्य स ततो नगरोपकण्ठे स्नात्वा स्वसोदरनिवेशन आश रात्रौ । चक्रे ततश्चतुरशीतिमपि द्विजानां ज्ञातींश्च भोजयितुमेव मनो महात्मा ।।९९।। ततोऽपरेद्युः सकलान् स पौरानागन्तुकांश्चाखिलविप्रसङ्घान् । सुभोजयामास पुराद्बहिस्तत्सरोवरं चाभित आशुकारी ।।१००।। यथेष्टसर्पिर्ग्रहनोदितानां घृतप्रियाणां नृप! गौर्जराणाम् । तत्रोत्सवोऽभूत्सुमहान् द्विजानां सयोषितां भूरि मुदाश्नतां वै ।।१०१।। तान्भोजयित्वाथ च दक्षिणाभिः स तोषयित्वा च गृहान्विसृज्य । सत्तिन्तिडीराजिपरिश्रिते स्वे सुखं न्यषीदद्भरिरूच्चपीठे ।।१०२।। एकस्मिन्नेव दिवसे पौराश्चान्ये सहस्रशः । ब्राह्मणा भोजितास्तेनेत्याश्चर्यमभवन्नृणाम् ।।१०३।। सर्वेषामपि लोकानां तदानन्दो महानभूत् । आबालवृद्धं हि जना जगुस्तस्यैव तद्यशः ।।१०४।। पूजोत्सवव्यवस्थां च सम्प्रदायानुसारतः । पञ्चम्यां कारयामास नरनारायणस्य सः ।।१०५।। तस्मिन्नेव दिने भुक्त्वापराह्णे सानुगस्ततः । नरनारायणं नत्वा निर्ययौ स सतां पतिः ।।१०६।। आनन्दितान् स्वेन मुदानुयातो निवर्तयित्वा पुरवासिनोऽसौ । साकं

---

(૯૩-૯૪) ફાગણ માસમાં ઉત્તરાફાલ્ગુની નક્ષત્રમાં કરવા યોગ્ય પુષ્પદોલોત્સવમાં અન્ય દેશનાં જનોએ પણ આવીને સમગ્ર અર્થને આપનારા શ્રીનરનારાયણનાં દર્શન કરવાં. (૯૫)

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! આ પ્રમાણે શ્રીહરિનું વાક્ય સાંભળીને સર્વેજનોએ બંને હાથ જોડીને 'જેમ તમો કહો છો તે પ્રમાણે કરીશું' એમ શ્રીહરિનું વચન સ્વીકાર્યું. પછી શ્રીનરનારાયણનાં દર્શન કર્યાં. (૯૬) પછી બ્રાહ્મણોને દેવ તરીકે માનનારા મહા ઉદાર સકલ ઐશ્વર્યસંપન્ન શ્રીહરિ નરનારાયણની પ્રતિષ્ઠાને દિવસે હજારો હજાર બ્રાહ્મણોને તેમને ઈચ્છિત ભોજનોથી તૃપ્ત કરતા હતા. અનેક પ્રકારનાં ગાયોના દાનો વગેરે અને દક્ષિણાઓથી પણ તેઓને સંતોષ પમાડતા હતા. (૯૭) તે સમયે અનેક દેશથી આવેલા જે પુરુષો તથા સ્ત્રીઓના પણ વાજિંત્રો તથા ગીતોના ધ્વનિઓથી ગજાવેલી છે દશ દિશાઓ જેમણે એવા **જનસમૂહોથી વ્યાપ્ત શ્રીનગર અત્યંત સંકુચિત થયું.** (૯૮)

પછી શ્રીહરિ નગરની સમીપે પોતાના નિવાસમાં આવીને રાત્રિમાં પોતાના ભાઈના નિવાસમાં જમ્યા. પછી મહાત્મા શ્રીહરિ **બ્રાહ્મણોની ચોરાશી** સમગ્ર જ્ઞાતિઓને જમાડવા માટે પણ સંકલ્પ કરતા હતા. (૯૯) પછી તત્કાળ કાર્ય કરનારા શ્રીહરિ બીજે દિવસે શ્રીનગરથી બહાર કાંકરીયા તળાવની ચોતરફ સમગ્ર પુરના બ્રાહ્મણો અને ગ્રામાન્તરથી આવેલા સમગ્ર બ્રાહ્મણના સમુદાયોને ભોજન કરાવતા હતા. (૧૦૦) હે રાજન્ ! યથેષ્ટ-જેમ પોતાની ઈચ્છા પ્રમાણે ઘી જમો, ઘી જમો એમ શ્રીહરિએ પ્રેરણા કરેલા ઘી પ્રિય જેમને છે એવા સ્ત્રીઓએ સહિત બ્રાહ્મણોને, અતિ આનંદથી કંઠપર્યંત જમનારા ગુજરાત દેશના બ્રાહ્મણોને તે સમયે અતિશય ભોજનાનંદ થયો જ. (૧૦૧) શ્રીહરિ તે બ્રાહ્મણોને જમાડીને તથા દક્ષિણાઓથી સંતોષ પમાડીને પોતપોતાને ઘેર જવાની આજ્ઞા આપી, શોભાયમાન આંબલીઓની પંક્તિઓથી ચોતરફથી વ્યાપેલા પોતાના અતિ ઊંચા સિંહાસનમાં સુખપૂર્વક બેઠા. (૧૦૨) શ્રીહરિએ પુરનાં નિવાસીઓ અને ગ્રામાંતરથી આવેલા હજારો હજાર બ્રાહ્મણો એક દિવસે જ જમાડ્યા. આ જોઈ પુરવાસીજનોને આશ્ચર્ય થયું. (૧૦૩) તે સમયે સર્વે લોકોને પણ મહા આનંદ થયો. બાળકો અને વૃદ્ધો સહિત સર્વ જનો શ્રી સ્વામિનારાયણ ભગવાનની સત્કીર્તિ; **શ્રીનરનારાયણદેવની પ્રતિષ્ઠા** અને એક જ દિવસે **અનંત બ્રાહ્મણોને ભોજન** કરાવવા રૂપ યશ, સર્વદા ગાતા હતા. (૧૦૪) શ્રીહરિ ફાગણ સુદી પાંચમને દિવસે સંપ્રદાયને અનુસરીને નરનારાયણની પૂજા અને ઉત્સવની વ્યવસ્થા કરાવતા હતાં. (૧૦૫) સત્પતિ શ્રીહરિ **પાંચમને દિવસે** જ જમીને સાંજના સમયે નરનારાયણને નમસ્કાર કરીને પોતાના અનુયાયી વર્ગે સહિત શ્રીનગરથી ચાલ્યા. (૧૦૬) હે નરેશ ! નારાયણ શ્રીહરિ, પોતે આનંદ પમાડેલા-હર્ષપૂર્વક પાછળ આવતા પુરના ભક્તોને પાછા વાળીને પોતાના સેવકોની સાથે ગઢપુર આવ્યા. (૧૦૭) પુષ્પદોલોત્સવનાં દર્શન કરવા માટે દુર્ગપત્તનમાં દેશાંતરથી

स्वकीयानुचरैरुपायान्नारायणो दुर्गपुरं नरेश! ॥१०७॥ सङ्गतान्बहुश आत्मसंश्रितान् पुष्पदोलमहदर्शनाय च । वीक्षणेन पुरि तत्र नन्दयन्नेत्य स स्ववसतिं ह्युपाविशत् ॥१०८॥ योषितस्तमवलोक्य सादरं वीततद्विरहवेदनास्तदा । एत्य तं च निकषा ववन्दिरे लेभिरे बहुमुदं जयादयः ॥१०९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे श्रीनरनारायणप्रतिष्ठानिरूपणनामा पञ्चविंशोऽध्यायः ॥२५॥

सुव्रत उवाच – प्रागेवागमनात्तस्य तत्राभूवन् नृपाऽऽगताः । भुजङ्गपुर्या गाङ्गेयमुखा भक्तास्तदीक्षकाः ॥१॥ तं दृष्ट्वा परमानन्दं प्राप्तास्ते तत्र चावसन् । सन्मानिता उत्तमेन हरिणा च कृतादराः ॥२॥ दोलोत्सवोऽथ हरिणा महांस्तत्र स्म कार्यते । तदन्ते स्वस्थमासीनं नत्वा गाङ्गेय आह तम् ॥३॥ भगवन्! नगरेऽस्माकं नरनारायणालयम् । कारय त्वं वयं सेवां करिष्यामो धनादिना ॥४॥ मनोरथोऽयं सर्वेषां पौराणां भवति प्रभो! । तं पूरय समर्थोऽसि त्वदीयाः स्मो वयं यतः ॥५॥ इत्थं तेनेतरैश्चापि प्रार्थ्यमानो निजाश्रितैः । स्वचिकीर्षितमेवेति तत्तथेत्यन्वमोदत ॥६॥ ततश्च वैष्णवानन्दं मुनिं नारायणोऽब्रवीत्। भुजङ्गनगरं गच्छ त्वं सहैतैः समण्डलः ॥७॥ तत्र देवालयं रम्यं कारयोत्तमशिल्पिभिः । जाते देवप्रतिष्ठार्थमहमेष्यामि तत्र वै ॥८॥ एवमुक्तस्तथेत्याह स मुनिः प्राञ्जलिः प्रभुम् । हर्षमापुश्च ते सर्वे भुजङ्गनगरौकसः ॥९॥

---

આવેલા અનેકાનેક પોતાના ભક્તોને પોતાના દર્શનથી આનંદ આપતા શ્રીહરિ પોતાના ભવનમાં આવીને બેઠા. (૧૦૮)

अवतारा दशैवेति नियमो नास्ति मानद! । यतः सर्वनियन्तासौ स्वतन्त्रोऽस्ति जगत्प्रभुः ॥७॥ बहुवाक्यविरोधोऽस्ति दशेति वदतां मते । कस्मिंश्चिदपि सद्ग्रन्थे सङ्ख्या नास्त्यजजन्मनाम् ॥८॥ अवताराः कति हरेरिति जन्मेजयो नृपः । पप्रच्छ हरिवंशे तं वैशंपायन ऊचिवान् ॥९॥ आहुर्वेदविदो विप्रा यं यज्ञे शाश्वतं विभुम् । तस्य विष्णोः सुरेशस्य श्रीवत्साङ्कस्य धीमतः ॥१०॥ प्रादुर्भावसहस्राणि अतीतानि न संशयः । भूयश्चैव भविष्यन्तीत्येवमाह प्रजापतिः ॥११॥ हितार्थं सुरमर्त्यानां लोकानां प्रभवाय च । बहुशः सर्वभूतात्मा प्रादुर्भवति कार्यतः ॥१२॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत! । धर्मसंस्थापनार्थाय तदा सम्भवति प्रभुः ॥१३॥ श्रीमद्भागवते पूर्वं कतिचित्तु समीरिताः । ततः प्रोक्ता असङ्ख्याता आविर्भावा हरेः किल ॥१४॥ अवतारा ह्यसङ्ख्याता हरेः सत्त्वनिधेर्द्विजाः । यथाऽविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥१५॥ इत्युक्तं प्रथमे स्कन्धे द्वितीये ब्रह्मणापि च । उक्त्वाऽवतारान् बहुशस्ततः प्रोक्तमिदं वचः ॥१६॥ नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये । गायन् गुणान् दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥१७॥ दशमे स्तुवता कृष्णमुक्तं वै ब्रह्मणा पुनः । हेतुमुक्त्वाऽवताराणां तस्यासन्निग्रहादिकम् ॥१८॥ को वेत्ति भूमन्! भगवन्! परात्मन्! योगेश्वरोतीर्भवतस्त्रिलोक्याम् । क्वाहो कथं वा कति वा कदेति विस्तारयन् क्रीडसि

---

પ્રજાપતિ (બ્રહ્મા)એ કહેલું છે. (૧૦-૧૧) જીવ-ઈશ્વરાદિ સમગ્ર ભૂતોના આત્મા શ્રી વાસુદેવ પોતાના ભક્ત દેવ-મનુષ્યાદિના હિત માટે અને જનોના ઉદયને માટે અને અનેક પ્રકારના પ્રયોજન માટે ઘણી વાર પ્રાદુર્ભાવ પામે છે. (૧૨) હે ભારત (જન્મેજય) ! જ્યારે જ્યારે વેદમાં કહેલા ધર્મની ક્ષીણતા થાય છે ત્યારે ત્યારે ધર્મના સંસ્થાપન માટે શ્રી વાસુદેવ પ્રાદુર્ભાવ પામે છે. (૧૩) અને **શ્રીમદ્ભાગવતમાં પ્રથમ** કેટલાક અવતારો પ્રથમ-બીજો વગેરે ઉક્તિપૂર્વક કહેલા છે. પછી હરિના અવતારો અસંખ્ય કહેલા છે જ. (૧૪) હે દ્વિજો ! જેમ ક્યારેય પણ ન ખૂટે એવા મહાસરોવરથી નાની નહેરો હજારોહજાર નીકળે છે તેમ હરિના અવતાર અસંખ્યાત થાય છે. આ ભગવાન સત્ત્વનિધિ=સત્ત્વગુણ પ્રધાન ધર્મ સર્ગવાળા ભગવાનના અવતારોના નિધિ-અક્ષય ઉત્પત્તિ સ્થાન હોવાથી અથવા સતઃ = સાધુઓને પ્રાદુર્ભાવ પામીને પરિત્રાણ માટે પ્રાપ્ત થાય છે. માટે સત્ત્વાઃ = અવતારો તેના નિધિ છે. અર્થાત્ સર્વાવતાર ધારણ કરનાર હરિના અસંખ્ય અવતારો થાય છે. (૧૫) આ પ્રકારે શ્રીમદ્ ભાગવતના પ્રથમ સ્કંધમાં ઉગ્રશ્રવાએ શૌનકાદિકોને કહ્યું છે. **દ્વિતીય સ્કંધમાં પણ બ્રહ્મા**એ વરાહાદિ અનેક અવતારો પોતાના પુત્ર નારદને કહીને પછી આ વાક્ય બોલ્યા. (૧૬) નિષ્કારણ અત્યંત કરુણાથી અનેક અવતાર ધારણ કરનારા સદા પુરુષાકૃતિવાળા શ્રીવાસુદેવના અવતારના ચરિત્રોના **અવધિ**ને હું ચતુર્મુખ જાણતો નથી. તમારાથી પ્રથમ ઉત્પન્ન થયેલા સનકાદિ મુનિઓ જાણતા નથી. બીજા મુનિઓ ક્યાંથી જાણી શકે ? બહુ શું કહીએ ? હજાર મુખવાળા આદિદેવ શ્રેષ્ઠ બે હજાર જિહ્વાઓવાળા શેષજી પણ પરમપુરુષના અનેક અવતારોએ કરેલાં ચરિત્રોને વર્ણન કરતા સતા આટલા સમય સુધી પણ પાર પામ્યા નથી. (૧૭) હે દ્વિજ ! ફરીથી પણ શ્રીમદ્ ભાગવતના દશમ સ્કંધમાં શ્રીવૃન્દાવનવિહારીની સ્તુતિ કરતા બ્રહ્માએ શ્રીકૃષ્ણના અવતારોનું-અસત્પુરુષોનો નિગ્રહ અને સાધુઓને અનુગ્રહ કરવારૂપ કારણ કહીને પછી આ પ્રમાણે કહ્યું છે : (૧૮) હે ભૂમન્ ! હે અપાર ઐશ્વર્યાદિ સમ્પન્ન ! હે પરમાત્મન્ ! હે યોગેશ્વર ! જે તમો અવતાર ધારણ કરવામાં ઉપાયભૂત જે માયા તેને વિસ્તારતા સતા દેવાદિમાં અવતાર ધારણ કરીને તેમની સાથે વિહાર કરો છો. આવી તમારી આશ્ચર્યકારી લીલાઓ ત્રિલોકીમાં કયો પુરુષ જાણે છે ? કોઈ જાણતો નથી. લીલાઓ કયા સ્થાનમાં, કયા પ્રકારે, કેટલી અથવા કયા સમયમાં થશે આ પ્રકારે કોણ જાણે છે ? (૧૯) હે દ્વિજ ! પોતે **શ્રીકૃષ્ણે પણ પોતાના અવતારોનું અનંતપણું** મુચુકુન્દ રાજાને શ્રીમદ્ ભાગવતના **દશમ સ્કંધ**માં કહ્યું છે. તે ત્રણ શ્લોકો કહીએ છીએ. (૨૦) હે રાજન્ ! મારા અવતારો અને ચરિત્રો અને નામો અપરિમિત છે. અને તે અનંત હોવાથી હું પણ સંખ્યા કરવા માટે શક્તિમાન નથી જ. (૨૧) ક્યારેય પણ કોઈ માણસ ઘણા જન્મોથી પૃથ્વીની રજકણોને ગણે તોપણ મારા જન્મો અને સત્યાદિ ગુણો અને નામોને ક્યારેય પણ ના જ ગણી શકે. (૨૨) હે અનઘ ! નારદાદિ મહામુનિઓ ભૂત-ભવિષ્ય અને વર્તમાનકાળમાં ઉત્પન્ન થયેલા મારાં જન્મ અને કર્મો અનુક્રમથી ગણતા સતા સંખ્યાના અંતને પામતા નથી જ. (૨૩) હે દ્વિજ ! ભગવાન શ્રીકૃષ્ણે ગીતામાં પણ અર્જુનને કહ્યું છે, હે અર્જુન ! મારા અવતારો અનેક થઈ ગયા અને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

योगमायाम् ॥१९॥ स्वयं कृष्णेन चाप्युक्तं मुचुकुन्दं नृपं प्रति । आनन्त्यं स्वावताराणां तच्छ्लोकत्रयमुच्यते ॥२०॥ जन्मकर्माभिधानानि सन्ति मेऽङ्ग ! सहस्रशः । न शक्यन्तेऽनुसङ्ख्यातुमनन्तत्वान्मयापि हि ॥२१॥ क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः । गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥२२॥ कालत्रयोपपन्नानि जन्मकर्माणि मेऽनघ! । अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥२३॥ गीतायामपि स प्राह भगवानर्जुनं प्रति । बहूनि मे व्यतीतानि जन्मानि तव चार्जुन! ॥२४॥ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ॥२५॥ इत्यादिभिर्हि वचनैः प्रबलैः शतशोऽनघ! । सङ्ख्या हर्यवताराणां साक्रोशं हि निषिध्यते ॥२६॥ दशसङ्ख्याभ्रमं त्यक्त्वा ततः स्वस्थेन चेतसा । कृतावतारो भगवान् श्रयणीयो मुमुक्षुणा ॥२७॥ हरिं विना च प्रत्यक्षमनेकभवसम्भवः । नैव नश्येन्महामोहः सेवनीयस्ततो हि सः ॥२८॥ ब्रह्मज्ञानं न मुक्त्यर्थं प्रत्यक्षं स्याद्विना हरिम् । अत एव सुबोधिन्यां प्रोक्तं श्रीवल्लभेन च ॥२९॥ भक्तानामेव निस्तारः कृतः कृष्णेन संसृतेः । अतो निरोधो भक्तानां प्रपञ्चस्येति निश्चयः ॥३०॥ यावद्बहिः स्थितो वह्निः प्रकटोऽन्तर्विशेन्नहि । तावदन्तःस्थितोऽप्येष न दारुदहनक्षमः ॥३१॥ एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् ।

તારા જન્મો પણ અનેક થઈ ગયા છે. હું હાલમાં યદુકુળમાં પ્રાદુર્ભાવને પામીને સર્વના લક્ષમાં આવતો ક્યારેય પણ પૂર્વે **'ન નાસમ્ '** પ્રાદુર્ભવેલો હતો નહિ એમ નથી પરંતુ પ્રાદુર્ભવ્યો હતો જ. કર્મવશવર્તી તું પૂર્વે જન્મ્યો નહોતો એમ નહીં, જન્મ્યો જ હતો. આ કર્મપરતંત્ર રાજાઓ પૂર્વે જન્મ્યા નહોતા એમ નથી જન્મ્યા હતા જ. આપણે સર્વે ભવિષ્યમાં નહિ હોઈએ એમ નહિ હોઈશું જ. આ પ્રમાણે પોતે અને અર્જુનાદિના દૃષ્ટાંતથી પોતાના અવતારોની અનંતતા અને સત્યતા કહેલી છે. (૨૪-૨૫) હે નિષ્પાપ ! આ પ્રબળ સોએ સો વચનોથી હરિના અવતારોની દશાદિ ગણનાનો આક્ષેપે સહિત નિષેધ કરાય છે. (૨૬) માટે ભગવાનના દસ સંખ્યાવાળા જ અવતારો છે એવી ભ્રાંતિનો ત્યાગ કરીને મુમુક્ષુએ સ્વસ્થ ચિત્તથી સ્વતંત્રપણે હાલમાં ધરેલા અવતારવાળા ભગવાન આશ્રય કરવા યોગ્ય છે. (૨૭) (શંકા:- **'ऋते ज्ञानान्न मुक्तिः'** આ શ્રુતિથી બ્રહ્મજ્ઞાનથી જ મોક્ષની સિદ્ધિ કહી છે તો મુક્તિ માટે ભગવાનનો આશ્રય શા માટે કરવો ? એમ જો કહેતા હોય તો શ્રુતિમાં જ્ઞાન છે તે શ્રીકૃષ્ણ પરમાત્માના સ્વરૂપનું જ કહેલું છે અને તે જ્ઞાન પ્રત્યક્ષ ભગવાનના અવતાર વિના સંભવતું નથી તેથી મોક્ષ માટે મુમુક્ષુએ પ્રત્યક્ષ ભગવાનનો આશ્રય કરીને સેવવા યોગ્ય છે તે વાત કહે છે :) પ્રત્યક્ષ = અત્યંત કરુણાથી સર્વજનોને પ્રત્યક્ષ પ્રાપ્ત થયેલા હરિ વિના અનેક જન્મથી ઉત્પન્ન મહામોહ-વારંવાર સંસારમાં કારણરૂપ અજ્ઞાન નાશ પામે નહિ માટે પ્રત્યક્ષ હરિ સેવા કરવા યોગ્ય જ છે. (૨૮) પ્રત્યક્ષ હરિ વિના પરોક્ષપણે ભગવત્સ્વરૂપનું જ્ઞાન આત્યંતિક મુક્તિ માટે થાય નહિ. **માટે જ શ્રીમદ્ભાગવતની સુબોધિની ટીકામાં શ્રીવલ્લભાચાર્યે કહ્યું છે** : (૨૯) પૃથ્વીમાં પ્રત્યક્ષપણે રહેલાં શ્રીકૃષ્ણ ભગવાને જન્મમરણરૂપ સંસારનો વિનાશ સ્વસ્વરૂપના જ્ઞાનવાળા પોતાનાં આશ્રિતજનોનો જ કરેલો છે. માટે સંસારનો વિનાશ ભક્તોને જ થાય. પરંતુ પરોક્ષ જ્ઞાનવાળાઓને થાય નહિ એવો નિર્ણય છે. (૩૦) કાષ્ઠથી બહાર રહેલો = છાણાં વગેરેને આલંબન કરીને રહેલો પ્રત્યક્ષ અગ્નિ જ્યાં સુધી કાષ્ઠની અંદર પ્રવેશ કરે નહિ ત્યાં સુધી બહારના અગ્નિના પ્રવેશની પહેલાં તેની અંદર રહેલો અગ્નિ પણ કાષ્ઠને બાળવા માટે શક્તિમાન થતો નથી. (૩૧) આવી રીતે સર્વાન્તર્યામી શ્રીકૃષ્ણ જો પ્રત્યક્ષ પ્રાદુર્ભાવ પામીને પોતાના ભક્તોના અંતઃકરણમાં પ્રવેશ કરે નહિ (આ પ્રત્યક્ષપણે રહેલા જ ભગવાન છે એવું જ્ઞાન થાય નહિ) ત્યાં સુધી વારંવાર સંસારમાં કારણભૂત સમગ્ર-પોતાના ભક્તોનું અજ્ઞાન લય પામે નહિ. માટે શ્રીકૃષ્ણનો પ્રત્યક્ષપણે પ્રાદુર્ભાવનો ઉદ્યોગ છે. (૩૨) હે રાજન્ ! આ પ્રકારે મુક્તાનંદ મુનિએ કહેલા તર્કાદિ સમગ્ર શાસ્ત્રના જ્ઞાતા-શોભારામ શાસ્ત્રી દસ અવતાર જ હોય એવી સંખ્યાનો સંશય નાશ પામેલા થયા. બીજા ત્રણ હરિશ્ચંદ્ર-નારૂપંત અને રામચંદ્રે પણ આ લોકમાં પ્રત્યક્ષપણે ભગવાન હોય આ પ્રમાણે નિશ્ચય કર્યો. (૩૩)

તે સમયે **ચિમનરાવ** આ નામવાળા ક્ષત્રિય વીરે પૃથ્વીમાં કળિયુગમાં પણ હરિ પ્રત્યક્ષ હોય તેમ આવાં પ્રબળ પ્રમાણોના શ્રવણથી જાણ્યું. (૩૪) પરંતુ મુક્તાનંદ મુનિના ગુરુ શ્રીહરિના પ્રત્યક્ષ ભગવાનના અવતારભાવમાં સંશય પામેલા બુદ્ધિમાન ચિમનરાવે બુદ્ધિમાન મુક્તાનંદમુનિને પ્રશ્ન પૂછ્યો. (૩૫) હે મુને ! પૃથ્વીમાં કળિયુગમાં પણ નારાયણના અવતારો ઘણા હોય. આ પ્રમાણે તમોએ કહ્યું તે પરં સત્ય છે એમ અમો માનીએ છીએ. (૩૬) હે મહામતે ! મનુષ્યાકૃતિ

तावन्न लीयते सर्वमिति कृष्णसमुद्यमः ॥३२॥ इत्युक्तस्तेन शास्त्री स सद्योऽभून्नष्टसंशयः । त्रयोऽन्येऽपि च निश्चिक्युर्हरिरत्र भवेदिति ॥३३॥ तदा चिन्मयरावस्तु कलावपि हरिर्भुवि । भवेदिति तु वेत्ति स्म प्रमाणप्रबलत्वतः ॥३४॥ किन्तु विष्णवतारत्वे तद्गुरोः प्राप्तसंशयः। प्रपच्छ तं मुनिवरं बुद्धिमन्तं स बुद्धिमान् ॥३५॥ नारायणस्यावतारा: स्युः कलावपि भूतले । इति त्वया यदुक्तं तत्सत्यं मन्यामहे मुने! ॥३६॥ नराकृतिः स भगवानसाधारणलक्षणैः । कैर्विज्ञेयो भुवि चरंस्तन्नो ब्रूहि महामते! ॥३७॥ न धृतः पर्वतो येन न हताश्चासुरा अपि । तादृशोऽपीश्वरो यः स्यात्स ज्ञेयश्च कथं वद ॥३८॥ मुक्तानन्द उवाच – नराकृतिरपि स्वामी चरित्रैः सोऽतिमानुषैः । तद्भक्तलक्षणैश्चापि ज्ञातुं शक्यो मुमुक्षुभिः ॥३९॥ लक्षणानि हरेस्तस्य धर्मं प्राह पुरावनिः । तानि वोऽहं प्रवक्ष्यामि यान्यसाधारणानि हि ॥४०॥ सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥४१॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं

પૃથ્વીમાં ફરતા તમારા ગુરુ શ્રીહરિ કયા **અસાધારણ લક્ષણો**થી આ પ્રત્યક્ષ ભગવાન છે એમ જાણવા. તેનાં અસાધારણ લક્ષણો અમને કહો. (૩૭) જે તમારા ગુરુ ભગવાને પર્વત, શ્રીકૃષ્ણે ગોવર્ધન પર્વત ધારણ કર્યો હતો તેમ ધારણ કર્યો નથી અને દૈત્યો પણ માર્યા નથી. શ્રીકૃષ્ણે બક-અઘ-કંસ વગેરે અસુરો જેમ નાશ કર્યા તેની માફક નાશ કર્યા નથી. તેવા તમારા ગુરુ 'આ પરમેશ્વર છે' એમ કયા પ્રકારે જાણવા તે તમો કહો. (૩૮)

**મુક્તાનંદ મુનિ બોલ્યા** - હે ક્ષત્રિયમાં વીર પુરુષ ચિમનરાવ ! અમારા ગુરુ મનુષ્યાકૃતિથી દેખાય છે તો પણ મનુષ્યોમાં ન સંભવી શકે એવા મહાદુઃખથી સાધ્ય અષ્ટાંગ યોગની સિદ્ધિથી પ્રાપ્ય સમાધિનું બીજાં જનોને સહજમાં સમાધિ કરાવવી વગેરે દિવ્ય ચરિત્રો વડે અને તેમના ભક્તોના કલિયુગમાં અનન્યસાધ્ય નિષ્કામાદિ લક્ષણોએ કરીને તે આ પ્રત્યક્ષ નારાયણ છે એમ મુમુક્ષુઓએ જાણી શકાય છે. (૩૯) પૂર્વે ગાય રૂપે રહેલી પૃથ્વીએ વૃષરૂપે રહેલા ધર્મ પ્રજાપતિ પ્રત્યે ભૂમિ ઉપર મનુષ્યાકૃતિથી પ્રગટ થયેલા હરિનાં જે અસાધારણ લક્ષણો કહ્યાં છે તે હું તમોને કહું છું. (૪૦) **સત્ય**-સર્વ ભૂતોનું હિતકારી યથાર્થ વચન, **શૌચ**- માનસિક, વાચિક, કાયિક-શુદ્ધિ, **દયા**-પરપીડા અસહનપૂર્વક તેના નિવારણની ત્વરા, **ક્ષાંતિ** - પરાપરાધને સહન કરવારૂપ અથવા ક્રોધનિમિત્ત હોવા છતાં પણ ચિત્તને નિયમમાં રાખવું, **ત્યાગ** - પૂર્ણકામ હોવાથી માયિક વસ્તુઓનો અનાદર અથવા અર્થીઓ માટે ઉદારતા રાખવી **સંતોષ** - પોતાના આનંદથી પરિપૂર્ણતા, **આર્જવ** - મન, વાણી અને શરીરની એકરૂપતા જેને સરલતા કહે છે. **શમ** - વિષયોથી મનનું નિયમન, **દમ** - વિષયોથી બાહ્યેન્દ્રિયોનું નિયમન, **તપ** - પ્રકૃતિથી જ કૃચ્છ્રાદિ વ્રતાચરણપરતા, **સામ્ય** - રમણીય અને અરમણીય વિષયોમાં અનાદર હોવાથી તુલ્યતા. **તિતિક્ષા**- સુખદુઃખાદિ દ્વન્દ્વથી પરાભવ નહિ પામવાપણું, **ઉપરતિ** - વૃથા વ્યાપારનો વિરામ, **શ્રુત** - સમસ્ત શાસ્ત્રાર્થનું યથાર્થ જાણવાપણું. **જ્ઞાન** - જીવાત્મા અને ક્ષરાક્ષરાતીત સ્વસ્વરૂપનું યથાર્થ જાણવાપણું, **વિરક્તિ** - વિષયોમાં નિઃસ્પૃહપણું, **ઐશ્વર્ય** - સર્વનું નિયંતાપણું, **શૌર્ય** - સ્વભાવનો વિજય. **તેજ**- કોઈથી પરાભવ ન પામવાપણું, **બળ** - સર્વની પ્રાણવૃત્તિઓને નિયમમાં કરવાનું સામર્થ્ય. **સ્મૃતિ** - કર્તવ્યાર્થનું અનુસંધાન, **સ્વાતંત્ર્ય** - અન્યની નિરપેક્ષતા અથવા અપરાધીનતા. **કૌશલ** - સર્વક્રિયામાં નિપુણતા. **કાન્તિ** - સર્વજનોનાં મન અને નેત્રને હરનારું સ્વાભાવિક નિરવધિ સૌંદર્ય, **ધૈર્ય** - વિષમ દેશકાળાદિકમાં વ્યાકુળતાએ રહિતપણું. **માર્દવ** - સર્વથી પર હોય તો પણ સર્વજનોએ સુખેથી ઉપસેવ્યપણું, **પ્રાગલ્ભ્ય**- નવા નવા તર્ક કરવામાં કુશળ બુદ્ધિ **પ્રશ્રય**- મોટાઓ સમક્ષ વિનય. **શીલ**- સારો સ્વભાવ. **સહ**- મનની પ્રવીણતા. **ઓજ**- જ્ઞાનેન્દ્રિયની ચતુરતા **બળ** - કર્મેન્દ્રિયની પ્રવીણતા, **ભગ**- જ્ઞાનાદિનો ઉત્કર્ષ. **ગાંભીર્ય** - અભિપ્રાય ન જાણી શકાય તે. **સ્થૈર્ય** - ચંચળતાએ રહિતપણું. **આસ્તિક્ય**- સત્શાસ્ત્રોના અર્થોમાં વિશ્વાસ, **કીર્તિ**- યશની ખ્યાતિ **માન**- સમુન્નત ચિત્તપણું, **અનહંકૃતિ**- ગર્વરહિતપણું. **બ્રહ્મણ્યત્વ** - બ્રાહ્મણના હિતપરાયણપણું, **શરણ્યત્વ** - શરણાગતના સંરક્ષણ પરાયણપણું વગેરે અને બીજા પણ અગણિત ગુણો સર્વ બ્રહ્માદિકોએ પ્રાર્થના કરવા યોગ્ય **નિત્ય**-સ્વાભાવિક અમારા ગુરુ **શ્રી સ્વામિનારાયણ વિશે વર્તે છે.** માટે એમને પુરુષોત્તમ જાણો. (૪૧-૪૪) વળી જેમની કૃપાથી પામર પણ શાસ્ત્રના અર્થને નહિ જાણનારો અને અષ્ટાંગ યોગના અભ્યાસે રહિત એવો પણ જન એકદમ જાગ્રત-સ્વપ્ન-સુષુપ્તિ આ ત્રણ અવસ્થા થકી પર, આત્માના અપરોક્ષરૂપ સ્થિતિને પામી જાય છે. (૪૫) આળસે રહિત બ્રહ્માદિ દેવતાઓએ જે મન વશ કરવા માટે અશક્ય છે તે મન જે પોતાના આશ્રિતજનોને વશ વર્તનારું કરે, તે પ્રભુ-પરમેશ્વર જાણવા. (૪૬) અષ્ટાંગ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥४२॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः ॥४३॥ ब्रह्मण्यत्वशरण्यत्वादयोऽन्येऽपि गुणाः प्रभौ । नित्याः सन्तीति जानीत प्रार्थ्या अन्यैरनेकशः ॥४४॥ कृपया यस्य सहसा प्राकृतोऽपि जनो भुवि । जाग्रत्स्वप्नसुषुप्तिभ्यः स्थानं परमवाप्नुयात् ॥४५॥ वशीकर्तुमशक्यं यद्ब्रह्मादिभिरतन्द्रितैः। तन्मनो यो वशे कुर्यात्स्वाश्रितानां च स प्रभुः ॥४६॥ अष्टाङ्गयोगाभ्यसनं विनापि कृपयैव च । यस्य नृणां भवेत्सद्यः स्वस्वरूपेऽचला स्थितिः ॥४७॥ दर्शनं यस्य मूर्तीनां गोलोकादिषु धामसु । भवेच्च सोऽत्र विज्ञेयो भगवान्मानुषाकृतिः ॥४८॥ यस्य भक्ता जितक्रोधा जितकामाश्च निःस्पृहाः । जितस्वादाश्च निर्लोभा निर्मानाः स्युः स वै हरिः ॥४९॥ एतत्सङ्क्षेपतः प्रोक्तमसाधारणलक्षणम् । समं सर्वावतारेषु मया नारायणस्य हि ॥५०॥ अन्यद्यत्तस्य चरितं तत्तु कार्यवशान्ननु । भक्तानां गायनार्थं वा नत्वीशत्वस्य सूचकम् ॥५१॥ गोवर्धनोद्धारणादि चरितं तस्य यत्प्रभोः । इन्द्रादिदर्पनुत्यै तन्नत्वीशत्वस्य सूचकम् ॥५२॥ हिरण्याक्षादयो दैत्याः सकलैरपि पर्वतैः । दध्रुः समग्रां पृथिवीं तावता ते किमीश्वराः ॥५३॥ तस्माल्लक्षणमीशस्य त्वज्ञानाज्जीवमोक्षणम् । सद्धर्मद्रोहिदैत्यानां वधश्चेत्येव निश्चितम् ॥५४॥ असुरा द्विविधा ज्ञेयास्तत्रैके शस्त्रपाणयः । भीषणाकृतयोऽन्ये तु साधुवेषाश्च दुष्क्रियाः ॥५५॥ वधोऽपि द्विविधस्तेषां

---

યોગના અભ્યાસ વિના પણ જેમની કૃપાથી જ મનુષ્યોને તત્કાળ જ પોતાની મૂર્તિમાં અચલ સમાધિસ્થિતિ થાય. (૪૭) ગોલોકાદિ ધામોમાં રહેલી ભગવાનની મૂર્તિઓનાં દર્શન થાય. તથા (ચકારના ગ્રહણથી) જેમના ભક્તોને પોતાના ધામમાં લઈ જવા માટે ભગવાનના પાર્ષદો આવે છે. તેને ભક્તો અને અભક્તો જુએ છે એમ પણ જાણવું. તે માનુષાકૃતિ ભગવાન જાણવા. (૪૮) જે શ્રીહરિના ભક્તો ક્રોધ જીતનારા, કામ જીતનારા, નિઃસ્પૃહી, સ્વાદે રહિત, નિર્લોભી અને નિર્માની હોય તે હરિ પરમેશ્વર જ જાણવા. (૪૯) આ પ્રકારે મેં નારાયણના સર્વાવતારોમાં સમાન **અસાધારણ લક્ષણ** સંક્ષેપથી કહ્યું. (૫૦) ભગવાનના આ કહેલાથી બીજાં કાલીયદમનાદિ ચરિત્ર તે તો કાર્યના-યમુનાનું જળ નિર્વિષ કરવા રૂપ પ્રયોજનના વશપણાથી છે અથવા પોતાના ભક્તજનોને ગાન કરવા માટે છે. તે ચરિત્ર પરમેશ્વરભાવનું સૂચક નથી જ. (૫૧) શ્રીકૃષ્ણ ભગવાનનું ગોવર્ધનનો ઉદ્ધાર વગેરે જે ચરિત્ર તે ઈન્દ્રાદિના ગર્વપરિહાર માટે છે. તે પણ પરમાત્માપણાનું સૂચક નથી. (૫૨) ગોવર્ધનનો ઉદ્ધાર વગેરે ઈશ્વરપણાના સૂચક કહેતા હોય તો હિરણ્યાક્ષાદિ દૈત્યો સમગ્ર પર્વતોએ સહિત સમગ્ર પૃથ્વીને પોતાના હાથોથી ઉખાડીને મસ્તકે ધારણ કરતા હતા. તેટલા માત્રથી હિરણ્યાક્ષ વગેરે દૈત્યો શું પરમેશ્વરના અવતારો છે ? નથી જ. **(પાદ્મપુરાણમાં** :- નિઃપ્રમાણશરીરઃ સન્હિરણ્યાક્ષો મદોદ્ધતઃ। ઉત્પાટય બાહુસાહસ્ત્રૈઃ પૃથિવીં સમહીધરાં સસાગરામ્ । દ્વીપયુતાં સર્વ પ્રાણિભિરાવૃતામ્ । સહસા શિરસા ધાર્ય પ્રવિવેશ રસાતલમ્ । એમ કહ્યું છે.) (૫૩) માટે **પરમેશ્વરનું લક્ષણ** તો જીવમાં રહેલા અનાદિ અજ્ઞાનના પાશથી જીવોને અજ્ઞાનથી રહિત કરવા અને સત્પુરુષો અને ધર્મના દ્રોહીઓ જે દૈત્યો-તેમનો વધ આ જ નિશ્ચે છે. આથી બીજું ઈશ્વરપણાને સૂચન કરનારું લક્ષણ નથી. (૫૪) અસુરો બે પ્રકારના જાણવા. તે અસુરોમાં કેટલાક ધનુષ્ય વગેરે આયુધોવાળા અને ભયંકર આકૃતિવાળા અને બીજા તો સાધુઓનો વેષ ધારણ કરનારા અને પોતાના શિષ્યની સ્ત્રીઓમાં ગમનરૂપ દુષ્ટ ક્રિયાવાળા છે. (૫૫) તે બે પ્રકારના અસુરોનો શસ્ત્રાદિથી તથા શસ્ત્ર વિના પણ અનુક્રમે બે પ્રકારનો વધ છે. તેમાં શસ્ત્રથી વધ છે તે અસુરોનાં મસ્તક છેદવારૂપ છે. શસ્ત્ર વિનાનો વધ છે તે દંભ-દર્પાદિરૂપ જીવિકાનું અપહરણ કરવું; તે અશસ્ત્રવધ કહ્યો છે. (૫૬) વિદ્વાનોએ દૈવી સંપત્તિ યુક્ત જનોની જીવિકા અભયાદિરૂપ દૈવી સંપત્તિ જ કહેલી છે. અસુરોની દંભાદિરૂપ આસુરિ સંપત્તિ જ જીવિકા કહેલી છે. બંને સંપત્તિઓ ગીતામાં શ્રીકૃષ્ણે અર્જુનને કહી છે. (૫૭) **'અભયં સત્ત્વસંશુદ્ધિઃ'** વગેરે દૈવી સંપત્ છે. **અભય** = પ્રતિકૂળ શંકાને લીધે બીજા થકી જે દુઃખની સંભાવના તે ભય કહેવાય છે. ભયે રહિતપણું તે અભય કહેવાય છે. અથવા શાસ્ત્રથી નિવૃત્તિ તે ભય કહેવાય. તેની અનુવૃત્તિ તે અભય કહેવાય. **અંતઃકરણની સંશુદ્ધિ** = રજોગુણ અને તમોભાવથી રહિત, આત્મા અને પરમાત્માના સ્વરૂપનું યથાર્થ જ્ઞાન અને ચિત્તની એકાગ્રતાપણે ધ્યાન એ બેનું નિરંતર નિષ્ઠાપણું. **દાન** = ન્યાયથી ઉપાર્જિત ધન વગેરેનું સત્પાત્રમાં આપવું. **દમ** = બાહ્યેન્દ્રિયોનું નિયમન. **યજ્ઞ** = નિષ્કામ દેવપૂજન. **સ્વાધ્યાય** = વેદાભ્યાસપરતા. **તપ** = શાસ્ત્રવિહિત ભોગનો પણ સંકોચ કરવો. **આર્જવ** = બીજામાં

शस्त्रेणाशस्त्रतस्तथा । शिरच्छेदः शस्त्रवधोऽपरस्तज्जीविकाहृतिः ॥५६॥ देवानां जीविका दैवी सम्पत्प्रोक्ता मनीषिभिः ।आसुरी त्वसुराणां ते गीतायां हरिणोदिते ॥५७॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥५८॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥५९॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत! ॥६०॥ दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ! सम्पदमासुरीम् ॥६१॥ दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता । मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव! ॥६२॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६३॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥६४॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥६५॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः

માનસિક, વાચિક, કાયિક પ્રવૃત્તિઓનું એકરૂપપણું (સરલપણું) **અહિંસા** = પ્રાણીપીડન માત્રથી નિવૃત્તિ. **સત્ય** = પારકા અને પોતાના દ્રોહે રહિત યથાર્થ વચન બોલવું. **અક્રોધ** = ક્રોધનું નિમિત્ત હોવા છતાં પણ ક્રોધે રહિતપણું તે. **ત્યાગ** = ગૃહક્ષેત્રાદિમાં મમત્વનો પરિત્યાગ. **શાંતિ** = વિષયોથી મનનો ઉપશમ. **અપૈશુન** = પરને અનર્થ થાય તેવું વચન ઉચ્ચારણ ન કરવું તે. **દયા** = પારકું દુઃખ ન દેખી શકાય તે. **અલોલુપત્વ** = વિષયોમાં લોલુપતાએ રહિતપણું. **માર્દવ** = ચિત્તની અકઠિનતા. **હ્રી** = અકાર્ય કરવામાં લજ્જા. **અચાપલ** = ઉત્તમ વિષયોની સમીપમાં પણ ચિત્તની અચપળતા. **તેજ** = બીજાથી પરાભવ નહિ પામવાપણું. **ક્ષમા** = બીજાએ પીડા પમાડવા છતાં પણ તેના પ્રત્યે ચિત્તની અવિકારિતા. **ધૃતિ** = મહાપત્કાળમાં પણ ધૈર્યનો ત્યાગ ન કરવો. **શૌચ** = બાહ્યાભ્યન્તર બે પ્રકારની શુદ્ધિ. **અદ્રોહ** = પરનું અનિષ્ટ ન ઈચ્છવું. **નાતિમાનિતા** = પૂજ્યમાં ગર્વ એ અતિમાનિતા કહેવાય. તેણે રહિતપણું. હે ભારત ! આ સર્વ ગુણો દૈવી સંપદાને અભિમુખ કરીને જન્મેલાને ઊપજે છે. આ ગુણો તેને અનુગુણ થાય છે. (૫૮-૬૦)

આસુરી સંપત્તિને અભિમુખ કરીને જન્મેલાને તો દંભ-દર્પાદિ દોષો ઊપજે છે. તેમાં **દંભ** = ધાર્મિકપણાને પ્રસિદ્ધ કરવા માટે ધર્મકર્મમાં પ્રવૃત્તિ **દર્પ** = પારકાના અપમાનને કરનારો ગર્વ **અતિમાન** = હું સર્વેની અપેક્ષાએ ઉત્તમ છું એવો નિશ્ચય, **પારૂષ્ય** = સજ્જનોને ઉદ્વેગ કરે એવું વાણીનું કઠિનપણું **અજ્ઞાન** = કરવા યોગ્ય અને ન કરવા યોગ્યના વિવેકનો અભાવ. હે પાર્થ ! આ સ્વભાવો આસુરી સંપત્તિને અભિમુખ કરીને ઉત્પન્ન થયેલાને ઉત્પન્ન થાય છે. (૬૧) તે બે સંપત્તિમાં દૈવી સંપદા મોક્ષ માટે અને આસુરી તો બંધન માટે માનેલી છે. હે પાંડવ ! તું શોક કરીશ નહિ. તું દૈવી સંપદાને અભિમુખ કરીને ઉત્પન્ન થયેલો છું. (૬૨)

આ લોકમાં બે ભૂત સર્ગ છે. દૈવ અને આસુર એવા ભેદથી વર્તે છે. હે પાર્થ ! દૈવ સર્ગ આટલા વિસ્તારથી કહ્યો. કર્મયોગ, જ્ઞાનયોગ અને ભક્તિયોગના ભેદથી પૂર્વાધ્યાયમાં વિસ્તારથી કહ્યો. અસુર સંબંધી સર્ગને મારાથી સાંભળ. (૬૩) અસુર સર્ગમાં ઉત્પન્ન થયેલા જનો, પ્રવૃત્તિ=અભ્યુદયના સાધનભૂત વૈદિક ધર્મ અને નિવૃત્તિ=મોક્ષના સાધનરૂપ વૈદિક ધર્મ જાણતા નથી. અસુરોમાં શાસ્ત્રસિદ્ધ વૈદિક કર્મની યોગ્યતાને સંપાદન કરનારી બાહ્યાભ્યન્તર શુદ્ધિ જણાતી નથી. મનુ વગેરેએ કહેલો સદાચાર જણાતો નથી. સત્ય પણ છે નહિ. (૬૪) તે અસુરો જગતને અસત્ય કહે છે. સત્ય છે એક મૂળ જેનું એમ કહેતા નથી. પ્રતિષ્ઠાએ રહિત કહે છે. અને અનીશ્વર-ઈશ્વરાધિષ્ઠિત પણ નથી કહેતા. આ સર્વ ભૂતમાત્ર કામથી કરાયેલા જે મિથુન સંયોગ તે મૂળ જેમાં છે એવું છે. જગતમાં સ્ત્રીપુરુષના પરસ્પર સંબંધ વિના ઉત્પન્ન થયેલું શું બીજું છે ? બધું તેમ જ છે એમ કહે છે. (૬૫) આવી દુર્દષ્ટિને અવલંબીને પ્રવર્તતા તે અસુરો નાશ પામેલા ચિત્તવાળા, મંદ મતિવાળા, પોતાનું અને પારકું અહિત કરવાની જ એક પ્રવૃત્તિવાળા, ઘાતકી કર્મ કરનારા થઈ જગતના નાશ માટે જ (સર્પ-સિંહ-ભૂતપ્રેતાદિ રૂપે) ઉત્પન્ન થાય છે. (૬૬) કલ્પપર્યંત વિષયભોગોથી ન પૂરી શકાય એવી પ્રાકૃત વિષયની ઈચ્છાનો આશ્રય કરીને અજ્ઞાનથી અસત્, ગ્રાહરૂપી વિષયોને ગ્રહણ કરીને દંભ, માન, મદથી યુક્ત અપવિત્ર વ્રતોવાળા સતા રાજસ્, તામસ્ દેવતાના આરાધનાદિમાં પ્રવર્તે છે. (૬૭) પ્રલય = મરણ છે અંત જેનો એવી અપરિમેય ચિંતાને આશરેલા, કામનો ઉપભોગ એ જ પરમ પુરુષાર્થ જેમને છે આટલા નિશ્ચયવાળા. (૬૮) આશા રૂપી અનેક પાશોથી બંધાયેલા, કામ અને ક્રોધ એ જ આશ્રય જેમને છે. કામ ભોગને માટે અન્યાયથી ધનનો સંચય કરવા ઈચ્છે છે. (૬૯) મેં આ ક્ષેત્રપુત્રાદિ સર્વ હાલમાં મેળવ્યું છે આ મનોરથને હું જ મારા સામર્થ્યથી પામીશ. આ ધન મારું છે. આ ધન મને ફરીથી પણ મારા સામર્થ્યથી જ પ્રાપ્ત થશે. (૭૦) મેં આ શત્રુને પોતાના સામર્થ્યથી નાશ કર્યો. શૂરવીર અને ધીર હું બીજા

। प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥६६॥ काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः । मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥६७॥ चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः । कामोपभोगपरमा एतावदितिनिश्चयाः ॥६८॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥६९॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥७०॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥७१॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥७२॥ अनेकचित्तविभ्रान्ता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥७३॥ आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥७४॥ अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥७५॥ इति दैवीमासुरीं च सम्पदं च तयोः फलम् । कृष्णः सविस्तरं प्राह विविच्यैवार्जुनं प्रति ॥७६॥ यदा दैत्याः शस्त्रभृतो जायन्ते भुवि दुष्क्रियाः । तदाविर्भूय भगवान् शस्त्रपाणिर्निहन्ति तान् ॥७७॥ यदा ते साधुवेषाः स्युर्दुराचारास्तदा प्रभुः । अशस्त्रो हन्ति तान् हत्वा कामक्रोधादिजीविकाम् ॥७८॥ तेषां सम्पदि नष्टायामासुर्यां हरिशक्तितः। नश्यत्वेवाऽऽसुरत्वं हि देवत्वं समुदेति च

શત્રુઓને પણ નાશ કરીશ માટે હું ઈશ્વર સ્વાધીન સતો જ બીજાઓનો નિયંતા છું, હું સ્વતંત્ર જ ભોગવનારો છું. હું પોતે જ સિદ્ધ સંકલ્પવાળો છું. હું બળવાન છું, હું સુખી = સ્વતંત્ર સુખ સંપન્ન છું. (૭૧) હું મારા સામર્થ્યથી ધનવાન છું. ઉત્તમ કુળમાં જન્મેલો છું આ લોકમાં મારા સમાન બીજો કોઈ નથી. હું યજ્ઞ કરીશ, હું આપીશ, હું આનંદ પામીશ, ઈશ્વરના અનુગ્રહ વિના પોતે યાગ, દાનાદિ કરવા, શક્તિમાન છું. **આવી રીતે અવિવેકથી વિમોહને પામેલા પ્રવર્તે છે.** (૭૨) અદૃષ્ટ ઈશ્વરાદિ સહકાર વિના પોતે જ કરવા માટે શક્ય છે એમ કરીને આવી રીતે કરું. આ કરું, બીજું કરું. આ પ્રકારે અનેક ચિત્તથી વિક્ષેપ પામેલા મોહરૂપી જાળથી સારી રીતે આવરણ પામેલા કામના ઉપભોગોમાં અત્યંત આસક્તિવાળા આસુરો મરીને પાચ, વિષ્ટા, મૂત્રાદિથી પરિપૂર્ણ **અત્યંત અપવિત્ર નરકમાં પડે છે.** (૭૩) પોતે જ પૂજ્યપણાને પામેલા પરંતુ કોઈ સજ્જનોએ નહિ પૂજાયેલા માટે જ અનમ્ર, ધનથી જે માન અને મદથી યુક્ત આસુરો નામમાત્ર યજ્ઞોથી, દંભથી-ધર્મધ્વજીપણાથી પણ શ્રદ્ધાથી નહિ; **અવિધિપૂર્વક** પોતાના અનુગુણથી દેવોને આરાધે છે. (૭૪) બીજાની અપેક્ષા રહિત હું કરું છું એવો અહંકાર, બળ, દર્પ, કામ અને ક્રોધને આશરેલા પોતાના અને પારકા દેહોમાં રહેલા ક્ષેત્રજ્ઞ-આત્માઓમાં અંતર્યામીપણે રહેલા મને, ભગવાન ક્યાં છે વગેરેથી પ્રદ્વેષ કરતાં **ગુણોમાં દોષોનો આવિષ્કાર કરનારા હોય છે.** (૭૫) હે ચિમનરાવ ! આ પ્રકારે કૃષ્ણ અર્જુનના પ્રત્યે દૈવી અને આસુરી બંને સંપત્તિઓનું ફળ વિવેચના કરીને જ વિસ્તારે સહિત કહે છે. (૭૬) પૃથ્વીમાં જ્યારે આયુધધારી દૈત્યો હિંસાદિ દુષ્કૃત કરનારા ઉત્પન્ન થાય છે ત્યારે ભગવાન મનુષ્યાદિમાં ઉત્પન્ન થઈને હાથમાં **આયુધો ધારણ કરીને** શસ્ત્રધારી દૈત્યોના મસ્તકનો છેદનપૂર્વક **નાશ** કરે છે. (૭૭) જ્યારે તે દૈત્યો સાધુના વેષવાળા શિષ્યની સ્ત્રીઓ પ્રત્યે ગમનાદિ દુરાચરણવાળા હોય ત્યારે શ્રીહરિ શસ્ત્રો ધારણ નહિ કરીને કામ-ક્રોધાદિ જીવિકા, **તેમની આસુરી વૃત્તિ**નો નાશ કરી (દોષ પ્રદર્શનપૂર્વક યુક્તિયુક્ત ઉપદેશથી નાશ કરી) તે દૈત્યોનો નાશ કરે છે. (૭૮) શ્રીહરિના સામર્થ્યથી દૈત્યોની આસુરી સંપત્તિ નાશ પામ્યે સતે આસુરપણું નાશ પામે છે જ, દૈવી સંપત્તિ પણ ઉત્પન્ન થાય છે. (૭૯) તે આ દેવદત્તો (અહીંયા દેવદત્ત શબ્દ ગમે તે જનનો વાચક છે.) હરિના પ્રતાપથી હાલમાં દૈવી સંપત્તિને પામેલા હોવાથી-નવીન છે. પૂર્વની માફક આસુરી સ્વભાવવાળા નથી. આ પ્રકારે સમગ્ર બીજા લોકો પણ આશ્ચર્યપૂર્વક કહે છે. (૮૦) ભગવાન, કૃપાથી આવિર્ભાવ પામેલા સમગ્ર ઐશ્વર્યસંપન્ન શ્રીહરિ જે કોઈ ઉપાયથી પૃથ્વીમાં ભાગવત ધર્મ સ્થાપન કરતા સતા પોતાના આશ્રિતજનોને અનાદિ અજ્ઞાનપાશના બંધનથી તત્કાળ જ મુકાવે છે. (૮૧) મહાપાતકી જીવોનું પણ પ્રત્યક્ષ ભગવાનના આશ્રયમાત્રથી કલ્યાણ થાય, માટે મનુષ્યોએ ભક્તિથી પ્રત્યક્ષ ભગવાન જ આશ્રય કરવા યોગ્ય છે. (૮૨) સમગ્ર પરમેશ્વરપણાના સૂચક લક્ષણોવાળા અમારા ગુરુ સમગ્ર જગતપ્રસિદ્ધ **શ્રીસ્વામિનારાયણ** નામના **આચાર્યેન્દ્ર** આ લોકમાં વર્તે છે. માટે અમારા ગુરુને પ્રત્યક્ષ પરમેશ્વર કહું છું. કેવળ ગુરુમાત્રથી કહેતો નથી. (૮૩) હિંસાદિ દુષ્ટ ક્રિયાનું આચરણ કરનારા પણ હજારોહજાર પુરુષો અમારા ગુરુના આશ્રયમાત્રથી ત્યાગ કરી છે આસુરી ક્રિયા જેમણે એવા છે. તેવા પુરુષો પૃથ્વીમાં પ્રસિદ્ધ છે. (૮૪) આ લોકમાં સોએ સો અને હજારોહજાર પુરુષો શ્રીહરિના આશ્રિત



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

॥७९॥ लोका अन्ये च साश्चर्यं तान्वदन्त्यखिला अपि । देवदत्ता इमे नूत्ना न तु ते प्राक्तना इति ॥८०॥ येन केनाप्युपायेन सद्धर्मं भगवान्भुवि । स्थापयन्स्वाश्रितान्सद्यो मोचयत्येव बन्धनात् ॥८१॥ तदाश्रयेण जीवानां महापातकिनामपि । कल्याणं स्यादतो भक्त्याऽऽश्रयणीयः स वै नृभिः ॥८२॥ अस्मद्गुरुश्च सकलैरैश्वर्यैर्लक्षणैरिह। सम्पन्नोऽस्तीति तं वच्मि भगवन्तं न गौरवात् ॥८३॥ सहस्रशो दुराचाराः पुमांसोऽपि तदाश्रयात् । मुक्तासुरक्रियाः सन्ति प्रसिद्धास्ते च भूतले ॥८४॥ योगाभ्यासं विनैवात्र शतशश्च सहस्रशः । जनाः समाधिं यान्तीति प्रत्यक्षं दृश्यतेऽखिलैः ॥८५॥ अन्तकाले च तद्भक्तान् नेतुं तत्पार्षदा अपि । आयान्तीतीक्ष्यते भक्तैरभक्तैश्च क्वचित्क्वचित् ॥८६॥ ईश्वरोऽतः स एवेति सुज्ञैर्निश्चीयते जनैः । अत्र चेत्संशयः कश्चित्पृच्छतोत्तरदोऽस्म्यहम् ॥८७॥ सुव्रत उवाच - इति तस्य मुनेर्निशम्य वाचं गलिताभ्यन्तरसर्वसंशयास्ते । स्वमतं परिहाय तं प्रणेमुः श्रुतपूर्वं विविदुर्हरिं च विष्णुम् ॥८८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे त्रियुगशब्दार्थनिर्णये भगवदवतारासाधारणलक्षणनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥३७॥

सुव्रत उवाच - ततो बद्धाञ्जलिपुटास्त ऊचुर्नृप! तं मुनिम् । अस्माकं संशयाः सर्वे विनष्टा मुनिपुङ्गव! ॥१॥ त्वादृशाः साधवोऽस्माभिर्यथाशास्त्रार्थबोधकाः । निजानुभवसिद्धाश्च नैव दृष्टा हि भूतले ॥२॥ सन्तः सन्त्यत्र ये ते तु

લોકો યમાદિ અષ્ટાંગયોગના અભ્યાસ વિના જ સમાધિને પામે છે. આ ઐશ્વર્ય સમગ્રજનોને પ્રત્યક્ષ જેમ હોય તેમ દેખાય છે. (૮૫) અંતકાળે શ્રીહરિના ભક્તોને ગોલોક ધામમાં લઈ જવા માટે ભગવાનના દિવ્ય પાર્ષદો આવે છે, પોતે પણ આવે છે. આ આશ્ચર્ય ક્યારેક ક્યારેક **ભક્તોએ અને અભક્તોએ** પ્રત્યક્ષ જોવાય છે. (૮૬) અમારા ગુરુ પરમેશ્વરનાં લક્ષણોવાળા હોવાથી અમારા ગુરુ જ પરમેશ્વર છે. આ પ્રમાણે શાસ્ત્રોક્ત ભગવાનના લક્ષણોને જાણનારા જનોએ નિશ્ચય કરાય છે. આ મારા કહેલા અર્થમાં જો સંશય હોય તો તમો પ્રશ્ન કરો. હું તમારા પ્રશ્નનો ઉત્તર આપનાર છું. (૮૭)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે મુક્તાનંદમુનિની વાણી સાંભળીને નષ્ટ થયા છે પોતપોતાના અંતઃકરણના સર્વ સંશયો જેમના એવા તે રામચંદ્રાદિ વાદીઓ પોતાના મતનો ત્યાગ કરીને મુક્તાનંદ મુનિને પ્રણામ કરતા હતા. પહેલાં જનોથી સાંભળ્યો છે મહિમા જેમનો એવા **શ્રીનારાયણમુનિને** સર્વાન્તર્યામી **શ્રીપુરુષોત્તમ** જાણતા હતા. (૮૮)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે ત્રિયુગશબ્દાર્થનિર્ણય ભગવદવતારાસાધારણલક્ષણનિરૂપણનામા સપ્તત્રિંશોઽધ્યાયઃ (૩૭)*

## અધ્યાય : ૩૮

### નિઃસંશય થયેલા વાદીઓનો પરાજય અને શ્રીહરિને પરમાત્મા જાણીને તેમણે કરેલો શ્રીહરિનો સમાશ્રય વર્ણન કરેલો છે.

**સુવ્રતમુનિ બોલ્યા** : હે રાજન્ ! પછી બંને હાથ જોડીને તે વાદીઓ મુક્તાનંદ મુનિને કહેવા લાગ્યા : હે મુનિશ્રેષ્ઠ ! અમારા સર્વે સંશયો નાશ પામ્યા. (૧) યથાર્થ શાસ્ત્રના સિદ્ધાંતને જણાવનારા, પોતાના અનુભવસિદ્ધ તમારા જેવા સાધુઓ પૃથ્વીમાં જોયા નહિ. (૨) અમારા પુરમાં જે સંતો-લૌકિક સાધુઓ છે તે તો દંભથી ઠગ્યા છે મનુષ્યો જેમણે એવા સ્ત્રી-દ્રવ્ય અને રસમાં આસક્તિવાળા, શાસ્ત્રને જાણનારા છતાં પણ શાસ્ત્રને ન જાણતા હોય ને શું એવા છે. (૩) અમોએ સ્વામિનારાયણ અને તેમના સાધુઓને તે તે જનો થકી જરૂર સાંભળ્યા છે. પરંતુ તમોએ કહ્યા પ્રમાણે **શ્રીસ્વામિનારાયણ ભગવાનનું માહાત્મ્ય** જેમ હોય તેમ કોઈએ પણ કહ્યું નહિ. (૪) આ પુરના નિવાસી સંતો તો પ્રત્યક્ષ શ્રીસ્વામિનારાયણના ગુણોમાં દોષો આરોપણ કરી **તેમને અનાદિ માયાના પાશથી બંધાયેલા બીજા પુરુષના સમાન** કહેતા હતા. કોઈ પણ અહીંના સાધુ તેમને માયાના પાશથી મુકાવનારા પોતાના આશ્રયમાત્રથી જીવોને અનાદિ અજ્ઞાનના બંધનના નિવારણ કરનારા છે એમ કહેતા નહોતા. (૫) આ પુરમાં અમો મહા ધૂર્તો છીએ. સભામાં મહા પંડિતને પણ ક્ષણમાત્રથી પરાજીત કરીએ છીએ. કોઈને પણ તમારાથી ભિન્ન સાધુ વગેરેને નમસ્કાર કરતા નથી. (૬) તમોએ **શ્રીસ્વામિનારાયણ** નામના **ગુરુના અનુગ્રહથી આજે જ અમોને રોકાયેલી વાણીવાળા કર્યા.** માટે તમારા ગુરુ **પરમેશ્વર** અમોએ સારી રીતે જાણ્યા.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

दम्भवञ्चितमानवाः। स्त्रीद्रव्यरससंसक्ता विद्वांसोऽप्यबुधा इव ॥३॥ स्वामिनारायणोऽस्माभिस्तत्सन्तश्च श्रुताः खलु । माहात्म्यं त्वीदृशं तस्य स्फुटं केनापि नोदितम् ॥४॥ गुणेषु दोषानारोप्य सन्तोऽत्रत्यास्तु मायिकम् । तमाहुर्न तु कोऽप्याह मायापाशविमोचकम् ॥५॥ वयं महान्तो धूर्ताः स्मो विद्वांसमपि संसदि । क्षणात्परास्तं कुर्मोऽत्र प्रणमामो न कञ्चन ॥६॥ गुरोः प्रसादादद्यैव त्वया मूकाः कृता वयम् । अतः स ईशो विज्ञातोऽन्यथास्मान् कः पराजयेत् ॥७॥ अद्यप्रभृति तस्य स्म इति जानीहि निश्चितम् । अतो मुमुक्षूनस्मांस्त्वं तत्पार्श्वे नेतुमर्हसि ॥८॥ सुव्रत उवाच – तेषामिति वचः श्रुत्वा प्रसन्नः स मुनिर्नृप! । निश्चिकाय मुमुक्षूंस्तांस्त्यक्तदम्भानुवाच च ॥९॥ समीचीना मतिर्वोऽस्ति यूयं खलु मुमुक्षवः । स्वामिवार्ता मनसि वः प्रविशेत्कथमन्यथा॥१०॥ अत्रागत्य प्रतिदिनं श्रव्यास्तस्य गुणा द्विजाः! । तेन दुःसङ्गजास्तर्का नङ्क्ष्यन्ति सकला अपि॥११॥ सत्सङ्गेनैव माहात्म्यमादौ बुद्ध्वा तु तस्य ये । कुर्वन्ति दर्शनं तेषां जायतेऽतिसुखाय तत् ॥१२॥ युष्माकं हृदये सम्यग्जाते तन्निश्चये वयम् । तदन्तिकं गमिष्यामः सहिता नात्र संशयः ॥१३॥ इत्याश्रुत्य मुनेर्वाक्यं प्रसन्नमनसो हि ते । तं प्रणम्य निजं स्थानं जग्मुः साश्चर्यचेतसः ॥१४॥ ये त्वन्य आगतास्तत्र ते दृष्ट्वा तत्पराजयम् । त्रस्ताश्च विस्मिताः किञ्चिन्नोक्त्वा तूर्ष्णीं ययुर्गृहान् ॥१५॥ सैव वार्ता प्रतिगृहं बभूव नगरे ततः । ये ये मुमुक्षवस्ते ते तं मुनिं शरणं ययुः ॥१६॥ स मुनिर्वादिनो जित्वा नाप किञ्चन विस्मयम् । हरेः प्रतापं तं जानन् निजहृत्पद्मसंस्थितेः ॥१७॥

---

જો એમ ના હોય તો અમોને તમારા વિના બીજો કોણ પરાભવ કરે. અર્થાત્ કોઈ પણ **પરાભવ** ના કરી શકે. (૭) આજથી આરંભીને અમો શ્રીસ્વામિનારાયણ ભગવાનના છીએ. આ પ્રકારે નિશ્ચે જાણો. માટે તમો મુમુક્ષુ એવા અમોને શ્રીહરિની પાસે લઈ જવા માટે યોગ્ય છો. (૮)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રમાણે રામચંદ્રાદિનું વચન સાંભળીને હર્ષિત મનવાળા મુક્તાનંદ મુનિ રામચંદ્રાદિને જેમણે દંભનો ત્યાગ કર્યો છે એવા માટે જ મુમુક્ષુઓનો નિશ્ચય કરી અને તેમના પ્રત્યે બોલ્યા. (૯) હે વિપ્રો ! તમારી બુદ્ધિ અતિ શુદ્ધ છે. તમો મુમુક્ષુઓ નિશ્ચે છો. એમ ના હોય તો તમારા મનમાં શ્રીસ્વામિનારાયણનું પરમેશ્વરપણાનું વૃત્તાંત કેમ પ્રવેશ કરે ? અર્થાત્ ના જ કરે. (૧૦) હે બ્રાહ્મણો ! દરરોજ મારી સમીપમાં આવીને શ્રીહરિના ગુણો સાંભળવા. તેના શ્રવણથી કુસંગથી થયેલા સમગ્ર તર્કો નાશ પામશે. (૧૧) જે પુરુષો પ્રથમ સત્સંગથી જ શ્રીહરિનું માહાત્મ્ય જાણીને શ્રીહરિનું દર્શન કરે છે તે પુરુષોને શ્રીહરિનાં દર્શન પરમ આનંદ માટે થાય છે. (૧૨) તમારા હૃદયમાં શ્રીહરિનો પરમેશ્વરપણાનો સારી રીતે નિશ્ચય થયે સતે આપણે સાથે મળીને શ્રીહરિની સમીપમાં જઈશું એમાં સંશય કરવો નહિ. (૧૩) હે રાજન્ ! આ મુક્તાનંદ મુનિનું વચન સાંભળીને પ્રસન્ન મનવાળા રામચંદ્રાદિ વિસ્મિત મનવાળા થઈને મુક્તાનંદ મુનિને પ્રણામ કરી પોતપોતાના સ્થાનમાં ગયા. (૧૪) તે સભામાં જે બીજા આવેલા હતા તે તો રામચંદ્રાદિનો પરાભવ જોઈને ત્રાસ પામેલા અને આશ્ચર્ય પામ્યા સતા કંઈ પણ નહિ બોલીને પોતપોતાનાં ભવનોમાં ગયા. (૧૫) પછી **વટપત્તનમાં** દરેક ગૃહોમાં, **દરેક ભવનોમાં શ્રીસ્વામિનારાયણ ભગવાન છે.** આ પ્રકારની જ વાર્તા થઈ. પછી જે જે મુમુક્ષુઓ હતા તે તે મુક્તાનંદ મુનિને શરણે આવ્યા. (૧૬) મુક્તાનંદ મુનિ પોતાના હૃદયકમળમાં સદા સ્થિતિ જેમની છે એવા શ્રીહરિનો **વાદી પરાજય લક્ષણ પ્રતાપ**ને જાણતા સતા વાદીને જીતીને પણ કંઈ પણ આશ્ચર્ય પામ્યા નહિ. (૧૭) હે ભૂમિપ ! મુક્તાનંદ મુનિ, જે જનો પુરના હતા તે લોકો પોતાની સમીપમાં આવ્યા તે પુરવાસી લોકોને પણ બોધ આપીને શ્રીહરિનો આશ્રય જ સારી રીતે કરાવતા હતા. (૧૮) વળી તે રામચંદ્રાદિ બ્રાહ્મણો પણ દરરોજ મુક્તાનંદમુનિની સમીપમાં આવીને ભગવાનની વાર્તાઓને આદરથી જ સાંભળતા હતા. (૧૯) પછી શ્રીહરિનું માહાત્મ્ય અક્ષરપરત્વાદિ મહામહિમાના શ્રવણથી પ્રતિદિન રામચંદ્રાદિને પ્રત્યક્ષ ભગવાન શ્રીનારાયણ મુનિમાં અતિશય વૃદ્ધિ પામી. અને તેમના દર્શનની ઈચ્છા અતિશય થઈ. (૨૦) પછી મુક્તાનંદ મુનીન્દ્ર રામચંદ્રાદિને પ્રત્યક્ષ શ્રીહરિમાં દર્શનની ત્વરા જોઈને રામચંદ્રાદિને કહેવા લાગ્યા, હે વિપ્રો ! તમો શ્રીહરિનું ધ્યાન કરો. તે શ્રીહરિ આ પુરમાં જ તમોને દર્શન આપશે, જ. (૨૧) શ્વેત વસ્ત્ર ધારણ કરનારા, નવીન મેઘ સમાન અંગના વર્ણવાળા, વર્ણિવેશવાળા મનોહર શ્રીહરિને ધ્યાન કરો. હે રાજન્ ! આ પ્રકારે મુક્તાનંદ મુનિએ કહેલા રામચંદ્રાદિ પણ મુક્તાનંદ મુનિની સમીપે તેમના કહ્યા પ્રમાણે આચરણ કરતા હતા. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ये जनाः स्वान्तिकं प्रापुर्बोधयित्वा स तानपि । हरेरेवाश्रयं सम्यक्कारयामास भूमिप! ॥१८॥ रामचन्द्रादयस्तेऽपि तदन्तिकमुपेत्य च । प्रत्यहं भगवद्वार्ता आदरेणैव शुश्रुवुः॥१९॥ दिने दिने रतिस्तेषामवर्धत हरौ ततः । माहात्म्यश्रवणात्तस्य तद्दिदृक्षा महत्यभूत् ॥२०॥ तेषां भगवति श्रद्धां दृष्ट्वाथाह मुनिः स तान् । ध्यानं कुरुत तस्यात्र दास्यते दर्शनं हि सः ॥२१॥ सिताम्बरं घनश्यामं वर्णिवेषं मनोहरम् । तं ध्यायथेति तेनोक्तास्तेऽपि तत्र तथाऽऽचरन् ॥२२॥ स्वस्तिकासनमासीनास्तद्वाक्याप्तप्रतीतयः । ध्यायन्तस्ते हरिं साक्षाद्ददृशुः सद्य आत्मनि ॥२३॥ सितप्रकाशमध्यस्थं तं दृष्ट्वातिमनोहरम् । आनन्दं परमं प्रापुः समाधेरुत्थितास्ततः ॥२४॥ विनष्टसंशयव्रातास्तद्दर्शनमहामुदः । भक्तिं तस्य ततो नित्यं विदधुर्मुन्यनुज्ञया ॥२५॥ स्वाश्रितांश्च स्वविश्वासांस्ततः प्रोचुर्जनांश्च ते । श्रेयइच्छा भवेद्येषां ते यान्तु शरणं मुनिम् ॥२६॥ तेषां तं निश्चयं दृष्ट्वा पौरा लोकाः सहस्रशः । हरेः समाश्रयं चक्रुस्तदीयाश्चाखिला जनाः ॥२७॥ नारुपन्तः सिंहजितं भूमिपालमशेषतः । वृत्तं तत्कथयामास स तच्छ्रुत्वाप विस्मयम् ॥२८॥ ततो वसन्तपञ्चम्यां सैन्येन महता वृतः । स तत्समीपमागत्य प्रणनाम महामतिः ॥२९॥ आदृतो मुनिना तेन पृष्टश्चानामयं नृपः । उपविष्टस्तत्समीपे प्रार्थयामास तं ततः ॥३०॥ साधूनां भवतामेव प्रसादादस्ति मे सुखम् । अधुना तु विशेषेण सुखितोऽस्मि त्वदीक्षणात् ॥३१॥ अत्र त्वया कृपां कृत्वा यथा दत्तं स्वदर्शनम् । तथा त्वद्गुरुणा देयमिति तं प्रार्थयेद्भवान् ॥३२॥ दिदृक्षा महती चित्ते वर्तते तस्य

સ્વસ્તિક આસનથી બેઠેલા તેમના વાક્યમાં પ્રતીતિવાળા તમોને શ્રીહરિનાં દર્શન નિશ્ચે થશે. મુક્તાનંદ સ્વામીના વચનમાં વિશ્વાસવાળા રામચંદ્રાદિ શ્રીહરિનું ધ્યાન કરતા સતા તત્કાળ જ પોતપોતાના અંતઃકરણમાં પ્રત્યક્ષ શ્રીહરિને જોતા હતા. (૨૩) અક્ષરબ્રહ્મનામના શ્વેત તેજઃપુંજના મધ્યમાં અતિ મનોહર શ્રીહરિને જોઈને પરમાનંદ પામ્યા. પછી સમાધિથી ઊભા થયા. (૨૪) પછી નાશ પામ્યા છે સંશયના સમુદાયો જેમને એવા, પ્રત્યક્ષ શ્રીહરિના દર્શનથી અત્યાનંદયુક્ત રામચંદ્રાદિ મુક્તાનંદ મુનિની આજ્ઞાથી દરરોજ શ્રીહરિની ભક્તિ કરતા હતા. (૨૫) પછી રામચંદ્રાદિ, પોતાનો આશ્રય કરનારા જનોને અને પોતાના ઉપર વિશ્વાસવાળા જનોને 'જેમને કલ્યાણની ઈચ્છા હોય તે **મુક્તાનંદ મુનિને શરણે જાઓ'** એમ કહેતા હતા. (૨૬) તે રામચંદ્રાદિનો પૂર્વે કહેલો નિશ્ચય જોઈને હજારોહજાર પુરના લોકો સમગ્ર અને રામચંદ્રાદિને આશરેલા લોકો મુક્તાનંદ મુનિની સમીપમાં જઈને શ્રીહરિનો સમાશ્રય કરતા હતા. (૨૭)

નારૂપંત નામના રાજાના કારભારીએ **સયાજીરાવ રાજાને** પૂર્વે થયેલું વૃત્તાંત સમગ્ર કહ્યું. સયાજીરાવ મહારાજ તે વૃત્તાંત સાંભળીને આશ્ચર્ય પામ્યા. (૨૮) પછી મહાબુદ્ધિશાળી રાજાએ માઘ સુદી પંચમીને દિવસે મહાસેનાથી વીંટાયેલા સતા મુક્તાનંદમુનિની સમીપમાં આવીને પ્રણામ કર્યો. (૨૯) પછી તે મુનિએ સન્માન કરાયેલા અને સુખી છો આ પ્રમાણે પુછાયેલા રાજા મુક્તાનંદ મુનિની સમીપમાં મુનિએ આપેલા આસન ઉપર વિનયૂપર્વક બેઠા. અને તે મુનિને પ્રાર્થના કરવા લાગ્યા : (૩૦) હે મુનીન્દ્ર ! આ લોકમાં જે કાંઈ પણ સુખ વર્તે છે તે આપના જેવા સાધુઓના અનુગ્રહથી જ છે. હાલમાં તો તમારા દર્શનથી વિશેષ સુખી થયો છું. (૩૧) જેમ તમોએ કૃપા કરીને આ પુરમાં આવીને પોતાનાં દર્શન આપ્યાં તેવી રીતે તમારા ગુરુ શ્રીહરિએ અમોને પોતાનાં દર્શન આપવાં. આ પ્રમાણે તમો શ્રીહરિને પ્રાર્થના કરો. (૩૨) હે અનઘ ! મારા ચિત્તમાં શ્રીહરિને જોવા માટે અતિશય ઈચ્છા છે. માટે તમો દયાળુએ મારું પ્રાર્થના કરાયેલું કાર્ય શ્રીહરિની આગળ નિવેદન કરવું. આ પ્રમાણે હું તમોને પ્રાર્થના કરું છું. (૩૩)

આ પ્રકારે શ્રીહરિના દર્શનમાં ઉત્સાહવાળા સયાજીરાવ રાજાએ પ્રાર્થના કરાયેલા; **પરમકરુણાવાળા મુક્તાનંદ મુનિ બોલ્યા,** હે રાજન્ ! તમોએ પોતાના મનમાં આ ઘણો સુંદર નિશ્ચય કર્યો. પરમેશ્વર શ્રીહરિ તો સ્વતંત્ર છે તો પણ હું પ્રાર્થના કરીશ. (૩૪) હે રાજન્ ! તમો સુજ્ઞ છો, માટે જ સત્ય અને અસત્યના વિવેકને જાણનારા-બુદ્ધિમાન અને ધર્મનિષ્ઠ છો જ. તમારે વ્યાવહારિક રાજકાર્યો ઘણાં હોય છે. (૩૫) વ્યવહારકાર્યોમાં પણ અવકાશ લાવીને શ્રીહરિના સ્વરૂપનું ધ્યાન સહિત તેમના નામનું સ્મરણ કરવું તે પરલોકમાં મહાસુખ આપનારું છે. બીજું સુખ આપનારું નથી જ. (૩૬) હે નરેન્દ્ર ! શાસ્ત્રમાં નિષ્ણાત બુદ્ધિવાળા પુરુષોને જો શમ, દમ, શીલ, દયા વગેરે ગુણો હોય તે ગુણોનું ફળ ભગવાનના ચરણકમળમાં પ્રીતિ એ જ શાસ્ત્રમાં કહેલું છે. (૩૭) જો પોતાનું મન શ્રીહરિના ચરણકમળમાં ભક્તિથી અતિ દૃઢ સ્થિતિ ના પામ્યું હોય તો સંસારસાગરમાં ભમવાના કારણથી ભગવાનની ભક્તિ વિના બીજા ગુણોના સમુદાયોથી શું ફળ થાય?

मेऽनघ! । अत एतत्त्वया कार्यमिति त्वां प्रार्थयाम्यहम् ॥३३॥ मुकतानन्द उवाच - समीचीनं त्वया राजन्नेतद्व्यवसितं हृदि । स्वतन्त्रोऽस्ति स तु स्वामी प्रार्थयिष्ये तथाप्यहम् ॥३४॥ त्वं हि सुज्ञोऽसि भूपाल! सदसद्व्यक्तिवित्सुधीः । व्यावहारिककार्याणि तव सन्ति बहूनि च ॥३५॥ तत्राप्यानीयावकाशं कर्तव्यं हरिचिन्तनम् । तदेव परलोकेऽस्ति सुखदं नेतरत् खलु ॥३६॥ निपुणमतिमतां गुणाश्च ये स्युः शमदमशीलदयादयो हि तेषाम् । फलमिदमुदितं नरेन्द्र! शास्त्रे भगवत एव पदाम्बुजे रतिर्या ॥३७॥ यदि हरिचरणाम्बुजे स्वचित्तं दृढतरसंस्थितिमाप्नुयान्न भक्त्या । इतरगुणगणेन किं तदानीं भवजलधिभ्रमहेतुना फलं स्यात् ॥३८॥ भवदवशिखिदग्धमानसानां निरवधि शैत्यसुखं विचिन्वतां वै । हरिचरणसरोजमेकमेव श्रुतिगदिताखिलसौख्यमूलमस्ति ॥३९॥ पदकमलसमीक्षणेन साक्षात्प्रभवति सौख्यमिति ध्रुवं न चित्रम् । अपि भवपरितापितोऽन्तरात्मा हरिगुणसंश्रवणेन शान्तिमेति ॥४०॥ अघभरहरणेऽत्र भक्तिभाजां प्रभवति नाम हरेर्हि तन्न चित्रम् । अपि विवशजनैरुदीरितं यद्दुरितचयं विनिहन्ति सद्य एव ॥४१॥ समवति परितोऽन्यदुर्निवार्यान्निजजनमान्तरबाह्यवैरिसङ्घात् । क्षणमपि च न विस्मरत्यमुं यज्जगति ततः प्रभुनाम तस्य सार्थम् ॥४२॥ स्थिरचरतनुधारिणां स आत्मा वपुरसुधीन्द्रियपाशसंवृतानाम् । हृदयसरसिजेऽस्ति दिव्यमूर्तिर्भुवि सदनुग्रहतः स लभ्यते च ॥४३॥ चरणकमलमेतदीयमेव प्लवमिह ये विबुधाः श्रयन्ति तूर्णम् । पृथुभवजलधिं त एव नूनं सपदि तरन्त्यपरांस्त्वदन्ति

---

કંઈ પણ થતું નથી. (૩૮) સંસાર રૂપી દાવાનળથી બળેલા અંતઃકરણવાળા ને અનંત શીતલ સુખને ખોળનારા પુરુષોને એક શ્રીહરિનાં ચરણકમળ જ સમગ્ર સુખનું મૂળ **'રસો વૈ સઃ રસં હ્યેવાડયં લબ્ધ્વાનન્દી ભવતિ'** આ શ્રુતિએ કહેલું છે. (૩૯) સમગ્ર જનોને પ્રત્યક્ષ વર્તમાન ભગવાનના ચરણકમળના જોવાથી અખંડ સુખ ઉત્પન્ન થાય છે. એમાં આશ્ચર્ય નથી, જેથી સાંસારિક અધ્યાત્માદિ ત્રિવિધ તાપથી તપેલું અંતઃકરણ પ્રત્યક્ષ ભગવાનના ગુણના શ્રવણમાત્રથી શાંતિ પામે છે. (૪૦) પ્રત્યક્ષ હરિમાં બુદ્ધિપૂર્વક નવ પ્રકારે ભજન કરનારા જનોના પાપના પુંજના નિવારણમાં પ્રત્યક્ષ ભગવાનના નામોચ્ચારણ માત્ર જ સમર્થ થાય છે એ આશ્ચર્ય નથી. જ્વરાદિ રોગોથી અવ્યવસ્થિત ચિત્તવાળા જનોએ પણ જે હરિનામ ઉચ્ચારણ કરાયેલું સતું તત્કાળ જ પાપના સમુદાયને નાશ કરે છે. (૪૧) જેથી, જે હરિ પ્રત્યક્ષ ભગવાન વિના અન્ય કોઈ પણ ઉપાયથી નિવારણ ના થઈ શકે એવા અંતઃકરણના અને બહારના (કામક્રોધાદિ અને જીવિકાદિને નાશ કરનારા) શત્રુઓના સમુદાયથી પોતાના આશ્રિતજનોનું સર્વ પ્રકારે રક્ષણ કરે છે અને તે પોતાના જનને ક્ષણ કાળ પણ વિસારતા નથી. માટે વિશ્વમાં ભગવાનનું પ્રભુ નામ સાર્થક છે. (૪૨) શરીર, પ્રાણ, અંતઃકરણ અને શ્રોત્રાદિ બાહ્ય ઈંદ્રિયો રૂપી પાશોથી વીંટાયેલા સ્થાવર - જંગમ દેહને ભજનારા શરીરધારીઓના હૃદયકમળમાં શ્રીહરિ તેના તેના કર્મફળને આપનારા અંતર્યામી થઈને વર્તે છે. પૃથ્વીમાં દિવ્યમૂર્તિ શ્રીહરિ તેમના આશ્રિત સાધુ જનોની કૃપાથી આ પ્રત્યક્ષ ભગવાન છે એમ યથાર્થ નિશ્ચયપૂર્વક આશ્રય કરાય છે. (૪૩) આ લોકમાં જે બુદ્ધિશાળી પુરુષો પ્રત્યક્ષ ભગવાનના ચરણકમળરૂપી નૌકાનો જ આશ્રય કરે છે તે જ તત્કાળ મહા સંસારરૂપી સમુદ્રને નિશ્ચે તરે છે. જે પુરુષો ભગવાનના ચરણકમળરૂપી નૌકાનો આશ્રય નથી કરતા તેમને મગર-મચ્છાદિગ્રાહની માફક કામક્રોધાદિ તત્કાળ જ ખાઈ જાય છે. માટે તમો પણ મહાસુખની પ્રાપ્તિ માટે પ્રત્યક્ષ શ્રીહરિનો આશ્રય કરો. (૪૪)

**સુવ્રતમુનિ કહે છે** - હે રાજન્ ! આ પ્રકારે મુક્તાનંદ મુનીન્દ્રે કહેલા અત્યંત પ્રસન્ન થયેલા સિંહજીત રાજા મુનિ સમીપે બે ઘડી વાર બેસીને મુનિને પ્રણામ કરી પછી પોતાના મહેલમાં ગયા. (૪૫) હે રાજન્ ! મુક્તાનંદ મુનિએ પ્રતિદિન ઘણાં પુરવાસી લોકોને શ્રીહરિનો સમાશ્રય કરાવતા સતા વડોદરામાં સાડાત્રણ માસ નિવાસ કર્યો. (૪૬) પછી મુનિએ શ્રીહરિનાં દર્શન માટે વડોદરાથી જવા માટે ઈચ્છા કરી. તે સમયમાં શ્રી દુર્ગપત્તનથી શ્રીહરિએ મોકલેલો સંદેશો લાવનાર દૂતે મુનિની સમીપમાં આવીને શ્રીહરિ આમલકી એકાદશીને દિવસે ગઢપુરથી વૃત્તાલયમાં આવશે એમ કહ્યું. (૪૭) પછી મુનિ નાથજી વગેરે અને રામચંદ્રાદિ ભક્તજનોની સાથે ફાગણ સુદી એકાદશીની તિથિમાં વૃત્તાલયમાં આવ્યા. (૪૮) તે સમયે રામચંદ્ર વગેરેએ શ્રીનારાયણમુનિનાં દર્શન કર્યાં. વડોદરામાં સમાધિમાં જોયેલા જ શ્રીહરિને જોઈને અતિશય આનંદ પામ્યા. (૪૯) મુક્તાનંદમુનિએ વડોદરામાં થયેલું સમગ્ર વૃત્તાંત શ્રીહરિને કહ્યું. તે વૃત્તાંત સાંભળીને પ્રસન્ન થઈને શ્રીહરિએ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नक्राः ॥४४॥ सुव्रत उवाच- **एवमुक्तः स मुनिना हृष्टो राजा घटीद्वयम् । तत्र स्थित्वा प्रणम्याथ तं ययौ निजकेतनम् ॥४५॥ हरेः समाश्रयं नित्यं कारयन् बहुशो जनान् । सार्धमासत्रयं तत्र मुनिः स न्यवसन्नृप! ॥४६॥ ततो जिगमिषां चक्रे दर्शनार्थं हरेस्ततः । तावद्दूत उपेत्याह तस्य वृत्तालयागमम् ॥४७॥ ततो नाथजिदाद्यैश्च रामचन्द्रादिभिः सह । वृत्तालयमुपेयायाऽऽमलक्येकादशीदिने ॥४८॥ ते हरेर्दर्शनं चक्रू रामचन्द्रादयस्तदा । समाधिदृष्टमेवैनं दृष्ट्वापुः परमां मुदम् ॥४९॥ तत्रत्यमखिलं वृत्तं मुक्तानन्द उवाच तम् । तच्छ्रुत्वा स प्रसन्नस्तं प्रशशंस च सादरम् ॥५०॥ इत्येतत्ते निगदितं यत्पृष्टं भवतानघ! । मुक्तानन्दः कथं जिग्ये वटपत्तनवादिनः ॥५१॥ इत्थं हरेर्भगवतो भवति प्रतापो देशान्तरेऽपि ननु येन समाधिसिद्धिः । सद्यो भवत्यकृतयौगिकसाधनानां नृणामपि प्रचुरयोगजुषां दुरापा ॥५२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे त्रियुगशब्दार्थनिर्णये वादिपराजयतत्कृतहरिसमाश्रयनिरूपण-नामाष्टत्रिंशोऽध्यायः ॥३८॥

राजोवाच - **हरेः कथामृतं पीत्वा तृप्तिर्नास्ति मुने! मम । पाययातस्तदेव त्वं करुणानिभृतो ह्यसि ॥१॥ एत्य दुर्गपुरं स्वामी वृत्तालयपुरात्स्वयम् । किं किं चकार तन्मे त्वं वद शुश्रूषवेऽखिलम् ॥२॥** सुव्रत उवाच - **शृणु त्वं राजशार्दूल! रसज्ञोऽसि विशुद्धधीः । कथयाम्यन्यदपि ते चरितं धर्मजन्मनः ॥३॥ भक्तग्रामेषु निवसन् हरिर्वृत्तालयात् पथि ।**

---

મુક્તાનંદમુનિની સત્કારપૂર્વક પ્રશંસા કરી. (૫૦) હે અનઘ ! મુક્તાનંદ મુનિ વડોદરાપુરના વાદીઓને કેવી રીતે જીત્યા આ પ્રમાણે તમોએ પૂછેલું એ તમોને મેં સંક્ષેપથી કહ્યું. (૫૧)

હે રાજન્ ! આ પ્રકારે ભગવાન શ્રીહરિનો પ્રતાપ છે, જે પ્રતાપથી દેશાંતરમાં પણ જેણે યોગનાં સાધનો કર્યા નથી એવા જનોને પણ તત્કાળ જ સમાધિસિદ્ધિ થાય છે. જે સમાધિસિદ્ધિ ઘણાં અષ્ટાંગયોગની સિદ્ધિના સાધનના અભ્યાસ કરનારાઓને પણ દુર્લભ છે. (૫૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે ત્રિયુગશબ્દાર્થ નિર્ણયે વાદિપરાજયતત્કૃતહરિસમાશ્રયનિરૂપણનામાષ્ટત્રિંશોઽધ્યાયઃ (૩૮)*

## અધ્યાય : ૩૯

### વડતાલમાં શ્રીહરિનું ફરીથી પધારવું તથા હેમંતસિંહરાજા તથા પુંજજીતરાજાનું અભીષ્ટ પૂર્ણ કર્યું તે તથા ધર્મજન્મના મહોત્સવનું વર્ણન કર્યું છે.

**રાજા બોલ્યા** : હે મુને ! હરિના કથામૃતનું પાન કરીને મને તૃપ્તિ થતી નથી. માટે શ્રીહરિનું કથામૃત જ મને પાન કરાવો. કારણકે તમો કરુણાપૂર્ણ અંતઃકરણવાળા છો. (૧) પોતે શ્રીહરિએ વૃત્તાલયપુરથી ગઢપુર જઈને શું શું ચરિત્ર કર્યું તે સર્વ ચરિત્ર શ્રવણ કરવા ઈચ્છતા મને તમો કહો. (૨) **સુવ્રતમુનિ બોલ્યા** - હે રાજશાર્દૂલ ! તમો સાંભળો, કારણ કે શ્રીહરિનાં ચરિત્ર સાંભળવામાં નિર્મળ અંતઃકરણવાળા છો. તેથી હું ધર્મદેવથી જન્મવાળા શ્રીહરિનું બીજું પણ ચરિત્ર તમોને કહું છું. (૩) શ્રી હરિ વૃત્તાલયથી નીકળીને માર્ગમાં ભક્તોનાં ગામોમાં નિવાસ કરતા સતા વૈશાખ સુદી પ્રતિપદાને દિવસે પ્રાતઃકાળમાં ગઢપુર આવ્યા. (૪) પછી શ્રીહરિએ સ્નાન કરીને આહ્નિક વિધિ કરીને કૂર્મજન્મનો મહોત્સવ કર્યો. સાધુ-બ્રાહ્મણો અને વર્ણિઓને સન્માનપૂર્વક મિષ્ટાન્નોથી જમાડ્યા. (૫) તે દિવસે જ વૈશાખ સુદી પડવાને દિવસે ગઢપુરમાં હેમંતસિંહ નૃપતિ જુનાગઢથી આવ્યા અને ધોલેરાથી પુંજજીત રાજા આવ્યા. (૬) તે બંને હેમંતસિંહ અને પુંજજીત રાજા એક જ સમયમાં ઉત્તમરાજાના દરબારમાં ભેગા થયા. પરસ્પર અનામય-કુશળતાનાં સમાચાર પૂછીને શ્રીહરિની સમીપમાં આવ્યા. (૭) બંને રાજાઓ પોતાના સિંહાસનમાં સુખેથી બેઠેલા શ્રીહરિને પ્રણામ કરી શ્રીહરિની આજ્ઞાથી તેમની આગળ બેઠા. શ્રીહરિએ બંને રાજાઓનો સત્કાર કર્યો. (૮) પછી શ્રીહરિના દર્શનથી અતિશય આનંદવાળા બંને રાજાઓ ઉત્તમરાજાના ગૃહમાં ઉત્તમરાજાએ આદરપૂર્વક માન આપેલા સતા પોતાનો નિવાસ કરતા હતા. (૯) પછી બંને રાજાઓ ચંદનયાત્રાના ઉત્સવના અંતમાં પોતાના સિંહાસનમાં બેઠેલા શ્રીહરિને નમસ્કાર કરીને શ્રીહરિની આગળ બેઠા. (૧૦) **હેમંતરાજા શ્રીહરિને** એકાંતમાં પોતાના અભિપ્રાયને નિવેદન કરવાનો અવસર જોઈને બંને હાથ જોડીને શ્રીહરિને કહેવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

राधशुक्लप्रतिपदि प्रापद्दुर्गपुरं प्रगे ॥४॥ स्नात्वा कृत्वाह्निकं चक्रे कूर्मजन्मोत्सवं ततः । साधून्विप्रान्वर्णिनश्च भोजयामास सादरम् ॥५॥ तस्मिन्नेव दिने जीर्णदुर्गात्तत्रायया नृप! । हेमन्तसिंहो धौरेयात् पुञ्जजिच्च नृपः पुरात् ॥६॥ एककालमुपायातौ गोपुरं तौ परस्परम् । मिलित्वानामयं पृष्ट्वा हरेरन्तिकमीयतुः ॥७॥ सुखासीनं हरिं तौ च प्रणम्य तदनुज्ञया । निषेदतुस्तत्पुरतो मानयामास तौ स च ॥८॥ वेश्मन्युत्तमभूपस्य स्वावासं चक्रतुस्ततः । सादरं मानितौ तेन हरीक्षाप्तमहामुदौ ॥९॥ ततश्चन्दनयात्राया उत्सवान्ते च तौ हरिम् । पीठे निषण्णं स्वावासे नत्वाग्रेऽस्य निषेदतुः ॥१०॥ विज्ञापनावकाशं तं दृष्ट्वा प्राञ्जलिराह तम् । हेमन्तसिंहो नृपतिर्भगवन्! शृणु मे वचः ॥११॥ मन्दिरं जीर्णदुर्गे त्वं राधाकृष्णस्य कारय । ममान्येषां च भक्तानां पौराणां प्रियमस्त्यदः ॥१२॥ अस्मद्देशस्याधिपतिर्वर्तते यवनेश्वरः । नाम्ना बह्वादरः सोऽपि ह्येतदेवानुमोदते ॥१३॥ एतं मनोरथं स्वामिन्नस्माकं प्रतिपूरय । पूर्यन्त ईदृशा ह्यद्य त्वया भक्तमनोरथाः ॥१४॥ इत्युक्त्वा विरराामासौ पुञ्जजिन्नृपतिस्ततः । प्राञ्जलिर्भगवन्तं तं तद्वदेवावदन्नृप! ॥१५॥ मनोरथो ममाप्येष मदीयानां च सर्वशः । अस्ति धौरेयपुर्यां यद्विधाप्यं मन्दिरं त्वया ॥१६॥ एवं ह्युभाभ्यां भक्ताभ्यामर्थ्यमानो हरिर्हसन् । उवाच मानयंस्तौ च भक्तेच्छापरिपूरकः ॥१७॥ युवाभ्यां शुद्धबुद्धिभ्यामिदं सम्यग्विचारितम् । चिकीर्षितं ममाप्येतद्वर्तते खलु सुव्रतौ! ॥१८॥ मन्दिरे कारयिष्यामि पुर्योर्वामुभयोरपि। तत्र च स्थापयिष्यामि श्रीकृष्णमहमेत्य वै ॥१९॥ एवमुक्त्वा स तौ भक्तौ ब्रह्मानन्दमुवाच च । सह हेमन्तसिंहेन जीर्णदुर्गं व्रजानघ! ॥२०॥ मन्दिरं शोभनं तत्र कारयेराश्मनं दृढम् । कृष्णप्रतिष्ठासमये तत्रायास्याम्यहं मुने!

લાગ્યા-હે ભગવન્ ! મારું વચન સાંભળો. (૧૧) હે પ્રભો ! તમો જુનાગઢ જે મારા નગરમાં **રાધાકૃષ્ણનું મંદિર** કરાવો અને મંદિર કરાવવાનું મારા બીજા પુરવાસીઓને પણ પ્રિય છે. (૧૨) અમારા દેશના અધિપતિ નામથી બહાદર યવનેશ્વર છે. તે પણ આ મંદિર કરવામાં અનુમોદન આપે છે. (૧૩) હે સ્વામિન્ ! અમારો આ મનોરથ પૂર્ણ કરો. હાલમાં તમોએ આવાં મંદિરો કરવારૂપ ભક્તોના મનોરથો પૂરા કર્યા છે. (૧૪) હે રાજન્ ! આ પ્રકારે કહીને હેમંતસિંહ રાજા મૌન રહ્યા. પછી **પુંજજીત રાજાએ** બંને હાથ જોડીને ભગવાનને હેમંતસિંહ રાજાની માફક કહ્યું. (૧૫) હે સ્વામિન્ ! તમોએ ધોલેરા નગરમાં મંદિર કરાવવું, મારો અને મારા સર્વે જનોનો પણ આ મનોરથ છે. (૧૬)

હે રાજન્ ! આ પ્રકારે હેમંતસિંહ અને પુંજજીત રાજાએ પ્રાર્થના કરાયેલા ભક્તોની ઈચ્છા પૂર્ણ કરનાર શ્રીહરિ હસતા સતા પોતાના બંને ભક્ત રાજાઓને માન આપતા સતા બોલ્યા. (૧૭) હે સુવ્રતો ! શુદ્ધ બુદ્ધિવાળા તમો બંનેએ આ સારો વિચાર કર્યો. મારે પણ તે કરવાની ઈચ્છા છે જ. (૧૮) તમો બંનેનાં પણ પુરોમાં મંદિર કરાવીશ, હું તમારા બંનેનાં નગરોમાં આવીને મેં કરાવેલાં મંદિરોમાં શ્રીકૃષ્ણનું સ્થાપન કરીશ જ. (૧૯) આ પ્રકારે **શ્રીહરિએ** બંને રાજાઓને કહીને પોતાની આગળ રહેલા **બ્રહ્માનંદમુનિને** કહ્યું - હે અનઘ ! તમે હેમંતસિંહની સાથે જુનાગઢ, મંડળે સહિત જાઓ. (૨૦) હે મુને ! જુનાગઢમાં અતિરમણીય પથ્થરનું દૃઢ મંદિર કરાવો. હું શ્રીકૃષ્ણની પ્રતિષ્ઠા સમયે આવીશ. (૨૧) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા બ્રહ્માનંદમુનિએ બંને હાથ જોડીને ઓમ્ (બહુ સારું) આ પ્રમાણે શ્રીહરિને કહ્યું. પછી શ્રીહરિએ પોતાની આગળ બેઠેલા **અદ્‌ભુતાનંદમુનિને** કહ્યું : (૨૨) હે મુને ! તમો પુંજજીત રાજાની સાથે ધોલેરાપુરમાં મંડળે સહિત જઈને ત્યાં અતિ સુશોભિત કૃષ્ણનું મંદિર કરાવો. (૨૩) હે રાજન્ ! અદ્‌ભુતાનંદ મુનિએ 'તમો કહો છો એમ કરીશ' એમ કહ્યું. પછી તે સર્વે વૈશાખ સુદી ચૌદશને દિવસે નૃસિંહજીના પ્રાદુર્ભાવના ઉત્સવ સુધી દુર્ગપત્તનમાં નિવાસ કરતા હતા. (૨૪) તે ઉત્સવની સમાપ્તિ થયે સતે શ્રીહરિએ આજ્ઞા કરાયેલા બંને મુનિઓ મંડળે સહિત તથા મહાઆનંદથી પૂર્ણ અંતઃકરણવાળા બંને રાજાઓ પોતપોતાના નગરમાં જતા હતા. (૨૫) બ્રહ્માનંદમુનિ અતિ ચતુર રતનો-જેઠો વગેરે શિલ્પીઓ દ્વારા મહાન મંદિર કરાવતા હતા. જુનાગઢના નિવાસી હેમંતસિંહાદિ ભક્તો બ્રહ્માનંદ મુનિએ કહેલા મંદિર કરવામાં ઉપયોગી તે તે પદાર્થો તત્કાળ લાવતા હતા. (૨૬) તે પ્રમાણે શ્રીહરિએ આજ્ઞા કરેલા અદ્‌ભુતાનંદ મુનિએ ધોલેરાપુરમાં વિચક્ષણ દયારામ-ભૂષણ વગેરે શિલ્પીઓ દ્વારા શુભ મંદિર કરાવ્યું. ધોલેરાપુરના નિવાસી પુંજજીત રાજા વગેરે ભક્તો અદ્‌ભુતાનંદ મુનિએ કહ્યા પ્રમાણે મંદિરના ઉપયોગી જે કંઈ કાર્ય સમુદાય કરતા હતા. (૨૭) શ્રીહરિએ હેમંતસિંહ અને પુંજજીત રાજા વગેરે ગયા પછી રામપ્રતાપ અને ઈચ્છારામે સહિત વૈશાખ વદી પાંચમને દિવસે **બ્રહ્મવૈવર્તપુરાણ સાંભળવાનો** આરંભ કર્યો. (૨૮) પુરાણના શ્રોતા શ્રીહરિ સંવત્ ૧૮૮૨ના ભાદરવા સુદી ચોથને દિવસે

॥२१॥ इत्युक्त ओमिति प्राह स मुनिः प्राञ्जलिर्हरिम् । ततोऽसावद्भुतानन्दमुनिमाहाग्रतः स्थितम् ॥२२॥ मुने! पुञ्जजिता साकं धौरेयं त्वं पुरं व्रज । मन्दिरं तत्र कृष्णस्य कारयेरतिशोभनम् ॥२३॥ एवमुक्तो मुनिः सोऽपि तथेत्याह ततश्च ते । सर्वेऽपि तत्र न्यवसन्नरसिंहोत्सवावधि ॥२४॥ तदुत्सवसमाप्तौ तौ हर्याज्ञप्तौ स्वकं स्वकम् । नगरं जग्मतुर्भूपौ समुनी हर्षनिर्भृतौ ॥२५॥ ब्रह्मानन्दोऽतिचतुरैः शिल्पिभिर्मन्दिरं महत् । कारयामास पौराश्च तदुक्तार्थानुपाहरन् ॥२६॥ तथा स चाद्भुतानन्दो धौरेये मन्दिरं शुभम् । शिल्पिभिः कारयामास पौराश्चक्रुस्तदीरितम् ॥२७॥ हरिस्तद्गमनादूर्ध्वं ब्रह्मवैवर्तसंज्ञकम् । पुराणं श्रोतुमारेभे पञ्चम्यां सह सोदरः ॥२८॥ समाप्तिं कारयामास तस्यासौ भाद्रनामनि । मासे शुक्लचतुर्थ्यां स विनायकजनुस्तिथौ ॥२९॥ तस्यां तिथौ मृन्मयरम्यमूर्तिं गणेशमानर्च महोत्सवेन । प्राज्याज्यमिश्रान् गुडलड्डुकांश्च तत्प्रीतयेऽभोजयदग्रजातान् ॥३०॥ स्कन्धं ततः पञ्चममेव नित्यं प्रीत्यैव शुश्राव समापयत्तत् । कामस्य तिथ्यां धनपूर्विकायां सन्तोषयामास च वाचकं सः ॥३१॥ ततोऽपरेद्युर्महतोत्सवेन हरिर्हनूमन्तमपूजयच्च । शास्त्रोक्तरीत्याथ स तस्य तुष्ट्यै समर्चयामास च नैष्ठिकान्स्वान् ॥३२॥ कृत्वा च दीपोत्सवमन्नकूटं जन्मोत्सवं कर्तुमथ स्वपित्रोः । वृत्तालयं दुर्गपुरादुपागात् स कार्तिकस्याद्यचतुर्थिकायाम् ॥३३॥ रामप्रतापप्रमुखास्तदानीं तद्बन्धुवर्गा अपि सस्त्रियस्तम् । पौराः सयोषा द्रुतमन्वयुः

---

विप्रवेश्मनि । न गम्यं तत्र भिक्षार्थं गन्तव्यमितरत्र तु ॥१८४॥ अभ्यासो वेदशास्त्राणां कार्यश्च गुरुसेवनम् । वर्ज्यः स्त्रीणामिव स्त्रैणपुंसां सङ्गश्च तैः सदा ॥१८५॥ चर्मवारि न वै पेयं जात्या विप्रेण केनचित् । पलाण्डुलशुनाद्यं च तेन भक्ष्यं न सर्वथा ॥१८६॥ स्नानं सन्ध्यां च गायत्रीजपं श्रीविष्णुपूजनम् । अकृत्वा वैश्वदेवं च कर्तव्यं नैव भोजनम् ॥१८७॥ साधवो येऽथ तैः सर्वैर्नैष्ठिकब्रह्मचारिवत्। स्त्रीस्त्रैणसङ्गादि वर्ज्यं जेतव्याश्चान्तरारयः ॥१८८॥ सर्वेन्द्रियाणि जेयानि रसना तु विशेषतः । न द्रव्यसङ्ग्रहः कार्यः कारणीयो न केनचित् ॥१८९॥ न्यासो रक्ष्यो न कस्यापि धैर्यं त्याज्यं न कर्हिचित् । न प्रवेशयितव्या च स्वावासे स्त्री कदाचन ॥१९०॥ न च सङ्गं विना रात्रौ चलितव्यमनापदि । एकाकिभिर्न गन्तव्यं तथा क्वापि विनापदम् ॥१९१॥ अनर्घ्यं चित्रितं वासः कुसुम्भाद्यैश्च रञ्जितम् । न धार्यं च महावस्त्रं प्राप्तमन्येच्छयापि तत् ॥१९२॥ भिक्षां सभां विना नैव गन्तव्यं गृहिणो गृहम् । व्यर्थः कालो न नेतव्यो भक्तिं भगवतो विना ॥१९३॥ पुमानेव भवेद्यत्र पक्वान्नपरिवेषणः । ईक्षणादि भवेन्नैव यत्र स्त्रीणां च सर्वथा ॥१९४॥ तत्र गृहिगृहे भोक्तुं गन्तव्यं साधुभिर्मम । अन्यथाऽऽमान्नमर्थित्वा पाकः कार्यः स्वयं च तैः ॥१९५॥ आर्षभो भरतः पूर्वं जडविप्रो यथा भुवि । अवर्ततात्र परमहंसैर्वृत्यं तथैव तैः ॥१९६॥ वर्णिभिः साधुभिश्चैतैर्वर्जनीयं प्रयत्नतः । ताम्बूलस्याहिफेनस्य तमालादेश्च भक्षणम् ॥१९७॥ संस्कारेषु न भोक्तव्यं गर्भाधानमुखेषु तैः । प्रेतश्राद्धेषु सर्वेषु श्राद्धे च द्वादशाहिके ॥१९८॥ दिवास्वापो

તે કોઈએ પણ ચર્મવારિ ન પીવું ને ડુંગળી ને લસણ આદિક જે અભક્ષ્ય વસ્તુ તે બ્રાહ્મણ જાતિ હોય તેણે કોઈ પ્રકારે ન ખાવી. ॥૧૮૬॥ અને જે બ્રાહ્મણ હોય તેણે સ્નાન, સંધ્યા ગાયત્રીનો જપ, શ્રીવિષ્ણુની પૂજા અને વૈશ્વદેવ એટલા વાના કર્યા વિના ભોજન કરવું જ નહિ. (એવી રીતે નૈષ્ઠિક બ્રહ્મચારીના વિશેષ ધર્મ કહ્યા.) ॥૧૮૭॥

### ✤ સાધુના વિશેષ ધર્મ ✤

હવે સાધુના જે વિશેષ ધર્મ તે કહીએ છીએ; અમારે આશ્રિત જે સર્વે સાધુ તેમણે નૈષ્ઠિક બ્રહ્મચારીની પેઠે સ્ત્રીઓનાં દર્શન-ભાષણાદિક પ્રસંગનો ત્યાગ કરવો તથા સ્ત્રૈણ પુરુષના પ્રસંગાદિકનો ત્યાગ કરવો; અને અંતઃ શત્રુ જે કામ, ક્રોધ, લોભ અને માન આદિક તેમને જીતવા ॥૧૮૮॥ અને સર્વે જે ઈન્દ્રયો તે જીતવી ને રસના ઈન્દ્રિયને તો વિશેષે કરીને જીતવી; અને દ્રવ્યનો સંગ્રહ પોતે કરવો નહિ ને કોઈ બીજા પાસે પણ કરાવવો નહિ. ॥૧૮૯॥ અને કોઈની થાપણ ન રાખવી અને ક્યારેય પણ ધીરજતાનો ત્યાગ ન કરવો અને પોતાના ઉતારાની જાયગા બંધિની હોય તો તેને વિષે ક્યારેય પણ સ્ત્રીનો પ્રવેશ થવા દેવો નહિ.॥૧૯૦॥ અને તે સાધુ તેમણે, આપત્કાળ પડ્યા વિના રાત્રીને વિષે સંઘસોબત વિનાનું ચાલવું નહિ તથા આપત્કાળ પડ્યા વિના ક્યારેય પણ એકલા ચાલવું નહિ. ॥૧૯૧॥ અને જે વસ્ત્ર બહુ મૂલ્યવાળું હોય તથા ચિત્ર વિચિત્ર ભાતનું હોય, તથા કસુંબાદિક જે રંગ તેણે કરીને રંગેલું હોય તથા શાલ-દુશાલા હોય ને તે જો બીજાની ઈચ્છાએ કરીને પોતાને પ્રાપ્ત થયું હોય, તો પણ તે વસ્ત્ર પોતાને પહેરવું-ઓઢવું નહિ. ॥૧૯૨॥ અને ભિક્ષા તથા સભા પ્રસંગ એ બે કાર્ય વિના ગૃહસ્થના ઘર પ્રત્યે જવું નહિ; અને ભગવાનની જે નવ પ્રકારની ભક્તિ તે વિના વ્યર્થ કાળ નિર્ગમવો નહિ, નિરંતર ભક્તિ કરીને જ કાળ નિર્ગમવો. ॥૧૯૩॥ અને જે ગૃહસ્થના ઘરને વિષે રાંધેલ અન્નનો પીરસનારો પુરુષ જ હોય તથા સ્ત્રીઓનો દર્શનાદિક પ્રસંગ કોઈ રીતે થાય એમ ન હોય. ॥૧૯૪॥ તેવી રીતનું જે ગૃહસ્થનું ઘર તે પ્રત્યે અમારા સાધુ તેમણે જમવા જવું અને એ કહ્યું તેવું ન હોય તો કાચું અન્ન માગીને પોતાના હાથે રસોઈ કરવી ને ભગવાનને નૈવેદ્ય ધરીને જમવું ॥૧૯૫॥ અને પૂર્વે ઋષભદેવ ભગવાનના પુત્ર જે ભરતજી તે જે તે પૃથ્વીને વિષે જડ બ્રાહ્મણ થકા જેમ વર્તતા હવા તેમજ પરમહંસ એવા જે અમારા સાધુ તેમણે વર્તવું. ॥૧૯૬॥ અને નૈષ્ઠિક બ્રહ્મચારી ને એ સાધુ તેમણે તાંબુળ તથા અફીણ તથા તમાકુ ઈત્યાદિકનું જે ભક્ષણ તે જતને કરીને વર્જવું. ॥૧૯૭॥ અને તે નૈષ્ઠિક બ્રહ્મચારી ને સાધુ તેમણે ગર્ભાધાન આદિક જે સંસ્કાર તેમને વિષે જમવું નહિ તથા એકાદશાહ પર્યંત જે પ્રેતશ્રાદ્ધ તેમને વિષે જમવું નહિ તથા દ્વાદશાહ શ્રાદ્ધને વિષે જમવું નહિ. ॥૧૯૮॥ અને રોગાદિક આપત્કાળ પડ્યા વિના દિવસે સુવું નહિ અને ગ્રામ્યવાર્તા કરવી નહિ ને જાણીને સાંભળવી નહિ ॥૧૯૯॥ અને તે નૈષ્ઠિક બ્રહ્મચારી ને સાધુ તેમણે રોગાદિક આપત્કાળ પડ્યા વિના ખાટલા ઉપર સૂવું નહિ, અને સાધુની આગળ તો નિરંતર નિષ્કપટપણે વર્તવું ॥૨૦૦॥ અને તે સાધુ અને બ્રહ્મચારી તેમણે કોઈક કુમતિવાળા દુષ્ટ જન હોય, ને તે પોતાને ગાળ દે અથવા મારે તો તે સહન જ કરવું,

न कर्तव्यो रोगाद्यापदमन्तरा । ग्राम्यवार्ता न कार्या च न श्रव्या बुद्धिपूर्वकम् ॥१९९॥ स्वप्यं न तैश्च खट्वायां विना रोगादिमापदम् । निश्छद्म वर्तितव्यं च साधूनामग्रतः सदा ॥२००॥ गालिदानं ताडनं च कृतं कुमतिभिर्जनैः । क्षन्तव्यमेव सर्वेषां चिन्तनीयं हितं च तैः ॥२०१॥ दूतकर्म न कर्तव्यं पैशुनं चारकर्म च । देहेऽहन्ता च ममता न कार्या स्वजनादिषु ॥२०२॥ इति सङ्क्षेपतो धर्माः सर्वेषां लिखिता मया । साम्प्रदायिकग्रन्थेभ्यो ज्ञेय एषां तु विस्तरः ॥२०३॥ सच्छास्त्राणां समुद्धृत्य सर्वेषां सारमात्मना । पत्रीयं लिखिता नृणामभीष्टफलदायिनी ॥२०४॥ इमामेव ततो नित्यमनुसृत्य ममाश्रितैः । यतात्मभिर्वर्तितव्यं न तु स्वैरं कदाचन ॥२०५॥ वर्तिष्यन्ते य इत्थं हि पुरुषा योषितस्तथा । ते धर्मादिचतुर्वर्गसिद्धिं प्राप्स्यन्ति निश्चितम् ॥२०६॥ नेत्थं य आचरिष्यन्ति ते त्वस्मत्सम्प्रदायतः । बहिर्भूता इति ज्ञेयं स्त्रीपुंसैः साम्प्रदायिकैः ॥२०७॥ शिक्षापत्र्याः प्रतिदिनं पाठोऽस्या मदुपाश्रितैः । कर्तव्योऽनक्षरज्ञैस्तु श्रवणं कार्यमादरात् ॥२०८॥ वक्त्रभावे तु पूजैव कार्याऽस्याः प्रतिवासरम् । मद्रूपमिति मद्वाणी मान्येयं परमादरात् ॥२०९॥ युक्ताय सम्पदा दैव्या दातव्येयं तु पत्रिका । आसुर्या सम्पदाऽऽढ्याय पुंसे देया न कर्हिचित् ॥२१०॥ विक्रमार्कशकस्याब्दे नेत्राष्टवसुभूमिते । वसन्ताद्यदिने शिक्षापत्रीयं लिखिता शुभा ॥२११॥ निजाश्रितानां सकलार्तिहन्ता सधर्मभक्तेरवनं विधाता । दाता सुखानां मनसेप्सितानां तनोतु कृष्णोऽखिलमङ्गलं नः ॥२१२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे शिक्षापत्रीलेखननिरूपणनामा चतुश्चत्वारिंशोऽध्यायः ॥४४॥

---

પણ તેને સામી ગાળ ન દેવી ને મારવો નહિ, અને તેનું જેમ હિત થાય તેમજ મનમાં ચિંતવન કરવું, પણ તેનું ભુંડુ થાય એવો તો સંકલ્પ પણ ન કરવો. ॥૨૦૧॥ અને કોઈનું દૂતપણું ન કરવું તથા ચાડિયાપણું ન કરવું ને કોઈના ચારચક્ષુ ન થવું અને દેહને વિષે અહંબુદ્ધિ ન કરવી ને સ્વજનાદિકને વિષે મમતા ન કરવી. (એવી રીતે સાધુના વિશેષ ધર્મ કહ્યાં) ॥૨૦૨॥ અને અમારે આશ્રિત એવા જે સત્સંગી બાઈભાઈ સર્વે તેમના જે સામાન્ય ધર્મ અને વિશેષ ધર્મ તે જે તે સંક્ષેપે કરીને આવી રીતે અમે લખ્યા છે અને આ ધર્મનો જે વિસ્તાર તે તો અમારા સંપ્રદાયના જે ગ્રંથ તે થકી જાણવો. ॥૨૦૩॥ અને સર્વે જે સત્શાસ્ત્ર તેનો જે સાર તેને અમે અમારી બુદ્ધિએ કરીને ઉદ્ધારીને આ શિક્ષાપત્રી જે તે લખી છે તે કેવી છે - તો સર્વે મનુષ્યમાત્રને મનવાંછિત ફળની દેનારી છે ॥૨૦૪॥ એ હેતુ માટે અમારા આશ્રિત જે સર્વે સત્સંગી તેમણે સાવધાનપણે કરીને નિત્યપ્રત્યે આ શિક્ષાપત્રીને અનુસરીને જ વર્તવું. પણ પોતાના મનને જાણે તો ક્યારેય ન વર્તવું ॥૨૦૫॥ અને જે અમારા આશ્રિત પુરુષ ને સ્ત્રીઓ તે જે તે આ શિક્ષાપત્રી પ્રમાણે વર્તશે, તો તે ધર્મ, અર્થ, કામ ને મોક્ષ એ ચાર પુરુષાર્થની સિદ્ધિને નિશ્ચય પામશે. ॥૨૦૬॥ અને જે બાઈ-ભાઈ, આ શિક્ષાપત્રી પ્રમાણે નહિ વર્તે તે તો અમારા સંપ્રદાય થકી બાહેર છે એમ અમારા સંપ્રદાયવાળા સ્ત્રી-પુરુષ તેમણે જાણવું. ॥૨૦૭॥ અને અમારા જે આશ્રિત સત્સંગી તેમણે આ શિક્ષાપત્રીનો નિત્યપ્રત્યે પાઠ કરવો અને જેને ભણતા આવડતું ન હોય તેમણે તો આદર થકી આ શિક્ષાપત્રીનું શ્રવણ કરવું ॥૨૦૮॥ અને આ શિક્ષાપત્રીને વાંચી સંભળાવે એવો કોઈ ન હોય ત્યારે તો નિત્યપ્રત્યે આ શિક્ષાપત્રીની પૂજા કરવી; અને આ જે અમારી વાણી તે અમારું સ્વરૂપ છે. એ રીતે પરમ આદર થકી માનવી. ॥૨૦૯॥ અને આ જે અમારી શિક્ષાપત્રી તે જે તે દૈવીસંપદાએ કરીને યુક્ત એવો જે જન હોય, તેને આપવી અને જે જન આસુરી સંપદાએ કરીને યુક્ત હોય, તેને તો ક્યારેય ન આપવી. ॥૨૧૦॥ સંવત ૧૮૮૨ અઢારસો બ્યાસીનાં મહાસુદી પંચમીને દિવસે આ શિક્ષાપત્રી અમે લખી છે, તે પરમ કલ્યાણકારી છે. ॥૨૧૧॥

निजाश्रितानां सकलार्तिहन्ता सधर्मभक्तेरवनं विधाता । दाता सुखानां मनसेप्सितानां तनोतु कृष्णोऽखिलमंङ्गलं नः ॥ २१२॥

અને પોતાના આશ્રિત જે ભક્તજન તેમની જે સમગ્ર પીડા તેના નાશ કરનારા એવા, ને ધર્મે સહિત જે ભક્તિ તેની રક્ષાના કરનારા એવા, ને પોતાના ભક્તજનને મનવાંછિત સુખના આપનારા એવા, જે શ્રીકૃષ્ણ ભગવાન તે જે તે અમારા સમગ્ર મંગળને વિસ્તારો. ॥૨૧૨॥

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થ પ્રકરણે શિક્ષાપત્રી લેખનનિરૂપણનામા ચતુશ્ચત્વારિંશોઽધ્યાયઃ (૪૪)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **लिखित्वा पत्रिकामित्थं तस्याश्च प्रतिमाष्टकम् । साधुभिः कारयित्वाऽसौ प्रैषयत्ककुभोऽष्ट सः ॥१॥ तत्र तत्र च तां प्राप्य भक्ताः प्रापुर्मुदं पराम् । कृत्वा तत्प्रतिमां सर्वे पृथक्पृथगधारयन् ॥२॥ तदुक्तरीत्या सर्वे च स्वाधिकारानुसारतः। अवर्तन्त च तं भेजुर्जानन्तः कृष्णमेव ते ॥३॥ पत्रिकां प्रेषयित्वाथ भक्तैः कतिपयैर्वृतः । हरिः श्रीनगरं भूयो जगामाऽऽनन्दयन्निजान् ॥४॥ अतर्कितागमात्तस्य नागरा हर्षविह्वलाः । प्रत्युद्गम्य नमस्कृत्य तमानिन्युः पुरं मुदा ॥५॥ नरनारायणं दृष्ट्वा मन्दिरेऽस्यात्मनो हरिः । आवासमकरोद्राजन्! पौराः पर्यचरंश्च तम् ॥६॥ पौरान्भक्तान् स सुखयन्सद्वार्ताभिरनुक्षपम् । श्रीवासुदेवमाहात्म्यं मासं तत्राशृणोत्पुनः ॥७॥ प्रशंसां तस्य बहुधा चकार जनसंसदि । सर्वथाऽस्मन्मतस्येदं मूलमित्येवमीरयन् ॥८॥ सम्भारेणातिमहता पुष्पदोलोत्सवं हरिः । महान्तं तत्र विदधे यथा वृत्तालये पुरा ॥९॥ तत्र देशान्तरेभ्यश्च भक्ता आयन्सहस्रशः । उत्तमाद्या दुर्गपुराद्धरेः सम्बन्धिनस्तथा ॥१०॥ सुखयंस्तान्निजान्भक्तान् पक्षमेकं पुनर्हरिः । तत्रोवास ततस्ते च भक्त्या चक्रुस्तदर्चनम् ॥११॥ वसनैर्विविधैर्नूत्नैरलङ्कारैश्च शोभनैः । चन्दनेन च पुष्पस्रक्शेखराद्यैर्धनेन च ॥१२॥ पूजाप्राप्तं च वस्त्रादि यत्तत्सर्वमपि प्रभुः । ततोऽयोध्याप्रसादाय ददाति स्म जनाधिप! ॥१३॥ चैत्रशुक्लद्वितीयायां तान्स्वदेशगमाय सः । आज्ञाप्य सह पाश्चात्यैः पश्चिमं देशमभ्यगात् ॥१४॥ अष्टम्यामाययौ स्वामी भाल्लदेशे वृतः स्वकैः । काम्यालयाभिधं ग्रामं सुखयन् पथि च स्वकान् ॥१५॥ तत्रत्यैः प्रार्थितो भक्तैः**

## અધ્યાય : ૪૫

### શ્રીહરિએ ધોલેરા નગરમાં રાધા-મદનમોહનદેવની સ્થાપના કરી તેનું વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** - હે રાજન્ ! આ પ્રકારે શિક્ષાપત્રી લખીને શિક્ષાપત્રીના લેખક શ્રીહરિએ શિક્ષાપત્રીની આઠ પ્રતો, સાધુઓ સવિત્રાનંદાદિ લેખકો પાસે લખાવીને આઠ દિશાઓમાં રહેલા હરિભક્તો ઉપર મોકલી. (૧) તે તે દેશોમાં રહેલા ભક્તો શિક્ષાપત્રી પામીને અત્યંત આનંદ પામ્યા. સર્વે ભક્તો જુદી જુદી તેની પુસ્તિકાઓ લખાવીને પોતપોતાની સમીપે રાખતા હતા. (૨) સર્વે તે ભક્તો શિક્ષાપત્રીમાં કહ્યા પ્રમાણે પોતાના અધિકારને અનુસારે વર્તતા હતા અને શ્રીહરિને જ કૃષ્ણ જાણતા સતા ભજતા હતા. (૩) શ્રી હરિ પત્રિકાની આઠ પ્રતો મોકલાવીને પછી કેટલાક ભક્તોથી વીંટાયેલા, પોતાના ભક્તજનોને આનંદ ઉપજાવવા માટે ફરીથી **શ્રીનગરમાં** ગયા. (૪) શ્રીહરિને એકદમ આવેલા જાણીને આનંદથી ઉતાવળા શ્રીનગરના નિવાસી ભક્તો શ્રીહરિની સન્મુખ જઈને શ્રીહરિને નમસ્કાર કરી હર્ષપૂર્વક નગરમાં લાવ્યા. (૫) હે રાજન્ ! શ્રીહરિએ નરનારાયણનાં દર્શન કરીને નરનારાયણના મંદિરમાં પોતાનો નિવાસ કર્યો. અને પુરના ભક્તજનો શ્રીહરિની સેવા કરતા હતા. (૬) શ્રીહરિ પુરના ભક્તોને સુંદર ધર્મનો બોધ આપનારી વાર્તાઓથી સુખી કરતા સતા શ્રીનગરમાં દરેક રાત્રિમાં ફરીથી પણ **એક માસ સુધી શ્રીવાસુદેવ માહાત્મ્ય સાંભળતા હતા.** (૭) 'આ વાસુદેવ માહાત્મ્ય અમારા મતનું સર્વ પ્રકારે મૂળ છે.' આ પ્રમાણે બોલતા શ્રીહરિ પોતાના સમગ્ર ભક્તજનોની સભામાં શ્રીવાસુદેવ માહાત્મ્યની ઘણા પ્રકારે પ્રશંસા કરતા હતા. (૮) શ્રીહરિએ શ્રીનગરમાં પહેલાં વૃત્તાલયમાં જેમ તેમ અતિ મહાસામગ્રીથી મોટો **પુષ્પદોલોત્સવ** કર્યો. (૯) આ ઉત્સવમાં દેશાન્તરોથી હજારોહજાર ભક્તો આવ્યા. ઉત્તમ નામના ગઢપુરના રાજા વગેરે તથા શ્રીહરિના સંબંધી રામપ્રતાપાદિ દુર્ગપુરથી ત્યાં આવ્યા. ભગવાનની આજ્ઞાથી દેશાન્તરથી મુક્તાનંદાદિ મુનિઓ પણ આવ્યા. એમ જાણવું. (૧૦) શ્રીહરિ દેશાન્તરથી આવેલ પોતાના ભક્તોને સુખ આપતાં શ્રીનગરમાં ફરી પંદર દિવસ રહ્યા અને ભક્તોએ ભક્તિપૂર્વક શ્રીહરિનું **મહાપૂજન** કર્યું. (૧૧) નવીન નાના પ્રકારનાં અમૂલ્ય વસ્ત્રો, સુંદર અલંકારો, ચંદન, પુષ્પોની માળાઓ, તોરાઓ અને ધન વગેરેથી પૂજન કર્યું. (૧૨) હે નરાધિપ ! પછી શ્રીહરિએ પોતાના ભક્તોએ કરેલી પૂજામાં જે પ્રાપ્ત થયેલાં વસ્ત્રો તથા આભૂષણો તે સર્વે પણ અયોધ્યાપ્રસાદ નામના પોતાના પુત્રને આપ્યાં. (૧૩) શ્રીહરિએ ચૈત્ર સુદી બીજને દિવસે દેશાંતરથી આવેલા ભક્તજનોને પોતપોતાના દેશમાં જવાની આજ્ઞા આપીને પશ્ચિમ દેશના નિવાસી ભક્તો સાથે **પશ્ચિમ દેશ પ્રત્યે** ગમન કર્યું. (૧૪) પોતાના ભક્તોથી વીંટાયેલા શ્રીહરિ માર્ગમાં પોતાના ભક્તોને દર્શન આપતા ચૈત્ર સુદી અષ્ટમી તિથિમાં ભાલ દેશમાં **કમીયાળા ગામમાં** આવ્યા.(૧૫) હે નૃપતે ! સાધુજનોની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सत्सेवोत्सुकमानसैः । तेभ्यस्तुष्टो हरिस्तत्र न्यवसन्नृपते! सुखम् ॥१६॥ ग्राम्या भक्ता यथार्हं च सर्वांस्तान्संन्यवासयन् । आतिथ्यं च हरेश्चक्रुः सानुगस्य यथोचितम् ॥१७॥ शशिवर्णो हठी वाहः क्षेमराजावरादयः । नराश्च जिजिवाद्यास्तं योषाः पर्यचरन्मुदा ॥१८॥ हरिस्तत्र द्वितीयेऽह्नि रामजन्ममहोत्सवम् । चकार तत्र तद्देशभक्ता आयुः सहस्रशः ॥१९॥ उपचारैर्बहुविधैः पुपूजुस्ते हरिं मुदा । स तत्र पौर्णमास्यन्तमुवासाभ्यर्थितो निजैः ॥२०॥ तं प्रार्थयत्प्रतिपदि व्रजन्तं पुञ्जजिन्नृपः । स्वामिन्! धौरेयनगरे जातप्रायं हि मन्दिरम् ॥२१॥ तत्र कृष्णप्रतिष्ठां त्वमागत्य कुरु साम्प्रतम् । शेषं मन्दिरकार्यं तु करिष्यामो वयं ततः॥२२॥ इत्युक्तो भगवांस्तेन तथेत्युक्त्वा च तत्पुरम् । ययौ सङ्गव एवासौ प्राप तच्च सहानुगैः ॥२३॥ पुञ्जजिद्वासयामास संस्कृते स्वगृहे तु तम् । यथार्हमन्यांश्चान्यत्र तदातिथ्यं ततोऽकरोत् ॥२४॥ विलोक्य मन्दिरं स्वामी जातकल्पं ततो द्विजान्। ज्योतिर्विदः समाहूय मुहूर्तं पृच्छति स्म च ॥२५॥ वैशाखे शुक्लपक्षे च जयायां भृगुवासरे । मुहूर्तोऽस्ति शुभो विष्णोः स्थापनस्येति तेऽब्रुवन् ॥२६॥ दूरे मुहूर्त इत्येव गन्तुकामं ततो हरिम् । प्रणम्य सम्प्रार्थ्य नृपो वासयामास तत्र तम् ॥२७॥ भक्तवश्यः स च सुखं तत्रोवास महीपते! । स्वकीयान्सुखयन्भक्तान्सद्वार्ता-भिर्दिनेदिने ॥२८॥ भाल्लदेशस्थभक्तानामुत्सवोऽभून्महांस्ततः । आजग्मुः प्रतिजग्मुश्च तत्र ते यूथशोऽन्वहम् ॥२९॥ त्रयोदश्यां यथाशास्त्रं कृष्णं मदनमोहनम् । राधया सहितं तत्र हरिस्स्थापयत्ततः ॥३०॥ पूजोत्सवो महानासीद्वाद्यघोषोपलक्षितः । विप्रांश्च भोजयामास हरिस्तत्र सहस्रशः ॥३१॥ तेभ्यश्च दक्षिणां प्रादाद्वासांसि च महामनाः । नरसिंहोत्सवं चक्रे द्वितीयेऽह्नि च

---

સેવામાં ઉત્સાહિત મનવાળા કમીયાળા ગામના ભક્તોએ પ્રાર્થના કરેલા શ્રીહરિએ તે ભક્તો ઉપર પ્રસન્ન થઈને ત્યાં સુખપૂર્વક નિવાસ કર્યો. (૧૬) ગામના ભક્તો શ્રીહરિના અનુયાયી સર્વેને યથાયોગ્ય નિવાસ કરાવતા હતા. મુનિ વગેરે અનુયાયી સહિત શ્રીહરિનું આતિથ્ય યથાયોગ્ય કરતા હતા. (૧૭) તે ભક્તોનાં નામ : શશીવર્ણ નામના ભક્ત, હઠી, વાહાભાઈ તથા ક્ષેમરાજ અને અવર આદિક પુરુષો અને જીજીબા આદિક સ્ત્રીઓ અધિકાર પ્રમાણે પરાભક્તિથી સેવા કરતા હતા. (૧૮) તે થકી બીજે દિવસે કમીયાળા ગામમાં શ્રીહરિએ **રામનો જન્મોત્સવ** કર્યો. તે ઉત્સવમાં હજારોહજાર ભાલદેશના જનો આવ્યા. (૧૯) તે ભક્તોએ ઘણા પ્રકારના ઉપચારોથી શ્રીહરિની પૂજા કરી. શ્રીહરિએ પોતાના ભક્તોએ પ્રાર્થના કરાયેલા સતા ત્યાં ચૈત્ર સુદી પૂર્ણિમા સુધી નિવાસ કર્યો. (૨૦) ચૈત્ર વદી પડવાને દિવસે દુર્ગપત્તન પ્રત્યે ચાલતા શ્રીહરિને ધોલેરાના અધિપતિએ પ્રાર્થના કરી, હે સ્વામિન્ ! ધોલેરા નગરમાં મંદિર ઘણું કરીને સંપૂર્ણ વર્તે છે જ. (૨૧) હે ભગવન્ ! તમો આવીને મંદિરમાં હાલમાં જ શ્રીકૃષ્ણની પ્રતિષ્ઠા કરો. પછી પ્રતિષ્ઠા બાદ મંદિરનું કાર્ય જેટલું બાકી રહે છે તેને થોડા સમયમાં જ પૂર્ણ કરાવીશું. (૨૨) હે રાજન્ ! આ પ્રકારે પુંજાજી રાજાએ કહેલા ભગવાન શ્રીહરિ 'એ પ્રમાણે કરીશું' એમ કહીને તેમના પુર (ધોલેરા) તરફ ચાલ્યા. પોતાના અનુયાયીઓની સાથે શ્રીહરિ પ્રાતઃકાળમાં જ **ધોલેરા નગરમાં** આવ્યા. (૨૩) પુંજાજી રાજાએ નવીન ઉલ્લોચ વગેરે બાંધીને શ્રીહરિના નિવાસ યોગ્ય કરેલા પોતાના ગૃહમાં જ શ્રીહરિને નિવાસ કરાવ્યો. ને બીજા અનુયાયીઓને મુનિજનો વગેરેને યથાયોગ્ય બીજા ભવનોમાં ઉતારો કરાવ્યો. પછી અનુયાયીઓ સહિત શ્રીહરિનો આતિથ્યસત્કાર કર્યો. (૨૪) પછી શ્રીહરિએ લગારેક અધૂરું મંદિર જોઈને જ્યોતિષી બ્રાહ્મણોને બોલાવડાવીને શ્રીકૃષ્ણની **પ્રતિષ્ઠાનું મુહૂર્ત** પૂછ્યું. (૨૫) શ્રીહરિએ પ્રતિષ્ઠામુહૂર્ત પૂછેલા બ્રાહ્મણો વૈશાખ સુદી ત્રયોદશી ભૃગુવાસરે (શુક્રવારે) વિષ્ણુના સ્થાપનનું શુભ મુહૂર્ત છે આ પ્રમાણે શ્રીહરિને કહેતા હતા. (૨૬) પછી મુહૂર્ત દૂર છે માટે જ જવાની ઈચ્છાવાળા શ્રીહરિને પ્રણામ કરીને પુંજાજી રાજાએ શ્રીહરિને ધોલેરા પુરમાં નિવાસ કરાવ્યો. (૨૭) હે મહીપતે ! પોતાના ભક્તોને વશવર્તી શ્રીહરિ દરરોજ સારી વાર્તાઓથી પોતાના ભક્તોને (પુંજાજી, નારાયણ, ભોજ, મૌન, વૃદ્ધ, રત્ન, જીવન, ક્ષેમ, વનમાળી વગેરે હરિજનો અને અદ્ભુતાનંદ, આત્માનંદ, નિષ્કુળાનંદ આદિક સાધુઓને) આનંદ આપતા થકા ત્યાં સુખેથી રહ્યા. (૨૮) પછી ભાલદેશના ભક્તો દરરોજ ધોલેરામાં આવતા હતા અને જતા હતા. તે ભક્તોને મહાન ઉત્સવ થયો. (૨૯) પછી શ્રીહરિએ **સંવત્ ૧૮૮૨ના વૈશાખ સુદી તેરશને દિવસે** મંદિરમાં **રાધાએ સહિત મદનમોહન** નામવાળા કૃષ્ણની શાસ્ત્ર પ્રમાણે સ્થાપના કરી. (૩૦) તે સમયે નાના પ્રકારનાં વાજિંત્રોના ધ્વનિપૂર્વક અતિશય પૂજાનો ઉત્સવ થયો અને શ્રીહરિએ હજારોહજાર બ્રાહ્મણોને જમાડ્યા. (૩૧) અતિ ઉદાર મનવાળા શ્રીહરિએ તેઓને દક્ષિણા અને વસ્ત્રો આપ્યાં અને બીજે દિવસે (વૈશાખ સુદી ચૌદશને દિવસે) નૃસિંહજીનો પણ **ઉત્સવ** ધોલેરાપુરમાં

**तत्र सः ॥३२॥ कृत्वा भुक्तिं पौर्णमास्यां सानुगो निरगात्ततः । अपराह्ने प्रतिपदि दुर्गपत्तनमाप सः ॥३३॥ आनन्द आसीच्च महांस्तदानीं तं पश्यतः पौरजनस्य भूप! । हरिर्निजावासमुपेत्य तत्र सुखं न्यवात्सीत्सुखरूपमूर्तिः ॥३४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे धौरेयपुरे श्रीराधाकृष्णस्थापनादिनिरूपणनामा पञ्चचत्वारिंशोऽध्यायः ॥४५॥

सुव्रत उवाच - **अथ तं सुखमासीनं पञ्चम्यां भोजनोत्तरम् । पुत्रावुपेत्य नत्वा च तत्समीपे निषेदतुः ॥१॥ आशीर्भिरभिनन्द्याथ तावुवाच हरिर्नृप! । प्रष्टव्यं यदि किञ्चिद्वां भवेत्तर्ह्यद्य पृच्छतम् ॥२॥ इत्युक्तौ तेन तौ हृष्टौ तं पप्रच्छतुरीश्वर! । शिष्या मुमुक्षवः कार्या इत्याज्ञा तेऽस्ति नौ प्रभो! ॥३॥ इच्छावः श्रोतुमखिलं त्वत्तो दीक्षाविधिं ततः । तं नौ ब्रूहि यथावत्त्वं शिष्यान् कुर्याव नूंस्ततः ॥४॥** सुव्रत उवाच - **इति पृष्टो विनीताभ्यां पुत्राभ्यां भगवान् हरिः । कृष्णं गुरुं च संस्मृत्य भूपते! प्रत्युवाच तौ ॥५॥** श्रीनारायणमुनिरुवाच-**धाम्नि स्वीयेऽक्षराख्ये विलसति भगवांस्तत्पुमांसं च मायां सत्यज्ञानादिभिर्यः प्रकृतिपुरुषजं शक्तिभिर्व्याप्य विश्वम् । तेजोभिः शक्तिभिः स्वैरनल इव जगद्व्याप्य लोके पृथक् स्वे वार्भिः पाशीव चास्ते भुवि धृतनृतनुः श्रेयसे सोऽस्तु कृष्णः ॥६॥ श्रीमच्छारदपूर्णचन्द्रवदनः पद्मच्छदाभेक्षणो**

---

કર્યો. (૩૨) તે થકી બીજે દિવસે પૂર્ણિમાએ શ્રીહરિ ભોજન કરીને અનુયાયીજનો સાથે ધોલેરાથી નીકળીને પ્રતિપદાએ દિવસના ચોથા પ્રહરમાં **દુર્ગપુરમાં** પહોંચ્યા. (૩૩)

હે રાજન્ ! તે સમયે પધારેલા ભગવાનનાં દર્શન થવાથી પુરનાં જનોને મહા આનંદ થયો. આનંદમય દિવ્યમૂર્તિ ભગવાન શ્રીહરિએ ભક્તોને આનંદ આપતા થકા પોતાના ઉતારામાં જઈને ત્યાં સુખેથી નિવાસ કર્યો. (૩૪)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે ધૌરેયપુરે શ્રીરાધાકૃષ્ણસ્થાપનાદિનિરૂપણનામા પંચચત્વારિંશોઽધ્યાયઃ (૪૫)*

## અધ્યાય : ૪૬

**પોતાના ભક્તોનું હિત ઈચ્છતા શ્રીહરિએ પોતાના પુત્રોને આઠ અધ્યાયોથી દીક્ષાવિધિ કહેલો છે. આ અધ્યાયમાં સામાન્યદીક્ષાનો વિધિ યથાવિધિ નિરૂપણ કરેલો છે.**

**સુવ્રત મુનિ બોલ્યા,** હે રાજન્ ! પછી વૈશાખ વદી પાંચમને દિવસે ભોજન કર્યા પછી સુખેથી બેઠેલા શ્રીહરિની પાસે જઈને અયોધ્યાપ્રસાદજી અને રઘુવીરજી નમસ્કાર કરીને શ્રીહરિની સમીપમાં બેઠા. (૧) હે નૃપ ! પછી શ્રીહરિ બંને પુત્રોને આશીર્વાદના વચનોથી સંભાવના કરીને બોલ્યા, હે પુત્રો ! જો તમારા બંનેને કંઈ પૂછવું હોય તો આજે પૂછો. (૨)

**બંને આચાર્યશ્રીઓનો દીક્ષા સંબંધી પ્રશ્ન :-** હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા બન્ને પુત્રો પ્રસન્ન થઈને શ્રીહરિને પૂછતા હતા. હે ઈશ્વર ! હે પ્રભો ! મુમુક્ષુજનોને શિષ્ય કરવા આ તમારી આજ્ઞા અમને બંનેને છે. (૩) માટે તમારાથી દીક્ષાવિધિ સાંભળવા ઈચ્છીએ છીએ. તે **દીક્ષાવિધિ** સમગ્ર જેમ હોય તેમ યથાર્થપણે તમો કહો. પછી અમો તમે બતાવેલા તે માર્ગને અનુસરીને શિષ્યોને દીક્ષિત કરીશું. (૪) હે ભૂપતે ! આ પ્રકારે પુત્રોએ સવિનય પૂછેલા ભગવાન **શ્રીહરિ** ઈષ્ટદેવપણે માનેલા શ્રીકૃષ્ણનું અને ગુરુપણે માનેલા શ્રી રામાનંદ મુનિનું સ્મરણ કરીને **તેમના પ્રતિ બોલ્યાઃ** (પોતે શ્રીપુરુષોત્તમ છે તો પણ જે પોતાના ઈષ્ટદેવ અને ગુરુના ધ્યાનનું આચરણ કરે છે તે તો મનુષ્યનાટ્યને અનુસરી પોતાના ભક્તોના શિક્ષણ માટે અને શિષ્ટાચારનું પાલન કરવા માટે છે એમ જાણવું.) (૫)

ભગવાન શ્રીકૃષ્ણ જે પોતે પોતાના અક્ષરધામમાં વિરાજે છે. અગ્નિ જેમ પોતાના પ્રકાશરૂપ શક્તિઓથી જગતમાં વ્યાપીને પોતાના રૂપથી અગ્નિલોકમાં જુદા રહે છે. અને વરુણ જેમ પોતાની જળરૂપ શક્તિથી જગતમાં વ્યાપીને પોતાના રૂપથી વરુણ લોકમાં રહે છે એમ જ ભગવાન પૃથ્વીમાં મનુષ્યોના શ્રેયને માટે મનુષ્યદેહ ધારીને રહે છે તે શ્રીકૃષ્ણ વાસુદેવ સર્વેના શ્રેય માટે થાઓ. (૬) અતિશય શોભાયુક્ત શરદઋતુના પૂર્ણચંદ્રમાના સમાન મુખારવિંદવાળા, કમળના પત્રોની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

द्योतद्गौरवपुर्विशाल-हृदयश्चाजानुबाहुद्वयः । कारुण्यार्द्रतनुः सिताम्बरधरो दोष्णा च पद्मं दधद्रामानन्दमुनिः करोतु भविकं भुव्युद्धवः सद्गुरुः ॥७॥ सभक्तिधर्मावनतत्परेण सुतौ! स्वसौख्यावहचेष्टितेन । तेनैव मह्यं गदितं युवाभ्यां दीक्षाविधिं भागवतं वदामि ॥८॥ आचार्यैरौद्धवाध्वस्थैर्दीक्षा भागवती यथा । सामान्या सविशेषा च पुम्भ्यो देयोच्यते तथा ॥९॥ दीप्तं ज्ञानं प्रदद्याच्च क्षयं कुर्यात्तथैनसाम् । तस्माद्दीक्षेति सम्प्रोक्ता देशिकैस्तन्त्रवेदिभिः ॥१०॥ श्रीकृष्णो वासुदेवो वै गोलोकाधिपतिः स्वयम् । उपास्या देवता ह्यस्यां दीक्षायां भवति प्रभुः ॥११॥ स्वोपास्यदेवसम्बन्धाद्दीक्षानामोच्यते यतः । औद्धवे सम्प्रदाये तद्वासुदेवीति सोच्यते ॥१२॥ द्विविधा सा तु विज्ञेया मुमुक्षूणां हितावहा । सामान्या महती चेति दीक्षा भवविमोचनी ॥१३॥ तत्राद्यां प्राप्नुयुर्ये ते प्रोक्ताः सत्सङ्गिसंज्ञकाः । अन्ये त्वात्मनिवेद्याख्यास्तत्राद्यादौ निरूप्यते ॥१४॥ क्षणिकत्वात्स्वदेहस्य वैषम्याद्देशकालयोः । तथाधिकारभेदाच्च दीक्षा साधारणोदिता ॥१५॥ नास्ति कालस्य नियमो न देशनियमस्तथा । सामान्यायां हि दीक्षायां न जातिनियमोऽपि च ॥१६॥ उत्पन्नः स्यान्मुमुक्षाया अङ्कुरो यस्य चेतसि । सच्छास्त्राद्वा सतां सङ्गात्सोऽधिकार्यत्र मानवः ॥१७॥ न तिथिर्न व्रतं नार्चा नोपवासादिका क्रिया । दुर्लभे सद्गुरूणां हि सकृत्सङ्ग उपस्थिते ॥१८॥ सदसद्व्यक्तिविच्छ्राद्धः स्वश्रेयःसाधनोद्यतः । सच्छास्त्रेषु सुशीलेषु सत्सु च प्रीतिमान्सुधीः

---

કાંતિ સમાન કાંતિવાળાં નેત્રો જેમના છે એવા, પ્રકાશમાન ગૌર શરીરવાળા, જેમનું હૃદય વિશાળ છે, જાનુપર્યંત લાંબા બંને હાથવાળા, કરુણાથી વ્યાપ્ત શરીરવાળા, શ્વેત વસ્ત્રોને હંમેશાં ધારણ કરનારા, જમણા હાથથી કમળને ધારણ કરનારા, પૃથ્વીમાં પોતે ઉદ્ધવના અવતાર સદ્‌ગુરુ રામાનંદ મુનિ મંગળ કરો. (૭) હે પુત્રો ! ભક્તિએ સહિત ધર્મનું રક્ષણ-પરાયણ, સ્વાશ્રિત જનોને સુખ કરનારાં ચરિત્રોવાળા શ્રીરામાનંદ મુનિએ જ મને પોતાના પદ ઉપર સ્થાપના કર્યા પછી કહેલો ભગવાન સંબંધી દીક્ષાવિધિ તે તમોને કહું છું. (૮) ઉદ્ધવ સંપ્રદાયમાં રહેલા આચાર્યોએ સામાન્ય અને વિશેષે સહિત ભાગવતી મહાદીક્ષા પુરુષોને જે પ્રકારે આપવી તે પ્રમાણે કહું છું. (૯)

**દીક્ષા શબ્દનો અર્થ :-** અતિશય પ્રકાશમાન જ્ઞાન-આત્માપરમાત્માદિનું યથાર્થ જ્ઞાન સારી રીતે ઉત્પન્ન કરે તથા પાપોનો મૂળે સહિત નાશ કરે માટે પંચરાત્ર તંત્રને જાણનારા આચાર્યોએ દીક્ષા કહેલી છે. (૧૦)

**દીક્ષામાં ઉપાસ્ય ઈષ્ટદેવ :-** અક્ષરધામાધિપતિ પ્રભુ પોતે શ્રીકૃષ્ણ વાસુદેવ આ દીક્ષામાં ઉપાસ્ય છે. (૧૧) જે માટે પોતાના ઉપાસ્ય દેવના સંબંધથી દીક્ષા-નામ કહેવાય છે. માટે ઉદ્ધવ સંપ્રદાયમાં તે દીક્ષા 'વાસુદેવી' આ પ્રકારની સંજ્ઞાથી (અને 'ભાગવતી' આ સંજ્ઞાથી પણ) કહેવાય છે. (૧૨)

મુમુક્ષુઓને સંસારથી મુકાવનારી માટે જ હિતકારી દીક્ષા સામાન્ય અને મહાદીક્ષા આ બે પ્રકારની છે. (૧૩) બે પ્રકારની દીક્ષામાં પ્રથમ સામાન્ય દીક્ષા જે પુરુષો પામે છે તે **સત્સંગી** સંજ્ઞાવાળા કહેવાય છે અને બીજા બીજી મહાદીક્ષાવાળા **આત્મનિવેદી** નામથી કહેલા છે. તે બે પ્રકારની દીક્ષામાં પ્રથમ **સામાન્ય દીક્ષા** નિરૂપણ કરીએ છીએ. (૧૪) પોતાના દેહની ક્ષણભંગુરતા હોવાથી દેશકાળનું વિષમપણું તથા અધિકારભેદથી સામાન્ય દીક્ષા કહી છે. (૧૫)

**સામાન્ય દીક્ષામાં અધિકારી :-** સામાન્ય દીક્ષામાં એકાદશી વગેરે કાલનિયમ નથી તથા શુભ દેશાદિનો નિયમ પણ નથી. (૧૬) જે મનુષ્યના મનમાં સત્શાસ્ત્રના શ્રવણ-પઠનથી અથવા સત્પુરુષના પ્રસંગથી **મુક્તિની ઈચ્છા**નો ઉદય થાય તે મનુષ્ય સામાન્ય દીક્ષાનો અધિકારી છે. (૧૭) સદ્‌ગુરુનો સોએ સો સાધનોથી પણ દુષ્પ્રાપ્ય સમાગમ એક વાર ઉપસ્થિત થાય ત્યારે દીક્ષાગ્રહણમાં તિથિનો શુભાશુભ વિચાર કરવો નહિ. દીક્ષાની યોગ્યતા માટે કૃચ્છ્રાદિવ્રતાચરણનો વિચાર કરવો નહિ. દીક્ષા ગ્રહણ કરવા નિમિત્તે પોતાના ઈષ્ટદેવની પૂજાની આવશ્યક્તા પણ નથી. પૂર્ણ દિવસે ઉપવાસ વગેરે ક્રિયાની અપેક્ષાનો સામાન્ય દીક્ષા ગ્રહણમાં નિયમ નથી. જ્યારે **સદ્‌ગુરુની પ્રાપ્તિ** થાય તે જ સામાન્ય દીક્ષાનો ગ્રહણ સમય છે. (૧૮)

**મુમુક્ષુ શિષ્યના લક્ષણો :-** સત્ અને અસત્ વ્યક્તિને જાણનારો, નિયમાદિ આચરણમાં શ્રદ્ધાવાળો, પોતાના શ્રેયના સાધનમાં ઉદ્યમવાળો, સત્શાસ્ત્રો તથા સદ્‌વ્રતોમાં નિષ્ઠાવાળો, સંતોમાં પ્રીતિવાળો, સુબુદ્ધિમાન, (૧૯) આસ્તિક,

।।१९।। आस्तिको धर्मनिष्ठश्च यमाद्भीतश्च संसृतेः । समाश्रयेद्गुरुं भक्त्या धर्मवंशसमुद्भवम् ।।२०।। स्वासन्नसम्बन्धभिन्नस्त्रीभाषास्पर्शवर्जितम् । स्वीयेतरासु च स्त्रीषु मातृस्वसृसुताधियम् ।।२१।। स्वधर्मनियमैर्जुष्टं स्थितमुद्धववर्त्मनि । हरेर्भक्तं च तस्याग्र उपविष्टं कृताह्निकम् ।।२२।। संपन्नोऽपि गुणैः सर्वैर्धर्मवंश्यो न चेत्तु यः । स गुरुर्नैव कर्तव्यः संसृतेर्मुक्तिमिच्छता ।।२३।। स्नातो धौताम्बरधरः कृतपौर्वाह्निकक्रियः । फलं करे गृहीत्वैव मुमुक्षुस्तमुपाव्रजेत् ।।२४।। निधायाग्रे फलं तस्य प्रणम्य प्राञ्जलिर्वदेत् । भगवन्पाहि मां भीतं संसृतेस्त्वामुपागतम् ।।२५।। इत्थं प्रपन्नाय गुरुस्तस्मा अभयमादितः । दत्त्वा ततश्च सामान्यां सद्यो दीक्षां ददीत सः ।।२६।। कालमायापापकर्मयमदूतभयादहम् । श्रीकृष्णदेवं शरणं प्रपन्नोऽस्मि स पातु माम् ।।२७।। सङ्कल्पं कारयित्वेत्थं श्रीकृष्णस्य प्रसादिना । सकेसरादिगन्धेन स गोपीचन्दनेन वा ।।२८।। कारयित्वोर्ध्वपुण्ड्रं च सम्प्रदायानुसारतः । हर्यङ्घ्रिस्पर्शिते दद्यात्तस्मै तुलसिकास्रजौ ।।२९।। बध्नीयात्कण्ठदेशे ते माले शिष्यस्ततो गुरुः । अष्टाक्षरं कृष्णमन्त्रं श्रवणे त्रिरुपादिशेत् ।।३०।। गुणाक्षरं ततो मन्त्रं जप्तुं सर्वत्र सर्वदा । उपादिशेद्गुरुस्तस्मै पापजालनिकृन्तनम् ।।३१।। दक्षकर्णे द्विजातीनामुपदेश्यो मनुर्मतः । तथा तुरीयवर्णानां वामकर्णे च दूरतः ।।३२।। ततो वदेच्च माहात्म्यं शिष्यं कृष्णस्य देशिकः । शिष्य! त्वं वासुदेवस्य भक्तो जातोऽसि साम्प्रतम् ।।३३।। स हि नारायणः स्वामी धाम्नः स्वादक्षरात्परात् । आविर्बभूव भूलोके न्राकृतिः श्रेयसे नृणाम् ।।३४।।

---

સ્વધર્મમાં નિષ્ઠાવાળો, પોતાના કર્મને અનુસારે યમે જમપુરીમાં અપાતા નરકના ભોગથી અને જન્મમરણરૂપ સંસારથી ભય પામેલો શિષ્ય ધર્મવંશમાં ઉત્પન્ન થયેલા ગુરુનો ભક્તિપૂર્વક આશ્રય કરે. (૨૦) **ધર્મવંશી ગુરુનું લક્ષણ કહે છે :** પોતાના સમીપ સંબંધ વિનાની સ્ત્રીઓની સાથે સંભાષણ તથા સ્પર્શથી રહિત એવા, પોતાની પત્નીથી ભિન્ન સર્વ સ્ત્રીઓમાં માતા-બહેન-પુત્રીની બુદ્ધિ જેને છે એવા; (૨૧) પોતાના વર્ણાશ્રમને યોગ્ય ધર્મના નિયમોથી યુક્ત, ઉદ્ધવ સંપ્રદાયમાં રહેલા, શ્રીહરિના ભક્ત, આહ્નિક વિધિ જેમણે કરેલો છે અને શ્રીહરિની આગળ બેઠેલા એવા ગુરુ = આચાર્યને શરણે જાય. (૨૨) જે ગુરુ એ રીતે કહેલા સર્વ સદ્‌ગુણ-સંપન્ન હોય પણ જો ધર્મવંશના ન હોય તો તે મુમુક્ષુએ આશ્રયણીય ગુરુપદને લાયક નથી. (૨૩) **સામાન્ય દીક્ષાગ્રહણ અને આપવાનો પ્રકાર કહે છે.** શુદ્ધ જળમાં સ્નાન કરેલો, ધોયેલા વસ્ત્રને ધારણ કરનારો, કરી છે પૂર્વ આહ્નિક ક્રિયા જેણે એવો મુમુક્ષુ શિષ્ય, હાથમાં ફળ ગ્રહણ કરીને જ ધર્મવંશના ગુરુને શરણે જાય. (૨૪) ગુરુની આગળ ફળને મૂકીને પ્રણામ કરી બંને હાથ જોડીને શિષ્ય ગુરુ પ્રત્યે બોલે, હે ભગવન્ ! હું સંસારથી બીક પામેલો માટે તમારે શરણે આવેલો છું. મારું રક્ષણ કરો. (૨૫) આ પ્રકારે પોતાને શરણે આવેલા શિષ્યને ગુરુ પ્રથમથી અભય આપીને તમો બીક રાખશો નહિ. શ્રીકૃષ્ણ તમારું સર્વ પ્રકારે રક્ષણ કરશે એવું અભયદાન આપીને પછી સામાન્ય દીક્ષા તત્કાળ જ આપે. (૨૬)

પ્રથમ શિષ્યના જમણા હાથમાં જળ ધારણ કરાવીને શિષ્યને શ્રીકૃષ્ણશરણની પ્રાપ્તિનો સંકલ્પ-મંત્રના જ્ઞાનનો અભાવ હોવાથી શિષ્ય નિમિત્તે ગુરુને બોલવા યોગ્ય **મંત્ર કહે છે** : કાળ, માયા, પાપકર્મ વગેરે સંકલ્પમંત્ર શિષ્ય પાસે બોલાવીને શ્રીકૃષ્ણની શરણપ્રાપ્તિનો સંકલ્પ કરાવે. આ **શરણ-મંત્ર**નો અર્થ, 'કાળ-માયા અને પાપકર્મ તથા યમદૂતના ભયથી હું પરાત્પર શ્રીકૃષ્ણ પરમાત્માને શરણે આવેલો છું. તે પરમાત્મા મારું રક્ષણ કરો'. (૨૭) આ પ્રકારે સંકલ્પ કરાવીને ગુરુએ શ્રીકૃષ્ણની પૂજાથી બાકી રહેલા કેસરે સહિત ઘસેલા ચંદનથી અથવા ગોપીચંદનથી સંપ્રદાયને અનુસરીને ઊર્ધ્વપુંડ્ર તિલક કરાવીને (કુંકુમના ચાંલ્લા સહિત લલાટ, બંને હાથ અને હૃદય આ ચારે ઠેકાણે ઊર્ધ્વપુંડ્ર તિલક કરાવીને) હરિના ચરણકમળને સ્પર્શ કરાવેલી તુલસીની બેવડી કંઠી શિષ્યને આપવી. (૨૮-૨૯) પછી શિષ્ય ગુરુએ આપેલી તુલસીની બેવડી કંઠી પોતાના કંઠમાં બાંધે, પછી ગુરુ **અષ્ટાક્ષર** શ્રીકૃષ્ણનો **મંત્ર** શિષ્યના જમણા કાનમાં ત્રણ વાર ઉપદેશ કરે. (૩૦) પછી જે કોઈ સ્થાનમાં અને સર્વ કાળમાં જપવા માટે પાપસમુદાય જેનાથી નાશ પામે છે તે છ અક્ષરોનો **સ્વામિનારાયણ** આ પ્રસિદ્ધ **નામમંત્ર** ગુરુ શિષ્યને આપે. (૩૧) બ્રાહ્મણાદિ ત્રણ વર્ણોને જમણા કાનમાં મંત્ર દૂરથી (સ્પર્શ કર્યા વગર) ઉપદેશ કરવા યોગ્ય માનેલો છે તથા ચોથો વર્ણ જે શૂદ્રોને ડાબા કાનમાં મંત્ર દૂરથી આપવા યોગ્ય માનેલો છે. (૩૨) પછી ગુરુ કૃષ્ણનું **માહાત્મ્ય** શિષ્યને કહે : હે શિષ્ય ! હાલમાં તમો વાસુદેવ-શ્રીકૃષ્ણ ભગવાનના ભક્ત થયા છો. (૩૩) સ્વામી પુરુષોત્તમ શ્રી વાસુદેવ પૃથ્વીલોકમાં મનુષ્યોનાં કલ્યાણ માટે અક્ષરબ્રહ્મ નામના સર્વોત્કૃષ્ટ પોતાના ધામથી મનુષ્યાકાર નારાયણ મુનિની સંજ્ઞાવાળા પ્રગટ થયા. (૩૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

रक्षार्थं च स्वाश्रययोर्दुष्टेभ्यो भक्तिधर्मयोः । जातस्य तस्य कारुण्यं को वा वक्तुं क्षमो भवेत् ॥३५॥ द्वेषाच्चिन्तयतोऽपि स्वं सुरामांसाशिनोऽसुरान् । निन्ये स्वकीयं धामैव कारुण्येनाततायिनः ॥३६॥ स्मरतां वैरभावेन स्वमित्थं द्विषतामपि । गुणग्राही स भगवान् नागृह्णादगुणान् हृदि ॥३७॥ यद्येवं तर्हि भक्त्या ये भजेयुः स्वमनन्यया । तेभ्यः प्रसन्नः करुणः स स्यात्किं वाच्यमत्र तु ॥३८॥ सर्वेषां हितकर्तारं तमद्य स्वामिनं भवान् । प्राप्तोऽस्ति शरणं तेन मुक्तः संसृतिबन्धनात् ॥३९॥ श्रीकृष्णमेव शरणं यः प्रपद्येत स ध्रुवम् । मायाया मुच्यते नान्यस्तस्यैवात्र वचः शृणु ॥४०॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥४१॥ तस्मात्त्वं सर्वभावेन धर्मान्स्वविहिताञ्छ्रयन् । भजेथाः श्रीवासुदेवं भक्तिधर्मावनोद्भवम् ॥४२॥ इत्थं श्रीकृष्णदेवस्य माहात्म्यं शास्त्रसम्मतम् । कथयन्तं वदेच्छिष्यः प्रहृष्टस्तं प्रणम्य सः ॥४३॥ कालमायाभयाद्घोरान्मुक्तः संसृतिबन्धनात् । श्रीकृष्णस्याद्य भक्तोऽहं गुरो ! जातोऽस्मि निर्भयः ॥४४॥ इत्थं च ब्रुवते तस्मै श्रीकृष्णप्रतिमां गुरुः । ददीत तदभीष्टां वै पूजनायानुवासरम् ॥४५॥ ततश्चोपदिशेद्धर्मांच्छिष्य ! धर्मं सदाऽऽचरेः । धर्मेण धार्यते विश्वं ब्रह्माण्डं सेश्वरं यतः ॥४६॥ प्रातःस्नानं चोर्ध्वपुण्ड्रं स्वकीयं नित्यकर्म च । कृष्णस्य पूजनं कुर्या बहिरन्तस्त्वमन्वहम् ॥४७॥ कृष्णमन्त्रस्य च जपो नियमाच्छुचिना त्वया । निजशक्त्यनुसारेण कार्योऽह्नि निशि चान्वहम् ॥४८॥ एकादश्यस्त्वयोपोष्या हरेर्जन्मदिनानि च । तत्र तत्रोत्सवाः कार्याः स्वस्य शक्त्यनुसारतः॥४९॥

---

પોતાના આશ્રયવાળા ભક્તિ અને ધર્મની દુષ્ટોથી સર્વ પ્રકારે રક્ષા કરવા માટે પૃથ્વીમાં ધર્મભક્તિથી જ આવિર્ભાવ પામેલા શ્રી નારાયણ મુનિનું નિરતિશય દયાળુપણું યથાર્થ કહેવા માટે કોણ સમર્થ થાય ? અર્થાત્ કોઈ થાય નહિ. (૩૫) જે વૈરભાવથી પોતાના સ્વરૂપને ચિંતવન કરતા સુરામાંસને ખાનારા આતયાયીઓ-પોતાને જે કોઈ પણ ઉપાયથી હણવા માટે ઉદ્યમવાળા અસુરોને પણ કરુણાથી પોતાના ધામ પ્રત્યે જ લઈ ગયા. (૩૬) અસુરોએ કરેલા વૈરભાવથી પોતાનાં ચિંતનરૂપ ગુણને ગ્રહણ કરનારા ભગવાન શ્રીહરિએ આવી રીતે વૈરભાવથી પણ પોતાને સંભારતા હંમેશા જ દ્વેષ કરનારા અસુરોના દોષોને પોતાના ચિત્તમાં ગ્રહણ ના કર્યા. (૩૭) જ્યારે અસુરોની ઉપર પણ અનુગ્રહ કર્યો તો જે મનુષ્યો એકાંતિક ભક્તિથી પોતાને ભજે છે તે જનો ઉપર દયાસાગર શ્રીહરિ પ્રસન્ન થાય એમાં કહેવું જ શું ? (૩૮) દ્વેષી અને અદ્વેષી સમગ્રજનોના **હિતકર્તા સ્વામી શ્રીહરિને તમો** હાલમાં શરણ પામેલા છો. માટે **સંસારના બંધનથી મુક્ત** થયેલા છો. (૩૯) જે પુરુષ શ્રીકૃષ્ણના જ શરણને પામે તે પુરુષ નિશ્ચે જ માયાથી મુક્ત થાય છે. બીજો મુકાતો નથી. આ અર્થમાં શ્રીકૃષ્ણનું જ વચન સાંભળો. (૪૦) આ જનોને સંસારના પ્રવાહરૂપે પ્રત્યક્ષ દેખાતી સત્ત્વાદિગુણમયી, દેવ એવા મેં જગતના સર્ગાદિમાં જોડેલી મારી શક્તિરૂપી માયા મારી શરણાગતિ વિના બીજાં સાધનોથી દુઃખથી પણ ન તરી શકાય તેવી છે. માટે જે પુરુષો મને જ પામે છે તે જનો આ માયાને તરે છે. (૪૧) માટે તમો પોતાને પાળવા યોગ્ય ધર્મોને આચરણ કરતા સતા ધર્મે સહિત ભક્તિનું રક્ષણ કરવા માટે આવિર્ભાવ પામેલા શ્રી વાસુદેવને સર્વ ભાવથી ભજો. (૪૨) હે પુત્રો ! આ પ્રકારે શાસ્ત્ર - સંમત શ્રીકૃષ્ણદેવનું માહાત્મ્ય કહેનારા ગુરુને પ્રણામ કરીને શિષ્ય પ્રસન્ન થઈને ગુરુને કહે. (૪૩) હે ગુરો ! અતિશય કઠોર કાળમાયાના ભયથી અને સંસારના બંધનથી હાલમાં હું મુક્ત થઈને શ્રીકૃષ્ણનો નિર્ભય ભક્ત થયો છું. (૪૪) હે પુત્રો ! આ પ્રકારે કહેનારા શિષ્યને ગુરુ શિષ્યે ઈચ્છેલી શ્રીકૃષ્ણની પ્રતિમા દરરોજ પૂજા કરવા માટે આપે. (૪૫) પછી ગુરુ શિષ્યને **ધર્મનો ઉપદેશ** આપે. હે શિષ્ય ! તમે ધર્મનું હંમેશાં પાલન કરો. કારણકે ધર્મથી બ્રહ્માદિ ઈશ્વરો સહિત વિશ્વને ધારણ કરાય છે. (૪૬)

હે શિષ્ય, દરરોજ પ્રાતઃસ્નાન-ઊર્ધ્વપુંડ્ર અને પોતાનું નિત્યકર્મ, સંધ્યાદિક કરો અને હૃદયમાં માનસીપૂજા અને બહાર પ્રદેશમાં કૃષ્ણનું પૂજન કરો. (૪૭) શુદ્ધપણે તમોએ શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રનો જપ નિયમપૂર્વક સંખ્યાથી અને પોતાની શક્તિને અનુસારે દિવસે અને રાત્રિમાં દરરોજ કરવો. (૪૮) સર્વ એકાદશીઓનો ઉપવાસ કરવો અને શ્રીહરિના જન્મદિવસોનાં પોતાની શક્તિને અનુસરીને ઉત્સવો કરવા. (૪૯) મદ્યપાન, માંસભક્ષણ, પરદારાનો સંગ, પારકા દ્રવ્યનું

मद्यं मांसं पारदार्यं स्तेयं स्वपरहिंसनम् । सर्वथैव त्वया त्याज्यं वर्णसङ्करकर्म च ।।५०।। भङ्गागञ्जाहिफेनानि तमालं मादकं च यत् । भक्षणीयं न तत्क्वापि यच्च लोके विगर्हितम् ।।५१।। अगालितं जलं क्षीरं न पेयं च कदाचन । अपशब्दा न वक्तव्याः सत्यं च स्वपरार्तिदम् ।।५२।। स्वासन्नसम्बन्धवतीः स्त्रीर्विनाऽन्यास्तु योषितः । न स्पृशेर्विधवाः क्वापि बुद्धिपूर्वमनापदि ।।५३।। तत्स्पर्शेऽज्ञानतो जाते स्नातव्यं बुद्धिपूर्वकम्। तत्स्पर्शने कृते कार्यं दिनमेकमुपोषणम् ।।५४।। कामाद्बुद्ध्या तु तत्स्पर्शे दिनद्वयमुपोषणम् । तादृक्स्पर्शे जनैर्बुद्धे कुर्याच्चान्द्रायणं व्रतम् ।।५५।। कार्य आवश्यके प्राप्ते प्राप्तायां क्वापि चापदि । बुद्धिपूर्वेऽपि तत्स्पर्शे जाते दोषो न विद्यते ।।५६।। स्त्रैणानामतिलुब्धानां कौलनास्तिकपापिनाम् । शुष्कज्ञानवतां चापि सङ्गः कार्यो न कुत्रचित् ।।५७।। सच्छास्त्रस्य सतां सङ्गं भक्तिं च नवधा हरौ । कुर्यास्त्वं प्रत्यहं शिष्य! कञ्चनापवदेर्न च ।।५८।। कुसङ्गिभ्यो न शृणुयाः कथावार्ता हरेरपि । न च कस्यापि देवस्य वाचाप्युच्छेदमाचरेः ।।५९।। अद्य भागवतान्धर्मान्सतस्त्वं सङ्गतो ह्यसि । सत्सङ्गीति च विख्यातो भविष्यसि धरातले ।।६०।। एवमेव करिष्येऽहमित्याज्ञां शिरसा गुरोः । गृहीत्वा पूजनं तस्य शिष्यः कुर्याद्गुरोर्मुदा ।।६१।। नवीनैर्वसनैर्गन्धपुष्पस्त्रक्शेखरादिभिः । स्वर्णरूप्यादिमुद्राभिः सदन्नैश्च स्वशक्तितः ।। ६२।। अभ्यर्च्य तं यथाशक्ति सतो विप्रांश्च पूजयेत् । ततः साष्टाङ्गमानम्य गृहं गच्छेत्तदाज्ञया ।।६३।। ततः स दीक्षितो नित्यमुत्साहेन भजेत्प्रभुम् । वर्णाश्रमोचितं धर्मं गुरूक्तं पालयन् पुमान् ।।६४।। केसराद्यैरूर्ध्वपुण्ड्रं कुर्याद्विष्णुप्रसादिभिः । श्रीखण्डेनाथवा गोपीचन्दनेन सचन्द्रकम् ।।६५।। राधारमाप्रसादेन चन्द्रकं कुङ्कुमेन वा । कुर्याद्गृहस्थो वर्णी च तथा साधुजनश्च यः ।।६६।। सन्न्यासिनो वनस्थाश्च साग्निकाश्चोर्ध्वपुण्ड्रकम् ।

અપહરણ, પારકી અને પોતાની હિંસા, અપેયનું પાન, અભક્ષ્યનું ભક્ષણ અને જાતિભ્રંશકર્મનું આચરણ તમોએ સર્વ પ્રકારે ત્યાગ કરવું. (૫૦) ને ભાંગ, અફીણ, તમાકુ જે મદને પેદા કરનારાં, મહાજમ વગેરે જે લોકમાં નિંદિત ઉમરડાનાં ફળ અને વિષ્ટામાં થયેલાં શાક વગેરે તે સર્વે પણ ક્યારેય ન ખાવાં. (૫૧) વસ્ત્રથી ગાળ્યા વગરનું જળ અને દૂધ ક્યારેય ન પીવું. ગાળો વગેરે નઠારા શબ્દો બોલવા નહિ અને પારકો અથવા પોતાનો દ્રોહ થાય તેવું સત્ય વચન બોલવું નહિ. (૫૨) પોતાના સમીપ સંબંધ વિનાની સ્ત્રીઓ વિના વિધવા સ્ત્રીઓનો ક્યારેય પણ બુદ્ધિપૂર્વક આપત્કાળ વિના સ્પર્શ ન કરવો. (૫૩) અજ્ઞાનથી વિધવાનો સ્પર્શ થયો હોય તો સ્નાન કરવું. અને બુદ્ધિપૂર્વક સ્પર્શ થયો હોય તો એક દિવસ ઉપવાસ કરવો. (૫૪) કામબુદ્ધિથી વિધવાનો સ્પર્શ થયો હોય તો બે દિવસ સુધી ઉપવાસ કરવો તેવા પ્રકારનો વિધવાનો સ્પર્શ જનોએ જાણ્યો હોય તો ચાંદ્રાયણ વ્રત કરવું (૫૫) આવશ્યક કાર્ય, વેચાતું આપવામાં અથવા લેવામાં સ્પર્શ થયો હોય, ક્યારેક જળમાં બૂડવાનો પ્રસંગ તથા અગ્નિદાહાદિક આપત્કાળમાં બુદ્ધિપૂર્વક સ્પર્શ થાય તેનો દોષ નથી. (૫૬) સ્ત્રીલંપટો, અતિ લોભિયાઓ, વામમાર્ગીઓ, નાસ્તિકો, બ્રહ્મહત્યાદિ મહાપાપ યુક્તનો અને નિર્વિશેષ બ્રહ્મને કહેનારાઓનો સંગ ક્યારેય પણ ન કરવો. (૫૭) હે શિષ્ય ! તમે દરરોજ સત્શાસ્ત્રનો અને ઉદ્ધવ સંપ્રદાયના સાધુઓનો સંગ અને શ્રીહરિમાં નવધા ભક્તિ કરો. કોઈના ઉપર અપવાદ મૂકવો નહિ. (૫૮) શ્રીહરિની કથાવાર્તા કુસંગીથી સાંભળવી નહિ કોઈ દેવની વચનથી પણ નિંદા કરવી નહિ. (૫૯) કારણકે તમે આ દિવસે સત્‌શબ્દથી કહેવાતા **ભાગવત ધર્મો**ને પામેલા છો. માટે પૃથ્વીમાં **સત્સંગી** નામથી પ્રસિદ્ધ થશો. (૬૦)

હે પુત્રો ! આવા પ્રકારની ગુરુની આજ્ઞા **'હું આ પ્રકારેજ કરીશ'** આ પ્રમાણે મસ્તકથી ગ્રહણ કરી **શિષ્ય** ગુરુનું પૂજન અતિ આનંદથી કરે. (૬૧) નવીન વસ્ત્રો, ચંદન, પુષ્પોના હારો, તોરાઓ વગેરે અલંકારો, સુવર્ણ અને ચાંદીની મુદ્રાઓ, સારાં અન્ન, ઘી, સાકર એ યુક્ત કાચું અન્ન વગેરેથી પોતાની શક્તિ પ્રમાણે ગુરુને વિધિ પ્રમાણે પૂજીને શક્તિ પ્રમાણે સાધુઓ અને બ્રાહ્મણોને પૂજે પછી ગુરુને સાષ્ટાંગ નમસ્કાર કરીને ગુરુની આજ્ઞાથી ઘેર જાય. (૬૨-૬૩) પછી દીક્ષાવાળો પુરુષ ગુરુએ કહેલા વર્ણાશ્રમને યોગ્ય ધર્મનું પાલન કરતો થકો ઉત્સાહપૂર્વક શ્રીકૃષ્ણને ભજે. (૬૪) વિષ્ણુની પ્રસાદી કેસર-કંકુથી યુક્ત ચંદનથી અથવા કેવળ ચંદનથી અથવા ગોપીચંદનથી ચાંલ્લા સહિત ઊર્ધ્વપુંડ્ર તિલક કરે. (૬૫) ગૃહસ્થ અને વર્ણી તથા સાધુજન રાધા અને લક્ષ્મીના પ્રસાદીભૂત કુંકુમથી ચાંલ્લો ઊર્ધ્વપુંડ્રના મધ્યમાં કરે. (૬૬) સંન્યાસીઓ-વાનપ્રસ્થો અને અગ્નિહોત્રી બ્રાહ્મણો ગોપીચંદન નામની મૃત્તિકાથી અથવા ઘસેલા ચંદનથી મધ્યમાં ચાંલ્લા

विचन्द्रकं मृदा कुर्युश्चन्दनेनापि वा शुभम् ।।६७।। तत्र ये गृहिणो भक्तास्तथा साधुजनाश्च ये । तैर्दृष्ट्वा मुकुरं कार्यमूर्ध्वपुण्ड्रचतुष्टयम् ।।६८।। सन्न्यासिनश्चतुर्धा स्युराद्यस्तत्र कुटीचकः । बहूदकस्तथा हंसस्तुर्यः परमहंसकः ।।६९।। कुटीचकादयस्तत्र कुर्युः पुण्ड्रत्रयं त्रयः । शीर्ष्णि भाले हृदि तथा भाल एकं तुरीयकः ।।७०।। वानप्रस्था वर्णिनश्च भाले कण्ठे तथा हृदि । बाह्वोश्चेति च पञ्चैव दध्युः पुण्ड्राणि नित्यदा ।।७१।। सच्छूद्राणां दीक्षितानां प्रोक्तं पुण्ड्रचतुष्टयम् । असच्छूद्रादिकानां तु भाले चन्दनचन्द्रकः ।।७२।। चतुष्टये तु पुण्ड्राणां वासुदेवादयोऽभिधाः । पठनीया भगवतश्चतस्रो भक्तपूरुषैः ।।७३।। कृष्णकेशवमुख्यानि पञ्च नामानि पञ्चके । पुण्ड्राणां पठनीयानि गायत्री वैष्णवी च वा ।।७४।। पुण्ड्रत्रये तु प्रणवः पठनीयस्त्रिमात्रकः । एकस्मिन्निह पुण्ड्रे तु पाठ्यो नारायणो मतः ।।७५।। पुण्ड्रमूर्ध्वं समं सौम्यं कनिष्ठाङ्गुलिवत्स्मृतम् । ऋजु दण्डाकृति शुभं तर्जन्या कार्यमेव तत् ।।७६।। अङ्गुल्या तिलकं कर्तुं न भवेद्यस्य दक्षता । स शलाकादिना कुर्याद्यथा तत्स्यात्सुशोभनम् ।।७७।। वर्तुलं तिर्यगच्छिद्रं ह्रस्वं दीर्घं ततं तनु । वक्रं विरूपं वक्राग्रं छिन्नमूलं पदच्युतम् ।।७८।। शुभ्रं रूक्षमारक्तं जले दृष्ट्वा च यत्कृतम् । विगन्धमवसव्यं च पुण्ड्रमाहुरनर्थकम् ।।७९।। प्रासादिक्यौ भगवतस्तुलसीमालिके गले । धारयेत्प्रयतो भक्तस्तादृशीं जपमालिकाम् ।।८०।। तुलसीकाष्ठमालाया अलाभे तु स

રહિત ઊર્ધ્વપુંડ્ર કરે. (૬૭) તેમાં જે ગૃહસ્થ ભક્તો છે તથા જે સાધુજનો છે તેમણે દર્પણમાં પોતાનું મુખ જોઈને ચાર ઊર્ધ્વપુંડ્ર કરવાં. (૬૮) સંન્યાસીઓ ચાર પ્રકારના છે. તેમાં પ્રથમ કુટીચક તથા બીજા બહૂદક ત્રીજા હંસ-ચોથા પરમહંસ છે. (૬૯) તેમાં કુટીચકાદિ ત્રણ મસ્તક, લલાટ અને હૃદયમાં અનુક્રમે ત્રણ પુંડ્ર કરે તથા ચોથો પરમહંસ ભાલમાં એક ઊધ્વપુંડ્ર કરે. (૭૦) વાનપ્રસ્થો અને વર્ણીઓ ભાલ-કંઠ-હૃદય તથા બંને બાહુના મૂળમાં આ પાંચ સ્થાનોમાં પાંચ ઊર્ધ્વપુંડ્રો હંમેશા ધારણ કરે. (૭૧) ઉદ્ધવ સંપ્રદાયની દીક્ષાવાળા સત્શૂદ્રોને **ચાર ઊર્ધ્વપુંડ્ર** કહેલા છે. દીક્ષિત અસત્શૂદ્રો વગેરેને તો ભાલમાં ચંદનનો કેવળ ચાંલ્લો જ કહેલો છે. (આદિ શબ્દથી સંકર જાતિ સૂત વગેરેનું ગ્રહણ કરવું.) (૭૨) ચાર ઊર્ધ્વપુંડ્રમાં ભક્ત પુરુષોએ શ્રીકૃષ્ણના વાસુદેવાદિ ચાર નામો બોલવાં. વાસુદેવાય નમઃ લલાટે, સંકર્ષણાય નમઃ હૃદયે, પ્રદ્યુમ્નાય નમઃ દક્ષિણ બાહૌ, અનિરુદ્ધાય નમઃ વામ બાહૌ આ ચારનો અનુક્રમ જાણવો. (૭૩) **પાંચ પુંડ્રોમાં** કૃષ્ણ-કેશવ વગેરે પાંચ નામો બોલવાં કૃષ્ણાય નમઃ ભાલે, કેશવાય નમઃ કંઠે, નારાયણ નમઃ હદયે, માધવાય નમઃ દક્ષિણબાહૌ, ગોવિન્દાય નમઃ વામ બાહૌ આ પ્રમાણે ક્રમ જાણવો. અથવા વૈષ્ણવી ગાયત્રી બોલવી, પાંચેય સ્થાનોમાં બોલીને ઊર્ધ્વપુંડ્ર તિલક કરવા. (૭૪) ત્રણ પુંડ્રમાં તો અકારાદિ ત્રણ માત્રાવાળા ૐકારના ઉચ્ચારણપૂર્વક નારાયણનું ધ્યાન ધરીને ત્રણ પુંડ્ર કરવા. અહીંયા આ એક પુંડ્રમાં તો ૐ નારાયણાય નમઃ આવી રીતે ઉચ્ચારણ કરીને પુંડ્ર કરવું. (૭૫) ઊર્ધ્વપુંડ્ર તિલક સરખું સૌમ્ય કનિષ્ઠ આંગળીની માફક સમાન મધ્ય ભાગમાં પહોળાઈવાળું નાસિકાના મૂળથી આરંભીને કેશપર્યંત દેખાતી નાની રેખાવાળું સરલ માટે જ દંડના સમાન આકૃતિવાળું શોભાયુક્ત કહેલું છે. તે ઊર્ધ્વપુંડ્ર તર્જનીથી જ કરવું. (૭૬) જે ભક્તને તર્જની આંગળીથી તિલક કરવાની ચાતુર્યતા ના હોય તે ભક્ત તે તિલક જેમ સારી શોભાયુક્ત થાય તે પ્રમાણે સળી વગેરેથી કરે. (૭૭)

**ન કરવા યોગ્ય તિલકનો પ્રકાર** :- તિલક ગોળ-ઊર્ધ્વ આકૃતિએ રહિત ન જ કરે તથા ઊર્ધ્વ કરેલું પણ વાંકા ભાવને પામેલું, અંદર છિદ્રે રહિત, બહુ નાનું, દીર્ઘ, નાસિકાના અગ્રભાગને આરંભીને કેશાંત સુધી બહુ લાંબુ કરેલું, બહુ પહોળુ, અતિ થોડું પહોળું, સમ રેખાએ રહિત હોવાથી લગાર વાંકું, વિરૂપ (ભયંકર), મૂળમાં થોડું પહોળું અને ઉપરથી બહુ પહોળું, છેદાઈ ગયેલા મૂળવાળું, ભાલના મધ્ય પ્રદેશ રૂપ પોતાના સ્થાનથી જ્યાં ત્યાં કરેલું મલિન અથવા શ્યામ, જળ વિના કરેલું (લૂખું), ચારે બાજુએ લાલવર્ણવાળું, જળમાં જોઈને કરેલું, સુગંધ રહિત, ડાબે હાથે કરેલું. આવાં લક્ષણોવાળું તિલક **વૃથાભૂત હોવાથી** ન જ કરે. (૭૮-૭૯) ભક્તજન નિયમ તત્પર થઈ ભગવાનના ચરણસ્પર્શથી તેમના **પ્રસાદભૂત,** બેવડી તુલસીમાળાને ગળામાં યજ્ઞોપવીતની પેઠે નિરંતર ધારે તથા ભગવાનના પ્રસાદભૂત **જપમાળા**ને તુલસી કાષ્ઠથી બનાવીને રાખે. (૮૦) દીક્ષિત પુરુષ તુલસીના કાષ્ઠની માળા ના મળે તો ચંદન-ધાત્રીના કાષ્ઠની કરેલી શ્રીહરિની પ્રસાદીની માળા ધારણ કરે. (૮૧) દીક્ષિત ભક્ત હંમેશા પ્રાતઃકાળમાં સ્નાન કરીને નિત્ય કર્મ કરી શ્રીહરિની પ્રતિમાને પૂજે. પવિત્ર

दीक्षितः । प्रासादिकीं हरेर्दध्याच्चन्दनादितरूद्भवाम् ॥८१॥ प्रातः स्नात्वा नित्यकर्म कृत्वार्चेत्प्रतिमां हरेः । अष्टाक्षरं यथाशक्ति जपेन्नित्यं शुचिः स च ॥८२॥ दृढासनो जपेत्तं च मौनी स्वस्थोऽत्वरन्नृजुः । वस्त्राच्छादितमालश्च वासुदेवं हृदि स्मरन् ॥८३॥ कुर्वीत द्वारिकायात्रामवश्यं दीक्षितो ह्यसौ । अङ्कयेत्तत्र बाहू च श्रीपतेस्तप्तहेतिभिः ॥८४॥ जन्माष्टम्याद्युत्सवेषु स स्वाचार्यस्य दर्शनम् । कर्तुं तदन्तिकं गच्छेत्तं दृष्ट्वा दण्डवन्नमेत् ॥८५॥ प्रणमेद्दक्षिणे भागे किञ्चिद्दूरे तमादरात् । आज्ञां विना तदङ्गं तु सच्छिष्यो न स्पृशेत्क्वचित् ॥८६॥ गुरुसेवापरो नित्यं तथ्यवादी गुरोः पुरः । काले काले यथायोग्यं तस्य कुर्याच्च दर्शनम् ॥८७॥ गुरोः शय्यामासनं च नाधिरोहेच्च पादुकाम् । तत्पानपात्रेण जलं न पिबेच्च कदाचन ॥८८॥ सद्गुरोराज्ञया तस्य वसतोऽपि गृहाश्रमे । भक्तस्य संसृतेर्भीतिः पुनर्नास्त्यन्यजीववत् ॥८९॥ दानेऽस्या अपि दीक्षाया द्वेधा विधिरुदीरितः । अधिकारविभेदेन मन्त्रभेदाद्रमापतेः ॥९०॥ तत्रोक्तोऽयं विधिः सर्वश्चातुर्वर्ण्यस्य दीक्षणे । ज्ञेयस्तथैवाश्रमिणां चतुर्णामपि सम्मतः ॥९१॥ वर्णाश्रमेतरे ये तु तेषां वच्म्यधुना विधिम् । तिष्ठेयुस्ते गुरोर्गेहाद्बहिः प्राञ्जलयो जनाः ॥९२॥ तेभ्यो गुरुः स चान्येन त्र्यक्षरं तूपदेशयेत् । मद्यमांसत्यागमुख्यान्नियमांश्च यथोचितम् ॥९३॥ ततस्तैः पालनीयास्ते धर्मा नित्यमतन्द्रितैः । साधूनां दर्शनं कार्यं न तु स्पर्शोऽननुज्ञया ॥९४॥ स्वग्रामे राधिकाकृष्णप्रतिमा त्वौद्धवालये । यत्र स्याद्दर्शनं तस्यास्तैः कार्यं प्रतिवासरम् ॥९५॥ बाह्या पूजा न तैः कार्या नित्यं कार्यैव मानसी । बहिस्तु दर्शनेनैव पूजाफलमवाप्नुयुः ॥९६॥ नाममन्त्रस्य तु जपो नियमेनैव नित्यदा । कर्तव्यश्चन्द्रको भाले चन्दनेन मृदापि वा

---

થઈને પોતાના આચાર્યે ઉપદેશ કરેલા શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રને શક્તિ પ્રમાણે જપે. (૮૨) સ્થિર આસનવાળો, મૌની, ઉદ્વેગ રહિત, માળા ફેરવતી વખતે અને મંત્રોચ્ચારણ વખતે ઉતાવળ રહિત, સરલ શરીરવાળો, જપમાળાને ગૌમુખીથી અથવા વસ્ત્રાદિથી આચ્છાદન કરીને માળા ફેરવે. પોતાના મનમાં વાસુદેવને સ્મરણ કરતો ભક્ત અષ્ટાક્ષર મંત્રનો જપ કરે. (૮૩) દીક્ષાવાળો આ શિષ્ય **દ્વારિકાની યાત્રા** અવશ્ય કરે જ. દ્વારિકામાં શ્રીલક્ષ્મીના પતિના અગ્નિથી ઉષ્ણ કરેલાં સુદર્શનાદિ આયુધોથી બંને બાહુને અંકિત કરે. (અહીંયાં દ્વારિકા શબ્દથી વૃત્તાલય જાણવું.) (૮૪) **દીક્ષિત પુરુષ જન્માષ્ટમ્યાદિ ઉત્સવોમાં દર્શન કરવા માટે પોતાના આચાર્ય સમીપે જાય.** પોતાના આચાર્યને જોઈને દંડની માફક નમસ્કાર કરે. (૮૫) સારો શિષ્ય ગુરુના જમણે પડખે લગારેક દૂર રહીને ગુરુને આદરપૂર્વક પ્રમાણ કરે. ગુરુની આજ્ઞા વિના ગુરુના ચરણાદિ અવયવને ક્યારેય પણ સ્પર્શ કરે નહિ. (૮૬) દરરોજ ગુરુની સેવાપરાયણ, ગુરુની આગળ સત્ય બોલનારો શિષ્ય સમયે સમયે સભામાં બેસવા વગેરે અનેક અવસરમાં યથાયોગ્ય પોતાના ગુરુના દર્શન કરે. (૮૭) ગુરુની શય્યા, આસન અને પાદુકાને પોતે વાપરે નહિ. તેમને પીવાનાં પાત્રથી ક્યારેય પણ જળ પીએ નહિ. (૮૮) સદ્ગુરુની આજ્ઞાથી ગૃહસ્થાશ્રમમાં રહેલો છે તો પણ તે ભક્તને અન્ય જીવની માફક ફરીથી જન્મમરણરૂપી સંસારનો ભય નથી. (૮૯) અધિકારભેદથી (વર્ણાશ્રમી અને બીજા જનો એમ બે વિભાગથી) શ્રીકૃષ્ણના મંત્રભેદથી આ સામાન્ય દીક્ષાના દાનમાં પણ બે પ્રકારનો વિધિ કહેલો છે. (૯૦) બે પ્રકારની દીક્ષાવિધિમાં કહેલો આ (પૂર્વોક્ત) સર્વ વિધિ ચાર વર્ણની દીક્ષામાં જાણવો. તે જ પ્રકારે ચાર આશ્રમીઓની દીક્ષામાં પણ સંમત છે. (૯૧)

જે વર્ણાશ્રમથી ઈતર-બીજા જનો તેમનો સામાન્ય દીક્ષાનો વિધિ તો હાલમાં કહું છું : વર્ણાશ્રમથી બીજા લોકો બંને હાથ જોડીને ગુરુના ઘરથી બહાર ઊભા રહે. (૯૨) તે ગુરુ તે જનોને બીજા પોતાના આશ્રિત ત્રણ વર્ણના માણસ પાસે **'શ્રીકૃષ્ણ'** આ ત્રણ અક્ષરનો મંત્ર-ઉપદેશ અપાવે. (षडर्णं-૭ અક્ષરનો-આવો પાઠ હોય તો **'સ્વામિનારાયણ'** આ ૭ અક્ષરનો મંત્ર જાણવો.) અને મદ્ય-માંસાદિનો ત્યાગ વગેરે નિયમોનો યથાયોગ્ય ઉપદેશ કરાવે. (૯૩) પછી ચાર વર્ણથી અન્ય જનોએ આળસે રહિત થઈને નિયમો હંમેશાં પાળવા, સાધુઓનાં દર્શન કરવાં, સાધુની આજ્ઞા વિના ચરણાદિનો સ્પર્શ કરવો નહિ. (૯૪) જે ગામમાં ઉદ્ધવ સંપ્રદાયના મંદિરમાં રાધાકૃષ્ણની પ્રતિમા હોય તો તે **પ્રતિમાનાં દર્શન** ચાર વર્ણથી બીજા જનોએ દરરોજ કરવાં. (૯૫) તે જનોએ બાહ્ય પૂજા ન કરવી. હંમેશા માનસી પૂજા કરવી. ચિત્રપ્રતિમાદિ બાહ્યપૂજાનું ફળ તો ઉદ્ધવ સંપ્રદાયના મંદિરમાં રહેલી પ્રતિમાના દર્શન માત્રથી જ તેમને મળે છે. (૯૬) નામ મંત્રનો જપ સર્વદા નિયમથી કરવો. ભાલમાં ચંદન અથવા ગોપીચંદનથી ચાંલ્લો જ કરવો. (૯૭) પોતાના ગામમાં જો શ્રીકૃષ્ણની પ્રતિમા ન

।।९७।। स्वग्रामे प्रतिमा न स्यात्प्रभोर्यदि तदान्तिके । पुष्पस्त्रग्वस्त्रखण्डादि रक्ष्यं प्रासादिकं हरेः ।।९८।। दर्शनं स्पर्शनं तस्य कर्तव्यं प्रतिवासरम् । भगवत्प्रतिमायास्तु स्पर्शः कार्यो न कर्हिचत् ।।९९।। इति द्वितीयो दीक्षायाः सामान्याया विधिर्मया । निरूपितस्तथा कार्यो गुरुशिष्यैरिहोद्धवैः ।।१००।। सामान्यदीक्षाविधिरित्थमुक्तो द्वेधा मया शास्त्रदृशा युवाभ्याम् । विशेषदीक्षाविधिमप्यशेषं हिताय लोकस्य वदामि पुत्रौ ! ।।१०१।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे दीक्षाविधौ सामान्यदीक्षाविधिनिरूपणनामा षट्चत्वारिंशोऽध्यायः ।।४६।।

श्रीनारायणमुनिरुवाच - अस्ते च वार्धके बाल्ये देवदैत्यपुरोधसोः । नीचस्थे सिंहगे चेज्ये दीक्षा देया न वक्रगे ।।१।। एकादश्यां प्रबोधन्यां जन्माष्टम्यां च दीक्षणे । दोषो रामनवम्यां च नास्तादेर्गुरुशुक्रयोः ।।२।। मलमासे च वर्षासु श्रीकृष्णस्य मनुः क्वचित् । नोपदेश्यो न च ग्राह्यः सूर्यचन्द्रग्रहं विना ।।३।। न मासतिथिवारादि विचार्यं ग्रहपर्वणि । सूर्यचन्द्रग्रहसमो नान्यः कालो यतः शुभः ।।४।। अस्तादिदोषहीनासु सर्वास्वेकादशीषु च । द्वादशीष्वपि सर्वासु दीक्षा देया तु सङ्गवे ।।५।। पुराणप्रथिते देशे शुचौ दीक्षाविधिर्मतः । धर्मवंश्यो गुरुर्दद्याद्दीक्षां शिष्यं परीक्ष्य सः ।।६।। वर्षेणापि परीक्ष्यैव धर्मपालनशीलताम्। शिष्यस्य स ततो दद्याद्दीक्षां तस्मै नचान्यथा ।।७।। धर्मपालनसामर्थ्यमपरीक्ष्य तु यो गुरुः । ददाति

હોય તો શ્રીહરિની પ્રસાદી પુષ્પની માળા, વસ્ત્રનો કટકો વગેરે પોતાની પાસે રાખવું. (૯૮) શ્રીહરિના પ્રસાદીભૂત પુષ્પની માળા તથા વસ્ત્રના ટુકડાનાં દર્શન અને સ્પર્શ દરરોજ કરવાં. ભગવાનની પ્રતિમાનો સ્પર્શ તો ક્યારેય પણ ન કરવો. (૯૯) આ રીતે મેં સામાન્ય દીક્ષાનો (પ્રકારરૂપ) બીજો વિધિ નિરૂપણ કરેલો છે. આ લોકમાં ઉદ્ધવ સંપ્રદાયમાં વર્તતા ગુરુ અને શિષ્યોએ આ પ્રકારે-કહ્યા પ્રમાણે બીજો વિધિ કરવો. (૧૦૦)

હે પુત્રો ! આ પ્રકારે મેં સામાન્ય દીક્ષાવિધિ શાસ્ત્રદૃષ્ટિથી તમોને બંનેને બે પ્રકારે કહ્યો. સમગ્ર વિશેષ દીક્ષાવિધિ પણ મારા આશ્રિતજનના હિત માટે કહું છું. (૧૦૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે દીક્ષાવિધૌ સામાન્યદીક્ષાવિધિનિરૂપણનામા ષટ્ચત્વારિંશોઽધ્યાયઃ (૪૬)*

## અધ્યાય : ૪૭

### શ્રીહરિએ મહાદીક્ષાના ગ્રહણમાં શાસ્ત્રવિધિ પ્રમાણે કાળ અને અધિકારીનું નિરૂપણ કર્યું છે.

**શ્રીનારાયણ મુનિ બોલ્યા** : હે પુત્રો ! દેવદૈત્યના પુરોહિત ગુરુ-શુક્રના અસ્તપણામાં, વૃદ્ધપણામાં અને બાળપણામાં તથા ગુરુ નીચ રાશિમાં, સિંહ રાશિમાં અને વક્રગતિમાં વર્તતા હોય ત્યારે દીક્ષા દેવી નહિ. ગુરુ શુક્રનાં અસ્તાદિ લક્ષણો નિર્ણયસિંધુથી જાણવાં. (૧) મહાદીક્ષા ધારણમાં કહેલો આ ગુરુશુક્રનો અસ્તાદિ દોષ પ્રબોધિની એકાદશી, જન્માષ્ટમી, અને રામનવમી થકી બીજા દિવસોમાં જાણવો. એટલે આ તિથિઓમાં મહાદીક્ષા લેવામાં અસ્તાદિ દોષ છે જ નહિ. (૨) મળમાસ (અધિકમાસ) અને વર્ષાઋતુમાં શ્રીકૃષ્ણનો મહાદીક્ષાનાં અંગભૂત મંત્ર ક્યારેય પણ ગુરૂએ ઉપદેશ કરવો નહિ તેમજ શિષ્યે લેવો નહિ. (આ નિષેધ સૂર્યચંદ્રના ગ્રહણ થકી અન્યત્ર જાણવો.) (૩) સૂર્યચંદ્રના ગ્રહણ યુક્ત અમાવાસ્યા અને પૂર્ણિમામાં માસ, તિથિ વાર આદિનો વિચાર કરવો નહિ. કારણ કે સૂર્ય-ચંદ્રના ઉપરાગના અવસર સમાન બીજો કાળ દીક્ષા ગ્રહણ કરવામાં તથા દીક્ષા આપવામાં શુભ સમય નથી. સ્મૃતિમાં કહ્યું છે : **'સત્તીર્થેઽર્કવિધુગ્રાસે તનુવામનપર્વણિ મંત્રદીક્ષાં પ્રકુર્વીત માસર્ક્ષાદિ ન શોધયેત્ ।।'** (૪) કહેલા અસ્તાદિ દોષે રહિત સર્વે એકાદશીઓ અને દ્વાદશીઓ પણ પ્રશસ્ત માની છે. તો આ તિથિઓમાં સંગવ સમયે દીક્ષા દેવી. (૫) પુરાણમાં પ્રસિદ્ધ પવિત્ર દેશમાં દીક્ષાવિધિ માનેલો છે. વળી ધર્મવંશના ગુરુ શિષ્યની પરીક્ષા કરીને દીક્ષા આપે. (૬) શિષ્યના ધર્મપાલનના સ્વભાવની ઘણા માસ અથવા એક વર્ષ સુધી પણ પરીક્ષા કરીને પછી જ ગુરુ શિષ્યને દીક્ષા આપે. ધર્મપાલનના સ્વભાવની પરીક્ષા કર્યા વિના દીક્ષા આપવી નહીં. (૭) જે ગુરુ ધર્મપાલનની શક્તિની પરીક્ષા કર્યા વગર શિષ્યને દીક્ષા આપે છે તે ગુરુ શિષ્યે કરેલા પાપથી દોષ યુક્ત થાય છે. (૮) જેમ મંત્રીએ કરેલું પાપ રાજાને પ્રાપ્ત થાય છે, પત્નીએ કરેલું પાપ તેના સ્વામીને પ્રાપ્ત થાય છે તેમ શિષ્યે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

दीक्षां शिष्यस्य स तत्पापेन युज्यते ॥८॥ अमात्यपापं राजानं पत्नीपापं च तत्पतिम् । यथा तथा शिष्यपापं गुरुं प्राप्नोति निश्चितम् ॥९॥ तस्मादादौ परीक्षेत शिष्यं गुरुरतन्द्रितः । तल्लक्षणानि सङ्क्षेपात्सच्छास्त्रोक्तानि वच्म्यहम् ॥१०॥ शान्तः सुशीलः शुद्धात्मा श्रद्धालुर्धर्मसंस्थितः । असत्वरश्चानसूयो मुमुक्षुः सत्यभाषणः ॥११॥ अधीतसच्छास्त्रविद्यो निजशक्त्यनुसारतः । स्वीयनिर्वाहोपयुक्तद्रव्यवान् गतमत्सरः ॥१२॥ दोषं महान्तं च विदन् स्पर्शने विधवस्त्रियाः । पापकर्मसु भीरुश्च तपस्युत्साहशक्तिमान् ॥१३॥ महापापेष्वन्यतमं गोघातो येन वा क्वचित् । कृतपूर्वो भवेन्नैव न कृतघ्नश्च यो भवेत् ॥१४॥ भोजने पङ्क्तिभेदं च यो न कुर्यादनापदि । स्वधर्मपालने यस्य शैथिल्यं स्यान्न च क्वचित् ॥१५॥ स्वबन्धोरप्यल्पमपि पदार्थं यश्च कर्हिचित् । अनापृच्छ्य न गृह्णीयाद्यो न विश्वासघातकः ॥१६॥ प्रतिश्रुतं तथा स्वेन कर्मकर्त्रे तथैव तत् । यश्च दद्यान्न तु क्वापि भञ्ज्यादेकं कपर्दकम् ॥१७॥ नातिलोभी नातिकामी मानेर्ष्याक्रोधवर्जितः । ऋजुर्दयालुप्रकृतिस्तितिक्षुर्धैर्यवाञ्छुचिः ॥१८॥ क्षुधया व्याकुलो न स्याद्व्रताद्याचरणे च यः । साधुशूश्रूषणरुचिर्निश्छद्मा विजितेन्द्रियः ॥१९॥ स्त्रीशिष्यतां च न प्राप्तः कौलमार्गं च नाश्रितः । न दिवास्वापशीलश्च न प्रमादी च यः पुमान् ॥२०॥ प्रवृत्तिधर्मोदासीनो निवृत्तं धर्ममादरात् । सिसेविषुः पुमान् योऽसावधिकार्यत्र कीर्तितः ॥२१॥ एतैस्तु लक्षणैर्हीनो यः पुमांस्तं न दीक्षयेत् । तथाभूतोऽपि यो व्यङ्गस्तं चापि न गुरुः क्वचित् ॥२२॥ अन्धः काणः केकरश्च पङ्गुः कुब्जश्च वामनः । छिन्नोष्ठनासाकर्णश्च मूकश्च बधिरः कुणिः ॥२३॥ खञ्जो भूतादिविकलः श्वित्री रुग्णः क्षयी जडः । नीचकर्मा चातिवृद्धो

કરેલું પાપ નિશ્ચે ગુરુને પ્રાપ્ત થાય છે. (૯) માટે ગુરુ સાવધાન થઈને પ્રથમ દીક્ષા આપવા પહેલાં જ શિષ્યની પરીક્ષા કરે. તે માટે સત્શાસ્ત્રમાં કહેલાં શિષ્યની પરીક્ષાનાં લક્ષણો સંક્ષેપથી કહું છું. (૧૦)

रोहिणी बुधसंयुता । निशीथगाऽष्टमी सम्यग्नोत्तरा तु निशीथगा ॥३॥ तदा विद्धापि सप्तम्या ग्रहीतव्याष्टमी व्रते । परेद्युः पारणा कार्या तिथ्यन्ते व्रतचारिभिः ॥४॥ प्रोक्ता योगविशेषेण सप्तमीसहिताऽष्टमी । ग्राह्येत्यग्निपुराणादौ नान्यथा केवलाष्टमी ॥५॥ पूर्वेद्युरेव योगश्च प्रागुक्तः सकलो यदि । भवेदथ परेद्युस्तु निशीथे केवलाष्टमी ॥६॥ उपवासद्वयं कुर्यात्तदा शक्तस्तु पूरुषः । उपवासमशक्तस्तु कुर्यादेकं परेऽहनि ॥७॥ बुधाष्टमीरोहिणीनां निशीथे योगमन्तरा । पूर्वविद्धा न कर्तव्या बुधैर्जन्माष्टमी क्वचित् ॥८॥ बुधवारो न चेत्तर्हि रोहिणी सहितामपि । पूर्वविद्धां विहायैव शुद्धा ग्राह्याऽष्टमी मता ॥९॥ विना ऋक्षेणापि कार्या नवमीसंयुताऽष्टमी । सत्रक्षापि न कर्तव्या सप्तमीसंयुताष्टमी ॥१०॥ पलं घटीं मुहूर्तं वा यदा कृष्णाष्टमी ततः । नवमी सैव ग्राह्या स्यात्सप्तमीसंयुता न तु ॥११॥ विद्धायाश्च क्षयः स्याच्चेत्तदा तु व्रतचारिभिः । ग्राह्या विद्धापि सप्तम्येत्यूचुः केचन वैष्णवाः ॥१२॥ श्रीविठ्ठलेशस्य मते विद्धायास्तु क्षये सति । उपोष्या नवमीत्येवं निर्णयोऽस्ति स गृह्यताम् ॥१३॥ सप्तमीवेधरहिता याऽष्टमी भास्करोदये । सैव जन्माष्टमी ग्राह्या व्रतोत्सवविधौ शुभा ॥१४॥ शुद्धाधिका भवेद्यर्हि तिथिः कृष्णाष्टमी तदा । बहुकालव्यापकत्वात्पूर्वा ग्राह्येति निर्णयः ॥१५॥ उपवासस्तत्र कार्यः पूजा कृष्णस्य च श्रियः । अचलायाश्चलाया वा मूर्तेः शक्त्या यथाविधि ॥१६॥ राधिकाया भवेन्मूर्तिर्मन्दिरे यत्र तत्र तु । वेषार्चनविधिर्ज्ञेयस्तस्या लक्ष्म्या इवाखिलः ॥१७॥ उभयोरपि न स्याच्चेत्प्रतिमा यत्र तत्र तु । उभे अपि हि विज्ञेये कृष्णस्याङ्गस्थिते इति ॥१८॥ विधिरेष तु विज्ञेय उत्सेवष्वखिलेष्वपि । मन्दिरेषु च सर्वेषु विशेषस्त्विह वक्ष्यते ॥१९॥ नित्यार्च्यां भगवन्मूर्तिं प्रातः स्नात्वा

સાતમના વેધવાળી હોય પણ જો રોહિણી નક્ષત્ર અને બુધવાર આ બેના યોગવાળી હોય ને મધ્યરાત્રિએ વ્યાપતી હોય તો તે ગ્રહણ કરવી. પારણાં તો બીજે દિવસે અષ્ટમી તિથિ ઊતરી ગયા પછી જ વ્રતકર્તાએ કરવાં. (૩-૪) આવા રોહિણી બુધવારરૂપ યોગવિશેષને લીધે જ સપ્તમીના સંબંધવાળી અષ્ટમી વ્રતમાં ગ્રહણ કરવાની અગ્નિ પુરાણાદિકમાં કહી છે. એમ ના હોય તો કેવળ અષ્ટમી વ્રતમાં લેવી નહિ. (૫) જો પૂર્વોક્ત સમગ્ર યોગ સપ્તમીને દિવસે જ હોય અને અષ્ટમીના દિવસે તો અર્ધરાત્રિએ કેવળ રોહિણી અને બુધના યોગથી વર્જિત શુદ્ધ અષ્ટમી હોય ત્યારે શક્તિમાન પુરુષે તો બે ઉપવાસ કરવા. અશક્ત તો બીજે દિવસે અષ્ટમીએ એક ઉપવાસ કરે. (૬-૭) મધ્યરાત્રિએ બુધ-અષ્ટમી અને રોહિણીના યોગ વિના તો બુધ જનોએ સપ્તમીના વેધવાળી જન્માષ્ટમી ક્યારેય પણ ના કરવી. (૮) જો બુધવાર ના હોય તો અર્ધ રાત્રિએ રોહિણી નક્ષત્રે યુક્ત એવી પણ સાતમના વેધવાળી અષ્ટમીનો ત્યાગ કરીને જ વેધ વિનાની અષ્ટમી ગ્રાહ્ય માની છે. (૯) રોહિણી નક્ષત્ર વિના પણ નવમીના સંબંધવાળી અષ્ટમી કરવી. રોહિણી સહિત એવી પણ સપ્તમીવિદ્ધા અષ્ટમી ન કરવી. (૧૦) શુદ્ધા અષ્ટમી યદ્યપિ મધ્યરાત્રિના સંબંધે રહિત મુહૂર્ત કે ઘટિકામાત્ર કે પળમાત્ર વર્તતી હોય અને તેને ભલે નવમીનો યોગ હોય તો પણ તે જ વ્રતમાં લેવી. પણ અર્ધરાત્રિએ યોગમાત્રથી પળમાત્ર પણ સપ્તમીના વેધવાળી વ્રતમાં લેવી નહિ. (૧૧) જો સપ્તમીના વેધવાળી અષ્ટમીનો ક્ષય હોય ત્યારે તો વ્રત કરનારાઓએ સપ્તમીના વેધવાળી પણ અષ્ટમી ઉપવાસમાં ગ્રહણ કરવી એમ કેટલાક વૈષ્ણવો કહે છે. (પરંતુ આ મત આદરણીય નથી. માટે પોતાને ગ્રહણ કરવા યોગ્ય વૈષ્ણવમત કહે છે :) **શ્રી વિઠ્ઠલેશના મતે તો** વિદ્ધાનો ક્ષય હોય તો નવમી તિથિએ ઉપવાસ કરવો આવો નિર્ણય છે. **તે નિર્ણય અમારા મતમાં ગ્રહણ કરવો.** (૧૨-૧૩) જે અષ્ટમી સૂર્યોદય સમયે પળમાત્ર પણ સપ્તમી વેધવર્જિત હોય તે શુભ જન્માષ્ટમી વ્રતોત્સવમાં સ્વીકારવી. (૧૪) જો શુદ્ધા કૃષ્ણાષ્ટમી તિથિ વૃદ્ધિને પામી હોય ત્યારે તો પૂર્વની જ શુદ્ધા અષ્ટમી બહુકાળ વ્યાપનારી હોવાથી વ્રતોત્સવમાં સ્વીકારવી પણ પર-બીજી સ્વીકારવી નહિ. આ બે અષ્ટમી હોય ત્યારે ગ્રહણ કરવા યોગ્ય નિર્ણય સમજવો. **આવો જન્માષ્ટમી વ્રતમાં ગ્રાહ્ય તિથિનો નિર્ણય છે.** (૧૫) આવી શુદ્ધા જન્માષ્ટમીએ **ઉપવાસ** કરવો તથા જે મંદિરમાં શ્રીકૃષ્ણની અને લક્ષ્મીજીની અચળા કે ચળા મૂર્તિ હોય ત્યાં તે બંને મૂર્તિઓની યથાશક્તિ યથાવિધિ ભક્તિથી **પૂજા** કરવી. (૧૬)

જે મંદિરમાં રાધિકાજીની મૂર્તિ હોય તે મંદિરમાં રાધિકાજીનો સમગ્ર વસ્ત્રાલંકારાદિથી વેષધારણ અને ગંધ-પુષ્પાદિથી પૂજન લક્ષ્મીજીની મૂર્તિની માફક જાણવું. (૧૭) જે મંદિરમાં લક્ષ્મી અને રાધિકા બંને મૂર્તિઓ ના હોય ત્યારે તો તે મંદિરમાં બંને લક્ષ્મી અને રાધા પણ શ્રીકૃષ્ણના અંગમાં અતિસ્નેહથી રહેલાં છે આવી રીતે જાણવું. (૧૮) આ વિધિ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

समर्च्य च । मन्दिरं शोधयेत्सम्यग्मृजाक्षालनलेपनैः ॥२०॥ रङ्गैर्नानाविधैश्चित्रैः शोभयेत्तच्च सेवकः । नवीनांश्च वितानादीन्बध्नीयात्तोरणानि च ॥२१॥ सिंहासनं भगवतः पूजोपकरणानि च । सम्मार्जयेद्दीपिकाश्च कुर्यादास्तरणं नवम् ॥२२॥ महानैवेद्यसामग्रीं महापूजोपयोगि च । नवीनवस्त्रपुष्पादि भक्तः सम्पादयेत्ततः ॥२३॥ स्वयं सीव्येदंशुकानि तुन्नवायेन वार्चकः । देवानां धारणार्हाणि शोभमानानि भङ्गिभिः ॥२४॥ सभामण्डपमध्ये वा मन्दिरस्याङ्गणे ततः । मण्डपं कारयेद्रम्यं कदलीस्तम्भशोभितम् ॥२५॥ विचित्रवस्त्रैः पुष्पैश्च मण्डितं ताम्रपल्लवैः । शुभैर्नानाविधै रङ्गैस्तत्र तत्र सुचित्रितम् ॥२६॥ सितैः पीतैस्तथा रक्तैः कर्बुरैर्हरितैरपि । वासोभिः शोभितं कुर्यात्समन्तात्कलशैर्नवैः ॥२७॥ पत्रैः फलैरनेकैश्च दीपालिभिरितस्ततः । पुष्पमालाविचित्रं च चन्दनागुरुधूपितम् ॥२८॥ तन्मध्ये सूतिकागारं देवक्या विदधीत च । धात्रीं कुर्यात्तत्र चैकां नालच्छेदनकर्तरीम् ॥२९॥ तन्मध्ये मञ्चके रम्ये स्थापयेद्देवकीं ततः । तदुत्सङ्गे बालकृष्णं स्थापयेच्च स्तनन्धयम् ॥३०॥ यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे । स्थापयेद्गोकुले तद्वत्प्रसूतवरकन्यकाम् ॥३१॥ नन्दश्च वसुदेवश्च गोपा गोप्यश्च धेनवः । वृषा वत्सा वत्सतर्यस्तत्र कल्प्या यथोचितम् ॥३२॥ यथाशक्ति प्रकर्तव्याः कृष्णादीनां तु मूर्तयः । सौवर्ण्याद्याश्च तत्पूजा कर्तव्या निशि भक्तितः ॥३३॥ कारयेद्दुन्दुभिध्वानं यथाकालं दिनद्वयम् । तूर्यवाद्यानि चान्यानि वादयेन्मङ्गलानि तु ॥३४॥ घृतपक्वपदार्थांस्तु नैवेद्यार्थं दिवैव हि । कारयेच्छाकसूपादि निशायां च शुचिस्थले ॥३५॥ आद्ययामे निशोऽतीते प्रारभेतार्चनं हरेः । स्थिरायाः प्रतिमायास्तु कुर्यात्पूजनमादितः ॥३६॥ यदि स्नापयितुं शक्या मूर्तिः कृष्णस्य च श्रियः । पञ्चामृतेन स्नपयेत्तर्हि तां चोष्णवारिणा ॥३७॥ अन्यथा तु प्रमार्ज्यैव

---

તો સર્વે મંદિરમાં સમગ્ર ઉત્સવોમાં પણ જાણવો. વિશેષ તો અહીંયા વ્રતોત્સવના વિધિ કહેવાના સમયે હું કહીશ. (૧૯)

જન્માષ્ટમીના તિથિના પ્રાતઃસમયે પૂજારી દરરોજ પૂજવાની ભગવન્મૂર્તિનું પૂજન કરીને વાળવા,ધોવા, લીંપવા વડે મંદિરને સારી રીતે શુદ્ધ કરે. (૨૦) તે પછી સેવક પીળા, લાલ, નીલા આદિક અનેક પ્રકારનાં રંગદ્રવ્યોથી કરેલાં ચિત્રો અને નવીન તોરણ ઉલ્લોચ આદિક વડે તે મંદિરને સમલંકૃત કરે. (૨૧) ભગવાનના સિંહાસનને અને દીપિકા, કળશ, ઉપપાત્રાદિ પૂજાનાં ઉપકરણોને માંજીને શુદ્ધ કરે. અને સિંહાસન ઉપર આસ્તરણાદિ નવીન કરે. (૨૨) તે પછી પૂજારી મહાપૂજાનાં ઉપકરણ દ્રવ્યો નવીન વસ્ત્ર, પુષ્પાદિક અને મહાનૈવેદ્ય સામગ્રીને એક સ્થળે તૈયાર કરે. (૨૩) પૂજક શ્રીકૃષ્ણાદિ દેવોને ધરાવવા લાયક વસ્ત્રો, નવીન દર્શનીય રચનાવિશેષવાળા સ્વયં સીવે અથવા દરજી પાસે સીવડાવે. (૨૪) પછી મંદિરના સભામંડપમાં અથવા મંદિરના આંગણામાં કેળના થાંભલા વડે સમલંકૃત, શુભ પુષ્પો અને આંબાદિકનાં પલ્લવો વડે વિરાજીત, નાનાવિધ રંગો વડે તે તે સ્થળમાં વિચિત્ર-શ્વેત, રક્ત, પીત, નીલાદિ વિવિધ સૂક્ષ્મ વસ્ત્રો વડે સુશોભિત, ચોગરદમ નવીન કળશોથી સમલંકૃત, અને પત્રફળોથી સંપન્ન, પુષ્પની માળાઓ વડે જ્યાં ત્યાં અલંકૃત કરાયેલો રમણીય એવો મંડપ કરાવે અને તે મંડપને ચંદન અગરૂના ધૂપવાળો તથા દીપમાળાઓ વડે શોભાયમાન કરે. (૨૫-૨૮) તે મંડપના મધ્યભાગમાં **દેવકીજીનું સૂતિકાગૃહ** કલ્પે. તેમાં એક ધાત્રી, ઉપમાતા અને એક નાળ-છેદન કરનારીને કલ્પે, ત્યાર પછી તે સૂતિકાગારને મધ્યે રમણીય મંચમાં દેવકીજીની સ્થાપના કરે અને તેમના ખોળામાં સ્તનપાન કરતા બાલકૃષ્ણની સ્થાપના કરે. (૨૯-૩૦) એ જ મંડપના એક પ્રદેશમાં ગોકુલની કલ્પના કરીને તેમાં બીજું સૂતિકાગૃહ કલ્પીને તેમાં દેવકીજીની પેઠે યશોદાજીની અને તેણીએ પ્રસવેલી કન્યાની સ્થાપના કરે. (૩૧) તેમાં નંદજી, વસુદેવ, ગોપો, ગોપીઓ, ગાયો, વૃષભો, વત્સો, વાછરડીઓ આ સર્વે યથાયોગ્ય શક્તિ પ્રમાણે પ્રતિમારૂપે કરવાં. (૩૨) કૃષ્ણાદિની મૂર્તિઓ સુવર્ણ વડે કે ચાંદીની શક્તિ પ્રમાણે કરવી. **પરિવારે સહિત શ્રીકૃષ્ણની પૂજા રાત્રિએ ભક્તિથી કરવી.** (૩૩) અષ્ટમી અને નવમીએ સમય પ્રમાણે દુંદુભિ, તૂર્ય વગેરે વિવિધ માંગલિક વાંજિત્રોને વગાડાવે. (૩૪) ભગવાનના નૈવેદ્ય માટે ઘૃતપક્વ-જલેબી, મોતિયાલાડુ આદિક ભોજનના પદાર્થોને તો દિવસે જ; અને શાક, દાળ, આદિકને તો રાત્રિએ પવિત્ર સ્થળમાં કરાવે. (૩૫) રાત્રિનો પ્રથમ પ્રહર વ્યતીત થતાં ભગવાનની પૂજાનો આરંભ પડદાની અંદર કરે. તેમાં સ્થિર ભગવત્પ્રતિમાનું પૂજન તો પ્રથમ કરે. (૩૬) જો કૃષ્ણની મૂર્તિને સ્નાન કરાવી શકાય તેમ હોય તો પંચામૃતથી સ્નાન કરાવે.



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वाससाऽऽर्द्रेण मन्त्रतः । वासांसि शोभनान्येव नूत्नानि परिधापयेत् ॥३८॥ पञ्चामृतेन स्नानं तु कार्यं मूर्तेर्लघोर्हरेः । इयमेव च विज्ञेया रीतिः सर्वोत्सवेष्वपि ॥३९॥ यदि श्यामा हरेर्मूर्तिर्भवेत्तर्ह्यंशुकानि तु । पीतरक्तसितान्येव यथार्हं परिधापयेत् ॥४०॥ मूर्तिः श्वेता यदि तदा हरिच्छोणासितानि तु। धारयेदंशुकानीत्थं यथाशोभं श्रियोऽपि च ॥४१॥ अलङ्काराञ्छुभान् हैमान्मुक्तास्त्रक्शेखरांस्तथा । धारयेन्मुकुटं रम्यं नानारत्नविभूषितम् ॥४२॥ स्ववैभवानुसारीणि भूषणानि तु धारयेत् । धनहीनस्त्वलङ्कारैः पौष्पैरेवार्चयेत्प्रभुम् ॥४३॥ निशोऽष्टमे मुहूर्तेऽथ देवक्याः सूतिकागृहम् । गत्वा सूतं तया कृष्णं नयेत् पात्रेण गोकुलम् ॥४४॥ स्थापयित्वा क्षणं तत्र यशोदाशयने च तम् । संस्नाप्याथाऽऽनयेत्तं च नित्यार्च्यप्रतिमान्तिके ॥४५॥ नानाविधानां वाद्यानां तदानीं कारयेद्ध्वनिम्। श्रीकृष्णजन्मपद्यानि गापयेन्मङ्गलानि च ॥४६॥ ततः शास्त्रोक्तविधिना वसुदेवादिभिः सह । पूजनं बालकृष्णस्य कुर्यात्पञ्चामृतादिभिः ॥४७॥ पालने तमुपावेश्य वासोभूषाः समर्पयेत् । ततो लघुमहत्योश्च मूर्त्योः कुर्यात्सहार्चनम् ॥४८॥ धारयेद्बालकृष्णं तु लम्बमानाङ्गरक्षिकाम् । कच्छर्नी च शिरष्टोपीमूर्ध्वाग्रां रुक्मभूषिताम् ॥४९॥ यत्र यत्रोचितं यद्यद्वस्त्रं वा भूषणं भवेत् । शोभेत च यथा तत्तत्तत्र तत्र तथार्पयेत् ॥५०॥ सकुङ्कुमं कैसरं च मलयागुरुचन्दनम् । सुगन्धीनि च पुष्पाणि मालत्यादीनि चार्पयेत् ॥५१॥ पुष्पवासिततैलेन प्रसर्पच्चारुगन्धिना । स्थलपद्माम्बुना चास्य वासयेद्वस्त्रमन्दिरम् ॥५२॥ हारापीडांश्चावतंसान् पौष्पांश्च तुलसीस्त्रजः । दशाङ्गं चार्पयेद्धूपं घृतदीपान्दशावरान् ॥५३॥ ततो धौतचतुष्पद्यां महानैवेद्यमाहरेत्। पूरीपायससंयावघृतपक्वादि सर्वशः ॥५४॥ कुबेरशुण्ठीधान्याकगुडाज्यादिविमिश्रिताम् । पिञ्जरीं स्थापयेद्धृत्वा पात्रे सूतिकयोः पुरः ॥५५॥ वादयित्वा ततो

પછી તે મૂર્તિને અત્યંત ઊનું નહિ એવા શુદ્ધ જળ વડે સ્નાન કરાવે. જો સ્નાન કરાવી શકાય તેમ ના હોય તો સ્નાનમંત્રો બોલવાપૂર્વક ભીના વસ્ત્ર વડે સંમાર્જન કરીને તે મૂર્તિને શોભાયમાન નવીન જ વસ્ત્રો પહેરાવે. (૩૭-૩૮) જે નિત્ય અર્ચામૂર્તિ નાની છે તેને તો (બાલકૃષ્ણને) પંચામૃતથી સ્નાન કરાવવું. સર્વ કોઈ ઉત્સવમાં સ્નાનવિધિ આ જ રીતે જાણવો. (૩૯) જો ભગવાનની મૂર્તિ શ્યામ હોય તો પીળાં-રાતાં-ધોળાં વસ્ત્રો જેમ શોભે તેમ પહેરાવવાં. જો મૂર્તિ શ્વેત હોય તો નીલા-લાલ-કાળા વર્ણોનાં વસ્ત્રો ધરાવવાં. આવી રીતે જ લક્ષ્મીજીની મૂર્તિને પણ જેમ શોભે તેમ વસ્ત્રો પહેરાવવાં. (૪૦-૪૧) વિવિધ રત્નજડિત દિવ્ય મુકુટ, કાંચનમય રમણીય કડાં-બાજુબંધ આદિક અલંકારો, મોતીમય હાર-તોરાઓ અને બીજાં પણ દિવ્ય ભૂષણો વૈભવ પ્રમાણે ભગવાનને ધરાવે. ધને રહિત માણસ તો પુષ્પનિર્મિત અલંકારો વડે પ્રભુનું પૂજન કરે. (૪૨-૪૩) પછી રાત્રિના આઠમા મુહૂર્તમાં પ્રથમથી જ કલ્પેલા મહોત્સવના મંડપમાં સૂતિકાગૃહપણે પરિકલ્પેલા સ્થાનમાં પ્રવેશ કરી તેમાં દેવકીજીએ પ્રસવેલા બાલકૃષ્ણને સુંદર પાત્રમાં સ્થાપન કરી ગોકુળપણે કલ્પેલા સ્થાનમાં વસુદેવની પેઠે લઈ જઈને તેમાં કલ્પેલા યશોદાના શયનમાં ક્ષણમાત્ર તેમને સંસ્થાપીને પછી તેમને સ્નાન કરાવી પ્રતિદિન પૂજનીય મહાપ્રતિમાની સમીપમાં લાવે. (૪૪-૪૫) તે સમયે નાના પ્રકારનાં વાજિંત્રો વગાડવાપૂર્વક શ્રીકૃષ્ણના પ્રાદુર્ભાવપરાયણ માંગલિક પદ્યો ગવરાવે. (૪૬) પછી શાસ્ત્રવિધિ પ્રમાણે તે બાલકૃષ્ણનું વસુદેવાદિકની સાથે પંચામૃતાદિક વડે **પૂજન** કરે. (૪૭) તે બાલકૃષ્ણને પારણામાં પધરાવીને વસ્ત્ર વિભૂષણ વગેરે વડે સમલંકૃત કરીને પછી નિત્યપૂજાની લઘુમૂર્તિ અને મોટી સ્થિર મૂર્તિનું સાથે પૂજન કરે. (૪૮) પછી બાલકૃષ્ણને તો લાંબી અંગરખી (ઝુલ્લરી) કચ્છની (સૂંથણી) અને ઊંચા અગ્ર ભાગવાળી, સુવર્ણસૂત્રોથી ગુંથેલી (ભરત ભરેલી) માથાની ટોપી ધરાવે. (૪૯) ભગવાનના જે જે અંગમાં જે જે વસ્ત્ર કે જે જે ભૂષણ યોગ્ય હોય અને જે પ્રકારે ભગવાનના તે તે અંગ સારી રીતે શોભે તે પ્રકારે તે તે અંગમાં તે તે વસ્ત્ર-વિભૂષણો ધરાવે. (૫૦) કુંકુમ કેસરથી મિશ્રિત મલયાગુરુ ચંદન તથા માલતી આદિક સુગંધી પુષ્પોને અર્પણ કરે. (૫૧) પછી ભગવાનનાં વસ્ત્રો અને મંદિરને ચારે તરફ પ્રસરતો સુંદર સુગંધી જેની છે એવા પુષ્પવાસિત અત્તરથી તથા ગુલાબજળથી વાસિત કરે. તેના સંસ્કારથી સંપન્ન કરે. (૫૨) પછી સુગંધી અને સુખ સ્પર્શવાળા વિવિધ પુષ્પોના હારો, તોરાઓ, ગુચ્છો અને તુલસીની માળાઓ ભક્તિથી ભગવાનને અર્પણ કરે. તથા દશાંગ ધૂપ અને દશથી ઓછા નહિ એવા ઘીના દીવાઓને અર્પણ કરે. (૫૩) ત્યાર પછી પ્રક્ષાલન કરેલા ચાર પાયાવાળા આસન (બાજોઠ આદિક)માં પુરીઓ-દૂધપાક-શીરો આદિક તથા જલેબી આદિક જે બીજું ઘૃતપક્વ તે સર્વ મહાનૈવેદ્ય લાવે. (૫૪) પછી

घण्टां भोज्यपद्यानि गापयन् । निवेदयेत्तत्कृष्णाय मध्ये पानीयमर्पयन् ॥५६॥ निधाय पाकशालायां ततः सर्वं निवेदितम् । कुर्वीत वारिणा तूर्णं भोजनस्थानशोधनम् ॥५७॥ ताम्बूलवीटिकां दत्त्वा ऋतुकालोद्भवानि च । फलानि नालिकेरं च शक्त्या दद्याच्च दक्षिणाम् ॥५८॥ उद्घाट्याथो जवनिकां महानीराजनं प्रभोः । वाद्यतालिगीतघोषैस्तिष्ठन्मन्त्रान्पठंश्चरेत् ॥५९॥ स्तुत्वा सम्प्रार्थ्य नत्वा च जनैः कृतसमीक्षणम् । श्रीकृष्णं स्वापयित्वाऽसौ शृणुयात्तत्कथाः शुभाः ॥६०॥ महान्ति भूषावासांसि स्वापकाले श्रियःपतेः । उत्तारयेच्च सूक्ष्माणि लघूनि परिधापयेत् ॥६१॥ चरणामृतमात्रं तु पिबेन्निशि न चेतरत् । कुर्याज्जागरणं भक्तस्तद्गुणश्रुतिकीर्तनैः ॥६२॥ प्रातः स्नात्वा पुनः पूजां कृत्वा साङ्गस्य सत्पतेः । क्षीरं भक्तं शर्करां च विशेषेण निवेदयेत् ॥६३॥ ततो नीराजनं कृत्वा स्वापयेत्प्रभुमात्मनः । भक्तः साकं भक्तजनैस्ततः क्रीडनमाचरेत् ॥६४॥ परस्परं पुमांसश्च दधिक्षीरघृताम्बुभिः । कुर्वीरन् क्रीडनं तत्र लेपक्षेपणासिञ्चनैः ॥६५॥ योषाश्च रजनीचूर्णतैलगोरसकुङ्कुमैः । अन्योन्यं नवनीतेन क्रीडेयुर्लेपसिञ्चनैः ॥६६॥ अमङ्गलत्वाद्विधवाः क्रीडेयुर्नैव योषितः । साधवोऽपि तथा नैव व्रतिनो ब्रह्मचारिणः ॥६७॥ यद्येतेषु पतेत्क्वापि दध्यादि क्रीडतः करात् । स्नात्वा जपेयुस्तर्ह्येते मन्त्रमष्टाक्षरं शतम् ॥६८॥ यद्येते च स्वयं कुर्युः क्रीडनं तर्ह्युपोषणम् । विदधीरन्नहोरात्रं भजन्तो रुक्मिणीपतिम् ॥६९॥ स्नानं विधाय क्रीडान्ते भक्तः कुर्वीत पारणाम् । जन्माष्टम्युत्सवविधिरित्युक्तो वार्षिको मया ॥७०॥ प्रातःसायं पूजनान्ते बालकृष्णस्तु पालने । आन्दोलनीयोऽनुदिनं यावत्स्यादर्जुनोत्सवः ॥७१॥ औद्धवीये सम्प्रदाये श्रीकृष्णस्योदितानि वै । मन्दिराणीष्टदेवस्य पञ्चधाचार्यपुङ्गवैः ॥७२॥ एकस्यैव हि कृष्णस्य प्रोक्तं स्थानादिभेदतः । पञ्चकं खलु मूर्तीनां न तु

---

સૂતિકા દેવકી અને યશોદાની આગળ અજમો, સૂંઠ, ધાણા, સુવા, જીરું, નાળીયેર, ખસખસ, ગોળ, ઘી વગેરેથી મિશ્રિત કરેલી પંચાજીરી પાત્રમાં ભરીને સ્થાપન કરે. (૫૫) ત્યાર પછી ઘંટાવાદન અને ભોજ્યપદ્ય (થાળ) ગાવાપૂર્વક મહાનૈવેદ્ય મધ્યે પાણી અર્પણ કરતો થકો પૂજારી ભગવાનને **નૈવેદ્ય** નિવેદન કરે. (૫૬) નૈવેદ્યને નિવેદન કર્યા પછી તે સર્વ નૈવેદ્ય પાકશાળામાં મૂકીને તે ભોજન-સ્થાનને જળ વડે જલદી સારી રીતે શુદ્ધ કરે. (૫૭) પછી તાંબૂળ સમર્પણ કરીને તે ઋતુએ થતાં ફળો અને નાળીયેર સમર્પીને શક્તિ પ્રમાણે દક્ષિણા સમર્પણ કરે. (૫૮) પછી પડદો કાઢી નાખવાપૂર્વક દ્વાર ઉઘાડીને **મહાનીરાજન** (આરતી)ને વાદ્ય-તાલી-ગીતના ધ્વનિપૂર્વક ઊભો રહીને તેના અંગભૂત મંત્રોને બોલતો સતો કરે. (૫૯) પછી ભગવાનની સ્તુતિ પ્રાર્થના નમસ્કારાદિ કરીને ભક્તજનોને ભગવાનનું રૂડી રીતે દર્શન કરાવીને પછી શ્રીકૃષ્ણને પોઢાડીને તે ભગવાનની સમગ્ર જનોને શુભ કરનારી કથાઓને પૂજક જન સાંભળે. (૬૦) ભગવાનને શયન કરાવવાના સમયે તેમના અંગ ઉપરથી મોટાં વસ્ત્રો તથા આભૂષણો ઉતારવાં અને સૂક્ષ્મ વસ્ત્રો પહેરાવવાં. (૬૧) ભક્ત રાત્રિના સમયમાં કેવળ ચરણામૃત માત્રનું પાન કરે. બીજું પંચાજીરી વગેરે કંઈ પણ વસ્તુમાત્ર ખાય નહિ. ભગવદ્ ગુણોના શ્રવણ-કીર્તનાદિથી જાગરણ કરે. (૬૨) પ્રાતઃકાળમાં સ્નાન કરીને ફરીથી અંગદેવતા સહિત સાધુજનોના એક સ્વામી શ્રીકૃષ્ણની પૂજા કરીને વિશેષપણે ઊનું કરેલું દૂધ, ભાત, સાકર નૈવેદ્ય કરે (૬૩) પછી પૂજક ભક્ત આરતી કરીને પોતાના પ્રભુને પોઢાડી દે. પછી **ભક્તજનોની સાથે ક્રીડાનું આચરણ** કરે. (અહીંયા ભક્તોની સાથે ક્રીડાનું આચરણ આચાર્યનું જ જાણવું. આચાર્યની આજ્ઞાથી પૂજન કરતા વર્ણીને ક્રીડાનો નિષેધ છે.) (૬૪) પુરુષો દહીં, દૂધ, ઘી, જળ વડે ઉપલેપન-નાખવું, છાંટવું વગેરેથી ભગવાનના મંદિરમાં પરસ્પર ક્રીડા કરે. (૬૫) અને ભગવાનની ભક્તા સ્ત્રીઓ હળદર અને તેલ, દહીં અને કુંકુમ અને માખણથી લેપન-છાંટવું-નાખવું વગેરેથી પરસ્પર ક્રીડા કરે. (૬૬) **વિધવા સ્ત્રીઓ** અમંગળ હોવાથી ક્રીડા કરે નહિ તથા તે પ્રકારે **સાધુઓ** અને નૈષ્ઠિકવ્રતને ધારણ કરનારા **બ્રહ્મચારીઓ પણ ક્રીડા ના કરે.** (૬૭) જ્યારે ક્રીડા કરતા જનના હાથથી દહીં વગેરે કોઈ પણ વસ્તુ ક્યારેક વિધવા, સાધુ અને બ્રહ્મચારી ઉપર પડે તો વિધવાદિ સ્નાન કરીને અષ્ટાક્ષર મંત્ર સો વાર(અર્થાત્ એક માળા) જપ કરે. (૬૮) જ્યારે વિધવા વગેરે પોતે ક્રીડા કરે તો લક્ષ્મીપતિ શ્રીકૃષ્ણને ભજતા સતા અહોરાત્રિ **ઉપવાસ કરે.** (૬૯) પૂજક ક્રીડાની સમાપ્તિમાં સ્નાન કરીને પારણાં કરે. આ પ્રકારે મેં દર વર્ષે કરવા યોગ્ય જન્માષ્ટમીના ઉત્સવનો વિધિ તમોને કહ્યો. (૭૦) દરરોજ પૂજાના અન્તમાં પ્રાતઃકાળે અને સાયંકાળે જ્યાં સુધી અર્જુનનો ઉત્સવ દિન આવે ત્યાં સુધી એટલે કે **ભાદરવા સુદી ૨ બીજ સુધી** બાલકૃષ્ણને પારણામાં હીંચકાવવા. (૭૧)

वास्तवभेदतः ॥७३॥ आदावेत्य स गोलोकाद्भगवान्निजधामतः । मथुरापुरि देवक्यां वसुदेवादजायत ॥७४॥ सोऽद्भुतार्भाकृतिः कृष्णो वासुदेव इतीर्यते । तथा बालमुकुन्दश्च नवनीतधरश्च सः ॥७५॥ स एव गोकुलं प्राप्य ववृधे नन्दवेश्मनि । यशोदालालितश्चक्रे बाललीलामलौकिकीम् ॥७६॥ राधाकृष्णस्तथा गोपीनाथो राधापतिः स च । वृन्दावनविहारी च प्रोक्तो मदनमोहनः ॥७७॥ राधया सहिता एव वर्तन्ते तस्य मूर्तयः । वंशीविभूषितकरा मन्दिरेषु धरातले ॥७८॥ व्रजादुपेत्य मथुरां यादवानां प्रियं स च । चकार सह रामेण रामकृष्णः स उच्यते ॥७९॥ मथुरानाथ इत्युक्त एष यादवभूषणः । रामेण सहिताः सन्ति मन्दिरेष्वस्य मूर्तयः ॥८०॥ उपयेमे स एवैत्य द्वारिकायां च रुक्मिणीम् । राजाधिराजलीलोऽसौ लक्ष्मीनारायणो मतः ॥८१॥ द्वारिकानाथ एषोऽथ प्रोक्तो यदुपतिस्तथा । सह लक्ष्म्या भवन्त्यस्य मन्दिरेष्वत्र मूर्तयः ॥८२॥ पाण्डवानां प्रियं कुर्वन् प्रायस्तेषां पुरेऽपि सः । उवास चार्जुनसखो द्रौपदीमानवर्धनः ॥८३॥ नरनारायण इति प्रोक्तोऽसौ पाण्डवप्रियः । सहार्जुनेन सन्त्यस्य मूर्तयो मन्दिरेष्विह ॥८४॥ अपि पञ्चविधा एता मूर्तयः सन्ति केषुचित् । चतुर्भुजा मन्दिरेषु द्विभुजा अपि केषुचित् ॥८५॥ सपार्षदाः क्वचित्सन्ति क्वचिच्चापि विपार्षदाः । सायुधाश्च क्वचित्सन्ति कुत्रचिच्च निरायुधाः ॥८६॥ एक एव विधिर्ज्ञेयो मन्दिरेष्वपि पञ्चसु । उत्सवानां हि सर्वेषां पूजाद्रव्यनिवेदने ॥८७॥ यत्र यत्र विशेषोऽस्ति तत्र तत्रोत्सवे च तम् । कथयिष्यामि स ज्ञेयस्तत्तन्मूर्त्यर्चने बुधैः ॥८८॥ इत्थं सुतौ ! वां गदितो हि जन्माष्टम्युत्सवस्योद्धवसम्प्रदाये । मुख्यस्य सर्वोऽपि विधिर्मयेत्थं कार्यो भवद्भ्यां प्रतिमन्दिरं सः ॥८९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे वार्षिकव्रतोत्सवविधौ जन्माष्टम्युत्सवविधिनिरूपणनामा

---

ઉદ્ધવ સમ્પ્રદાયમાં આચાર્યવર્યશ્રી રામાનંદ સ્વામી ચરણોએ ઈષ્ટદેવ શ્રીકૃષ્ણનાં મંદિરો પાંચ પ્રકારે કહેલાં છે. (૭૨) એક જ શ્રીકૃષ્ણની મૂર્તિઓના સ્થાનાદિ ભેદથી પાંચ પ્રકાર કહેલાં છે. પરમાર્થભેદથી પાંચ પ્રકાર નથી. વસ્તુતાએ એક જ શ્રીકૃષ્ણ છે. (૭૩) (આ અર્થને બતાવે છે :) સર્વના કારણ, સર્વ થકી પર એવા તે શ્રીકૃષ્ણ ગોલોક નામના પોતાના ધામથી પ્રથમ મથુરાપુરીમાં આવીને વસુદેવ થકી દેવકીજીમાં પ્રકટ થયા. (૭૪) તે આ અદ્‌ભુત આકૃતિવાળા કૃષ્ણ **વાસુદેવ** નામથી કહેવાય છે. તથા તે કૃષ્ણ **બાલમુકુંદ** નામથી કહેવાય છે, તે જ કૃષ્ણ **નવનીતધર** એ નામથી કહેવાય છે. (૭૫) તે જ શ્રીકૃષ્ણ ગોકુલને પામીને નંદના રાજભવનમાં વૃદ્ધિ પામ્યા. યશોદાએ લાલન કરાયેલા અલૌકિક બાળલીલાઓ કરતા હતા. (૭૬) તે શ્રીકૃષ્ણ **રાધાકૃષ્ણ** તથા **ગોપીનાથ, રાધાપતિ અને વૃંદાવનવિહારી** કહેલા છે તથા **મદનમોહન** કહેલા છે. આ પાંચ નામોથી કહેલા છે. (૭૭) તે શ્રીકૃષ્ણની મૂર્તિઓ પૃથ્વીમાં મંદિરોમાં રાધાએ સહિત હોય છે. ત્યારે વાંસળીથી વિભૂષિત હસ્તવાળા જ હોય છે. (૭૮) તે શ્રીકૃષ્ણે બલરામની સાથે વ્રજથી મથુરામાં જઈને યાદવોનું પ્રિય કર્યું. ત્યારે શ્રીકૃષ્ણ રામકૃષ્ણ નામથી કહેવાયા. (૭૯) એ શ્રીકૃષ્ણ મથુરાનાથ નામથી કહેવાયા અને યાદવભૂષણ નામથી કહેવાયા. તે આ શ્રીકૃષ્ણની મૂર્તિઓ મંદિરોમાં બલરામે સહિત છે. (૮૦) તે જ શ્રીકૃષ્ણ દ્વારિકામાં આવીને લક્ષ્મીજીને પરણ્યા. રાજાધિરાજની માફક લીલા જેની છે એવા શ્રીકૃષ્ણ લક્ષ્મીનારાયણ નામથી માન્યા છે. (૮૧) અને એ શ્રીકૃષ્ણ દ્વારિકાનાથ એ નામથી કહેલા છે તથા યદુપતિ નામથી કહેલા છે. તે આ શ્રીકૃષ્ણની મૂર્તિઓ આ લોકમાં મંદિરોમાં લક્ષ્મીજી સાથે હોય છે. (૮૨) તે શ્રીકૃષ્ણ પાંડવો જે યુધિષ્ઠિરાદિનું પ્રિય કરવા માટે અર્જુનના મિત્ર દ્રૌપદીનું માન વધારતા સતા પાંડવોનું જે હસ્તિનાપુર તેમાં ઘણું કરીને રહેતા હતા. (૮૩) તે શ્રીકૃષ્ણ નરનારાયણ આ નામથી કહેલા છે અને પાંડવપ્રિય આ નામથી કહેલા છે. તે આ શ્રીકૃષ્ણની મૂર્તિઓ આ લોકમાં મંદિરોમાં અર્જુનની સાથે છે. (૮૪) પાંચ પ્રકારની પણ આ મૂર્તિઓ કોઈ મંદિરોમાં ચતુર્ભુજ હોય છે. કેટલાંક મંદિરોમાં બે ભુજાવાળી પણ હોય છે. (૮૫) કેટલાંક મંદિરોમાં પાર્ષદોએ સહિત હોય છે. કોઈ ઠેકાણે પાર્ષદે રહિત પણ હોય છે. ક્યારેક આયુધે સહિત હોય છે. કોઈ મંદિરોમાં આયુધે રહિત હોય છે. (૮૬) પાંચ પ્રકારનાં મંદિરોમાં પણ સર્વે ઉત્સવોનાં પૂજાદ્રવ્યો સંબંધી વસ્તુઓના અર્પણમાં એક જ સામાન્ય વિધિ છે એમ જાણવું. (૮૭) જે જે ઉત્સવમાં વિશેષ છે તે કહીશ. મારો કહેલો વિશેષ પૂજાવિધિમાં પ્રવીણ પૂજકોએ તે તે મૂર્તિના પૂજનમાં જાણવો. (૮૮)

હે પુત્રો ! આ પ્રકારે ઉદ્ધવ સંપ્રદાયમાં મુખ્ય જન્માષ્ટમીના ઉત્સવનો સર્વે વિધિ પણ મેં તમોને બન્નેને કહ્યો. તમો બન્નેએ તે વિધિ દરેક મંદિરમાં આ પ્રમાણે જ કરવો. (૮૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે વાર્ષિકવ્રતોત્સવવિધૌ જન્માષ્ટમ્યુત્સવવિધિ નિરૂપણનામા પંચપંચાશત્તમોઽધ્યાયઃ (૫૫)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पञ्चपञ्चाशत्तमोऽध्यायः ॥५५॥

श्रीनारायणमुनिरुवाच – **अथोत्सवा भगवतो मासि भाद्रपदे च ये । भवन्ति तेषां सकलं कथयामि विधिं सुतौ! ॥१॥ भाद्रशुक्लद्वितीयायां मध्याह्ने गुरुवासरे । नक्षत्रेऽर्यमदैवत्ये मुहूर्तेऽभिजिदाह्वये ॥२॥ जज्ञे हिमवतः पृष्ठे साक्षान्नरऋषिः प्रभुः । कुन्त्यामिन्द्रादर्जुनाख्यश्चक्रुर्देवास्तदोत्सवम् ॥३॥ पूर्वविद्धैव सा ग्राह्या मध्याह्नव्यापिनी तिथिः । नक्षत्रयोगसत्त्वे तु ग्रहीतव्या परैव सा ॥४॥ मुकुटं धारयेत्तत्र भगवन्तं महोज्ज्वलम् । धनुर्बाणं तथा खड्गं हैमं च शतचन्द्रकम् ॥५॥ राजरीत्यैव वासांसि भूषणानि च धारयेत् । पूरिकाः पायसं चास्मै साज्यखण्डं निवेदयेत् ॥६॥ एतावान् हि विशेषोऽत्र विधिरन्यस्तु पूर्ववत् । महतीं पूजयेदित्थं मूर्तिं भगवतः पुमान् ॥७॥ ततो नरस्य प्रतिमामर्चयेदर्जुनाख्यया । सा न चेत्तर्हि कृष्णस्य मूर्तावर्जुनमर्चयेत् ॥८॥ न स्यात्सा चेत्तदा मूर्तिमर्जुनस्य किरीटिनीम् । धनुर्बाणधरां हैमीं कृत्वार्चेदभिजित्क्षणे ॥९॥ मण्डपं कारयित्वैव मन्दिरस्याग्रतः शुभम् । पूजयेत्सर्वतोभद्रे महत्या पूजयैव ताम् ॥१०॥ तदङ्गदेवताः पाण्डुः कुन्ती माद्री युधिष्ठिरः । भीमश्च मुनयः पूज्याः शतशृङ्गनिवासिनः ॥११॥ नैवेद्यमर्पयेत्तस्मै संयावक्षैरपूरिकाः । नीराजनं प्रकुर्वीत कर्पूरघृतवर्तिभिः ॥१२॥ गापयेद्धिमवत्पृष्ठे पार्थजन्मकथां च तम् । आन्दोलयेदुपावेश्य बालकृष्णस्य पालने ॥१३॥ मुहूर्तान्त उभौ कृष्णौ नीराज्योत्तारयेत्ततः । तद्दिने स्याद्धविष्याशी पूजनान्ते सकृत्पुमान् ॥१४॥ मासि भाद्रपदे**

## અધ્યાય : ૫૬

### ધર્મપુત્ર શ્રીહરિએ પોતાના પુત્રોને ભાદ્રમાસના ઉત્સવોના વિધિનું નિરૂપણ કર્યું છે.

**શ્રીનારાયણમુનિ બોલ્યા :** હે પુત્રો ! હવે ભાદરવા માસમાં ભગવાનના જે ઉત્સવો કરવાના છે તેનો સમગ્ર વિધિ તમને કહું છું. (૧) તેમાં **અર્જુનના પ્રાદુર્ભાવના ઉત્સવનો વિધિ** પ્રથમ કહું છું. ભાદરવા માસની સુદી દ્વિતીયાએ ગુરુવારે બપોરને સમયે અર્યમાદૈવત્ય ઉત્તરાફલ્ગુની નક્ષત્રમાં અભિજીત નામના મુહૂર્તમાં પ્રત્યક્ષ પ્રભુ પ્રગટ થયા હતા. તે સમયે દેવતાઓએ તેમના પ્રાદુર્ભાવનો મહોત્સવ કર્યો હતો. (૨-૩) તેમના મહોત્સવવિધિમાં સામાન્યપણે મધ્યાહ્ન વ્યાપિની દ્વિતીયા જ તિથિ લેવી. જો તે પ્રતિપદાએ વિદ્ધા હોય, બીજા દિવસે મધ્યાહ્ને ઉત્તરાફલ્ગુની નક્ષત્રનો યોગ હોય તો શુદ્ધા જ દ્વિતીયા પરદિન પહોંચતી મધ્યાહ્ન નહિ વ્યાપિની પણ ગ્રહણ કરવી, (આ સ્થળે આટલું જાણવું-બંને પણ દિવસે જો તિથિ મધ્યાહ્ન વ્યાપિની હોય કે ના હોય તો નક્ષત્રયોગને અનુસારે તેનો નિર્ણય જાણવો. જો નક્ષત્રયોગ પણ ના હોય ત્યારે તો પૂર્વ દિવસ જ લેવો. (૪) તે ઉત્સવમાં ભગવાનને મોટો ઉજ્જવળ રત્નમુકુટ, ધનુષ્ય, બાણ, તલવાર અને સુવર્ણનિર્મિત ઢાલને ધારણ કરાવે. બીજાં આભૂષણો તથા વસ્ત્રો રાજોપચારથી જ ધરાવે અને પૂરીઓ તથા ઘૃતસાકર સહિત દૂધપાક ભગવાનને નિવેદન કરે. (૫-૬) આ ઉત્સવમાં આટલો વિશેષ છે. બીજો વિધિ તો પૂર્વની માફક જાણવો. આ પ્રકારે પૂજારી પુરુષ ભગવાનની મોટી સ્થિર મૂર્તિની પૂજા કરીને પછી નરની પ્રતિમાની અર્જુન નામથી ભાવના કરી પૂજન કરે. જો નર પ્રતિમા ન હોય તો શ્રીકૃષ્ણની સ્થિર મૂર્તિમાં જ તે અર્જુનની ભાવના કરી પૂજન કરે. (૭-૮) જો કૃષ્ણની પ્રતિમા પણ ના હોય તો ધનુષ્યબાણને ધારી રહેલી સુવર્ણમયી અર્જુનની મૂર્તિ કરીને અભિજીત મુહૂર્તમાં (મધ્યાહ્ને) પૂજન કરે. શ્રીકૃષ્ણની પ્રતિમા હોય તો પણ સ્વતંત્રપણે અર્જુનની મૂર્તિના પૂજનમાં અભિરુચિ પૂજકને હોય તો મંદિરની આગળ જ રમણીય મંડપ કરાવીને તેની મધ્યમાં કરેલા સર્વતોભદ્રમંડળમાં તે અર્જુનની સ્થાપના કરીને તેની મહાપૂજા ક્રમથી જ કરે. (૯-૧૦) તે પૂજામાં પૂજ્ય પ્રધાનદેવ અને અંગદેવતાઓ પાંડુ, કુંતી, માદ્રી, યુધિષ્ઠિર, ભીમ આદિક તથા શતશૃંગાચળ નિવાસી મુનિઓની પૂજા કરવી. (૧૧) તે અર્જુનની મૂર્તિને શીરો, દૂધપાક, પૂરીઓ આદિક નૈવેદ્ય કરીને ઘીમાં પલાળેલી વાટ્યો વડે તથા કપૂર વડે આરતી કરે. (૧૨) પછી હિમાચળના પૃષ્ઠભાગમાં ઉત્પન્ન થયેલા અર્જુનની જન્મકથાને ગવરાવે અને બાલકૃષ્ણની સાથે પારણામાં અર્જુનની પ્રતિમાને પધરાવીને હિંડોળે. (૧૩) મુહૂર્તને અંતે તે બન્ને બાલકૃષ્ણ-અર્જુનની આરતી કરીને તેમને પારણાથી ઉતારે. પૂજક જન તે દિવસે પૂજનને અંતે એક જ વાર હવિષ્યાન્ન જ જમે. બીજું ન જમે. (૧૪)

**ભાદરવા માસની સુદી ચતુર્થીએ** હસ્ત નક્ષત્રમાં સૂર્ય-ચંદ્ર કન્યા રાશિને પામતાં, રવિવારે સિદ્ધિ યોગમાં અભિજીત મુહૂર્તમાં શંકરના મંદિરમાં સાક્ષાત્ ગોલોકાધિપતિ કૃષ્ણ; શંકરના પુત્રરૂપે ગણપતિ નામથી પ્રગટ થયા હતા. તે સમયે સર્વ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शुक्लचतुर्थ्यामभिजित्क्षणे । कन्यादित्ये करे चन्द्रे सिद्धियोगेऽर्कवासरे ॥१५॥ गोलोकाधिपतिः कृष्णो जज्ञे शङ्करमन्दिरे। तदा देवगणैः सर्वैः कृतस्तत्रोत्सवो महान् ॥१६॥ अतस्तत्र विधातव्यस्तदर्चनमहोत्सवः । चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥१७॥ पूर्वा दिनद्वये व्याप्तावव्याप्तौ वाभिजित्क्षणे । परेऽह्न्येव तु मध्याह्नव्याप्तौ ग्राह्या परैव सा ॥१८॥ अत्रारुणानि वासांसि श्रीकृष्णं परिधापयेत् । नैवेद्ये लड्डुकाः कार्या विधिरन्यस्तु नैत्यकः ॥१९॥ मूर्तिं गणपतेरत्र मृन्मयीं च चतुर्भुजाम्। गजाननामेकदन्तां मध्याह्नेऽर्चेद्यथागमम् ॥२०॥ सिन्दूरेण च दूर्वाभिः शमीपत्रादिभिश्च तम् । अर्चेन्निवेदयेत्तस्मा एकविंशतिलड्डुकान् ॥२१॥ अस्मिन्नेव दिने तस्य पूजायां तुलसी मता । वर्षमध्ये न चान्यत्र ज्ञेयमेतत्पुराणतः ॥२२॥ अत्र रात्रौ न कर्तव्यं केनापीन्दोस्तु दर्शनम् । कृते मिथ्यापवादस्य प्राप्तिः स्यान्नात्र संशयः ॥२३॥ अज्ञानतो यदि भवेद्दर्शनं तस्य तर्हि तु । स्यमन्तकाहृतिकथा श्रव्या भागवतोदिता ॥२४॥ तस्याः पाठोऽथवा कार्यस्तद्द्वयस्याप्यसम्भवे । मन्त्रो विष्णुपुराणोक्तः पठनीयोऽयमादरात् ॥२५॥ सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः । सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः ॥२६॥ दशकृत्व इमं मन्त्रं यः पठेत्पुरुषः शुचिः । चन्द्रदर्शनजाद्दोषान्मुच्यते सद्य एव सः ॥२७॥ मासि भाद्रपदेऽष्टम्यां मैत्रे च रविवासरे । वृषभानुगृहे साक्षाद्राधिकाविर्बभूव हि ॥२८॥ मध्याह्नव्यापिनी ग्राह्या व्रतिभी राधिकाष्टमी। व्याप्त्यव्याप्त्योः परयुता ग्रहीतव्या दिनद्वये ॥२९॥ न ग्राह्या सप्तमीविद्धा राधाजन्मतिथिः क्वचित् । ग्राह्या विद्धापि सप्तम्या यदि स्यादष्टमीक्षयः ॥३०॥ भगवन्तं दिने तस्मिंश्चोलं रक्तं तु धारयेत् । शोणं च

દેવગણોએ તે તિથિએ તે નિમિત્તનો મહોત્સવ કર્યો હતો; (૧૫-૧૬) માટે તે તિથિએ **ગણપતિ પૂજનનો મહોત્સવ** કરવો. તેમાં માતૃવિદ્ધા, તૃતીયાના વેધવાળી ચતુર્થી જ વ્રતમાં શ્રેષ્ઠ માની છે. તે ચતુર્થી તિથિ મધ્યાહ્ને પહોંચતી લેવી. પૂર્વદિને અને પરદિને મધ્યાહ્ને પહોંચતી હોય તો પૂર્વની ગ્રહણ કરવી. પણ પરની ન ગ્રહણ કરવી. (કેમ કે વિદ્ધાનું પ્રશસ્તપણું માનેલું છે.) અને જો બંને દિવસ પણ ચતુર્થી મધ્યાહ્નવ્યાપિની ના હોય તો પણ પૂર્વની જ ઉત્સવમાં ગ્રહણ કરવી અને જો પર દિવસે જ તે મધ્યાહ્નવ્યાપિની હોય તો પછીની ગ્રહણ કરવી. (૧૭-૧૮) આ ઉત્સવમાં રક્તવસ્ત્રો ભગવાનને ધરાવે. નૈવેદ્યમાં તો ચૂરમાના લાડવા નિવેદન કરવા. બીજો વિધિ તો નિત્યોત્સવ પ્રકારે જાણવો.(૧૯) આ ગજાનન જન્મતિથિ ચતુર્થીએ એક દાંતવાળી ગજના જેવા મુખવાળી ચાર ભુજવાળી મૃત્તિકામયી ગણપતિની મૂર્તિ બનાવીને મધ્યાહ્ને યથાવિધિ પૂજવી. (૨૦) સિંદૂર, દુર્વા, શમડીનાં પાન વગેરે ઉપચારો વડે તે મૂર્તિની પૂજા કરીને તેમને એકવીશ લાડુઓ નિવેદન કરે. (૨૧) વર્ષમાં આ પ્રાદુર્ભાવમહોત્સવ સમયે જ તે ગણેશની તુલસી વડે પૂજા કરવાની કહી છે. અન્ય દિવસે નહિ, આ અર્થ પુરાણથી જાણવો. (૨૨) આ ચતુર્થી તિથિએ રાત્રિએ કોઈ પણ મનુષ્યે ચંદ્રનું દર્શન ન જ કરવું. જો કરે તો મિથ્યાપવાદને પામે એમાં સંશય નથી. (૨૩) જો અજાણથી તે રાત્રિએ ચંદ્રદર્શન થાય તો તે દોષના નિવારણ માટે શ્રીમદ્ ભાગવતના દશમ સ્કંધમાં કહેલી સ્યમંતકમણિના આહરણની કથા સાંભળવી અથવા પાઠ કરવો. શ્રવણ-પઠનની પણ અનુકૂળતા ન હોય તો **વિષ્ણુપુરાણમાં કહેલો મંત્ર**-સિંહઃ પ્રસેનમવધીત્સિંહો જામ્બવતા હતઃ । સુકુમારક ! મા રોદીસ્તવ હ્યેષ સ્યમન્તકઃ ॥ આ મંત્રનો આદરપૂર્વક પાઠ કરવો. **મંત્રનો અર્થ**-સિંહે પ્રસેનરાજાને માર્યો, જાંબવાને સિંહને માર્યો. હે સુકુમારક ! તું રોદન કરીશ નહિ. આ સ્યમન્તક મણિ તારો જ છે. (૨૪-૨૬) આ મંત્રનો જે પુરુષ બાહ્ય અને આભ્યંતર શુદ્ધિપૂર્વક દશ વાર પાઠ કરે તે ચંદ્રદર્શનજન્ય દોષથી તત્કાળ જ મુક્ત થાય છે. (૨૭)

**ભાદરવા માસની શુક્લ પક્ષની અષ્ટમી તિથિએ** અનુરાધા નક્ષત્રમાં રવિવારે વૃષભાનુ નામના ગોપના ગૃહમાં સાક્ષાત્ **રાધિકાજી** પ્રાદુર્ભાવ પામ્યાં હતાં. (૨૮) તેમના વ્રતમાં મધ્યાહ્ને પહોંચતી **અષ્ટમી** લેવી. તે અષ્ટમી જો પૂર્વ દિવસે અને પર દિવસે મધ્યાહ્ન વ્યાપિની હોય તો પર જ લેવી. બંને દિવસે પણ જો મધ્યાહ્ન વ્યાપિની ન હોય તો પણ પર જ (એટલે નવમીના સંબંધવાળી) ગ્રહણ કરવી. જો પૂર્વ દિવસે જ મધ્યાહ્ન વ્યાપિની હોય અને બીજે દિવસે ન હોય તો તે મધ્યાહ્ન વ્યાપિની પણ સપ્તમીનો વેધ આવતો હોય તો ગ્રહણ ન જ કરવી. કેમ કે સપ્તમીના વેધવાળી અષ્ટમી રાધાના જન્મોત્સવમાં ક્યારેય શ્રેષ્ઠ માની નથી. અને જો પરદિને અષ્ટમીનો ક્ષય થઈ જતો હોય ત્યારે તો સપ્તમીના વેધવાળી પણ તે અષ્ટમી વ્રતમાં ગ્રહણ કરવી. (૨૯-૩૦) તે આ ઉત્સવમાં ભગવાનને રક્તવર્ણનો સુરવાળ તોરાની પંક્તિઓ વડે સમલંકૃત લાલ ફેંટો

शीर्षपटकं शेखरालिविभूषितम् ॥३१॥ कैसरं भङ्गिलं सूक्ष्मं धारयेच्चाङ्गरक्षकम् । अन्यत्तु पूर्ववत्सर्वं धारयेद्वस्त्रभूषणम् ॥३२॥ मध्याह्ने पूजयेद्राधां कृष्णपार्श्वस्थितां ततः । प्रतिमा राधिकायास्तु न भवेद्यदि मन्दिरे ॥३३॥ तदा तु पूजयेल्लक्ष्मीं राधारूपेण सोऽर्चकः । शार्टीं च कैसरीं सूक्ष्मां दीर्घां तां परिधापयेत् ॥३४॥ अन्तरीयाभ्यन्तरीये वाससी अरुणे तथा । विभूषणानि सर्वाणि यथापूर्वं तु धारयेत् ॥३५॥
लड्डुका मौक्तिकाख्याश्च नैवेद्ये तु विशेषतः । दातव्या विधिरन्यस्तु ज्ञेयः पूर्ववदत्र च ॥३६॥ यदि लक्ष्म्या न मूर्तिः स्याद्राधिकाप्रतिमां तदा । हैमीं विधाय द्विभुजां सह गोपीभिरर्चयेत् ॥३७॥ राधिकाजन्मपद्यानि गापयेच्च तदर्चने । भुञ्जीत पूजनस्यान्ते हरेः प्रासादिकं पुमान् ॥३८॥ एकादशी प्रौष्ठपदे शुक्ला पद्माभिधा मता । दानिलीलां तत्र चक्रे भगवान् गोकुले पुरा ॥३९॥ गोपवेषः स कालिन्द्यां नौस्थो गोपीरयाचत । दधि गृहीत्वा मथुरां यान्तीर्दानमिवाध्वदृक् ॥४०॥ दिनेऽस्मिन् धारयेत् कृष्णं गोपवेषं ततो नयेत् । गीतवादित्रनिर्घोषैर्यानमारोप्य तं नदीम् ॥४१॥ तत्र सम्पूज्य नौकायां तं निधायाम्बुखेलनम् । कृत्वा मुहूर्तं स्वस्थानमानयेन्नन्दनन्दनम् ॥४२॥ दानिलीलां भगवता कृतां राधिकया सह । गायेच्च गापयेद्भक्तश्चोपवासमिहाचरेत् ॥४३॥ अस्मिन्दिने च नैवेद्ये दधि भक्तं विशेषतः । दद्याद्विशेषोऽत्रैतावानेकादश्या विधिः परः ॥४४॥ भाद्रे मासि शुक्लपक्षे द्वादश्यां श्रवणाख्यभे । बुधे मध्याह्नसमये वामनस्त्वदितेरभूत् ॥४५॥

અને કેસરિયું વિચિત્ર રચનાવાળું સૂક્ષ્મ અંગરખું ધરાવે બીજું બધું વસ્ત્ર વિભૂષણ વગેરે તો યથાયોગ્ય પૂર્વની પેઠે ધરાવે. (૩૧-૩૨) પછી મધ્યાહ્ને કૃષ્ણના પડખામાં રહેલી રાધાની મૂર્તિની વિશેષપણે પૂજા કરે. જો તે રાધામૂર્તિ મંદિરમાં ન હોય ત્યારે તો પૂજક જન લક્ષ્મીની મૂર્તિને જ રાધારૂપે ધ્યાન કરીને પૂજે. તે રાધા કે લક્ષ્મીને કાંચળી અને ચયણીયો આ બે વસ્ત્રો લાલ વર્ણનાં ધરાવે તથા સાડી કેસરિયા રંગથી રંગેલી સૂક્ષ્મ લાંબી ધરાવે અને સર્વ આભૂષણો તો પૂર્વની માફક પહેરાવે. (૩૩-૩૫) શ્રીકૃષ્ણ અને રાધિકાજીના નૈવેદ્યવિધિમાં તો મોતીયા લાડુ વિશેષપણે અર્પણ કરવા. આ ઉત્સવમાં બીજો બધો વિધિ તો પૂર્વની પેઠે સમજવો. (૩૬) જો લક્ષ્મીજીની મૂર્તિ ના હોય ત્યારે તો સુવર્ણની બે ભુજાવાળી રાધિકાની પ્રતિમા કરાવીને એની અંગદેવતા-ગોપીઓ સાથે પૂજે. પૂજાના મહોત્સવ સમયે રાધિકા-સ્તુતિપર પદ્યો (કીર્તનો) ગવરાવે પછી પૂજાને અંતે પૂજક પુરુષ ભગવાનના પ્રસાદભૂત અન્નને જમે. (૩૭-૩૮)

**ભાદરવા સુદી એકાદશીને દિવસે શ્રીકૃષ્ણની દાનિલીલાનો ઉત્સવ કહે છે.** ભાદરવા સુદી એકાદશી પદ્મા નામની માનેલી છે. તે એકાદશી દિવસે પૂર્વે શ્રીકૃષ્ણ ભગવાને ગોકુળમાં દાણલીલા (કર લેવાની લીલા) કરી હતી. (૩૯) શ્રીકૃષ્ણ ગોપ વેષ વડે સમલંકૃત થઈને યમુનાજીમાં ચાલતી નૌકામાં સ્વયં બેસીને વેચવા માટે દહીં લઈને મથુરા જતી ગોપીઓ પાસે રાજાની આજ્ઞાથી ઘાટ આદિકમાં લેવાતું દાણ માંગ્યું હતું આ રીતની દાણલીલા ભગવાને કરી હતી. (૪૦) આ દિવસે કૃષ્ણને ગોપવેષ ધારણ કરાવે પછી શ્રીકૃષ્ણને શિબિકામાં બેસાડીને ગીતવાજિંત્રોના ધ્વનિઓ સાથે નદીમાં અને નદી ના હોય તો તળાવમાં લઈ જાય એમ જાણવું. (૪૧) નદીમાં રહેલી નૌકામાં નંદનંદન શ્રીકૃષ્ણને બેસાડી તેમનું પૂજન કરી બે ઘડીવાર જળક્રીડા કરાવીને પોતાના સ્થાનમાં લાવે. (૪૨) ભગવાન શ્રીકૃષ્ણે રાધિકા સાથે કરેલી દાણલીલા પૂજક જન વગેરે પણ ગાય અને ગવડાવે. આ એકાદશીમાં નિરાહાર ઉપવાસ કરે. (૪૩) આ દિવસે નૈવેદ્યમાં વિશેષપણે દહીં-ભાત અર્પણ કરે. આ ઉત્સવમાં આટલો વિશેષ છે. બીજો વિધિ એકાદશી સંબંધી જાણવો. (૪૪)

**હવે વામનજીનો ઉત્સવ કહે છે,** ભાદરવા માસમાં સુદી દ્વાદશીને દિવસે શ્રવણ નક્ષત્રમાં બુધવારે મધ્યાહ્ન સમયે કશ્યપમુનિની પત્ની અદિતિથી વામન ભગવાન પ્રાદુર્ભાવ પામ્યા. (૪૫) દ્વાદશી વામનોત્સવમાં મધ્યાહ્ન વ્યાપિની ગ્રહણ કરવી. જો મધ્યાહ્ન સમયે પણ દ્વાદશી શ્રવણ નક્ષત્રથી યુક્ત હોય તો તે દ્વાદશી વામનના જન્મોત્સવમાં અતિ પ્રશંસાને યોગ્ય છે. (૪૬) એકાદશીને દિવસે જો મધ્યાહ્ન સમયે દ્વાદશી તિથિ હોય, તે સમયે જ વિષ્ણુદેવતાક શ્રવણ નક્ષત્ર પણ હોય તો વિષ્ણુ શૃંખલ નામનું પર્વ થાય. અને તે વિષ્ણુની મૂર્તિમાં અતિ પ્રેમથી સંલગ્નતા લક્ષણ મુક્તિ આપનારું થાય. (૪૭) ક્યારેક પણ દ્વાદશીમાં જ્યારે વિષ્ણુદેવતાક શ્રવણ નક્ષત્ર ન હોય, તે નક્ષત્ર જો એકાદશીને દિવસે હોય ત્યારે તો શ્રવણ નક્ષત્ર યુક્ત એકાદશીમાં આ વામનોત્સવ કરવો. અને પારણાં તો બારસને દિવસે મધ્યાહ્નોત્તર કરવાં. (૪૮) જ્યારે દ્વાદશી શ્રવણ નક્ષત્ર યુક્ત હોય ત્યારે તો શક્તિમાન પુરુષ બે ઉપવાસ કરે. (એકાદશી અને દ્વાદશીના) (૪૯) બે ઉપવાસ કરવાની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मध्याह्नव्यापिनी ग्राह्या द्वादशी वामनोत्सवे । तत्रापि चेच्छ्रवणयुक् तर्हि साऽतिप्रशस्यते ॥४६॥ एकादश्यां द्वादशी च वैष्णाव्यमपि तत्र चेत् । तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥४७॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् । एकादश्यां भवेत्तच्चेत्तत्र कार्योऽयमुत्सवः ॥४८॥ यदा तु द्वादशी युक्ता श्रवणेन भवेत्तदा । शक्तस्तु पुरुषः कुर्यादुपवासं दिनद्वये ॥४९॥ अशक्तस्तु फलाहारमेकादश्यां विधाय च । उपोषणं प्रकुर्वीत द्वादश्यां नक्तमेव वा ॥५०॥ त्रयोदश्यां यदि भवेच्छ्रवणं तर्हि पूजकः । द्वादश्यामेव कुर्वीत सर्वथा वामनोत्सवम् ॥५१॥ पीताम्बरं शोभनं यत्तत्कृष्णं परिधापयेत् । अन्यद्वस्त्रविभूषादि यथापूर्वं तु धारयेत् ॥५२॥ चला भगवतो मूर्तिर्वासुदेवस्य यर्हि तु । भवेन्निजान्तिके तर्हि तस्यां वामनमर्चयेत् ॥५३॥ सा चेन्न स्यात्तदा कार्या वामनार्चा हिरण्मयी । बाला द्विबाहुर्दधती छत्रदण्डकमण्डलून् ॥५४॥ मण्डपे सर्वतोभद्रे मध्याह्ने पूजयेच्च ताम् । उपचारैर्यथालब्धैर्भक्त्या पञ्चामृतादिभिः ॥५५॥ तदङ्गदेवताश्चार्चेददितिं कश्यपं तथा । देवान्महेन्द्रप्रमुखान्सस्त्रीकान्सगणानपि ॥५६॥ प्रचुराज्यसितैः कुर्यान्नैवेद्यं चूर्णलड्डुकैः। अवतारचरित्राणि गापयेद्वामनस्य च ॥५७॥ एतावानत्र विज्ञेयो विशेषः पूजने हरेः । सामान्यस्तु विधिस्तुल्यः सर्वेष्वेवोत्सवेष्वपि ॥५८॥ इति भाद्रपदोत्सवा मया कथिता वामिषमासि ये त्वथ । तनयौ ! विहिता महाश्च तान्कथयाम्युद्धवसम्मतानहम् ॥५९॥

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे वार्षिकव्रतोत्सवविधौ भाद्रपदोत्सवविधिनिरूपणनामा षट्पञ्चाशत्तमोऽध्यायः ॥५६॥

---

શક્તિ ના હોય તો એકાદશીને દિવસે ફળાહાર કરીને બારસને દિવસે નિરાહાર ઉપવાસ કરે, અથવા એકાદશીને દિવસે નિરાહાર ઉપવાસ કરીને દ્વાદશીને દિવસે નક્ત ભોજન કરે. અતિ અશક્ત હોય તે તો એકાદશીને દિવસે ફળાહાર કરીને દ્વાદશીને દિવસે નક્ત ભોજન કરે. **'शयने च मदुत्थाने मत्पार्श्वपरिवर्तने ॥ नरो मूलफलाहारी हृदि शल्यं ममार्पयेत् ॥** આવું વિશેષ વચન હોવાથી એકાદશીએ નિરાહાર ઉપવાસ કરીને દ્વાદશીએ ફળાહાર કરે. જ્યારે દ્વાદશીએ પરિવર્તન હોય ત્યારે એમાં યોગવિશેષના વિદ્યમાનપણાને લીધે એકાદશીએ ફળાહાર કરીને દ્વાદશીએ નિરાહાર ઉપવાસ કરવો. (૫૦) જો શ્રવણ નક્ષત્રનો યોગ એકાદશીએ ના હોય તેમ દ્વાદશીએ પણ ના હોય, પરંતુ ત્રયોદશીએ હોય ત્યારે તો દ્વાદશીએ જ **વામનોત્સવ** કરે પણ નક્ષત્રની યોગદૃષ્ટિથી ત્રયોદશીએ ના કરે. આમાં એકાદશીનો નિરાહાર ઉપવાસ કરીને દ્વાદશીએ ઉત્સવને અંતે પારણાં કરવાં. (૫૧) આ ઉત્સવમાં મનોહર પીતાંબર ભગવાન શ્રીકૃષ્ણને પહેરાવે. બીજું વસ્ત્ર-વિભૂષણ વગેરે તો પૂર્વની માફક ધરાવે. (૫૨) જો ભગવાન વાસુદેવની ચલાયમાન મૂર્તિ પોતા પાસે હોય ત્યારે તો તેમાં વામનનું આવાહન કરીને પૂજન કરે. જો ચળામૂર્તિ ના હોય તો સુવર્ણમયી છત્ર-દંડ-કમંડળને બાહુ વડે ધારી રહેલી બાળસ્વરૂપા દ્વિભુજા વામન મૂર્તિને કરાવીને મંડપમાં સર્વતોભદ્ર મંડળમાં સ્થાપન કરીને તેની વિધિ પ્રમાણે પંચામૃતાદિ યથાપ્રાપ્ત ઉપચારો વડે ભક્તિથી મધ્યાહ્ને પૂજા કરે. (૫૩-૫૫) તેના અંગદેવતાઓ અદિતિ, કશ્યપ અને સપત્નીક, ગણે સહિત મહેન્દ્ર આદિક દેવોની પણ પૂજા કરે. (૫૬) ઘણા ઘી-સાકરે સહિત ચૂરમાના લાડુઓનું નૈવેદ્ય કરી નિવેદન કરવું. અને તેમનાં **અવતારચરિત્રો**ને પૂજક પોતે ગાય અને બીજા પાસે ગવડાવે. (૫૭) આ ઉત્સવમાં આટલો ભગવત્પૂજનમાં વિશેષ જાણવો. બીજો તો સર્વ ઉત્સવ પ્રકાર સમાન જ સમજવો. (૫૮)

હે પુત્રો ! આ પ્રકારે મેં ભાદરવા માસના ઉત્સવો તમો બંનેને કહ્યા. હવે આશ્વિન માસમાં જે અમારા મતમાં કર્તવ્યપણે કહેલા અને ઉદ્ધવ જે રામાનંદ સ્વામીએ માનેલા તે મહોત્સવો હું કહું છું. (૫૯)

*ઈતિ શ્રી સત્સંગિજીવનને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે વાર્ષિકવ્રતોત્સવવિધૌ ભાદ્રપદોત્સવવિધિનિરૂપણનામા ષટ્પંચાશત્તમોઽધ્યાયઃ (૫૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः । विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः ॥१॥ तस्मिन्काले दशम्यास्तु व्याप्त्यव्याप्त्योर्दिनद्वये । उत्सवः पूर्वविद्धायां कार्यः श्रीकृष्णसेवकैः ॥२॥ श्रवणर्क्षेऽश्विपूर्णायां काकुत्स्थः प्रस्थितो यतः । उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥३॥ वासांसि भगवन्तं तु नृपवद्धारयेत्तदा । सुगन्धिपुष्पहारांश्च शेखरांश्चारुचन्दनम् ॥४॥ पायसं स्थिरकादीनि विशेषेण निवेदयेत् । सायं यवाङ्कुराञ्छुद्धान्धारयेच्छेखरानिव ॥५॥ महान्तमुत्सवं भक्त्या गीतवादित्रनिःस्वनैः । कारयेद्गापयेदत्र जयपद्यानि च प्रभोः ॥६॥ पूर्णचन्द्रोदययुता याऽश्विनस्य तु पूर्णिमा । तत आरभ्य भगवान् रासलीलां चकार ह ॥७॥ अतस्तस्या विधातव्यः कृष्णभक्तेन सर्वथा । निशाकरप्रकाशायां रजन्यामुत्सवः सुतौ ! ॥८॥ रासोत्सवो हि राकायां नानुमत्यामिति स्थितिः । पूर्णेऽब्जे पूर्णिमा राकाऽनुमतिस्तद्विपर्यये ॥९॥ गोपीभिः सह राधाया मूर्तिमत्रातिशोभयेत् । तन्मूर्त्यसन्निधाने तु विधिमेतं प्रकल्पयेत् ॥१०॥ राधाया गोपिकानां च लक्ष्म्यामावाहनं तदा । विधाय धारयेद्भक्तो महाशृङ्गारमेव ताम् ॥११॥ कौसुम्भं धारयेद्वास उत्तरीयं च चल्लकम् । कञ्चुकीं पीतवर्णां च भाले कुङ्कुमपत्रिकाम् ॥१२॥ पीताम्बरं च श्रीकृष्णमनर्घ्यं धारयेत्पुमान् । नानारत्नविचित्रं च मुकुटं कुण्डले तथा ॥१३॥ करे च मुरलीं हैमीं धारयेद्रत्नभूषिताम् । नैवेद्ये पर्पिका धार्या पिण्डकाश्च विशेषतः ॥१४॥ सुगन्धिपुष्पतैलेन**

## અધ્યાય : ૫૭

### સ્વયં શ્રીહરિએ આસો માસના સર્વે ઉત્સવોની વિધિનું નિરૂપણ કરેલું છે.

**શ્રીનારાયણમુનિ બોલ્યા** : હે પુત્રો ! આસો માસના ઉત્સવોમાં પ્રથમ **વિજયાદશમીના ઉત્સવનો વિધિ** કહું છું. સંધ્યાકાળને લગારેક ઉલ્લંઘન કરીને વર્તતો લગારેક ઉદય પામ્યા છે તારાઓ જેમાં એવો જે કાળ છે તે આ સર્વ કાર્યના અર્થને સિદ્ધ કરનારો કહ્યો છે. તે સમયે બે દિવસે (નવમી-દશમીએ) દશમીનો સંબંધ હોય તો નવમીના વેધવાળી પૂર્વા જ દશમીને ઉત્સવમાં શ્રીકૃષ્ણના સેવકોએ લેવી. જો બંને દિવસે પણ તે વિજય સમયે દશમીની વ્યાપ્તિ ના હોય પરંતુ પૂર્વ દિવસે જ હોય તો પણ પૂર્વવિદ્ધા જ (નવમીના વેધવાળી) ઉત્સવમાં ગ્રહણ કરવી. (૧-૨) જે હેતુ માટે આસો સુદી દશમી તિથિએ શ્રવણ નક્ષત્રમાં પૂર્વે ભગવાન રામચંદ્રજીએ (સમસ્ત તપસ્વીજનોના હિંસક રાવણાદિ રાક્ષસગણના નાશ માટે) કિષ્કિન્ધાપુરી થકી જૈત્રયાત્રા પર થઈને પ્રયાણ કર્યું હતું તે હેતુ માટે સર્વ નરોએ તે દિવસે શ્રવણ નક્ષત્ર યુક્ત તે **વિજય** નામના સમયે પોતપોતાની ગામની સીમાનું ઉલ્લંઘન કરવું. અર્થાત્ બંને તિથિએ શ્રવણ નક્ષત્રનો યોગ ના હોય તો નવમી તિથિએ ઉત્સવ કરવો. (૩) ઉત્સવ સમયે ભગવાનને વસ્ત્રો તો રાજાની માફક ધરાવવાં. સુગંધીમાન પુષ્પોના હારો-પુષ્પોના તોરાઓ અને સુંદર અગુરુ ચંદનના અંગરખા ભગવાનને ધારણ કરાવે. (૪) દૂધપાક-ઠોર વગેરે પકવાનો વિશેષપણે નિવેદન કરે. સાયંકાળે શુદ્ધ યવાંકુરોને તોરાઓની માફક ધારણ કરાવે. (૫) ગીતવાજિંત્રોના ધ્વનિઓએ સહિત ભક્તિપૂર્વક મહોત્સવ કરાવવો. આ ઉત્સવમાં પ્રભુ શ્રીકૃષ્ણનાં કંસ-જરાસંધાદિ વિજયનાં પદ્યો ગવડાવે. (૬)

**હવે રાસોત્સવ કહે છે** : આસો માસની પૂર્ણ-ચંદ્રોદયયુક્ત પૂર્ણિમાથી આરંભીને શ્રીકૃષ્ણે રાધિકાદિ ગોપીઓ સાથે રાસક્રીડા કરી હતી. (૭) હે પુત્રો ! માટે પૂર્ણચંદ્રના પ્રકાશ યુક્ત પૂર્ણિમાની રાત્રિમાં કૃષ્ણના ભક્તે સર્વ પ્રકારે ઉત્સવ કરવો. (૮) આ રાસોત્સવ રાકામાં જ કરવો પણ અનુમતિમાં નહિ. એવી ઉદ્ધવસ્વામિએ મર્યાદા કરેલી છે જે પૂર્ણિમા રાત્રિએ કળાનાથ સોળકળાએ પરિપૂર્ણ હોય તે રાકા નામથી કહી છે. જે પૂર્ણિમાએ તો પ્રતિપદાના યોગને લીધે ઉદય પામતાં જ કળાનાથ ચંદ્ર એકકળાએ હીન થાય છે તે અનુમતિ નામથી કહી છે. (૯) આ ઉત્સવમાં રાધાની મૂર્તિને ગોપીઓ સાથે વસ્ત્ર અને વિભૂષણ વગેરે વડે અતિશય અલંકૃત કરે. શ્રીકૃષ્ણની પ્રતિમાની પાસે રાધિકાની પ્રતિમા ન હોય તો લક્ષ્મીની મૂર્તિમાં જ રાધિકા તથા ગોપીઓનું આવાહન કરીને પછી ભક્તજન તે લક્ષ્મીજીને જ મહાશૃંગાર ધરાવે. (૧૦-૧૧) અંદરનું વસ્ત્ર ચણિયો અને બાહ્ય ઉત્તરીય વસ્ત્ર-ઓઢવાનું વસ્ત્ર કસુંબલ ધરાવે અને કંચુકી(કાંચળી) પીળા વર્ણવાળી ધરાવે. ભાલમાં કુંકુમપત્રિકા ધરાવે. (૧૨) તે પછી પૂજક પુરુષ શ્રીકૃષ્ણને બહુમૂલ્ય પીતાંબર પહેરાવે અને નાના રત્નોથી વિચિત્ર મહામૂલ્ય મુકુટ તથા કુંડળ ધરાવે વળી નાના પ્રકારના રત્નોથી વિચિત્ર સુવર્ણમયી મુરલી કરકમળમાં ધરાવે. બરફી, પેંડા, આદિક નૈવેદ્ય વિશેષપણે નિવેદન કરે. (૧૩-૧૪) પછી સુગંધવાળું જૂઈ, ચંપો, મોગરો વગેરે પુષ્પથી વાસિત તૈલ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्थलपद्मोदकेन च । वासांसि मन्दिरं चापि वासयेद्रुक्मिणीपतेः ॥१५॥ स्थापयित्वा बालकृष्णं चन्द्रशालासदासने । पूजयेत्सेवको रात्रौ गीतवाद्यपुरःसरम् ॥१६॥ नवीनशालिपृथुकान् क्षीरं चैव सशर्करम् । तस्मै निवेदयेद्भक्तो विधिरन्यस्तु पूर्ववत् ॥१७॥ रासलीला भगवता गोपीभिः सह या कृता । वृन्दावने त्रियामासु तत्प्रबन्धांश्च गापयेत् ॥१८॥ इषकृष्णत्रयोदश्यामलङ्कारान् श्रियः पतेः । उन्मार्जयेद्यथायोग्यं पूजोपकरणानि च ॥१९॥ मन्दिरं शोधयेत्सर्वं लेपक्षालनसिञ्चनैः । तिलकं धारयेत्कृष्णं कुङ्कुमेन सुशोभनम् ॥२०॥ स्वर्णसूत्रमयं चीरपटकं शीर्ष्णि धारयेत् । लक्ष्मीं च हरितां शाटीं कौसुम्भीं चारुकञ्चुकीम् ॥२१॥ निवेदयेच्छष्कुलीश्च खाजकानि मृदूनि च । एतावान्हि विशेषोऽत्र विधिरन्यस्तु पूर्ववत् ॥२२॥ इत आरभ्य गेयानि पद्यानि भगवत्प्रियैः । दीपोत्सवाश्रयाण्येव कार्या दीपा दिनत्रयम् ॥२३॥ चतुर्दश्याश्विने कृष्णा भवेद्या तु विधूदये । अभ्यङ्गस्नपने ग्राह्या सैव कृष्णस्य सश्रियः ॥२४॥ सुगन्धिपुष्पतैलेन तत्राभ्यङ्गं विधाय च । उष्णोदकेन स्नपयेत्कृष्णं लक्ष्मीं च पूजकः ॥२५॥ सर्वाण्यपि च वासांसि रक्तानि परिधापयेत् । वटिकाभज्यवटकानपूपांश्च निवेदयेत् ॥२६॥ नीराजनविधिं कुर्याद्विशेषेणात्र पूजकः । विशेष उक्त एतावानिहान्यस्त्वस्ति पूर्ववत् ॥२७॥ अस्मिन्दिने हनुमतः कार्यं च महदर्चनम् । तैलसिन्दूरार्कपुष्पस्त्रग्माषवटकादिभिः ॥२८॥ सङ्गवव्यापिनी ग्राह्या भूता हनुमदर्चने । व्याप्त्यव्याप्त्योस्तूभयत्र पूर्वा ग्राह्या न तूत्तरा ॥२९॥ अमावास्याश्विने दीपदाने चाप्यर्चने श्रियः । प्रदोषव्यापिनी ग्राह्या

---

(અત્તર) અને ગુલાબ જળ વડે ભગવાનના મંદિરને અને વસ્ત્રોને સુવાસિત કરે. (૧૫) પછી રાત્રિએ બાલકૃષ્ણને અગાશીમાં કરેલા અતિસુશોભિત આસનમાં (આથી મંદિરના આંગણામાં સુંદર આસન સ્થાપીને) પૂજક જન ગીતવાદ્યપૂર્વક પૂજન કરે. (૧૬) પૂજા કરનારો ભક્ત નવી ડાંગરના પુંવા અને સાકરે સહિત દૂધ તે બાલકૃષ્ણને નિવેદન કરે. વળી વૃંદાવનમાં રાત્રિએ ભગવાન શ્રીકૃષ્ણે ગોપીઓ સાથે કરેલી જે રાસલીલા તેને પ્રતિપાદન કરનારાં કીર્તનો ગવડાવે. બીજો બધો વિધિ તો પૂર્વની માફક જાણવો. (૧૭-૧૮)

**હવે ભગવાનનાં અલંકારોને ધોવાનો ઉત્સવ કહે છે :** આસો માસના કૃષ્ણપક્ષની ત્રયોદશીએ (ધનતેરશે) લક્ષ્મીપતિ ભગવાનનાં અલંકારો અને પૂજાનાં ઉપકરણ પાત્રોને યથાયોગ્ય સ્વચ્છ કરે. જેવો અલંકાર અને જેવું પાત્ર તેને યોગ્ય જ શુદ્ધિ કરે. (આ ઉત્સવ તો શિષ્ટાચારથી ઉદય વ્યાપિની ત્રયોદશીએ જ કરવો. ક્ષય હોય ત્યારે તો દ્વાદશીએ કરવો કેમ કે તેમાં બીજી ગતિ નથી. (૧૯) ભગવાનના સર્વ મંદિરને યથાયોગ્ય ધોવા વડે, લીંપવા વડે, જળ છાંટવા વડે શુદ્ધ કરે. તે પછી કૃષ્ણને સુશોભિત કુંકુમથી લલાટમાં તિલક કરે. (૨૦) સુવર્ણસૂત્રમય (જરીયાની) ચીરાપટકા નામથી પ્રસિદ્ધ અને ફેંટા નામથી પ્રસિદ્ધ વસ્ત્ર ભગવાનના મસ્તકમાં ધારણ કરે. પીળા અને નીલા વર્ણની સાડી કૌસુંભી રંગની અને લાલ સુંદર કંચુકી (કાપડી) લક્ષ્મીને ધરાવવી. (૨૧) જલેબી અને ખાજાં ભગવાનને નૈવેદ્ય માટે સમર્પણ કરવાં. આ ઉત્સવમાં આટલો વિશેષ છે; બીજો વિધિ તો પૂર્વની માફક છે. (૨૨)

**આસો વદી તેરસ**થી આરંભીને ભગવાનના ભક્તોએ દીપોત્સવના આશ્રયવાળાં પદો ગાવાં ધનતેરસથી દિવાળી સુધી દીવાઓની પંક્તિઓ કરવી. અર્થાત્ દીવાઓ કરવા. (૨૩) આસો માસમાં વદી **ચૌદશ**ને દિવસે ચંદ્રમાના ઉદય સમયે અવશ્ય કર્તવ્ય લક્ષ્મીએ સહિત ભગવાનનો **અભ્યંગોત્સવ** (સ્નાનોત્સવ) કરવો. તેમાં જે ચતુર્દશી ચંદ્રોદય વ્યાપિની (ત્રયોદશીના અંતિમ પ્રહરમાં ચંદ્રોદય સમયે વ્યાપતી) હોય એ જ લેવી પણ કેવળ આશ્વિન વદી ચૌદશ ના લેવી. (૨૪) આ ચતુર્દશીએ પૂજક જન સુગંધી પુષ્પવાસિત તેલ, અત્તર વડે લક્ષ્મીજી અને શ્રીકૃષ્ણને તૈલમર્દનપૂર્વક સુગંધી સુખ સ્પર્શ ઊના જળ વડે સ્નાન કરાવે. (૨૫) બધાં વસ્ત્રો લાલ પહેરાવે. ફૂલવડી, ભજિયાં, વડાં અને માલપુવા વિશેષપણે નિવેદન કરે. (૨૬) આ ઉત્સવમાં પૂજન કરનારો માણસ આરતી કરવાના પાત્રમાં બહુ વાટો મૂકીને વિશેષપણે આરતી કરે. આ ઉત્સવમાં આટલો વિશેષ કહ્યો છે. બીજો બધો વિધિ તો પૂર્વની માફક જાણવો. (૨૭) વળી આ દિવસે હનુમાનજીનું તૈલ, સિંદુર આકડાનાં પુષ્પોના હારો અને અડદનાં વડાં વગેરેથી મહાપૂજન કરે. કારણકે આ તિથિએ એમનો જન્મ કહ્યો છે. (૨૮) આ હનુમાનજીના પૂજનમાં ચતુર્દશી સંગવ સમય વ્યાપિની લેવી. બંને દિવસે સંગવવ્યાપિની તે જો હોય તો ત્રયોદશીના વેધવાળી પૂર્વની જ લેવી. પણ ઉત્તરની નહિ. કેમ કે અલ્પ સમય વ્યાપનારી છે. (૨૯)

पूर्वविद्धा च सा शुभा ॥३०॥ भगवन्तं दिने तस्मिन्भूषणानि महान्ति च । वासांसि धारयेद्भक्तः सूक्ष्माणि रुचिराणि च ॥३१॥ प्रदोषे पूजनं कुर्याद्रुक्मिण्याख्यश्रियः पुमान् । यदि श्रीप्रतिमा न स्याद्राधायां तां तदार्चकः ॥३२॥ ध्यात्वार्चयेद्यथाशास्त्रमुपचारैः सुशोभनैः । राधार्चापि न चेत्तर्हि श्रियं हैमीं प्रकल्पयेत् ॥३३॥ लक्ष्मीश्चतुर्भुजा कार्या पद्मसिंहासनस्थिता । दक्षिणोर्ध्वकरे कार्यं बृहन्नालं तु पङ्कजम् ॥३४॥ वाम ऊर्ध्वे भुजे तस्याः कार्योऽमृतभृतो घटः । अन्ययोर्भुजयोः कार्यौ बिल्वशङ्खौ सुशोभनौ ॥३५॥ तत्पार्श्वयोर्गजौ कार्यौ धृतकुम्भकरावुभौ । तस्याश्च मस्तके पद्मं कर्तव्यं सुमनोहरम् ॥३६॥ मण्डपे निर्मिते रम्ये कदलीस्तम्भमण्डिते । पूजयेत्सर्वतोभद्रे लक्ष्मीसूक्तेन तां ततः ॥३७॥ परितः कारयेच्छक्त्या दीपानामावलीस्तथा । अलङ्कारांश्च वासांसि महान्त्येवार्पयेच्छ्रियै ॥३८॥ समीपे चेद्धरेर्लक्ष्मीस्तदा रक्ताम्बराणि ताम् । पृथक् चेच्छ्वेतवासांसि नूत्नानि परिधापयेत् ॥३९॥ भालेऽस्याश्चन्द्रकं कुर्यात्कुङ्कुमेनातिशोभनम् । तत्र दध्यादक्षतांश्च शुभ्रान्सूक्ष्मानखण्डितान् ॥४०॥ सुगन्धिभिः पुष्पहारैः पौष्पैश्च करभूषणैः। कमलैः पूजयेत्तां च धूपेन घृतदीपकैः ॥४१॥ नैवेद्ये शष्कुली देया शतच्छिद्राणि फेणिकाः । घृतपूरांश्च रेवालीः पीतसाराणि पर्पिकाः ॥४२॥ पिण्डकाञ्छर्करैलाश्च शार्करांश्चणकांस्तथा । ओदनादीनि भोज्यानि भक्त्या तस्यै निवेदयेत् ॥४३॥ ताम्बूलवीटिका दत्त्वा कुर्यान्नीराजनं महत् । लक्ष्मीपूजनपद्यानि पूजाकाले च गापयेत् ॥४४॥ इत्युत्सवा आश्विनमासि विष्णोरुक्ता मया वामथ कार्तिकेऽपि । य उत्सवा मासि भवन्ति तांश्च ब्रवीमि पुत्रौ ! शृणुतं विधेयान् ॥४५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे वार्षिकव्रतोत्सवविधौ आश्विनोत्सवविधौ आश्विनोत्सवनिरूपणनामा सप्तपञ्चाशत्तमोऽध्यायः

**હવે દીપોત્સવનો વિધિ અને લક્ષ્મીપૂજનોત્સવનો વિધિ કહે છે.** આસો વદી અમાવાસ્યાને દિવસે દીપોત્સવ અને લક્ષ્મીપૂજનનો મહોત્સવ કરવો. તેમાં આસો માસની અમાવાસ્યા દીવાના દાનમાં અને લક્ષ્મીના પૂજનમાં પણ પ્રદોષ વ્યાપિની ગ્રહણ કરવી. અમાવાસ્યા ચતુર્દશી યુક્ત પૂર્વવિદ્ધા શુભા છે. (૩૦) અમાવાસ્યાને દિવસે ભક્ત ભગવાનને મહામૂલ્યવાળાં ભૂષણો અને સૂક્ષ્મ સુંદર વસ્ત્રો ધારણ કરાવે. (૩૧) પૂજન કરનારો ભક્ત પ્રદોષ સમયે રૂકમણીરૂપ લક્ષ્મીનું પૂજન કરે. જ્યારે લક્ષ્મીની મૂર્તિ ના હોય ત્યારે લક્ષ્મીજીને રાધામાં ધ્યાન કરી તેમાં આવાહન કરી સુંદર ઉપચારોથી શાસ્ત્ર પ્રમાણે પૂજન કરે. જો રાધિકાની પ્રતિમા ના હોય તો સુવર્ણની કરાવેલી લક્ષ્મીને કલ્પે. (૩૨-૩૩) લક્ષ્મી ચાર ભુજાવાળા-પદ્મના સિંહાસનમાં રહેલાં કરવાં. (ચાર ભુજાનું ગ્રહણ છે તે તો અલગ લક્ષ્મીજીના પૂજન-વિષયક છે. ભગવાનની સમીપે તો બે ભુજાવાળાં કરવાં એમ જાણવું.) જમણાં ઊંચા હાથમાં મોટા નાળવાળું લીલાપદ્મ કરવું. (૩૪) લક્ષ્મીના ઊંચા ડાબા હાથમાં અમૃત ભરેલો કળશ કરવો. નીચેના જમણા હાથમાં શ્રીફળ અને નીચેના ડાબા હાથમાં શંખ કરવો. (૩૫) લક્ષ્મીના બંને પડખાના ભાગોમાં ધારણ કર્યા છે કળશો જેમણે એવા હાથવાળા બે હાથીઓ કરવા. લક્ષ્મીના મસ્તકમાં અતિ મનોહર કમળ કરવું. (૩૬) પછી કેળના સ્તંભોથી શોભાયમાન અતિ ચતુરાઈથી કરેલા મંડપમાં સર્વતોભદ્રમંડળમાં લક્ષ્મીજીને લક્ષ્મીસૂક્તથી **'હિરણ્યવર્ણાં હરિણીં'** ઈત્યાદિ પંદર ઋચાત્મક લક્ષ્મીસૂકત વડે પૂજા કરે. (૩૭) અમૂલ્ય વસ્ત્રો તથા મહામૂલ્ય અલંકારો લક્ષ્મીજીને અર્પણ કરે મંડપની અંદર અને બહાર ચોતરફ દીવાઓની પંક્તિઓ યથાશક્તિ કરાવે. (૩૮) જો લક્ષ્મીની મૂર્તિ હરિ સમીપે હોય તો લક્ષ્મીજીને લાલ વર્ણના વસ્ત્રો પહેરાવે. જો ભગવાન થકી પૃથક્ કરાવી હોય તો નવીન શ્વેત વસ્ત્રો પહેરાવે. (૩૯) પછી લક્ષ્મીજીના લલાટમાં સુશોભિત કુંકુમનો ચાંલ્લો કરીને તેની મધ્યમાં શુભ સૂક્ષ્મ અખંડિત અક્ષતોને આરોપીને સુગંધી પુષ્પહારો, સુગંધી પુષ્પનિર્મિત કેયૂરકંકણ, વગેરે હાથનાં આભૂષણો, કમળો, ધૂપ અને ઘીના દીવાઓ વડે તે લક્ષ્મીજીની પૂજા કરે. (૪૦-૪૧) નૈવેદ્યમાં જલેબી, ખાજા, સુતરફેણી, ઘેબર, રેવડી, પતાસાં, બરફી, પેંડા, સાકરનો રસ પાએલા એલચીદાણા, સાકરિયા ચણા અને ભાત આદિક ભોજનો ભક્તિથી લક્ષ્મીજીને નિવેદન કરે. (૪૨-૪૩) પછી તાંબૂળબીડી આપીને મહાનીરાજન કરે અને પૂજા સમયે લક્ષ્મીજીની સ્તુતિવાળા પદ્યોને ગવડાવે. (૪૪)

હે પુત્રૌ ! આસો માસમાં કરવાના ભગવાનના ઉત્સવોનો વિધિ આ પ્રકારે મેં તમને કહ્યો. હવે કારતક માસમાં કરવાના મહોત્સવોનો વિધિ નિરૂપણ કરું છું. તેને એકાગ્રમન રાખીને સાંભળો. (૪૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે ચતુર્થપ્રકરણે વાર્ષિકવ્રતોત્સવવિધૌ આશ્વિનોત્સવનિરૂપણનામા સપ્તપંચાશત્તમોऽધ્યાયઃ (૫૭)*

॥५७॥

श्रीनारायणमुनिरुवाच – **सायाह्नव्यापिनी ग्राह्या प्रतिपत्कार्तिके सिता । पूर्वविद्धैव सुखदा प्रोक्ता गोवर्धनोत्सवे ॥१॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः । सोमो राजा पशून् हन्ति सुरभिपूजकांस्तथा ॥२॥ संलग्नमेव कर्तव्यं दीपावल्या दिनत्रयम् । चतुर्दशी ह्यमावास्या प्रतिपच्चेति नान्यथा ॥३॥ पीताम्बरं तदा कृष्णं धारयेद्रक्तपल्लवम् । मयूरपिच्छमुकुटं कर्णिकारावतंसकौ ॥४॥ पञ्चवर्णैश्च कुसुमैर्मालां विरचितां शुभाम् । वैजयन्तीं शेखरांश्च धारयेन्मुरलीं तथा ॥५॥ भूषणानि विचित्राणि तुलसीमालिकां तथा । प्रावारं द्विपटं तिर्यग्धारयेत् स्कन्धलम्बितम् ॥६॥ अन्नकूटं विरचयेत्स्वस्य वित्तानुसारतः। नानाविधानि शाकानि भज्यानि विविधानि च ॥७॥ घृतपक्वविशेषांश्च कृतान्नानाविधानपि । ओदनादीनि भोज्यानि श्रीकृष्णाय निवेदयेत् ॥८॥ ताम्बूलवीटिका दत्त्वा महानीराजनं हरेः । कृत्वा विप्रान्वैष्णवांश्च साधून्प्रीत्यैव भोजयेत् ॥९॥ अस्मिन्नेव दिने प्रातः पूजयेद्गाश्च वत्सकान् । वृषान्वत्सतरीश्चापि हरिद्राकुङ्कुमादिभिः ॥१०॥ पौष्पैर्हारैः शृङ्गरङ्गैर्नूतनैश्च तृणादिभिः । सम्पूज्य खेलयेत्तांश्च मन्दिरस्याग्रतो हरेः ॥११॥ गोवर्धनं गोमयेन कृत्वाऽर्चेच्च ततः परम् । अन्नकूटं तु मध्याह्ने विदधीत हरेः पुरः ॥१२॥ गोवर्धनोत्सवकथापद्यानि रुचिराणि च । गापयेत्कीर्तयेदत्र वाद्यघोषं च कारयेत् ॥१३॥ भोजनान्ते वैष्णवानां भुञ्जीत स च सेवकः । एतावान् हि विशेषोऽत्र विधिरन्यस्तु नैत्यकः ॥१४॥ शुक्लाष्टम्यामूर्जमासे**

## અધ્યાય : ૫૮

### શ્રીહરિએ કારતક માસના ઉત્સવોનો વિધિ નિરૂપણ કર્યો છે.

